उच्चतरमाध्यमिकपाठ्यक्रम

संस्कृतम्

309

3

राष्ट्रीय मुक्त विद्यालयी िाक्षा संस्थान

ए-24-25, ैक्षणिक क्षेत्र, सेक्टर-62, नोएडा-201301 (उत्तर प्रदे ा)

NIOS SENIOR SECONDARY - SANSKRIT (309)

Complete Textbook (25 Lessons)

Table of Contents

1. Lesson 1 4
2. Lesson 2 24
3. Lesson 3 41
4. Lesson 4 60
5. Lesson 5 84
6. Lesson 6 102
7. Lesson 7 119
8. Lesson 8 137
9. Lesson 9 157
10. Lesson 10 179
11. Lesson 11 200
12. Lesson 12 216
13. Lesson 13 230
14. Lesson 14 248
15. Lesson 15 270
16. Lesson 16 294
17. Lesson 17 324
18. Lesson 18 344
19. Lesson 19 365
20. Lesson 20 384
21. Lesson 21 404
22. Lesson 22 422
23. Lesson 23 444
24. Lesson 24 468
25. Lesson 25 483

SANSKRIT (309) - SYLLABUS BIFURCATION

Chapter split as per NIOS Bifurcation of Syllabus

TMA (Tutor Marked Assignment) (9 lessons)

1. Lesson 1 4
2. Lesson 2 24
3. Lesson 3 41
4. Lesson 4 60
5. Lesson 5 84
6. Lesson 6 102
7. Lesson 7 119
8. Lesson 19 365
9. Lesson 20 384

Public Examination (1 lessons)

1. Lesson 1 4

309sk01

1

जीवन-संदेशः

मानवः प्राणिषु श्रेष्ठः। मानवेषु अपि ते एव धन्याः ये सदाचारेण जीवनं यापयन्ति। सत् आचारः अथवा सताम् आचारः एव सदाचारः भवति। सदाचरणस्य पालनाय विशेषः व्यवहारः अपेक्षितः भवति। सदाचारस्य नियमाः एव 'नीतिः' इति नाम्ना ज्ञायन्ते। नीतिपूर्वकम् आचरणेन अस्माकं जीवनं सुखमयं भवति। मानवस्य जीवने गुणानां महत्त्वम् अस्ति। अस्माकं भोजनं शुद्धं भवेत्। शुद्धभोजनेन मनः शुद्धं भवति, क्रोधस्य भावना शाम्यति। वयम् सुमधुरां वाणीं वदेम, अतिथेः आदरं कुर्याम, शास्त्राणाम् अध्ययनं कुर्याम, सन्तोषं धारयेम, धनं प्रति लुब्धाः भूत्वा पापं न आचरेम इत्येव अस्माकं वेदादिग्रन्थानाम् उपदेशः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- पाठगतपद्यानां सस्वरं पदच्छेदपूर्वकं च पाठं कर्तुं समर्थः भविष्यति;
- नीतिपद्यानाम् अन्वयं भावार्थं च लेखितुं शक्तः भविष्यति;
- पाठे प्रयुक्तानां सूक्तीनां लेखनं कर्तुं क्षमः भविष्यति;
- पाठे प्रदत्तभावानां समानान्तरपद्यानां चयनं कर्तुं शक्ष्यति;
- सन्धिसंयोगयोः मध्ये विभेदं कर्तुं समर्थः भविष्यति;
- पाठे विशेषणानि अवचित्य विशेष्यपदैः सह योजनं कर्तुं समर्थः भविष्यति;
- अकारान्त–पुल्लिङ्ग–नपुंसकलिङ्गशब्दानां रूपेषु भेदं कर्तुं समर्थः भविष्यति;
- पाठान्तर्गतशब्दानां पर्यायपदानि विलोमपदानि च लेखने समर्थः भविष्यति;
- दीर्घसन्धिपदानां चयनं करिष्यति।

क्रियाकलापः

अधः कानिचित् वाक्यानि लिखितानि सन्ति। तानि प्रदत्तचित्राणाम् अधः लिखत।

(क) अहं समयेन विद्यालयं गच्छामि।

(ख) रात्रौ स्वाध्यायं करोमि।

(ग) प्रातः उत्थाय पितरौ प्रणमामि।

(घ) सायंकाले अशिक्षितान् पाठयामि।

(ङ) अहं प्रातः पंचवादने उत्तिष्ठामि।

1.1 _____

1.2 _____

1.3 _____

1.4 _____

1.5 _____



टिप्पणी

1.1 मूल पाठः

जीवन–सन्देशः

प्रथमं तावद्, इमान् श्लोकान् ध्यानेन पठामः।

पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति।
अपूजितं तु तद्भुक्तमुभयं नाशयेदिदम्।।1।।

अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत्।
जयेत् कदर्यं दानेन जयेत् सत्येन चानृतम्।।2।।

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन।।3।।

सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम्।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम्।।4।।

अधमा धनमिच्छन्ति धनमानं च मध्यमाः।
उत्तमाः मानमिच्छन्ति मानो हि महतां धनम्।।5।।

यः स्वाध्यायमधीतेऽब्दं विधिना नियतः शुचिः।
तस्य नित्यं क्षरत्येतत् पयो दधि घृतं मधु।।6।।

यस्य वाङ्मनसी शुद्धे सम्यग्गुप्ते च सर्वदा।
स वै सर्वमवाप्नोति वेदान्तोपगतं फलम्।।7।।

शब्दार्थाः

पूजितं = सम्मानित, आदरपूर्वक ग्रहण किया गया, अशनं = भोजन नित्यं = सदा, बलम् = ताकत ऊर्जम् = शक्ति को, ऊर्जा को कदर्यं = कंजूस को, अनृतम् = झूठ, तृणानि = तिनके (तिनकों (कुशा) आदि से बना आसन), भूमिः = स्थान, आश्रय, उदकं = जल, सूनृता वाक् = मीठी और सच्ची वाणी, सताम् = सज्जनों के, न उच्छिद्यन्ते = समाप्त नहीं होते, सन्तोषामृततृप्तानां = सन्तोष रूपी अमृत से तृप्त हुए लोगों का, शान्तचेतसाम् = शान्त चित्त वालों का, धनलुब्धानां = धन लोभियों का, इतः च इतः च धावताम् = इधर उधर दौड़ने वालों का, महतां = महान् लोगों का, स्वाध्यायम् = सद्ग्रन्थों का अध्ययन, शुचिः = पवित्र होकर, अधीते = पढ़ता है, अब्दं = वर्ष भर, नित्यं = सदा, क्षरति = देता है, पयः = दूध, दधि = दही, घृत = घी, मधु = शहद, वाङ्मनसी = वाणी और मन, सम्यक् = अच्छी तरह से, गुप्ते = रक्षित, आप्नोति = प्राप्त करता है, वेदान्तोपगतं फलम् = वेदान्त में वर्णित फल, सर्वदा = सदा

1.2 बोधप्रश्नाः

1. भवता मूलपाठः पठितः। सम्प्रति उदाहरणम् आधृत्य 'क' स्तम्भस्य वाक्यांशान् 'ख' स्तम्भस्य वाक्यांशैः सह रेखया योजयत।

	स्तम्भः 'क'	स्तम्भः 'ख'
उदा0	(क) तृणानि भूमिरुदकं	(1) बलमूर्जं च यच्छति।
	(ख) पूजितं ह्यशनं नित्यम्	(2) वाक् चतुर्थी च सूनृता।
	(ग) एतान्यपि सतां गेहे	(3) विधिना नियतः शुचिः।

(घ) अपूजितं तु तद् भुक्तम् (4) नोच्छिद्यन्ते कदाचन।

(ङ) यः स्वाध्यायमधीतेऽब्दं (5) उभयं नाशयेदिदम्।

2. अधः प्रदत्तेषु प्रत्येकं पदद्वयेन युक्तं उपयुक्तं पदं पाठात् चित्वा तत्समक्षं लिखत।

(क) भूमिः + उदकम् = ... (ख) न + उच्छिद्यन्ते = ...

(ग) हि + अशनम् = ... (घ) च + अनृतम् = ...

(ङ.) मानः + हि = ... (च) पयः + दधि = ...

3. रिक्तस्थानानि पूरयत–

(क) एतान्यपि ..... गेहे नोच्छिद्यन्ते कदाचन।

(ख) अधमाः धनमिच्छन्ति ..... च मध्यमाः।

(ग) यस्य वाङ्मनसी ..... सम्यग्गुप्ते च सर्वदा।

(घ) पूजितं ह्यशनं नित्यं ..... ऊर्जं च यच्छति।

1.3 अधुना अवगच्छामः

प्रथमः अंशः

पूजितं ह्यशनं नित्यं
बलमूर्जं च यच्छति।
अपूजितं तु तद्भुक्तमुभयं
नाशयेदिदम्।।1।।

श्लोकः– 1

प्रथमं श्लोकं पुनः पठामः। अयं श्लोकः 'मनुस्मृतिः' इति ग्रन्थात् उद्धृतः।

पदच्छेदः पूजितम् हि अशनम् नित्यम् बलम् ऊर्जम् च यच्छति। अपूजितम् तु तद् भुक्तम् उभयम् नाशयेत् इदम्।

अन्वयः पूजितम् हि अशनम् नित्यम् बलम् ऊर्जम् च यच्छति।
तत् अपूजितम् भुक्तम् तु इदम् उभयम् नाशयेत्।

व्याख्या

कीदृशं भोजनं हितं भवेत्? अस्मिन् पद्ये पठामः।

पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति।

नित्यं पूजितम् अशनं किं यच्छति? बलम् ऊर्जं च यच्छति।

कथम् यच्छति? यदि वयम् आदरेण, प्रसन्नमनसा रूक्षं शुष्कम् अपि भोजनम् भक्षयेम तद् भोजनम् अस्मभ्यं शक्तिं यच्छति किन्तु यदि अनादरेण स्वादिष्टं भोजनम् अपि भक्षयेम तद् भोजनं वृथा एव जायते।



अपूजितम् अशनं किं कुर्यात्? अपूजितम् अशनं बलम् ऊर्जं च नाशयेत्। अनेन भोजनेन शरीरे विकाराः जायन्ते।

भोजनम्

आहारशुद्धौ सत्त्वसंशुद्धिः

(आहार की शुद्धि होने पर ही मन पवित्र होता है)

भावार्थः

सम्मानेन भक्षितं रुक्षं रसहीनम् अपि अन्नं स्फूर्तिं शक्तिं च यच्छति किन्तु अनादरेण खादितं भोजनं शरीरस्य बलं वीर्यं च नाशयति।

व्याकरणबिन्दवः

अत्र भवन्तः संयोगः कुत्र? सन्धिः च कुत्र? इति ज्ञायताम्

ह्यशनम्	=	हि	+ अशनम् (सन्धिः)
तद्भुक्तमुभयम्	=	तत्	+ भुक्तम् (सन्धिः)
		भुक्तम्	+ उभयम् (संयोगः)
बलमूर्जम्	=	बलम्	+ ऊर्जम् (संयोगः)
नाशयेदिदम्	=	नाशयेत्	+ इदम् (सन्धिः)

(संयोगे वर्णाः अन्यवर्णैः सह संयुज्यन्ते तत्र कश्चन विकारः न भवति असौ वर्णसंयोगः इति कथ्यते। किन्तु यदि पूर्वपदस्य अन्तिमवर्णः उत्तरपदस्य पूर्ववर्णेन सह मिलति तत्र किंचित् परिवर्तनं च भवति, तदा तत् 'सन्धिः' इति कथ्यते।)

शाब्दबोधः

विपरीतार्थकः शब्दः

पूजितम्	अपूजितम्
अशनम्	अनशनम्
भुक्तम्	अभुक्तम्
यच्छति	नाशयति

श्लोकः– 2

इदानीम् एव मनुना विरचितम् **द्वितीयं श्लोकम्** अवगच्छामः–

अक्रोधेन जयेत् क्रोधमसाधुं
साधुना जयेत्।
जयेत् कदर्यं दानेन
जयेत् सत्येन चानृतम्।।2।।

पदच्छेदः अक्रोधेन जयेत् क्रोधम् असाधुम् साधुना जयेत्। जयेत् कदर्यम् दानेन, जयेत् सत्येन च अनृतम्।

अन्वयः क्रोधम् अक्रोधेन जयेत्, असाधुम् साधुना जयेत्, कदर्यम् दानेन जयेत्, अनृतम् च सत्येन जयेत्।

टिप्पणी

व्याख्या

क्रोधम् अक्रोधेन जयेत्

क्रोधं कथं जयेत्? अक्रोधेन क्रोधं जयेत्। सौम्येन, सद्व्यवहारेण क्रोधं जयेत्। यदि कश्चित् भवते क्रोधं दर्शयति तस्मै क्रोधः न कर्तव्यः। शान्तव्यवहारेण तस्य क्रोधः शमयितव्यः।

कदर्यं दानेन जयेत्

कदर्यं कथं जयेत्? कदर्यं अर्थात् कृपणं दानेन जयेत्। कृपणः जनः संसारे केवलं संग्रहं करोति, न तु किंचित् कस्मैचित् ददाति। अयं तु जीवने नकारात्मकः भावः। अयम् भावः अपि शत्रुः मानवानाम्। कृपणताभावं दानं दत्त्वा दूरीकुर्यात्।

अनृतं सत्येन जयेत् च

अनृतं केन जयेत्? अनृतं सत्येन जयेत्। सत्यम् एव नित्यम्, सत्यस्य एव सदा जयः भवति। अतएव कथ्यते 'सत्यमेव जयते नानृतम्'।

सत्यस्य विषये महाभारते कथितम्– 'नास्ति सत्यात् परं दानं, नास्ति सत्यात् परं तपः।' तैत्तिरीय–उपनिषदि अपि कथितम्– 'सत्यान्न प्रमदितव्यम्।'

भावार्थः

कोपं शान्तभावनया, दुष्टं सद्भावनया, कृपणं दानेन, असत्यं च सत्येन जयेत् इत्येव नीतिः।

व्याकरणबिन्दवः

भवन्तः अत्र केषांचन पदानां परिचयम् बोधन्तु।

अक्रोधेन = न क्रोधः अक्रोधः, तेन अक्रोधेन, नञ् तत्पुरुषसमासः

साधुना = साधु शब्दः तृतीयाविभक्तिः, एकवचनम्

जयेत् = जि + विधिलिङ् + प्रथमपुरुषः, एकवचनम्

चानृतम् = च + अनृतम्, अ + आ = आ (दीर्घसन्धिः)

श्लोकः– 3

तृणानि भूमिरुदकं
वाक् चतुर्थी च सूनृता।
एतान्यपि सतां गेहे
नोच्छिद्यन्ते कदाचन।।3।।

इदानीं **तृतीयं श्लोकं** पठामः जानीमः च सतां पार्श्वे किं भवति?

पदच्छेदः तृणानि भूमिः उदकम् वाक् चतुर्थी च सूनृता। एतानि अपि सताम् गेहे न उच्छिद्यन्ते।

अन्वयः तृणानि भूमिः उदकम् चतुर्थी च सनृता वाक् एतानि (चत्वारि) अपि सताम् गेहे कदाचन न उच्छिद्यन्ते।



तृणानि भूमिः उदकं नोच्छिद्यन्ते कदाचन

सतां गेहे कति वस्तूनि न उच्छिद्यन्ते? (समाप्तानि भवन्ति) चत्वारि वस्तूनि।

कानि–कानि तानि? तृणानि, भूमिः, उदकम्, मधुरम् वाक् च।

कानि तृणानि? तृणानि अर्थात् कुशनिर्मितम् आसनम्। सज्जनाः आदरेण कुश–आसनं दत्त्वा अतिथीनां सम्मानं कुर्वन्ति।

पुनः किम्? भूमिः। अतिथीनां कृते सज्जनानां गृहे कदापि स्थानस्य आश्रयस्य वा अभावः न भवति।

पुनः किम्? उदकम्। जलमेव जीवनम्। सज्जनाः जलं दत्त्वा अभ्यागतानां पिपासां शमयित्वा तेषाम् आदरं कुर्वन्ति।

चतुर्थी किम्? सूनृता वाक्। प्रियं सत्यं च वचनम्। सज्जनाः अतिथीनाम् मानं प्रेम्णा उदित्वा (प्रेमवचसा) कुर्वन्ति।

भावार्थः

सतां गेहेषु धनं भवेत् न वा भवेत् किन्तु तेषां गेहेषु आसनस्य, स्थानस्य, जलस्य, मधुरवाचः च कदापि अभावः न भवति। भारतीय–संस्कृतौ 'अतिथिदेवो भव' इति मन्यते। अतः सज्जनैः अतिथिः देवतावत् पूजनीयः भवति।

व्याकरणबिन्दवः

अत्र पदानां परिचयः दत्तः वर्तते, वयम् बोधामः।

तृणानि	= तृण शब्दः नपुं0,	प्रथमा वि0, बहुवचनम्
वाक्	= वाक् शब्दः स्त्रीलिंग	प्रथमा वि0, एकवचनम
सताम्	= सत् शब्दः	षष्ठी वि0, बहुवचनम्
गेहेषु	= गेह शब्दः	सप्तमी वि0, बहुवचनम्
एतानि	= एतत् शब्दः नपुं0	प्रथमा वि0, बहुवचनम्

नोच्छिद्यन्ते = न + उच्छिद्यन्ते (अ + उ = ओ) (गुणसन्धिः)

कदाचन = अव्ययपदम्

सन्धिः

वर्णानां परस्परमेलनेन ये विकाराः भवन्ति ते सन्धिः इति उच्यन्ते। सन्धिकरणाय प्रथमशब्दस्य अन्तिमः वर्णः द्वितीयशब्दस्य प्रथमेन वर्णेन सह मेल्यते। अतः द्वयोः वर्णयोः योगः एव सन्धिः।

सन्धीनां त्रयः भेदाः–

1. स्वरसन्धिः च + अनृतम् = चानृतम्
2. व्यंजनसन्धिः प्रसीदेत् + च = प्रसीदेच्च
3. विसर्गसन्धिः भूमिः + उदकम् = भूमिरुदकम्

स्वरसन्धेः भेदाः

1. दीर्घसन्धिः 2. गुणसन्धिः 3. वृद्धिसन्धिः 4. यण्सन्धिः 5. अयादिसन्धिः

अत्र वयं दीर्घसन्धिविषये पठामः

(i) दीर्घसन्धिः – अकः सवर्णे दीर्घः

अ/आ + अ / आ = आ

च + अनृतम् = चानृतम्

विवेक + आनन्दः = विवेकानन्द :

(ii) इ/ई + ई / ई = ई

रजनी + ईशः = रजनीशः।

हरि + इच्छा = हरीच्छा

(iii) उ/ ऊ + उ / ऊ = ऊ

विष्णु + उदयः = विष्णूदय :

मधु + उर्मिः = मधूर्मिः

(iv) ऋ/ॠ + ऋ / ॠ = ॠ$_{ृ}$

होतृ + ऋकार = होतृकारः

पित$_{ृ}$ + ऋणम् = पितृणम्

शाब्दबोधः

विपरीतार्थकशब्दाः

सुनृता	अनृता
सताम्	दुर्जनानाम्

पर्यायवाचिनः शब्दाः

भूमिः = पृथ्वी

वाक् = वाणी

गेहे = गृहे

सताम् = सज्जनानाम्

सारः

आदरभाव से खाया गया भोजन शक्तिवर्धक होता है। क्रोध को शान्तभाव से, दुष्ट को सद्भाव से, कंजूस को दान से तथा असत्य को सत्य से जीतना चाहिए। सज्जनों के



घरों में अतिथि–सत्कार के लिए कुशा का आसन, आश्रय देने के लिए भूमि, पिलाने के लिए जल तथा सम्मान देने के लिए प्रिय और सच्ची वाणी की कमी नहीं होती।

पाठगतप्रश्नाः 1.1

1. एकपदेन उत्तरत

(क) क्रोधं केन जयेत्? .....

(ख) असाधुं केन जयेत्? .....

(ग) पूजितम् अशनं किम् यच्छति? .....

(घ) कीदृशम् अशनं बलम् ऊर्जं च नाशयति? .....

2. पाठात् चित्वा अधोलिखितानां शब्दानां पर्यायवाचिपदानि दीयन्ताम्–

(क) सज्जनानाम् ..... (घ) भोजनम् .....

(ख) समाप्यन्ते ..... (ङ) कृपणम् .....

(ग) वाणी ..... (च) कोपम् .....

3. रिक्तस्थानेषु क्रियापदानि योजयत–

(क) अशनं नित्यं ..... ।

(ख) पूजितम् अशनं बलमूर्जं च ..... ।

(ग) अपूजितम् अशनम् उभयं ..... ।

(घ) अक्रोधेन क्रोधं ..... ।

(ङ) एतानि सतां गेहे न ..... ।

द्वितीयः अंशः

श्लोकः– 4

अधुनां **चतुर्थं श्लोकं** पठामः।

सन्तोषामृततृप्तानां यत्
सुखं शान्तचेतसाम्।
कुतस्तद्धनलुब्धानामितश्चेतश्च
धावताम्।।4।।

समाजे वयं पश्यामः यत् जनाः सदैव धनं प्राप्तुम् इच्छन्ति। किन्तु वास्तविकं सुखं शान्तिं च धनेन न प्राप्यते। सन्तोषम् एव परमं सुखम् भवति।

पदच्छेदः सन्तोषामृततृप्तानाम् यत् सुखम् शान्तचेतसाम् कुतः पदधनलुब्धानाम् इतः च इतः च धावताम्।

अन्वयः सन्तोषामृततृप्तानाम् शान्तचेतसाम् यत् सुखम् (भवति)
तत् (सुखं) इतः च इतः च धावताम् धनसुब्धानां कुतः?

टिप्पणी

व्याख्या–

सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम्।

सुखं कः प्राप्नोति? सः एव सुखं प्राप्नोति यस्य चित्तं शान्तम् भवति, यः च सन्तोषरूपिणा अमृतेन तृप्तः भवति। इच्छानां कदापि अन्तः न भवति। चंचलेन मनसा जनः सदा अशान्तः भवति। अतः सन्तोषः एव मनुष्यस्य परमं निधानम् कथितम्।

कुतस्तद् धनलुब्धानाम् इतश्च इतश्च धावताम्।

सुखं कः न लभते? धनलुब्ध इतः ततः धावन् जनः सुखं न लभते। धने सुखं नास्ति सुखं तु सन्तोषी जनः एव प्राप्नोति।

कथितम् एव ''सन्तोष एव पुरुषस्य परमनिधानम्।'' ''संतोषः परमं सुखम्।''

भावार्थः

सन्तोषरूपिणा अमृतेन ये तृप्ताः ते एव सुखं प्राप्नुवन्ति। इतः इतः धावतां धनलुब्धानां कृते तु सुखं नास्ति।

व्याकरणबिन्दवः

अत्र वयं सन्धियुक्तपदानां समस्तपदानां च बोधं कुर्मः।

सन्तोषामृततृप्तानाम्	= सन्तोष + अमृततृप्तानाम् (अ + अ = आ – दीर्घसन्धिः)
कुतस्तद्धनलुब्धानाम्	= कुतः + तत् + धनलुब्धानाम्, विसर्गसन्धिः, व्यंजनसन्धिः
इतश्चेतश्च	= इतः + च + इतः + च, विसर्गसन्धिः, गुणसन्धिः, विसर्गसन्धिः
धनलुब्धानाम्	= धनेन लुब्धानाम् (तृतीया तत्पुरुषः)
शान्तचेतसाम्	= शान्तं चेतः येषां ते शान्तचेतसः; तेषाम् (बहुव्रीहिः)
सन्तोषामृततृप्तानाम्	= सन्तोषः एव अमृतम्, तेन तृप्ताः ये, तेषाम् (बहुव्रीहिः)
यत्	= यत् शब्दः नपुंसकलिंगं, प्रथमा विभक्तिः एकवचनम्

श्लोकः– 5

अधमा धनमिच्छन्ति
धनमानं च मध्यमाः।
उत्तमाः मानमिच्छन्ति
मानो हि महतां धनम्।।5।।

भवन्तः किं जानन्ति यत् धन मानं वा के इच्छन्ति? एतदर्थं **पंचमं श्लोकं** पठामः।

पदच्छेदः अधमाः धनम् इच्छन्ति, धनमानम् च मध्यमाः। उत्तमाः मानम् इच्छन्ति मानः हि महताम् धनम्।

अन्वयः अधमाः धनम् इच्छन्ति, मध्यमाः धनम् मानम् च इच्छन्ति, उत्तमाः मानम् इच्छन्ति। महताम् मानः हि धनम् (भवति)



व्याख्या

अधमाः धनमिच्छन्ति धनमानं च मध्यमाः।

के धनम् इच्छन्ति? अधमाः।

कथम्? अधमाः येन केन प्रकारेण केवलं धनं वा छन्ति। तेषां मते जीवनमूल्यानां किमपि महत्त्वं न वर्तते। ते तु केवलं धनम् इच्छन्ति।

मध्यमाः किम् वा छन्ति? मध्यमाः धनं च मानं च उभे वा छन्ति। ते धनं तु वा छन्ति किन्तु उचितेन प्रकारेण परिश्रमेण एव।

उत्तमाः मानमिच्छन्ति मानो हि महतां धनम्।

महताम् धनं किम्? महतां धनं तु केवलं सम्मानः भवति। धनं तु नश्वरं भवति। धनम् आगच्छति गच्छति च किन्तु जीवनमूल्यानि, सद्गुणाः, सद्भावनाः च शाश्वताः गुणाः सन्ति। उत्तमाः जनाः तु केवलं मानं वा छन्ति।

भावार्थः

अधमाः केवलं धनम् इच्छन्ति, मध्यमाः धनं मानं च उभे वा छन्ति किन्तु उत्तमजनानां कृते तु मानम् एव धनम् वर्तते। अतः तेषां कृते मानम् एव अमूल्यं धनम् अस्ति।

व्याकरणबिन्दवः

भवद्भिः अत्र विसर्गसन्धेः उदाहरणम्, पदपरिचयः च ज्ञायताम्

मानो हि = मानः + हि (विसर्गसन्धिः), अत्र विसर्गस्थाने 'उ' भवतिः ततः 'ओ' गुणः

महताम् = महत् शब्दः षष्ठी विभक्तिः बहुवचनम्

इच्छन्ति = 'इष्' धातुः + लट् लकारः प्र. पु. बहुवचनम्

श्लोकः— 6

अधुना **षष्ठं श्लोकं** पुनः पठामः बोधामः च स्वाध्यायः कथं कर्तव्य।

यः स्वाध्यायमधीतेऽब्दं
विधिना नियतः शुचिः।
तस्य नित्यं क्षरत्येष
पयो दधि घृतं मधु।।6।।

पदच्छेदः— यः स्वाध्यायात् अधीते अब्दम् विधिना नियतः शुचिः। तस्य नित्यम् क्षरति एषः पयः दधिघृतम् मधु।

अन्वयः— यः नियतः शुचिः विधिना अब्दम् स्वाध्यायम् अधीते तस्य एव कृते एषः स्वाध्यायः नित्यम् पयः, दधि घृतम्, मधु (च) क्षरति।

व्याख्या—

भवतः विचारे स्वाध्यायं कथं कुर्यात्? स्वाध्यायं पवित्रं भूत्वा नियमपूर्वकम् वर्षपर्यन्तम् स्थिरः भूत्वा कुर्यात्।

अत्र एषः कस्मै प्रयुक्तः? एषः इति पदं स्वाध्याय इति कृते प्रयुक्तम्।

तस्मै किं किं क्षरति? यः स्वाध्यायं करोति तस्मै स्वाध्यायः दुग्धं दधि, घृतं मधु च सदा क्षरति अर्थात् ददाति। तस्य गृहे स्वास्थ्यवर्धकानां पदार्थानाम् कदापि अभावः न जायते।

टिप्पणी

स्वाध्यायविषये अन्यत्र अपि वर्णितम्

1. विद्यया स्फीयते ज्ञानं ज्ञानात् तत्त्वनिदर्शनम्
   दृष्टतत्त्वो विनीतात्मा सर्वार्थस्य च भाजनम्।
2. स्वाध्यायात् मा प्रमदः। (तैत्तिरीय–उपनिषद्)

भावार्थः

यः नियमपूर्वकं पवित्रं भूत्वा सद्ग्रन्थानाम् अध्ययनं करोति तस्य कृते स्वास्थ्यवर्धकानां पदार्थानां सदा उपलब्धिः जायते।

व्याकरणबिन्दवः

अत्र वयं पद्यगतपदानां सन्धिविच्छेदं कुर्मः

अधीतेऽब्दम् = अधीते + अब्दम्	ए + अ = एऽ		(पूर्वरूपसन्धिः)
क्षरत्येषः = क्षरति + एषः	इ + ए = य् + ए =	ये	(यण्सन्धिः)
पयो दधि = पयः + दधि	यः + द = य +उ+द =		(विसर्जनीयस्थाने उत्वम्)

शाब्दबोधः

समानार्थकशब्दाः

अधीते = पठति

शुचिः = पवित्रः

अब्दं = वर्षम्

श्लोकः– 7

यस्य वाङ्.मनसी शुद्धे
सम्यग्गुप्ते च सर्वदा।
स वै सर्वमवाप्नोति
वेदान्तोपगतं फलम्।।7।।

इदानीं वाचः मनसः च शुद्धतायाः विषये **सप्तमं श्लोकं** पठामः।

पदच्छेदः यस्यवाङ्मनसी शुद्धे, सम्यक् गुप्ते च सर्वदा। स वै सर्वम् अवाप्नोति वेदान्तोपगतम् फलम्।

अन्वयः– यस्य वाङ्मनसी शुद्धे सर्वदा च सम्यक् गुप्ते स वै सर्वम् वेदान्तोपगतम् फलम् अवाप्नोति।

<u>यस्य वाङ्.मनसी शुद्धे सम्यग्गुप्ते च सर्वदा।</u>

वाङ्मनसी कथं भवेताम्? वाङ्मनसी शुद्धे सम्यक् गुप्ते च भवेताम्।

वाङ्मनसी शुद्धे इत्यस्य कः अभिप्रायः? वाक् तपः तु सर्वोत्तमं तपः कथ्यते। जनः सदा प्रियं सत्यं वदेत् मितभाषी च भवेत्। तस्य मनः च शुद्धं भवेत्।

सम्यक् गुप्ते इत्यस्य कः अभिप्रायः? वाक् मनः च सुनियन्त्रितं कुर्यात्।

शुद्धवाङ्मनोयुक्तः जनः किम् आप्नोति? सः धर्म–अर्थ–काम–मोक्षरूपं सर्वं फलम् आप्नोति।



भावार्थः

यस्य वाक् मनः च शुद्धे नियन्त्रिते च, सः वेदान्तशास्त्रे वर्णितं फलम् आप्नोति।

व्याकरणबिन्दवः

अत्र पदानां सन्धिच्छेदं द्वन्द्वसमासस्यैकम् उदाहरणं च पश्यामः।

वाङ्मनसी = वाक् च मनः च = वाङ्मनसी (द्वन्द्वसमासः)

सम्यग्गुप्ते = सम्यक् + गुप्ते क् + ग् = ग्ग् (व्यंजनसन्धिः)

वेदान्तोपगतम् = वेद + अन्त + उपगतम् (दीर्घसन्धिः, गुणसन्धिः)

शाब्दबोधः

विपरीतार्थकाः शब्दाः

शुद्धम् = अशुद्धम्

सर्वदा = यदा कदा

गुप्तम् = अगुप्तम्

आप्नोति = ददाति

सारः

सन्तोषी व्यक्ति सुख पाता है धनलोभी नहीं। निम्न श्रेणी के लोग केवल धन चाहते हैं, मध्यम धन एवं मान दोनों की कामना करते हैं किन्तु महान् लोगों का धन तो मान ही है। सद्ग्रन्थों का सतत अध्ययन करने वालों के लिए तो सभी स्वास्थ्य वर्धक पदार्थ सहज ही उपलब्ध रहते हैं। शुद्ध मन और वाणी वाले को वेदान्तशास्त्र में वर्णित फल मिलता है।

पाठगतप्रश्नाः 1.2

1. विपरीतार्थान् मेलयत–

(क) नित्यम्	(i) उत्तमाः
(ख) अधमाः	(ii) यच्छति
(ग) तृप्तानाम्	(iii) सताम्
(घ) दुष्टानाम्	(iv) यदा–कदा
(ङ) आप्नोति	(v) प्रकटे
(च) गुप्ते	(vi) लुब्धानाम्

2. रिक्तस्थानेषु कर्मपदानि पाठात् चित्वा योजयत

(क) यः ..... अधीते।

(ख) सः वै ..... अवाप्नोति।

(ग) सन्तोषामृततृप्ताः शान्तचेतसः ..... आप्नुवन्ति।

(घ) अधमाः ..... इच्छन्ति।

(ङ) उत्तमाः ..... इच्छन्ति।

(च) वाचा मनसा च शुद्धः नरः वेदान्तोपगतं ..... आप्नोति।

3. निम्नलिखितेषु कथनेषु शुद्धं कथनं (✓) इति चिह्नेन अशुद्धं च (×) इति चिह्नेन चिह्नितं कुरुत–

(क) अधमाः मानम् इच्छन्ति।

(ख) कुत्सितमनसा युक्तः जनः वेदान्तोपगतं फलम् अवाप्नोति।

(ग) मानो हि महतां धनम्।

(ङ) शान्तचेताः जनः सुखम् आप्नोति।

(घ) उत्तमाः धनं मानं च इच्छन्ति।

(च) उत्तमाः मानम् इच्छन्ति।

1.4 किम् अधिगतम्

1. भोजनस्य सदा सम्मानः कर्तव्यः।
2. पूजितम् अशनं बलम् ऊर्जं च यच्छति।
3. सज्जनाः अतिथीनाम् आदरं कुर्वन्ति।
4. सत्येन असत्यम् जयेत्।
5. स्वाध्यायः कर्तव्यः।
6. वाङ्मनोभ्यां शुद्धः जनः सर्वम् आप्नोति।
7. सन्तोषी जनः सुखम् अवाप्नोति।
8. मानो हि महताम् धनम्।



9. सन्धि –संयोगयोः मध्ये विभेदः भवति।

10. अकारान्तपुल्लिंग–अकारान्त नपुंसकलिंगशब्दानां रूपेषु भेदः भवति।

11. दीर्घसन्धिः स्वरसन्धेः भेदः अस्ति।

1.5 योग्यताविस्तारः

(क) सन्दर्भग्रन्थपरिचयः

1. **मनुस्मृतिः** मनुना निर्मितं मानवसमाजस्य प्रथमं संविधानम्। धर्मशास्त्रेषु प्राचीनतमः अयं ग्रन्थः। मनुस्मृतौ द्वादश (12) अध्यायाः, 2685 श्लोकाः च वर्तन्ते। प्रस्तुतपाठे श्लोकसंख्या 1, 2, 7, 8 मनुस्मृत्याः संकलिताः।
2. **विदुरनीतिः** महाभारतस्य उद्योगपर्वणि विदुरनीतिः वर्णिता। अस्मिन् ग्रन्थे मन्त्री विदुरः धृतराष्ट्राय नीतेः उपदेशं यच्छति। अस्मिन् ग्रन्थे अष्ट (8) अध्यायाः सन्ति। (संकलितश्लोकसंख्या – 3, 4)
3. **चाणक्यनीतिः** चाणक्यः चन्द्रगुप्तस्य महामन्त्री आसीत्। तेन प्रणीतः ग्रन्थः चाणक्यनीतिः अतीव महत्त्वपूर्णः, सम्पूर्णमानवजातेः लाभाय च वर्तते। अस्मिन् ग्रन्थे 17 अध्यायाः 340 श्लोकाः च सन्ति। अयं ग्रन्थः ज्ञानसागरः एव। (संकलितश्लोकसंख्या – 5, 6)

(ख) भावविस्तारः

1. पूजितं ह्यशनम्– अन्नं सदा सम्माननीयम्। 'अन्नं वै ब्रह्म' इति उक्तम्। अन्नस्य उत्पादने, निष्पादने, प्रदाने च सर्वथा शुद्धिः भवेत्। श्रीकृष्णः दुर्योधनस्य व्यंजनानि विहाय विदुरस्य शाकम् अखादत्। यथा अन्नं तथा मनः। उक्तं च 'आहारशुद्धौ सत्त्वशुद्धिः'। दत्तम् अन्नं सदा सत्कृत्य एव भोक्तव्यम्।
2. सन्तोषामृततृप्तानां यत्सुखं– 'सन्तोषः' ईदृशः धनम् अस्ति येन जनः परमं सुखं लभेत्। सन्तोषः परमं सुखम्। धनस्य तृष्णा विशाला चेत् तर्हि कुतः सुखम्। उक्तं च भर्तृहरिणा–

   स तु भवति दरिद्रः यस्य तृष्णा विशाला।

   मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः।।
3. स्वाध्यायम्–स्वाध्यायस्य महत्त्वं पुरातनकालादेव प्रसिद्धम्। आचार्यः शिष्यम् उपदिशति स्म स्वाध्यायान्मा प्रमदः। 'तपःस्वाध्याय प्रवचनाभ्यां न प्रमदितव्यम्' इति। स्वाध्यायम् अस्माकं जीवनस्य प्रथमम् अङ्गम् आसीत्। स्वाध्यायेन एव ज्ञानवृद्धिः भवति।

(ग) भाषा विस्तारः

संस्कृते त्रीणि लिंगानि सन्ति

(1) पुल्लिंगम् (2) स्त्रीलिंगम् (3) नपुंसकलिंगम्।

अत्र पाठे प्रयुक्तानाम् अकारान्तपुल्लिंगशब्दानाम्, अकारान्तनपुंसकलिंगशब्दानां रूपाणि दीयन्ते।

शब्दसूची

अकारान्तपुंल्लिङ्गशब्दाः

ऊर्जः – शक्ति
अक्रोधः – शान्ति
क्रोधः – गुस्सा
कदर्यः – कंजूस
सन्तोषः – सन्तोष
तृप्तः – तृप्त
धनलुब्धः – धन का लोभी
अधमः – नीच
मध्यमः – मध्यम
उत्तमः – उत्तम
मानः – सम्मान
स्वाध्यायः – वेदादि सद्ग्रन्थों का अध्ययन

अकारान्तनपुंसकलिङ्गशब्दाः

अशनम् – भोजनम्
बलम् – ताकत
दानम् – दान
सत्यम् – सत्य
अनृतम् – झूठ
धृतम् – घी
फलम् – फल
धनम् – धन
गेहम् – घर

अकारान्तपुंल्लिङ्गशब्दाः (देववत्)

'देव' शब्दः

	एकवचनम्	द्विवनचनम्	बहुवचनम्
प्रथम वि.	देवः	देवौ	देवाः
द्वितीया वि.	देवम्	देवौ	देवान्

बालक शब्दः

	एकवचनम्	द्विवनचनम्	बहुवचनम्
प्रथम वि.	बालकः	बालकौ	बालकाः
द्वितीया वि.	बालकम्	बालकौ	बालकान्



(विभिन्नानाम् अकारान्तपुल्लिंगशब्दानां रूपाणि)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा विभक्तिः	क्रोधः	क्रोधौ	अधमाः
	(एक क्रोध ने)	(दो क्रोध/क्रोधों ने)	(बहुत से अधम)
द्वितीया विभक्तिः	अधमम्	मध्यमौ	मध्यमान्
	(एक नीच को)	(दो मध्यमों को)	(सभी मध्यमों को)
तृतीया विभक्तिः	ऊर्जेन	ऊर्जाभ्याम्	अक्रोधैः
	(शक्ति के द्वारा)	(दो शक्तियों के द्वारा)	(शान्तियों के द्वारा)
चतुर्थी विभक्तिः	अक्रोधाय	कदर्याभ्याम्	कदर्येभ्यः
	(शान्ति के लिए)	(दो कंजूसों के लिए)	(सब कंजूसों के लिए)
पंचमी विभक्तिः	सन्तोषात्	सन्तोषाभ्याम्	तृप्तेभ्यः
	(सन्तोष से)	(दो सन्तोषों से)	(सभी तृप्त मनुष्यों से)
षष्ठी विभक्तिः	तृप्तस्य	उत्तमयोः	उत्तमानाम्
	(तृप्त मनुष्य का)	(दो उत्तम मनुष्यों का)	(सभी उत्तम मनुष्यों का)
सप्तमी विभक्तिः	माने	धनमानयोः	स्वाध्यायेषु
	(सम्मान में)	(धन और मान में)	(वेदादि ग्रन्थों में)
सम्बोधनम्	हे धनलुब्ध	हे धनलुब्धौ	हे उत्तमाः
	(हे धन के लोभी)	(हे धन के लोभी दो पुरुषो)	(हे उत्तम व्यक्तियो)

अकारान्तनपुंसकलिङ्गशब्दानाम् रूपाणि (फलवत्)

फल शब्द

	एकवचनम्	द्विवनचनम्	बहुवचनम्
प्रथमा वि.	फलम्	फले	फलानि
द्वितीया वि.	फलम्	फले	फलानि

अशन शब्द

	एकवचनम्	द्विवनचनम्	बहुवचनम्
प्रथमा वि.	अशनम्	अशने	अशनानि
द्वितीया वि.	अशनम्	अशने	अशनानि

विशेषः– एवमेव दान–घृत पुष्पादिशब्दानां रूपाणि भवन्ति।

1.6 पाठान्तप्रश्नाः

1. पूर्णवाक्येन उत्तरत
   (क) उत्तमाः किम् इच्छन्ति?
   (ख) सन्तोषी जनः किं प्राप्नोति?
   (ग) धनमानं के इच्छन्ति?
   (घ) यः विधिना अब्दपर्यन्तं स्वाध्यायं करोति तस्य कृते किं किं क्षरति?
   (ङ) असाधुं कथं जयेत्?
   (च) दानेन कम् जयेत्?
2. अधोलिखितयोः वाक्यांशयोः उचितं भावार्थं चिनुत–
   (क) पूजितं ह्यशनम्–
      (i) धूपदीपादिभिः पूजितम् भोजनम्
      (ii) सम्मानितं भोजनम्
      (iii) सुस्वादु भोजनम्
   (ख) सन्तोषामृततृप्तानाम्–
      (i) सन्तोषेण अमृतेन च तृप्तानाम्
      (ii) अमृतपानेन सन्तुष्टानाम्
      (iii) सन्तोषरूपिणा अमृतेन तृप्तानाम्
3. अधः प्रदत्तपङ्क्तीनाम् आशयं स्पष्टीकुरुत–
   (क) एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन।
   (ख) सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम्।
   (ग) मानो हि महतां धनम्।
   (घ) यस्य वाङ्मनसी शुद्धे सम्यग्गुप्ते च सर्वदा।
4. 'जीवनसन्देशः' पाठमाधृत्य कानिचित् प च जीवनमूल्यानि प चवाक्येषु लिखत।
5. अधोलिखिते उदाहरणे अनुसृत्य कोष्ठके सन्धिः अस्ति अथवा संयोगः इति चिह्नीकुरुत–

   यथा–(i) नोच्छिद्यन्ते, न + उच्छिद्यन्ते न् + अ + उ = नो (सन्धिः)
   (ii) सतामेतानि, सताम् + एतानि म् + ए = मे (संयोगः)

   (i) ह्यशनम् = हि + अशनम् इ + अ = य (सन्धिः/संयोगः)
   (ii) नाशयेदिदम् = नाशयेत् + इदम् त् + इ = दि (सन्धिः/संयोगः)



(iii) बलमूर्जम् = बलम् + ऊर्जम् म् + ऊ = मू (सन्धिः/संयोगः)

(iv) पूजयेदशनम् = पूजयेत् + अशनम् त् + अ = द (सन्धिः/संयोगः)

(v) मानमिच्छन्ति = मानम् + इच्छन्ति म् + इ = मि (सन्धिः/संयोगः)

(vi) धनमिच्छन्ति = धनम् + इच्छन्ति म् + इ = मि (सन्धिः/संयोगः)

6. अधः अकारान्तशब्दाः प्रदत्ताः सन्ति। तेषु पुल्लिङ्ग–नपुसंकलिङ्गशब्दान् पृथक्कृत्य लिखत–

क्रोध, बल, दान, सन्तोष, ऊर्ज, धन, गेह, उत्तम

7. अधोलिखितपदानां संन्धिविच्छेदं कृत्वा सन्धिनाम अपि लिखत–

चानृतम्, नोच्छिद्यन्ते, ह्यशनम्, वेदान्तोपगतम्

8. पद–परिचयः देयः–

(क) महताम्, (ख) तृणानि, (ग) इच्छन्ति

1.7 उत्तराणि

1.3 बोधप्रश्नानाम् उत्तराणि

1. (क) 2, (ख) 1, (ग) 4, (घ) 5, (ङ) 3

2. (क) भूमिरुदकं (ख) नोच्छिद्यन्ते (ग) ह्यशनम्
   (घ) चानृतम् (ङ) मानो हि (च) पयो दधि

3. क. सतां, ख. धनमानं ग. शुद्धे घ. बलम्

पाठगतप्रश्नानाम् उत्तराणि

1.1 1. (क) अक्रोधेन (ख) साधुना (ग) बलमूर्जम्
(घ) अपूजितम्

2. (क) सताम् (ख) उच्छिद्यन्ते (ग) वाक्
(घ) अशनम् (ङ) कदर्यम् (च) क्रोधम्

3. (क) पूजयेत् (ख) यच्छति (ग) नाशयेत्
(घ) जयेत् (ङ) उच्छिद्यन्ते

1.2 1. (क) 4 (ख) 1 (ग) 6 (घ) 3 (ङ) 2 (च) 5

2. (क) स्वाध्यायम् (ख) सर्वम् (ग) सुखम्
(घ) धनम् (ड.) मानम् (च) फलम्

3. (क) × (ख) × (ग) ✓
(घ) × (ङ.) ✓ (च) ✓

1.6 पाठान्तप्रश्नानाम् उत्तराणि

1. (क) उत्तमाः मानम् इच्छन्ति।
(ख) सन्तोषी जनः सुखं शान्तिं च प्राप्नोति।
(ग) मध्यमाः धनमानं इच्छन्ति।
(घ) यः विधिना अब्दपर्यन्तं स्वाध्यायं करोति तस्य गृहे पयः, दधि, घृतं मधु च क्षरन्ति।
(ङ) असाधुं साधुना जयेत्।
(च) दानेन कदर्यं जयेत्।
2. क–(ii), ख–(iii)
3. तत्रैव पद्यानां व्याख्याप्रसङ्गे पठित्वा लेखनीयानि।
4. स्वयमेव पाठानुसारं प च वाक्यानि रचयत।
5. (i) सन्धिः (ii) सन्धिः (iii) संयोगः
(iv) सन्धिः (v) संयोगः (vi) संयोगः
6. पुं. क्रोध, सन्तोष, ऊर्ज, उत्तम
नपुं. बल, दान, धन, गेह
7. च + अनृतम् (दीर्घ)
न + उच्छिद्यन्ते (गुण)
हि + अशनम् (यण्)
वेद + अन्त + उपगतम् (दीर्घ–गुण)
8. (क) महत्, पुं. ष. वि. ब. व.
(ख) तृण, नपुं. प्र. द्वि. ब. व
(ग) इष्, धातु, लङ्, लट् प्र. पु. ब. व.

309sk02

2

यदि जानासि तद् वद

अस्ति काचित् मधुरस्मृतिः बाल्यावस्थायाः, यदा शयनकाले भवतः पितामही/मातामही कथाः कथयति स्म, प्रश्नान् प्रहेलिकाः च पृच्छति स्म? नूनम् कथाभिः प्रश्नैः, प्रहेलिकाभिः च अस्माकं ज्ञानं वर्धते, बुद्धिः तीव्रा भवति, मनोरंजनम् अपि जायते। इमाः प्रहेलिकाः विश्वस्य सर्वासु भाषासु येन केन अपि रूपेण उपलभ्यन्ते। संस्कृतभाषायाः साहित्यम् अतिसमृद्धं वर्तते। संस्कृतसाहित्ये अनेकाः प्रहेलिकाः संकलिताः सन्ति। अस्मिन् पाठे वयं काश्चन प्रहेलिकाः प्रक्ष्यामः उत्तरं ज्ञातुं च प्रयत्नं कुर्मः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्–

- प्रहेलिकाः बोद्धुं समर्थः भविष्यति;
- प्रहेलिकानां गूढार्थं ज्ञात्वा उत्तराणि दातुं क्षमः भविष्यति
- श्लिष्टपदानाम् अर्थबाहुल्यं स्पष्टीकर्तुं योग्यः भविष्यति;
- किम्, यत्, तत्, एतत्, युष्मद्, अस्मद् सर्वनामशब्दानां रूपाणि चेष्यति;
- विभिन्नसंज्ञापदानां पर्यायवाचिनः लेखितुं प्रभविष्यति;
- इन् प्रत्ययान्तपदानां, त्रिषु लिंगेषु रूपभेदं परिचेष्यति;
- कर्तृपदैः सह क्रियापदानि मेलयितुं शक्तः भविष्यति।
- आकारान्तस्त्रीलिङ्गः ईकारान्तस्त्रीलिङ्गपदानां प्रयोगं करिष्यति।

क्रियाकलापः

द्वे		षट्
	पञ्च	एकम्
चत्वारि	त्रीणि	

उपर्युक्ततालिकायां त्रिषु कोष्ठकेषु रिक्तस्थानानि सन्ति। तत्र प्रत्येकं कोष्ठकेषु एतादृशी संख्या लेखनीया येन एतेषाम् अंकानां योगः उपरिष्टात् अधः (↓) अधस्तात् उपरि (↑), वामतः दक्षिणम् (→), दक्षिणतः वामम् (←) तिर्यक्रूपेण (×) सर्वत्र 15 पञ्चदश भवेत्।

2.1 मूलपाठः

यदि जानासि तद् वद

शोभनः अयं बुद्धिविलासः। अस्मिन् पाठे वयम् बौद्धिकविलासाय प्रहेलिकाः पठिष्यामः

कस्तूरी जायते कस्मात्, को हन्ति करिणां कुलम्,
किं कुर्यात् कातरो युद्धे, मृगात् सिंहः पलायनम्।।1।।

युधिष्ठिरः कस्य पुत्रो, गंगा वहति कीदृशी
हंसस्य शोभा का वास्ति, धर्मस्य त्वरिता गतिः ।।2।।

वृक्षाग्रे फलं दृष्टं, फलाग्रे वृक्ष एव च,
अकारादिसकारान्तं, जानाति स पण्डितः ।।3।।

अपूर्वोऽयं मया दृष्टः, कान्तः कमललोचने,
शोऽन्तरं यो विजानाति स विद्वान्नात्र संशयः।।4।।

शब्दार्थाः
कस्मात् = किससे
हन्ति = मारता है,
करिणां = हाथियों के,
कातरः = कायर,
त्वरिता = तेज़,
वृक्षाग्रे = वृक्ष के आगे
फलाग्रे = फल के आगे
अकारादि = 'अ' से प्रारम्भ
सकारान्तम् = 'स' अन्त में है जिसके
अपूर्वः = 'अ' शुरू में
कान्तः = 'का' अन्त में
शोऽन्तरं = 'शो' बीच में,



नित्यं रथेन गच्छामि, अश्वा वहन्ति मे रथम्,
सम्राडस्मि नरो नास्मि, नासुरोऽस्मि निशाचरः ।।5।।

सदारिमध्यापि न वैरियुक्ता,
नितान्तरक्ताऽपि सितैव नित्यम्,
यथोक्तवादिन्यपि नैव दूती,
का नाम कान्तेति निवेदयाशु।।6।।

अनेकसुशिरं वाद्यं कान्तं च ऋषिसंज्ञितम्,
चक्रिणा च सदाराध्यं, यो जानाति, स पण्डितः।।7।।

न तस्यादिर्न तस्यान्तो मध्ये यस्तस्य तिष्ठति।
तवाप्यस्ति ममाप्यस्ति, यदि जानासि, तद्वद।।8।।

सम्राट् = विशेष चमकदार
असुरः = प्राणदाता
निशाचरः = राक्षस
रिमध्या = 'रि' बीच में
नितान्तरक्ता = अति अनुरक्त
रक्ता = अनुरक्ता
सिता = सफेद
यथोक्तवादिनी = जैसा कहा गया वैसा ही बोलने वाली,
कान्ता = 'क' है अन्त में जिसके
आशु = शीघ्र
अनेकसुशिरं = अनेक सुन्दर शिखरों वाला
वाद्यम् = 'व' है शुरू में, जिसके
कान्त = 'क' है अन्त में, जिसके
आराध्यम् = पूजने योग्य
'न' तस्यादिः = न उसके आदि में,
तस्यान्ते = न उसके अन्त में
मध्ये यः = मध्य में य,
तव = तुम्हारे
मम = मेरे

2.2 बोधप्रश्नाः

1. पाठं पठित्वा सम्बद्धान् पद्यांशान् मेलयत–

'क' स्तम्भः	'ख' स्तम्भः
यथा (अ) कस्तूरी जायते कस्मात्	(i) अश्वाः वहन्ति मे रथम्।
(आ) अनेकसुशिरं वाद्यम्	(ii) मध्ये यस्तस्य तिष्ठति।
(इ) नित्यं रथेन गच्छामि	(iii) को हन्ति करिणां कुलम्
(ई) न तस्यादिर्न तस्यान्तः	(iv) कान्तः कमललोचने,
(उ) वृक्षाग्रे फलं दृष्टम्	(v) कान्तं च ऋषिसंज्ञितम्
(ऊ) अपूर्वोऽयं मया दृष्टः	(vi) फलाग्रे वृक्ष एव च

2. क्रियापदैः रिक्तस्थानानि पूरयत
   (क) किं ———कातरो युद्धे?
   (ख) गंगा ——— कीदृशी?
   (ग) का नाम कान्तेति ——— आशु।

(घ) यो–––– स पण्डितः।

(ङ) सम्राट् ––––– नरः न ––।

(च) मध्ये यः तस्य ––––।

3. उपयुक्तम् उत्तरम् चिह्नीकुरुत–

प्रश्नाः	उत्तराणि
यथा – कस्तूरी कस्मात् जायते?	सिंहात्/मृगात्
(क) हंसस्य शोभा का?	गतिः/मतिः
(ख) युधिष्ठिरः कस्य पुत्रः?	सूर्यस्य/धर्मस्य
(ग) करिणां कुलं कः हन्ति?	सिंहः/व्याघ्रः
(घ) कातरः युद्धे किं कुर्यात्?	युद्धं/पलायनम्
(ङ) गंगा कीदृशी वहति?	मन्दा/त्वरिता

2.3 अधुना अवगच्छामः

प्रथमः अंशः

श्लोक–1

कस्तूरी जायते कस्मात्,
को हन्ति करिणां कुलम्,
किं कुर्यात् कातरो युद्धे,
मृगात् सिंहः पलायनम्।।1।।

प्रथमं श्लोकं पुनः पठामः। प्रहेलिकायाम् एव प्रश्नानाम् उत्तराणि सन्ति।

पदच्छेदः कस्तूरी जायते कस्मात्, कः हन्ति करिणाम् कुलम्।
किं कुर्यात् कातरः युद्धे, मृगात् सिंहः पलायनम्।।

अन्वयः– कस्तूरी कस्मात् जायते? मृगात्। कः करिणाम् कुलम् हन्ति? सिंहः। कातरः युद्धे किम् कुर्यात्? पलायनम्।

व्याख्या

(i) अस्याम् प्रहेलिकायां त्रयः प्रश्नाः सन्ति। कस्तूरी कस्मात् उत्पन्ना भवति? इति प्रथमः प्रश्नः। अस्य उत्तरम् अन्तिमे चरणे अस्ति–मृगात्, हरिणात् अर्थात् कस्तूरी हरिणात् जायते।

(ii) कः करिणां कुलं हन्ति? = इति द्वितीयः प्रश्नः अत्र हन्ति इति क्रियापदम्

कः हन्ति?	सिंहः
कं हन्ति?	करिणाम् कुलम्

(iii) कातरः युद्धे किं कुर्यात्? इति तृतीयः प्रश्नः। पलायनम्, धावनम् कुर्यात्।



टिप्पणी

यः भीरुः अस्ति, युद्धं कर्तुं भीतः भवति सः तु युद्धक्षेत्रात् पलायनम् करोति। अर्थात् भीरुः जनः कदापि युद्धं कर्तुम् उद्यतः न भवति।

अन्तिमे पादे किम् वैचित्र्यम्? 'मृगात् सिंहः पलायनम् (कुर्यात्)' अर्थात् सिंहः हरिणं दृष्ट्वा धावति इत्यर्थः अत्र प्रतीयते। परन्तु वस्तुतः एतानि पदानि त्रयाणां प्रश्नानाम् उत्तराणि सन्ति।

श्लोक–2

अधुना **द्वितीयं श्लोकं** पुनः पठामः। प्रहेलिकायाम् एव प्रश्नानाम् उत्तराणि सन्ति इति बोधामः।

युधिष्ठिरः कस्य पुत्रो,
गंगा वहति कीदृशी;
हंसस्य शोभा का वास्ति,
धर्मस्य त्वरिता गतिः ।।2।।

पदच्छेदः युधिष्ठिरः कस्य पुत्रः, गंगा वहति कीदृशी।
हंसस्य शोभा का वा अस्ति, धर्मस्य त्वरिता गतिः।।

अन्वयः युधिष्ठिरः वै कस्य पुत्रः–धर्मस्य, गंगा कीदृशी वहति– त्वरिता, वा हंसस्य शोभा का अस्ति = गतिः।।

व्याख्या– अत्रापि त्रयः प्रश्नाः, तेषाम् उत्तराणि अन्तिमे चरणे दत्तानि। एवं प्रतीयते यत् हंसस्य शोभा का इति प्रश्नस्य उत्तरम् अस्ति– धर्मस्य त्वरिता गतिः परन्तु एवं नास्ति। एतानि त्रीणि पदानि त्रयाणां प्रश्नानाम् उत्तराणि एव। अर्थात्

(i) धर्मराजस्य पुत्रः युधिष्ठिरः,

(ii) गंगा तीव्रगत्या वहति,

(iii) हंसस्य शोभा तस्य गतिः एव अस्ति, यतः हंसस्य गतिः प्रसिद्धा वर्तते।

अत्र एकः अन्यः अपि भावः प्रतीयते– धर्मस्य त्वरिता गतिः, अर्थात् धर्मपरायणजनस्य शीघ्रं कल्याणं भवति। वस्तुतः एतानि त्रीणि पदानि पृष्टानां प्रश्नानाम् उत्तराणि एव सन्ति।

श्लोक–3

अधुना **तृतीयां** प्रहेलिकां पठामः।

वृक्षाग्रे फलं दृष्टं,
फलाग्रे वृक्ष एव च,
अकारादिसकारान्तं,
जानाति स पण्डितः ।।3।।

पदच्छेदः वृक्षाग्रे फलम् दृष्टम्, फलाग्रे वृक्षः एव च।
अकारादिसकारान्तम्, जानाति सः पण्डितः।

अन्वयः वृक्षाग्रे फलम् दृष्टम्, फलाग्रे वृक्षः एव च। अकारादिसकारान्तम्, (यः) जानाति सः पण्डितः।।

व्याख्या

एतत् किं फलं यस्य नाम्नः आदौ अकारः, अन्ते सकारः भवति? तत् फलं वृक्षे लगति। तस्य फलस्य अग्रे पुनः वृक्षवत् पत्राणि भवन्ति। एतत् तु 'अनानास' इति फलम् एव।

टिप्पणी

अपूर्वोऽयं मया दृष्टः
कान्तः कमललोचने।
शोऽन्तरं यो विजानाति
स विद्वान्नात्र संशयः।।4।।

श्लोक–4

सम्प्रति प्रहेलिकायां **चतुर्थं पद्यं** पठामः।

पदच्छेदः अपूर्वः अयम् मया दृष्टः कान्तः कमललोचने।
शो अन्तरम् यः विजानाति सः विद्वान् न अत्र संशयः।।

अन्वयः (हे) कमललोचने मया अयम् अपूर्वः कान्तः दृष्टः। यः शोऽन्तरम् (इमं) विजानाति स विद्वान् (अस्ति) अत्र संशयः न (अस्ति)।

व्याख्या– कमललोचने– कमलम् इव लोचने यस्याः सा (बहुव्रीहिःसमासः) सम्बोधने एकवचने रूपम् अर्थात् हे कमलनेत्रे।

अपूर्वः – अकारः पूर्वे यस्य सः/ अद्भुतः

कान्तः– ककारः अन्ते यस्य सः/ प्रियः, सुन्दरः

अन्तरम् किम्? मध्यम्

शोऽन्तरम् – शो मध्ये यस्य सः शोऽन्तरः तम्, संशयः– संदेहः

हे कमललोचने–सुलोचने! मया अयं वृक्षः दृष्टः यस्य आदौ अकारः वर्तते अन्ते ककारः वर्तते मध्ये च 'शो' इति वर्तते। जानासि किम्, सः कः वृक्षः? सः 'अशोकः' इति वृक्षः यः एवं जानाति स विद्वान् कथ्यते। अस्मिन् विषये संदेहः नास्ति।

अत्र अपूर्वः कान्तः इत्येतौ शब्दौ अद्भुतः प्रियः इत्येताभ्याम् अर्थाभ्यां तु भ्रमम् उत्पादयतः। अतः एतौ अर्थौ अत्र न विचारणीयौ स्तः। अस्याः प्रहेलिकायाः उत्तरम् अशोकः इति नाम वृक्षः।

भावार्थः

अशोकः वृक्षः अद्भुतः, सुन्दरः च भवति। अस्याः प्रहेलिकायाः उत्तरम् 'अशोकः' इति यः जानति स विद्वान् अस्ति; अस्मिन् विषये संदेहः नास्ति।

सारः

प्रथम अंश में चार पहेलियाँ हैं। इन्हीं पहेलियों में उत्तर भी समाविष्ट हैं जैसे कस्तूरी किससे पैदा होती है? हरिण से। हाथियों के कुल को कौन मार सकता है? सिंह। कायर युद्ध में पलायन करता है। इसी प्रकार दूसरी पहेली में बताया गया है कि युधिष्ठिर धर्म के पुत्र हैं, गंगा तीव्र गति से बहती है, हंस की शोभा चाल से है। तीसरी पहेली अनानास का वर्णन करती है। वृक्ष के आगे फल है और फल के आगे फिर वृक्ष ही है। उस शब्द का 'अ' से प्रारम्भ होता है और 'स' से अन्त। इसी प्रकार चौथी पहेली 'अशोक' शब्द को लेकर बनाई गई है। इसके प्रारम्भ में 'अ' है, 'शो' मध्यम में है तथा 'क' अन्त में है। पदों के दो–दो अर्थों से चमत्कार पैदा हुआ है।



व्याकरणबिन्दवः

किम् प्रश्नवाचकं सर्वनामपदम्। अस्य रूपाणि त्रिषु लिङ्गेषु चलन्ति, पुल्लिङ्गे, स्त्रीलिङ्गे, नपुंसकलिङ्गे च कानिचित् सर्वनामशब्दानां रूपाणि जानीमः।

	'किम्' पुंल्लिङ्गम्			'किम्' स्त्रीलिङ्गम्			'किम्' नपुंसकलिङ्गम्		
विभक्तिः	**एक व.**	**द्वि.व.**	**बहु व.**	**एक व.**	**द्वि.व.**	**बहु व.**	**एक व.**	**द्वि.व.**	**बहु व.**
प्रथमा	कः	कौ	के	का	के	काः	किम्	के	कानि
द्वितीया	कम्	कौ	कान्	काम्	के	काः	किम्	के	कानि
तृतीया	केन	काभ्याम्	कैः	कया	काभ्याम्	काभिः	शेषरूपाणि पुल्लिङ्गवत्		
चतुर्थी	कस्मै	काभ्याम्	केभ्यः	कस्यै	काभ्याम्	काभ्यः			
पंचमी	कस्मात्	काभ्याम्	केभ्यः	कस्याः	काभ्याम्	काभ्यः			
षष्ठी	कस्य	कयोः	केषाम्	कस्याः	कयोः	कासाम्			
सप्तमी	कस्मिन्	कयोः	केषु	कस्याम्	कयोः	कासु			

एवम् एव यत्, तत्, एतत् सर्वनामशब्दानाम् रूपाणि चलन्ति।

		पुल्लिङ्गे			**स्त्रीलिङ्गे**		
सर्वनाम	विभक्तिः	एक व0	द्वि व0	बहु व0	एक व0	द्वि व0	बहु व0
यत्	प्रथमा	यः	यौ	ये	या	ये	याः
तत्	प्रथमा	सः	तौ	ते	सा	ते	ताः
एतत्	प्रथमा	एषः	एतौ	एते	एषा	एते	एताः
यत्	द्वितीया	यम्	यौ	यान्	याम्	ये	याः
तत्	द्वितीया	तम्	तौ	तान्	ताम्	ते	ताः
एतत्	द्वितीया	एतम्	एतौ	एतान्	एताम्	एते	एताः
यत्	तृतीया	येन	याभ्याम्	यैः	यया	याभ्याम्	याभिः
तत्	तृतीया	तेन	ताभ्याम्	तैः	तया	ताभ्याम्	ताभिः
एतत्	तृतीया	एतेन	एताभ्याम्	एतैः	एतया	एताभ्याम्	एताभिः
यत्	चतुर्थी	यस्मै	याभ्याम्	येभ्यः	यस्यै	याभ्याम्	याभ्यः
तत्	चतुर्थी	तस्मै	ताभ्याम्	तेभ्यः	तस्यै	ताभ्याम्	ताभ्यः
एतत्	चतुर्थी	एतस्मै	एताभ्याम्	एतेभ्यः	एतस्यै	एताभ्याम्	एताभ्यः
यत्	पंचमी	यस्मात्	याभ्याम्	येभ्यः	यस्याः	याभ्याम्	याभ्यः
तत्	पंचमी	तस्मात्	ताभ्याम्	तेभ्यः	तस्याः	ताभ्याम्	ताभ्यः
एतत्	पंचमी	एतस्मात्	एताभ्याम्	एतेभ्यः	एतस्याः	एताभ्याम्	एताभ्यः

यत्	षष्ठी	यस्य	ययोः	येषाम्	यस्याः	ययोः	यासाम्
तत्	षष्ठी	तस्य	तयोः	तेषाम्	तस्याः	तयोः	तासाम्
एतत्	षष्ठी	एतस्य	एतयोः	एतेषाम्	एतस्याः	एतयोः	एतासाम्
यत्	सप्तमी	यस्मिन्	ययोः	येषु	यस्याम्	ययोः	यासु
तत्	सप्तमी	तस्मिन्	तयोः	तेषु	तस्याम्	तयोः	तासु
एतत्	सप्तमी	एतस्मिन्	एतयोः	एतेषु	एतस्याम्	एतयोः	एतासु

नपुंसकलिङ्गे

	विभक्तिः	एक व0	द्वि व0	बहु व0
यत्	प्रथमा	यत्	ये	यानि
तत्	प्रथमा	तत्	ते	तानि
एतत्	प्रथमा	एतत्	एते	एतानि
यत्	द्वितीया	यत्	ये	यानि
तत्	द्वितीया	तत्	ते	तानि
एतत्	द्वितीया	एतत्	एते	एतानि

शेष रूपाणि पुल्लिंङ्गवत्

	अस्मद् शब्दः			युष्मद् शब्दः		
विभक्तिः	एक व.	द्वि व.	बहु व,	एक व.	द्वि व.	बहु व,
प्रथमा	अहम्	आवाम्	वयम्	त्वम्	युवाम्	यूयम्
द्वितीया	माम्	आवाम्	अस्मान्	त्वाम्	युवाम्	युष्मान्
तृतीया	मया	आवाभ्याम्	अस्माभिः	त्वया	युवाभ्याम्	युष्माभिः
चतुर्थी	मह्यम् (में)	आवाभ्याम्	अस्मभ्यम्	तुभ्यम्	युवाभ्याम्	युष्मभ्यम्
पंचमी	मत्	आवाभ्याम्	अस्मत्	त्वत्	युवाभ्याम्	युष्मत्
षष्ठी	मम (में)	आवयोः	अस्माकम्	तव	युवयोः	युष्माकम्
सप्तमी	मयि	आवयोः	अस्मासु	त्वयि	युवयोः	युष्मासु

पाठगतप्रश्नाः 2.1

1. एकपदेन उत्तरत

(क) कस्तूरी कस्मात् जायते? ——————————

(ख) युधिष्ठिरः कस्य पुत्रः ——————————

(ग) अनानासशब्दे आदौ कः वर्णः? ——————————



(घ) 'अशोकः' इति पदे अन्ते कः वर्ण भवति? ——————————

(ङ) कस्य फलस्य अग्रे पर्णानि भवन्ति? ——————————

2. विग्रहान् योजयित्वा समस्तपदं रचयत

(क) फलस्य अग्रे = ——————————

(ख) वृक्षस्य अग्रे = ——————————

(ग) 'अ' पूर्वे यस्य सः = ——————————

(घ) शो मध्ये यस्य सः = ——————————

(ङ) युधि स्थिरः = ——————————

(च) 'क' अन्ते यस्य सः = ——————————

3. अन्वयं पूरयत

(क) हे कमललोचने! मया अयम् (i)————— कान्तः (ii)————— यः (iii)————— विजानाति, सः (iv)————— अस्ति, अत्र (v)————— न (अस्ति)

(ख) वृक्षाग्रे (i)————— दृष्टम् (ii)————————— वृक्षः एव च। अकारादि सकारान्तम् (iii)————————— जानाति (iv)————— पण्डितः ।।

द्वितीयः अंशः

श्लोक–5

इदानीं **पञ्चमं श्लोकं** पुनः पठामः बोधामः च।

पदच्छेदः नित्यम् रथेन गच्छामि, अश्वाः वहन्ति मे रथम्।
सम्राट् अस्मि नरः न अस्मि न असुरः अस्मि निशाचरः।।

नित्यं रथेन गच्छामि,
अश्वाः वहन्ति मे रथम्।
सम्राडस्मि नरो नास्मि,
नासुरोऽस्मि निशाचरः।।5।।

अन्वयः नित्यम् रथेन गच्छामि, अश्वाः मे रथम् वहन्ति। सम्राट् अस्मि नरः न अस्मि असुरः अस्मि निशाचरः न।।

व्याख्याः अत्र कश्चित् कथयति अहं राजावत् रथेन गच्छामि, अश्वाः मम रथं कर्षन्ति। यद्यपि सम्राट्, सम्यक् शोभायमानः अस्मि परन्तु अहं नरः न, अहम् असुरः अस्मि परन्तु निशाचरः न।

एषः रथः आकाशे गच्छति। सप्तवर्णीयाः किरणाः अस्य रथं चालयन्ति।

सम्राट् (i) सम्यक् राजते इति सम्राट्– (ii) नृपः

असुरः (i) प्राणदाता (ii) राक्षसः

टिप्पणी

निशाचरः (i) निशायां चरति इति (ii) राक्षसः



अस्याः प्रहेलिकायाः उत्तरम् अस्ति सूर्यः। सः नृपवत् आकाशे रथेन संचरति। सप्त–अश्वाः अस्य रथं नयन्ति। अयम् अत्यधिकं भासते। अतः सम्राट् वर्तते। सः असून् प्राणान् ददाति इति वयं सर्वे जानीमः यत् सूर्यः एव जगतः उत्पादकः। असुरस्य अन्यः अर्थः अस्ति राक्षसः– निशाचरः। एषः प्राणदाता अस्ति न तु राक्षसः। अयं तु रात्रौ न चरति अपितु दिवा चरति।

श्लोक–6

सदारिमध्यापि न वैरियुक्ता
नितान्तरक्तापि सितैव नित्यम्।
यथोक्तवादिन्यपि नैव दूती
का नाम कान्तेति
निवेदयाशु।।6।।

अस्याः प्रहेलिकायाः अधुना **षष्ठं श्लोकं** पुनः पठामः।

पदच्छेदः–सदा अरिमध्या अपि न वैरियुक्ता नितान्तरक्ता अपि सिता एव नित्यम्।
यथा उक्तवादिनी अपि न एव दूती का नाम कान्ता इति निवेदय आशु।।

अन्वयः – सदारिमध्यापि वैरियुक्ता न, नितान्तरक्तापि नित्यम् सितैव। यथोक्तवादिनी अपि दूती न एव। का नाम कान्ता इति आशु निवेदय।



व्याख्या–

नितान्तरक्तापि– नितान्तं रक्ता, अत्र रक्ता रक्तवर्णयुता, अथवा अनुरक्ता इत्यर्थद्वयं प्रतिभासते।

रक्तवर्णयुता सिता (श्वेतवर्णा) कथं स्यात् अतः अत्र अनुरक्ता अपि सिता इति अयम् अर्थः ग्रहीतव्यः।

यथोक्तवादिन्यपि– यथा + उक्तवादिनी + अपि

कान्ता– का अन्ते यस्याः सा।

भावार्थः– प्रहेलिकायाः आपातपठनेन सर्वत्र विरोधाभासः प्रतिभाति। सदा अरिमध्या अपि वैरियुक्ता न अस्ति नितान्तं रक्ता अपि नित्यं सिता। यथोक्तवादिनी अपि दूती न अस्ति। ध्यानपूर्वकं पठनेन भिन्न. अर्थः भासते। सारिका पदस्य मध्ये 'रि' अस्ति। अन्ते का अस्ति। दूती इव यत् शृणोति तत् वदति। अतः उत्तरम् अस्ति सारिका।

श्लोक–7

सम्प्रति, **सप्तमं श्लोकं** पुनः पठामः। अत्रापि प्रहेलिकायाम् एव प्रश्नानाम् उत्तराणि सन्ति।

पदच्छेदः अनेकसुशिरम् वाद्यम् कान्तम् च ऋषिसंज्ञितम्।
चक्रिणा सदा आराध्यम् यः जानाति सः पण्डितः।।

अन्वयः अनेकसुशिरम् वाद्यम् कान्तम् ऋषिसंज्ञितम् चक्रिणा च सदा आराध्यम् यः जानाति स पण्डितः।

व्याख्या

अनेकसुशिरं– शोभनं शिरः सुशिरः (कर्मधारयसमासः) अनेकानि सुशिरांसि यस्मिन् तत् द्वितीयाविभक्तिः एकवचनम्

वाद्यम्– (1) वकारः आदौ यस्य तत्,
(2) वादनसाधनम्



कान्तम्– ककारः अन्ते यस्य तत्, सुन्दरम्

ऋषिसंज्ञितम्– ऋषेः संज्ञया– नाम्ना युक्तम्।

चक्रिणा– सर्पेण/विष्णुना

सदाराध्यम्– सदा आराध्यं सेवनीयम्। अत्र वाद्यं, कान्तं चक्रिणा इत्येषां शब्दानां वादनसाधनम् सुन्दरं विष्णुना इत्येतैः पदैः अर्थे भ्रमः भवति। अतः एते अर्थाः अत्र न विचारणीयाः। यस्य आदौ वकारः अस्ति यस्य अन्ते च ककारः अस्ति असौ शब्दः स्यात् व.....क। एतस्मिन् अनेकानि छिद्राणि भवेयुः, ऋषिनामवत् तस्य नाम स्यात्, सर्पः च तत् इच्छेत्। तत् किं स्यात्? अहो! एतत् तु वल्मीकम्।

भावार्थः– वल्मीके अनेकानि छिद्राणि भवन्ति। ऋषेः वाल्मीकस्य नाम्ना सदृशं तस्य नाम। वल्मीके सर्पः निवसति। अतः प्रहेलिकायाः उत्तरं वल्मीकम् इति बुद्धिमान् जानाति।

अनेकसुशिरं वाद्यं
कान्तं च ऋषिसंज्ञितम्।
चक्रिणा सदाराध्यं यो
जानाति स पण्डितः।।7।।

श्लोक–8

अधुना **अष्टमं श्लोकं** पुनः पठामः।

पदच्छेदः न तस्य आदिः न तस्य अन्तः मध्ये यः तस्य तिष्ठति।
तव अपि अस्ति मम अपि अस्ति यदि जानासि तद् वद्।।

अन्वयः न तस्यादिः (अस्ति), न तस्य अन्तः (अस्ति), तस्य मध्ये यः तिष्ठति। तव अपि अस्ति यदि जानासि, तद् वद।

व्याख्या– प्रहेलिकायाः पठनकाले कश्चिद् भ्रमः जायते। न तस्यादिः न तस्यान्तः इत्थं प्रतिभाति यत् उत्तरे यद् वस्तु अस्ति तत् अनादि अनन्तं च वर्तते। ध्यानेन पठनानन्तरं

न तस्यादिर्न तस्यान्तो
मध्ये यस्तस्य तिष्ठति।
तवाप्यस्ति ममाप्यस्ति
यदि जानासि तद् वद।।8।।

टिप्पणी

ज्ञायते यद् वस्तुतः उत्तरं स्यात् तस्य आदौ न इति वर्णः वर्तते, तस्य अन्ते न इति वर्णः वर्तते।

न तस्यादिः – न तस्य आदिः, तस्य आदिवर्णः 'न' अस्ति।

न तस्यान्तः– न तस्य अन्तः, तस्य अन्तवर्णः न अस्ति इत्थं स्थितिः इयम् अस्ति न.....न

यस्तस्य– यः तस्य। तस्य पदस्य मध्ये यः तिष्ठति। अतः स्थितिः इयं संजाता–न य न

तवाप्यस्ति– तव+ अपि+ अस्ति

ममाप्यस्ति– मम+ अपि+ अस्ति इयं सूचना अस्ति उत्तरं ज्ञातुम्।

''नयन'' सर्वेषां भवति। अतः प्रहेलिकायाः उत्तरम् अस्ति 'नयन' इति

भावार्थः प्रहेलिकायाः भ्रमोत्पादकानि पदानि न विचारणीयानि। 'आदौ न' 'मध्ये य' 'अन्ते न'। 'नयन' इति प्रहेलिकायाः उत्तरम्। नयने सर्वेषां भवतः।

व्याकरण–बिन्दवः

(i) स्त्रीलिंगपदानां रूपाणि (आकारान्तानि), ईकादान्तानि च

	गंगा			कस्तूरी		
विभक्तिः	**ए.व.**	**द्व.व.**	**बहुव.**	**ए.व.**	**द्वि.व.**	**वहु.व.**
प्रथमा	गंगा	गंगे	गंगाः	कस्तूरी	कस्तूर्यौ	कस्तूर्यः
द्वितीया	गंगाम्	गंगे	गंगाः	कस्तूरीम्	,,,,,	कस्तूरीः
तृतीया	गंगया	गंगाभ्याम्	गंगाभिः	कस्तूर्या	कस्तूरीभ्याम्	कस्तूरीभिः
चतुर्थी	गंगायै	,,	गंगाभ्यः	कस्तूर्यै	,,	कस्तूरीभ्यः
पंचमी	गंगायाः	,,	,,	कस्तूर्याः	,,	कस्तूरीभ्यः
षष्ठी	,,	,,	गंगानाम्	,,	कस्तूर्योः	कस्तूरीणाम्
सप्तमी	गंगायाम्	गंगयोः	गंगासु	कस्तूर्याम्	,,	कस्तूरीषु
सम्वोधनम्	हे गंगे	हे गंगे	हे गंगाः	हे कस्तूरि	हे कस्तूर्यौ	हे कस्तूर्यः
एवमेव रमा, लता, कला आदीनां शब्दानां रूपाणि भविष्यन्ति।				एवमेव नारी, नदी, देवी आदीनां शब्दानां रूपाणि भविष्यन्ति		



'इन्' प्रत्ययान्तशब्दाः

	करिन्			चक्रिन्		
विभक्ति	ए.व.	द्व.व.	बहुव.	ए.व.	द्वि.व.	बहु.व.
प्रथमा	करी	करिणौ	करिणः	चक्री	चक्रिणौ	चक्रिणः
द्वितीया	करिणम्	,,	,,	चक्रिणम्	,,	,,
तृतीया	करिणा	करिभ्याम्	करिभिः	चक्रिण	चक्रिभ्याम्	चक्रिभिः
चतुर्थी	करिणे	,,	करिभ्यः	चक्रिणे	,,	चक्रिभ्यः
प×चमी	करिणः	,,	,,	चक्रिणः	,,	,,
षष्ठी	,,	करिणोः	करिणाम्	चक्रिणः	चक्रिणोः	चक्रिणाम्
सप्तमी	करिणि	,,	करिषु	चक्रिणि	,,	चक्रिषु
सम्बोधन्	हे करिन्	हे करिणौ	हे करिणः	हे चक्रिन्	हे चक्रिणौ	हे चक्रिणः

सारः

इस अंश में भी चार पहेलियाँ हैं। पांचवीं पहेली का आधार सूर्य है जो राजा नहीं पर रथ से यात्रा करता है, घोड़े (किरणें) उसके रथ को खींचते हैं, वह सम्राट् है पर मनुष्य नहीं, प्राण दाता है पर निशाचर नहीं। छठी पहेली का उत्तर है सारिका। इसके मध्य में 'रि' है, अरिमध्य नहीं है, अनुरक्ता होते हुए भी श्वेत वर्णा है, जैसे का तैसा वर्णन करते हुए भी दूती नहीं है, सुन्दर है 'का' वर्ण अन्त में है। प्रत्येक शब्द के दो दो अर्थ हैं। सातवीं पहेली का उत्तर वल्मीक है, वल्मीक में अनेक छिद्र होते हैं और इसमें सांप का निवास होता है। अतः बुद्धिमान् ही इसको पहचान सकता है। अन्तिम पहेली का उत्तर नयन है जिसके प्रारम्भ और अन्त में 'न' है और मध्यम में 'य' है। यह सभी के पास विद्यमान है। ऐसी ही पहेलियों का संकलन करके आप अपने ज्ञान का विस्तार कर सकते हैं

पाठगतप्रश्नाः 2.2

1. सन्धिं कृत्वा लिखत

(क) सम्राट् + अस्मि = ----------

(ख) न + असुरः + अस्मि = ----------

(ग) सदा + अरि = ----------

(घ) सिता + एव = ----------

(ङ) वादिनी + अपि = ————————————

(च) कान्ता + इति = ————————————

(छ) सदा + आराध्यम् = ————————————

2. अर्थद्वयं लिखत

(क) सदारिमध्या = (i) ————————————
(ii) ————————————

(ख) चक्रिणा = (i) ————————————
(ii) ————————————

(ग) न तस्यादिः = (i) ————————————
(ii) ————————————

(घ) न तस्यान्तः = (i) ————————————
(ii) ————————————

(ङ) असुरः = (i) ————————————
(ii) ————————————

(च) वाद्यम् = (i) ————————————
(ii) ————————————

3. तां प्रहेलिकां लिखत यस्याः उत्तरं सूर्यः अस्ति

————————————————————————————————

4. द्वितीयांशस्य प्रहेलिकानाम् उत्तराणि लिखत।

2.4 किम् अधिगतम्

- प्रहेलिकाभिः ज्ञानमपि वर्धते, मनोरंजनम् अपि भवति।
- शब्दानाम् अर्थद्वयेन चमत्कारः उत्पद्यते।
- प्रथमप्रहेलिकायाः तात्पर्यम् अस्ति– कस्तूरी मृगात् जायते। सिंहः करिणां कुलं हन्ति। कातरः युद्धे पलायनं कुर्यात् इति।
- द्वितीयप्रहेलिकायाः तात्पर्यम् अस्ति – युधिष्ठिरः धर्मस्य पुत्रः, गंगा त्वरिता वहति, हंसस्य शोभा गतिः अस्ति।
- तृतीयप्रहेलिकायाः उत्तरमस्ति– 'अनानास' इति। यतः अनानासवृक्षस्य उपरि फलम् भवति, पुनः तस्य उपरि वृक्षः (पत्राणि) भवति।



- चतुर्थप्रहेलिकायाः उत्तरमस्ति 'अशोकः'। यतः यस्य (शब्दस्य) पूर्वे 'अकारः' वर्तते, मध्ये 'शो' वर्णः अन्ते च 'क' वर्णः विद्यते।
- पंचमप्रहेलिकायाः उत्तरमस्ति 'सूर्यः'। यः नित्यं रथेन गच्छति। तस्य किरणाः एव अश्वाः। देदीप्यमानः सम्राट् अस्ति। सः संसारस्य कृते असुरः प्राणदायकः अपि अस्ति।
- षष्ठप्रहेलिकायाः उत्तरमस्ति 'सारिका'। यतः सा दूती इव वदति। अयमेव शब्दः यस्य मध्ये 'रि' वर्णः भवति, अन्ते च 'का' वर्णः भवति।
- सप्तम प्रहेलिकायाः उत्तरमस्ति 'वल्मीकम्' इति। यतः यस्य शब्दस्य आदौ 'व' अस्ति अन्ते च ककारः अस्ति। एतस्मिन् अनेकानि छिद्राणि भवन्ति, सर्पः च तत् इच्छेत्। तस्य नाम ऋषिनामवत् एव।
- अष्टम प्रहेलिकायाः उत्तरमस्ति– 'नयन' इति। यस्य आदौ 'न' वर्णः, अन्तेऽपि 'न' वर्णः, मध्ये च 'य' वर्णः भवति, यत् च सर्वेषाम् अङ्गं भवति। अस्य अर्थः 'नेत्रम्' इति।
- किम् यत् तत्, एतत् इत्येतेषां सर्वनामशब्दानां त्रिषु लिंगेषु रूपाणि भवन्ति। अस्मद्, युष्मद् सर्वनामशब्दयोः रूपाणि पुल्लिङ्गे स्त्रीलिङ्गे च समानानि भवन्ति।

2.5 योग्यताविस्तारः

(क) ग्रंथपरिचयः

एताः प्रहेलिकाः अधिकांशतः सुभाषितरत्नभाण्डागारतः संकलिताः। सुभाषितत्नभाण्डागारे विविधानां पद्यानां सूक्तीनां च संग्रहः अस्ति।

प्रहेलिकाः तर्कशक्तिं मननक्षमतां च वर्धयन्ति।

(ख) भावविस्तारः

काश्चन अन्याः प्रहेलिकाः

(क) मुखे हस्तद्वयं धत्ते, सर्वथा जागरूका सा।
प्रतिक्षणं वदन्तीव, प्राणाः पिंजिताः सदा।। (घटिका)

(ख) आदिस्वरेण ब्रह्माऽहं तापयामि निरन्तरम्।
नाहं भीमस्य जामाता,कोऽस्मि शीघ्रं ब्रवीतु मे।। (अनलः)

(ग) आदौ भा शोभते नित्यम्, रतम् पश्चाद् विराजते।
देवतानां प्रियं धाम, तवाप्यस्ति ममापि च ।। (भारतम्)

(घ) अपदो दूरगामी च साक्षरो न च पण्डितः।
अमुखः स्फुटवक्ता च यो जानाति स पण्डितः।। (पत्रम्)

2.6 पाठान्तप्रश्नाः

1. प्रथमान्तं पदं रेखांकितं कुरुत–

   यथा कः करिणां कुलं हन्ति? कः

   (क) हंसस्य शोभा का अस्ति? .....

   (ख) वृक्षाग्रे फलं दृष्टम्। .....

   (ग) अपूर्वः अयम् मया दृष्टः। .....

   (घ) त्वम् आशु निवेदय। .....

   (ङ) यः तस्य मध्ये तिष्ठति। .....

   (च) अश्वाः मे रथं वहन्ति। .....

2. पाठे सम्बोधनपदं किम्?
3. अधोलिखितेषु पदेषु क्रियापदानि पृथक् कृत्वा लिखत–

   करिणाम्, हन्ति, जानाति, कान्तेति, वैरियुक्ता, दूती, वद, निवेदय, कान्तः, पण्डितः।
4. स्त्रीलिङ्गपदानि रेखांकितानि कुरुत–

   कस्तूरी, वृक्षः, वैरियुक्ता, वाक्यम्, चक्रिणा, निशाचरः, गंगा, कीदृशी, कान्ता, चक्रिणा।
5. एतत् पदम् अव्ययम् नास्ति–

   ताः, एव, च, अत्र, न, नाम, इति, आशु, आदिः,अपि, नित्यम्, कीदृशी, का।

2.7 उत्तराणि

2.2 बोधप्रश्नाः

1 (iii), (v), (i), (ii), (vi), (iv),

2. (क) कुर्यात्, (ख) वहति, (ग) निवेदय, (घ) जानाति,
   (ङ) अस्मि, अस्मि, (च) तिष्ठति।

3. (क) गतिः, (ख) धर्मस्य (ग) सिंहः (घ) पलायनम् (ङ) त्वरिता

पाठगतप्रश्नाः

2.1 1. (क) मृगात्, (ख) धर्मस्य, (ग) अ वर्णः, (घ) कः, (ङ) अनानासफलस्य,

2. (क) फलाग्रे, (ख) वृक्षाग्रे, (ग) अपूर्वः (घ) शोमध्यः (ङ) युधिष्ठिरः (च) कान्तः



3. (क) (i) अपूर्वः (ii) दृष्टः (iii) शोऽन्तरं, (iv) विद्वान् (v) संशयः

(ख) (i) फलम्, (ii) फलाग्रे (iii) यः, (iv) सः

2.2 1. (क) सम्राडस्मि, (ख) नासुरोऽस्मि, (ग) सदारि (घ) सितैव

(ङ) वादिन्यपि (च) कान्तेति, (छ) सदाराध्यम्।

2. (क) (i) सदा अरिमध्या, सदा शत्रूणां मध्ये स्थिता

(ii) सदा 'रि' मध्या, यस्य पदस्य मध्ये 'रि' वर्णः विद्यते

(ख) (i) विष्णुना, (ii) सर्पेण

(ग) (i) तस्य आदिवर्णः 'न' (ii) तस्य प्रारम्भः नास्ति।

(घ) (i) तस्य अन्ते 'न' वर्णः (ii) तस्य अन्तः नास्ति।

(ङ) (i) यः सुरः नास्ति, राक्षसः।। (ii) यः असून् प्राणान् ददाति।

(च) (i) वादयते यत् वाद्ययन्त्रम् (ii) 'व' आद्यम्, 'व' प्रथमाक्षरः यस्य तम्।

3. नित्यं रथेन गच्छामि, अश्वाः वहन्ति मे रथम्।

सम्राडस्मि, नरो नास्मि, नासुरोऽस्मि निशाचरः।।

4. (1) मृगात्, सिंहः, पलायनम्, (2) धर्मस्य, त्वरिता, गतिः

(3) अनानासफलम्, (4) अशोकः,

(5) सूर्यः (6) सारिका

(7) वल्मीकम्, (8) नयनम्,

2.6 पाठान्तप्रश्नाः

1. (क) शोभा, का (ख) फलम्, दृष्टम् (ग) अपूर्वः, अयम्, दृष्टः

(घ) त्वम्, (ङ) यः, (च) अश्वाः

2. कमललोचने

3. क्रियापदानि– हन्ति, जानाति, वद, निवेदय,

4. कस्तूरी, वैरियुक्ता, गंगा, कीदृशी, कान्ता

5. ताः, आदिः, कीदृशी, का

309sk03

3

आरोग्यं परमं सुखम्

भवतां गृहे अनेकानि वस्तूनि दृश्यन्ते यथा गैसचुल्लः, सीवनयन्त्रं, तालकं नलम् इति। एतेषां सम्यक् चालनाय तैलप्रदानम् अनिवार्यं भवति। एतेषां सन्धिस्थलेषु यदि तैलं न दीयते तदा एतानि सम्यक् कार्यं न कुर्वन्ति कुण्ठितानि च भवन्ति। अस्माकं शरीरम् अपि एकं यन्त्रम् इव। कालिदासेन सत्यमुक्तम्– ''शरीरमाद्यं खलु धर्मसाधनम्।'' शरीरस्य इन्द्रियाणि– नासिका, कर्णः, त्वक्, नेत्रे, हस्तौ पादौ च सुदृढानि भवेयुः तदर्थं तैलमर्दनम् आवश्यकम्। नूनं तैलमर्दनेन स्वास्थ्यं वर्धते। स्वास्थ्यम् एव परमं प्रथमं सुखम्। आयुर्वेदे तैलमर्दनस्य महत्त्वं सुस्पष्टं वर्तते। चरकः आर्युवेदस्य सर्वश्रेष्ठः विद्वान् अभवत्। प्रस्तुतः पाठः चरकसंहितायाः एव संकलितः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- तैलाभ्यङ्गस्य लाभान् लेखितुं समर्थः भविष्यति;
- तैलमर्दनस्य उपचर्यया अपसारितानां रोगानां नामानि लेखिष्यति;
- वाक्येषु कर्तृपदैः सम्बद्धक्रियापदानां चयनं कर्तुं शक्ष्यति;
- मतुप्प्रत्ययान्तशब्दानां प्रयोगं कर्तुं शक्ष्यति;
- स्व, नित्यं, न, एव, च, उच्चैः इति अव्ययपदानां वाक्येषु प्रयोगं करिष्यति;
- यण्–गुण–पूर्वरूपसन्धियुक्तानां पदानां चयनं करिष्यति।

क्रियाकलापः

अधः केषाञ्चित् वस्तूनां चित्राणि तेषां नामानि च दत्तानि सन्ति। तेषु यत्कृते तैलम् आवश्यकं तत्समक्षम् 'आम्', यत्कृते च तैलम् अनावश्यकम् तत्समक्षं 'नैव' लिखत।

यथा–

	आम्/नैव		आम/नैव
			
3.1 शकटः	.....	3.2 दण्डदीपः	.....
3.2 द्विचक्रिका	.....	3.4 तालकः	.....
3.5 रथः	.....	3.6 संगणकम्	.....
3.7 नौका	.....	3.8 कारयानम्	.....
			
3.9 नलम्	.....	3.10 सीवनयन्त्रम्	.....

3.1 मूलपाठः

आरोग्यं परमं सुखम्

अत्र भवद्भिः ज्ञातं यत्– एतेषु कानिचित् यन्त्राणि तैलं विना कार्यं न कुर्वन्ति एवमेव शरीरम् अपि तैलं विना सम्यक् कार्यं न करोति। इदानीं वयम् 'आयुर्वेदे तैलमर्दनस्य महत्त्वं ज्ञातुं मूलपाठं पठामः।

नित्यं स्नेहार्द्रशिरसः शिरः शूलं न जायते।
न खालित्यं न पालित्यं न केशाः प्रपतन्ति च।।1।।

बलं शिरः कपालानां विशेषेणाभिवर्धते।
दृढमूलाश्च दीर्घाश्च कृष्णाः केशाः भवन्ति च।।2।।

न चास्यं कण्ठशोषः स्यान्नौष्ठयोः स्फुटनाद्भयम्।
न च दन्ताः क्षयं यान्ति दृढमूलाः भवन्ति च।।3।।

इन्द्रियाणि प्रसीदन्ति सुत्वग्भवति चाननम्।
निद्रालाभः सुखं च स्यान्मूर्ध्नि तैलनिषेवणात्।।4।।

सुस्पर्शोपचिताङ्गश्च बलवान् प्रियदर्शनः।
भवत्यभ्यङ्गनित्यत्वान्नरोऽल्पजरः एव च।।5।

जायते सौकुमार्यं च बलं स्थैर्यं च पादयोः।
दृष्टिः प्रसादं लभते मरुतश्चोपशाम्यति।।6।।

शब्दार्थाः
नित्यं = प्रतिदिन
स्नेहार्द्रशिरसः = सिर में तेल डालने से
शिरःशूलं = सिरदर्द
खालित्यं = गंजापन
पालित्यं = बालों का सफेद होना
प्रपतन्ति = गिरते हैं
शिरः कपालानां = सिर की हड्डियों की, अभिवर्धते = बढ़ता है
दृढमूलाः = मजबूत जड़ों वाले
कृष्णा = काले, कण्ठशोषः = गला सूखना
ओष्ठयोः = होठों के
स्फुटनाद्भयम् = फटने का डर
न क्षयं यान्ति = नष्ट नहीं होते
प्रसीदन्ति = प्रसन्न होती हैं
सुत्वक् = कान्तियुक्त त्वचा
निद्रालाभः = अच्छी नींद आना
मूर्ध्नि = सिर में
सुस्पर्शोपचिताङ्गः = शरीर सुस्पर्शी (नरम, मुलायम) हो जाता है।
अभ्यङ्गः = तेलमालिश
अल्पजरः = बुढ़ापा धीरे धीरे आता है
सौकुमार्यम् = कोमलता
प्रसादं लभते = तेज हो जाती है
मरुतः = वायु से होने वाला विकार
उपशाम्यति = शान्त हो जाता है

3.2 बोधप्रश्नाः

1. उपयुक्तम् उत्तरं (√) चिह्नीकुरुत–

(क) शिरसि तैलमर्दनेन केशाः न भवन्ति–

(i) कृष्णाः (ii) दीर्घाः

(iii) श्वेताः (iv) दृढमूलाः

(ख) नरः अल्पजरः केन भवति–

(i) औषधीनां प्रभावेन (ii) निद्रालाभेन

(iii) स्नानेन (iv) तैलाभ्यङ्गेन

(ग) एतेषां श्लोकानां लेखकः कः?

(i) कालिदासः (ii) चरकः

(iii) भासः (iv) सुश्रुतः

2. 'क' स्तम्भस्य श्लोकांशानां 'ख' स्तम्भस्य श्लोकांशैः सह मेलनं कुरुत–

'क' स्तम्भः	**'ख' स्तम्भः**
(क) नित्यं स्नेहार्द्रशिरसः	(i) क्षयं यान्ति।
(ख) न च दन्ताः	(ii) मूर्ध्नि तैलनिषेवणात्।
(ग) निद्रालाभः सुखं च स्यात्	(iii) शिरः शूलं न जायते।
घ) दृष्टिः प्रसादं लभते	(iv) न केशाः प्रपतन्ति च।
(ङ) न खालित्यं न पालित्यं	(v) मरुतश्चोपशाम्यति।

3. पाठं पठित्वा रिक्तस्थानानि पूरयत–

(क) ..... शिरः कपालानां विशेषेणाभिवर्धते।

(ख) सुस्पर्शोपचिताङ्गश्च ..... प्रियदर्शनः।

(ग) दृढमूलाश्च दीर्घाश्च ..... केशाः भवन्ति च।

(घ) नित्यं स्नेहार्द्रशिरसः ..... न जायते।

(ङ) जायते सौकुमार्यं च बलं ..... च पादयोः।

3.3 अधुना अवगच्छामः

प्रथमः अंशः

भवद्भिः दृष्टमेव यत् माता स्वशिशोः शिरः प्रभृति पादपर्यन्तम् नित्यं तैलं मर्दयति। किमर्थम्? शरीरस्य पुष्टार्थम्। आम्, सत्यमेव। मल्लाः अपि नित्यं तैलं मर्दयन्ति। अतः तैलमर्दनेन अस्माकं शरीरस्य अंगानि कथं स्वास्थ्ययुक्तानि भवन्ति इति अत्र वयम् बोधामः।

श्लोकः– 1

अस्तु **प्रथमं श्लोकं** पठामः।

नित्यं स्नेहार्द्रशिरसः
शिरः शूलं न जायते।
न खालित्यं न पालित्यं
न केशाः प्रपतन्ति च।।1।।

पदच्छेदः नित्यम् स्नेहार्द्रशिरसः शिरः शूलम् न जायते।
न खालित्यम् न पालित्यम्, न केशाः प्रपतन्ति च।

अन्वयः यः नित्यं शिरसि तैलमर्दनम् करोति तस्य स्नेहार्द्रशिरसः शिरः शूलम् न जायते। तस्य न खालित्यम् न पालित्यम्, न च तस्य केशाः प्रपतन्ति। इदानीं श्लोकम् अवगच्छामः।

3.12

व्याख्या–

शिरः शूलम् इति किम्? शिरसि पीडा।

कस्य शिरःशूलं न जायते? स्नेहेन तैलेन आर्द्रं शिरः यस्य तस्य। अर्थात् यस्य शिरः नित्यं तैलेन मर्दितं भवति, तस्य शिरःपीड़ा न जायते।

तैलार्द्रतया च पुनः किं किं न भवति?

(क) खालित्यं, केशराहित्यम् (गंजापन इति) शिरः केशरहितं न भवति।

(ख) पालित्यम्, केशानां श्वेतवर्णे परिवर्तनम् अर्थात् केशाः श्वेताः न भवन्ति।

(ग) केशानां पतनं च न भवति।

भावः

यः मनुष्यः शिरसि तैलाभिसेचनं नित्यं करोति तस्य शिरसि पीडा न भवति। तस्य केशानां वर्णः कृष्णः एव वर्तते, श्वेतः न जायते। तस्य केशानां पतनमपि न जायते। अतः अस्माभिः नित्यं शिरसि तैलाभ्यङ्गः करणीयः।

बलं शिरः कपालानां
विशेषेणाभिवर्धते।
दृढमूलाश्च दीर्घाश्च
कृष्णाः केशाः भवन्ति च।।2।।

श्लोकः– 2

अधुना **द्वितीयं श्लोकं** पठामः

पदच्छेदः बलम् शिरः कपालानाम् विशेषेण अभिवर्धते।
दृढमूलाः च दीर्घाः च कृष्णाः केशाः भवन्ति।।

अन्वयः शिरसि तैलमर्दनेन शिरःकपालानाम् विशेषेण बलम् अभिवर्धते। केशाः दृढमूलाः दीर्घाः कृष्णाः च भवन्ति।

व्याख्या–

शिरःकपालाः के? शिरसः अस्थीनि।

शिरसि तैलाभ्यङ्गेन किं वर्धते? शिरसः अस्थ्नां शक्तिः नूनं तैलाभ्यङ्गेन वर्धते।



के दृढमूलाः भवन्ति? केशाः। केशानां मूलानि तैलेन दृढानि भवन्ति।

एवं हि तैलाभ्यङ्गेन केशाः कीदृशाः भवन्ति? दीर्घाः कृष्णाः श्यामवर्णाः दृढमूलाश्च भवन्ति।

भावः

शिरसि तैलप्रयोगेण शिरसः अस्थ्नां शक्तिः वर्धते अर्थात् मस्तिष्कः अधिकः क्रियाशीलः भवति। केशानां मूलानि सुदृढानि भवन्ति। तेन केशाः दीर्घाः श्यामवर्णाः च जायन्ते। अतः शिरसि तैलप्रयोगः अवश्यमेव कर्तव्यः। सुन्दरैः केशैः मानवः चिरं शोभते।

श्लोकः– 3

अधुना **तृतीयं पद्यं** पठामः। बोधामः च अन्येः लाभाः के भवन्ति तैलाभ्यङ्गेन।

न चास्यं कण्ठशोषः
स्यान्नौष्ठयोः स्फुटनाद्भयम्।
न च दन्ताः क्षयं यान्ति
दृढमूलाः भवन्ति च।।3।।

पदच्छेदः न च अस्य कण्ठशोषः स्यात् न ओष्ठयोः स्फुटनात् भयम्।
न च दन्ताः क्षयम् यान्ति। दृढमूलाः भवन्ति च।।

अन्वयः अस्य (नरस्य) न च कण्ठशोषः स्यात् न ओष्ठयोः स्फुटनात् भयम्। (अस्य) दन्ताः च क्षयम् न यान्ति दृढमूलाः च भवन्ति।

नरस्य कण्ठः केन न शुष्यति? तैलाभ्यङ्गेन।

तैलाभ्यङ्गेन कस्मात् भयं नास्ति? ओष्ठयोः स्फुटनात्।

तैलमर्दनेन के क्षयं (नाशं) न यान्ति (गच्छन्ति)? दन्ताः।

अर्थात! – दन्तेषु ओष्ठयोः कण्ठे च तैलमर्दनं करणीयम्।

भावः

मुखे तैलमर्दनेन कण्ठः न परिशुष्यति। ओष्ठयोः स्फुटनात् भीतिः न भवति। तैलप्रयोगेण च दन्तानां मूलानि दृढानि भवन्ति। ते च बाल्यकाले एव न विनश्यन्ति। अतः मुखे दन्तेषु च सर्षपतैलाभ्याङ्गः नित्यमेव करणीयः। दन्तैः मानवस्य न केवलं शोभा भवति अपि तु भोजने तु तेषामुपयोगः प्रशंसनीयः एव।

व्याकरणबिन्दवः

वयम् अत्र पदानां सन्धिविच्छेदं, विग्रहं, क्रियापद–परिचयं च बोधामः।

सन्धिविच्छेदाः

स्नेहार्द्रः = स्नेह + आर्द्रः = अ + आ = आ दीर्घसन्धिः

चास्य = च + अस्य = अ + अ = आ दीर्घसन्धिः

विशेषेणाभिवर्धते	= विशेषेण + अभिवर्धते	= अ + अ = आ	
नौष्ठयोः	= न + ओष्ठयोः	= अ + ओ = औ	
खालित्यं न	= खालित्यम् + न	= म् + (व्यंजनम्) =	अनुस्वारः (ं)
क्षयं यान्ति	= क्षयम् + यान्ति	= म् + व्यंजनम् =	अनुस्वारः
दृढमूलाश्च	= दृढमूलाः + च	= : + च = श्च (: – श्)	
दीर्घश्च	= दीर्घः + च		
स्फुटनाद्भयम्	= स्फुटनात् + भयम्	= त् + भ = द्भ (त् → द्)	
स्याच्च	= स्यात् + च	= त् + च = च्च (त् → च्)	

(चवर्गयोगे तवर्गः तु चवर्गः जायते)

समासाः

समस्तपदानि	विग्रहः	समासनाम
शिरः शूलम्	शिरसि शूलम्	सप्तमीतत्पुरुषः
शिरः कपालानाम्	शिरसः कपालानाम्	षष्ठीतत्पुरुषः
कण्ठशोषः	कण्ठस्य शोषः	षष्ठीतत्पुरुषः
स्नेहार्द्रशिरसः	स्नेहेन आर्द्रं शिरः यस्य सः तस्य	बहुव्रीहिः
दृढमूलाः	दृढं मूलं येषां ते	बहुव्रीहिः

क्रियापदानिः

पदम्	धातुः	लकारः	पुरुषः	वचनम्
जायते	जन्	लट्	प्रथमः	एकवचनम्
अभिवर्धते	अभि + वृध्	लट्	प्रथमः	एकवचनम्
प्रपतन्ति	प्र + पत्	लट्	प्रथमः	बहुवचनम्
भवन्ति	भू	लट्	प्रथमः	बहुवचनम्
यान्ति	या	लट्	प्रथमः	बहुवचनम्
स्यात्	अस्	विधिलिङ्	प्रथमः	एकवचनम्

सारः

नित्यं तैलमर्दनेन शिरोवेदना न जायते। केशाः कृष्णाः भवन्ति। केशानां मूलानि दृढानि भवन्ति। तैलमर्दनेन कण्ठः न शुष्यति, ओष्ठयोः स्फुटनाद् भयं दूरीभवति, दन्ताः च दृढमूलाः भवन्ति।



नित्य सिर पर तेल लगाने से सिरदर्द नहीं होता और न ही बाल सफेद होते हैं। सिर की हड्डियों की शक्ति बढ़ती है। बालों की जड़ें मजबूत होती हैं। इसी तरह मुँह में तेल का कुल्ला करने से व्यक्ति का गला नहीं सूखता, होंठ नहीं फटते और दांत नहीं टूटते।

पाठगतप्रश्नाः 3.1

1. अधोलिखितपदानां सन्धिविच्छेदं कृत्वा लिखत–

   (क) स्नेहार्द्रः = ... + ...

   (ख) क्षयं यान्ति = ... + ...

   (ग) दीर्घश्च = ... + ...

   (घ) स्याच्च = ... + ...

   (ङ) स्फुटनाद्भयम् = ... + ...

2. अधोलिखितानां क्रियापदानाम् अर्थैः सह मेलनं क्रियताम्

क्रियापदानि	**अर्थाः**
(क) जायते	(i) वृद्धिम् आप्नोति
(ख) अभिवर्धते	(ii) पतन्ति
(ग) प्रपतन्ति	(iii) गच्छन्ति
(घ) यान्ति	(iv) भूयात्
(ङ) स्यात्	(v) उत्पद्यते

3. रेखाचित्रे स्नेहार्द्रशिरसः अष्टगुणान् अधः पुनः रिक्तस्थलेषु पद्ये प्रदत्त क्रमेण लिखत–



(i) ..... (v) .....

(ii) ..... (vi) .....

(iii) ..... (vii) .....

(iv) ..... (viii) .....

4. रेखाङ्कितानि पदानि आधृत्य उदाहरणानुसारं प्रश्ननिर्माणं कुरुत–

उदाहरणम्– केशाः न प्रपतन्ति

प्रश्नः– के न प्रपतन्ति?

(क) शिरसः कपालानां बलं तैलमर्दनेन अभिवर्धते।

(ख) केशाः दीर्घाः भवन्ति।

(ग) दन्ताः क्षयं न यान्ति।

(घ) स्नेहार्द्रस्य शिरसः शूलं न जायते।

द्वितीयः अंशः

इन्द्रियाणि प्रसीदन्ति
सुत्वग्भवति चाननम्।
निद्रालाभः सुखं च स्यान
मूर्ध्नि तैलनिषेवणात्।।4।।

इदानीम् पुनः तैलाभ्यङ्गस्य अन्येषां लाभानां विषये द्वितीयम् अंशं बोधामः।

श्लोकः– 4

पदच्छेदः इन्द्रियाणि प्रसीदन्ति सुत्वक् भवति च आननम्।
निद्रालाभः सुखम् च स्यात् मूर्ध्नि तैलनिषेवणात्।

अन्वयः मूर्ध्नि तैलनिषेवणात् इन्द्रियाणि प्रसीदन्ति आननम् च सुत्वक् भवति सुखम् निद्रालाभः च स्यात्।

व्याख्या–

3.13

अस्तु, अस्य पद्यस्य भावार्थं विस्तरेण बोधामः। किं भवन्तः जानन्ति–

तैलनिषेवणात् इन्द्रियाणि कीदृशानि भवन्ति? तैलनिषेवणात् इन्द्रियाणि प्रसन्नानि सक्रियाणि दृढानि च भवन्ति।

आननं कीदृशं भवति? आननस्य त्वक् कोमलं कान्तियुक्तं च भवति।

शिरसि तैलमर्दनेन अन्य कः लाभः? निद्रायाः प्राप्तिः भवति। सुखम् अर्थात् सरलतया शीघ्रतया एव निद्रा आयाति।

भावः

शिरसि तैलाभ्यङ्गेन इन्द्रियाणि प्रसन्नानि सक्रियाणि च भवन्ति। आननस्य कान्तिः वर्धते। कृत्रिम–उपकरणानां च आवश्यकता एव न भवति। सुखपूर्वकं निद्रा भवति।



टिप्पणी

अधुना वयं **प चमं श्लोकं** पठामः तैलमर्दनस्य अन्यान् लाभान् च बोधामः।

श्लोकः– 5

पदच्छेदः सुस्पर्शोपचिताङ्गः (सुस्पर्श + उपचित + अङ्गः) च बलवान् प्रियदर्शनः।
भवति अभ्यङ्गनित्यत्वात् नरः अल्पजरः एव च।

सुस्पर्शोपचिताङ्गश्च बलवान्
प्रियदर्शनः।
भवत्यभ्यङ्गनित्यत्वान्नरोऽल्पजरः
एव च।।5।

अन्वयः अभ्यङ्गनित्यत्वात् नरः सुस्पर्शोपचिताङ्गः बलवान् प्रियदर्शनः अल्पजरः एव च भवति।

'सुस्पर्शोपचिताङ्गः' पदस्य कोऽर्थः? (सुस्पर्श + उपचिताङ्गः) सुखेन स्पृश्यानि = कोमलानि उपचितानि = दृढानि अङ्गानि यस्य सः।

सुस्पर्शोपचिताङ्गः कः भवति? यः नित्यं तैलाभ्यङ्गं करोति। नित्यं तैलमर्दनेन अङ्गानि कोमलानि भवन्ति। त्वक् च सुस्पर्शयोग्या भवति। सः नरः बलवान् कान्तिमान् च भवति।

'प्रियदर्शनः' पदस्य कोऽर्थः? 'प्रियं दर्शनं यस्य सः' अर्थात् सुन्दरः

'अल्पजरः' पदस्य कोऽभिप्रायः? अल्पा जरा यस्य सः अर्थात् अल्पवृद्धः = अर्थात् यः नरः नित्यं तैलमर्दनं करोति। सः सुन्दरः। दर्शनीयः भवति, सः शीघ्रं वृद्धः न भवति, चिरं युवा भवति इति।

भावः

यः नरः प्रतिदिनं तैलाभ्यङ्गं करोति तस्य शरीरं कोमलं पुष्टं च भवति। सः बलवान् सुन्दरशरीरः च जायते। सः विलम्बेन एव वृद्धः भवति।

अधुना एकम् अन्यं श्लोकं पठामः यस्मिन् पादयोः तैलमर्दनस्य लाभाः वर्णिताः।

श्लोकः– 6

पदच्छेदः जायते सौकुमार्यम् च बलम् स्थैर्यम् च पादयोः।
दृष्टिः प्रसादम् लभते मरुतः च उपशाम्यति।

जायते सौकुमार्यं न बलं
स्थैर्यं च पादयोः।
दृष्टिः प्रसादं लभते
मरुतश्चोपशाम्यति।।6।।

अन्वयः पादयोः (तैलाभ्यङ्गात्) सौकुमार्यम् बलम् स्थैर्यम् च जायते। दृष्टिः प्रसादम् लभते मरुतः च उपशाम्यति।

व्याख्या–

पादयोः तैलाभ्यङ्गात् किं भवति? पादयोः सौकुमार्यं कोमलता भवति। बलं शक्तिः स्थैर्यं स्थिरता च भवति। यथा वृक्षमूले जलसेचनेन समग्रः वृक्षः पत्रशाखादिभिः सह ऊर्जां लभते तथैव पादमूले तैलप्रयोगेन सर्वे स्नायवः पोषणं प्राप्नुवन्ति।

अन्यः को लाभः? पादयोः तैलनिषेवणात् दृष्टिः अपि निर्मला प्रसन्ना भवति। वायुजनित–रोगाः अपि उपशाम्यन्ति शान्ताः भवन्ति।

भावः

पादयोः तैलमर्दनेन पादौ कोमलौ बलयुक्तौ दृढौ च भवतः। नेत्रज्योतिः वर्धते। वातविकाराणां च उपशमः (नाशः) जायते। अतः तैलमर्दनं तु नित्यं कुर्यात्।

व्याकरणबिन्दवः

अत्र वयं पाठगतविविधव्याकरणबिन्दून् (सन्धिविच्छेदसमासमतुप्प्रत्ययादीन्) बोधामः।

सन्धिच्छेदः

चाननम् = च + आननम् = अ + आ = आ	दीर्घसन्धिः
सुस्पर्शोपचिताङ्गः = सुस्पर्श + उपचिताङ्गः = अ + उ = ओ	गुणसंन्धिः
भवत्यभ्यङ्गः = भवति + अभ्यङ्गः = इ + अ = य्	यणसन्धिः
सुत्वग्भवति = सुत्वक् + भवति = क् + भ = ग्भ	जश्त्वम्
स्यान्मूर्ध्नि = स्यात् + मूर्ध्नि = त् + म = न्म	त् – म्
नित्यत्वान्नरः = नित्यत्वात् + नरः = त् + न = न्न	त् – न्
नरोऽल्पजरः = नरः + अल्पजरः = अः + अ = ो ऽ	पूर्वरूपम्
मरुतश्च = मरुतः + च = : + च = श्च	विसर्गसन्धिः

1. यण्सन्धिः– यण् = य् व् र् ल् एते चत्वारः वर्णाः यण् कथ्यन्ते।

पूर्व वर्ण	उत्तर वर्ण	यण्	उदाहरणम्
1. इ/ई +	असमानस्वरः	= य्	(i) प्रति + एकम् = प्रत्येकम्
			(ii) भवति + अभ्यङ्गनित्यत्वात्= भवत्यभ्यङ्गनित्यत्वात्
			(iii) यदि + अपि = यद्यपि
2. उ/ऊ +	असमानस्वरः	= व्	(i) सु + आगतम् = स्वागतम्
			(ii) मधु + अरिः = मध्वरिः
3. ऋ/ॠ +	असमानस्वरः	= र्	(i) पितृ + आज्ञा = पित्राज्ञा
			(ii) धातृ + अंशः = धात्रंशः
4. ऌ +	असमानस्वरः	= ल्	ऌ + आकृतिः = लाकृतिः

2. गुणसन्धिः– अ (अर् अल्) ए, ओ

अ/आ + इ/ई = 'ए' भवति।

उदाहरणः– (i) देव + इन्द्रः = देवेन्द्रः

(ii) महा + ईशः = महेशः



अ/आ + उ/ऊ = ओ

उदाहरणः— (i) सूर्य + उदयः = सूर्योदयः

(ii) महा + ऊर्मिः = महोर्मिः

अ/आ + ऋ/ॠ = अर्

उदाहरणः— (i) देव + ऋषिः = देवर्षिः

(ii) महा + ऋषिः = महर्षिः

अ/आ + ऌ = अल्

उदाहरणः— तव + ऌकारः = तवल्कारः

3. पूर्वरूपसन्धिः—

यदि पदान्ते ए/ओ वर्णः भवेत् पश्चात् 'अ' ह्रस्व अकारः भवेत् तर्हि पूर्व—परयोः स्थाने ए + ऊ = 'ए', ओ + ऊ = ओ इति पूर्वरूपः एकादेशः भवति। अकारस्थाने च 'ऽ' चिह्नम् प्रयुज्यते।

उदाहरणः अन्ते + अपि = अन्तेऽपि

प्रभो + अत्र = प्रभोऽत्र

समस्तपदानां विग्रहः

समस्तपदानि	विग्रहः	समासनाम
निद्रालाभः	निद्रायाः लाभः	षष्ठीतत्पुरुषः
तैलनिषेवणात्	तैलस्य निषेवणात्	षष्ठीतत्पुरुषः
प्रियदर्शनः	प्रियं दर्शनं यस्य सः	बहुव्रीहिः
अल्पजरः	अल्पा जरा यस्य सः	बहुव्रीहिः
सुस्पर्शोपचिताङ्गः	सुस्पर्शानि उपचितानि अङ्गानि यस्य सः	बहुव्रीहिः

प्रत्ययप्रयोगः

बलवान्	बल + मतुप् प्रत्ययः	पु0 प्रथमाविभक्ति :	एकवचनम्

मतुप् प्रत्ययः

हिन्दीभाषायां 'वाला' इति अर्थे मतुप् प्रत्ययः प्रयुज्यते। 'मतुप्' इति प्रत्ययस्य 'मत्' इति शेषः भवति। यदि शब्दस्य अन्ते अ/आ भवति तर्हि मत् इति स्थाने 'वत्' भवति—

बल + मतुप् = बलवत्। बलवत् पदस्य रूपाणि पुल्लिङ्गे स्त्रीलिङ्गे नपुंसकलिङ्गे च द्रव्टव्यानि—

	पु.	स्त्री.	नपुं.
बल + मतुप् = बलवत्	बलवान्	बलवती	बलवत्
धन + मतुप् = धनवत्	धनवान्	धनवती	धनवत्
श्री + मतुप् = श्रीमत्	श्रीमान्	श्रीमती	श्रीमत्
हनु + मतुप् = हनुमत्	हनुमान्	हनुमती	हनुमत्

क्रियापदानि

प्रसीदन्ति	प्र + सद् = प्रसीद् धातुः	लट्लकारः	प्रथमपुरुषः	बहुवचनम्
स्यात्	अस् धातुः	विधिलिङ्	प्रथमपुरुषः	एकवचनम्
उपशाम्यति	उप + शम्	लट्लकारः	प्रथमपुरुषः	एकवचनम्
जायते	जन् (आत्मनेपद)	लट्लकारः	प्रथमपुरुषः	एकवचनम्
लभते	लभ् (आत्मनेपद)	लट्लकारः	प्रथमपुरुषः	एकवचनम्

सारः

शिरसि तैलनिषेवणात् इन्द्रियाणि प्रसन्नानि भवन्ति। निद्रा सरलतया आयाति। नित्यम् अभ्यङ्गात् नरः बलवान् प्रियदर्शनः च भवति। पादयोः तैलमर्दनेन पादौ दृढौ भवतः, दृष्टिः तीव्रा जायते, वायुजनितः रोगः च न भवति।

सिर पर नित्य तेल की मालिश करने से इन्द्रियाँ प्रसन्न होती हैं। चैन की नींद आती है। प्रतिदिन तेलमालिश से मनुष्य बलवान् और सुन्दर होता है। पैरों में तेल मलने से टांगें मजबूत होती हैं। नेत्रज्योति बढ़ती है तथा वायुजनित रोग नहीं होते।

पाठगतप्रश्नाः 3.2

1. अधोलिखितेषु अन्वयेषु रिक्तस्थानपूर्तिः क्रियताम्–

(क) अभ्यङ्गनित्यत्वात् (i) ..... सुस्पर्शोपचिताङ्गः (ii) ..... प्रियदर्शनः (iii) ..... एव (iv) ..... भवति।

(ख) पादयोः (तैलाभ्यङ्गात्) (i) ..... बलम् (ii) ..... च जायते। (iii) ..... प्रसादं लभते (iv) ..... च उपशाम्यति।

2. उपयुक्तम् उत्तरं चित्वा रिक्तस्थानेषु लिखत–

(क) ..... प्रसादं लभते। (भक्तिः / मुक्तिः / दृष्टिः)

(ख) पादयोः तैलाभ्यङ्गात् ..... उपशाम्यति। (बलम् / मरुतः / स्थैर्यम्)

(ग) मूर्ध्नितैलनिषेवणात् ..... स्यात्। (निद्रालाभः / विद्यालाभः / धनलाभः)

(घ) अभ्यङ्गनित्यत्वात् नरः ..... स्यात्। (कृशकायः / स्थूलः / बलवान्)

3. समस्तपदानि रचयत–

(क) निद्रायाः लाभः .....

(ख) प्रियं दर्शनं यस्य सः .....

(ग) अल्पा जरा यस्य सः .....

(घ) तैलस्य निषेवणात् .....

3.4 किम् अधिगतम्

- तैलाभ्यङ्गेन शरीराङ्गानि दृढानि भवन्ति। अतः तैलमर्दनं नित्यं कर्तव्यम्।
- शिरसि तैलनिषेवणात् शिरः शूलम् न जायते। केशाः च दृढमूलाः भवन्ति।
- पादयोः तैलमर्दनेन सौकुमार्यं, बलं स्थैर्यं च जायते।
- तैलाभ्यङ्गेन ओष्ठयोः स्फुटनं न भवति दन्ताश्च दृढमूलाः भवन्ति।
- 'मतुप्' (मत्) तद्धितप्रत्ययः अस्ति। 'अस्ति अस्य' इति विग्रहे 'मतुप्' भवति।

3.5 योग्यताविस्तारः

(क) कविपरिचयः

चरकः आयुर्वेस्य प्राचीनविद्वत्सु चरकः अन्यतमः अस्ति। सः राज्ञः कनिष्कस्य शासने राजवैद्यरूपेण उषितवान्। मूलतः तु अयं गान्धारवासी आसीत्। अस्य कालः ईसापूर्वं प्रथमशताब्दी इति मन्यते। चरकस्य यशः भारतात् बहिः अपि प्रसृतम्। कविराजचरकस्य विषये सत्यमुक्तम् – 'चरकस्तु चिकित्सते।'

ग्रन्थपरिचयः

चरकसंहिता चरकस्य आयुर्वेदीयः ग्रन्थः अस्ति। अयं सर्वप्रथमः सर्वश्रेष्ठः च कायचिकित्सायाः ग्रन्थः वर्तते। सहस्रवर्षेभ्यः आयुर्विज्ञानस्य मूलं स्रोतः चरकसंहिता एव

अस्ति। अयं ग्रन्थः अष्टभागेषु त्रिंशत्सु अध्यायेषु च विभक्तः। ग्रन्थे गद्यस्य पद्यस्य च उभयोः प्रयोगः कृतः। आयुर्वेदक्षेत्रे तु अयं ग्रन्थः ईदृशः लोकप्रियः जातः यत् अष्टभ्यां शताब्द्याम् एव अस्य अनुवादः अरबीभाषायां जातः। फारसीभाषायाम् अपि अनुवादः उपलभ्यते। पाठेऽस्मिन् प्रस्तुतः अंशः सूत्रस्थानस्य पंचम–अध्यायात् संकलितः।

भावविस्तारः

तैलमर्दनम्– न कर्णरोगाः वातोत्थाः नमन्याहनुसंग्रहः।
नोच्चैः श्रुतिर्न बाधिर्यं स्यान्नित्यं कर्णतर्पणात्।।

पादाभ्यङ्गः– खरत्वं स्तब्धता रौक्ष्यं श्रमः सुप्तिश्च पादयोः।
सद्य एवोपशाम्यन्ति पादाभ्यङ्गनिषेवणात्।।
न च स्याद् गृध्रसीवातः पादयोः स्फुटनं न च।
न शिरास्नायुसंकोचः पादाभ्यङ्गेन पादयोः।

(ख) भाषा विस्तारः

धातुरूपाणि

√लभ्–लट् लकारः (आत्मनेपदे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	लभते	लभेते	लभन्ते
मध्यमः पुरुषः	लभसे	लभेथे	लभध्वे
उत्तमः पुरुषः	लभे	लभावहे	लभामहे

अस् = लट् लकारः (परस्मैपदे)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	अस्ति	स्तः	सन्ति
मध्यमः पुरुषः	असि	स्थः	स्थ
उत्तमः पुरुषः	अस्मि	स्वः	स्मः

अस् = विधिलिङ् लकारः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	स्यात्	स्याताम्	स्युः
मध्यमः पुरुषः	स्याः	स्यातम्	स्यात
उत्तमः पुरुषः	स्याम्	स्याव	स्याम



अस् = लृट् लकारः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	भविष्यति	भविष्यतः	भविष्यन्ति
मध्यमः पुरुषः	भविष्यसि	भविष्यथः	भविष्यथ
उत्तमः पुरुषः	भविष्यामि	भविष्यावः	भविष्यामः

अस् = लोट् लकारः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	अस्तु	स्ताम्	सन्तु
मध्यमः पुरुषः	एधि	स्तम्	स्त
उत्तमः पुरुषः	असानि	असाव	असाम

अस् = लङ् लकारः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	आसीत्	आस्ताम्	आसन्
मध्यमः पुरुषः	आसीः	आस्तम्	आस्त
उत्तमः पुरुषः	आसम्	आस्व	आस्म

शब्दानां रूपाणि

हलन्तनपुंसकलिङ्गम् (सकारान्त)

मूलशब्दः	विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
शिरस्	प्रथमा	शिरः	शिरसी	शिरांसि
मनस्	द्वितीया	मनः	मनसी	मनांसि
नभस्	तृतीया	नभसा	नभोभ्याम्	नभोभिः
तपस्	चतुर्थी	तपसे	तपोभ्याम्	तपोभ्यः
यशस्	पंचमी	यशसः	यशोभ्याम्	यशोभ्यः
तेजस्	षष्ठी	तेजसः	तेजसोः	तेजसाम्
शिरस्	सप्तमी	शिरसि	शिरसोः	शिरस्सु
शिरस्	सम्बोधन	हे शिरः!	हे शिरसी!	हे शिरांसि!

नकारान्तपुल्लिंगशब्दानां रूपाणि

मूलशब्दः	विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
मूर्धन्	प्रथमा	मूर्धा	मूर्धानौ	मूर्धानः
मूर्धन्	द्वितीया	मूर्धानम्	मूर्धानौ	मूर्ध्नः
महिमन्	तृतीया	महिम्ना	महिमभ्याम्	महिमभिः
लघिमन्	चतुर्थी	लघिम्ने	लघिमभ्याम्	लघिमभ्यः
गरिमन्	पंचमी	गरिम्नः	गरिमभ्याम्	गरिमभ्यः
अश्वत्थामन्	षष्ठी	अश्वत्थाम्नः	अश्वत्थाम्नोः	अश्वत्थाम्नाम्
मूर्धन्	सप्तमी	मूर्ध्नि	मूर्ध्नोः	मूर्धसु
मूर्धन्	सम्बोधन	हे मूर्धन्!	हे मूर्धानौ!	हे मूर्धानः!

अनुरूपशब्दाः महिमन्, लघिमन्, गरिमन्, अश्वत्थामन्।

3.6 पाठान्तप्रश्नाः

1. क्रियापदानि चिनुत–
   (क) तैलप्रयोगेन पादयोः बलं जायते। .....
   (ख) दृष्टिः प्रसादं लभते। .....
   (ग) भवति अभ्यङ्गनित्यत्वात् नरः अल्पजरः। .....
   (घ) मूर्ध्नि तैलनिषेवणात् निद्रालाभः स्यात्। .....
   (ङ) मरुतश्चोपशाम्यति। .....
2. म जूषायां दत्तानां शब्दानां सहायतया तैलाभ्यङ्गस्य लाभान् षड्वाक्येषु वर्णयत–

   शिरसि, केशाः, मूर्ध्नि, इन्द्रियाणि, सुत्वक्, आननम्, नरः, बलवान्, पादयोः, स्थैर्यं, दृष्टिः, प्रसादम्, शिरःशूलं, प्रसीदन्ति, जायते, अभ्यङ्गेन, निद्रा, कृष्णाः, भवन्ति।

3. अधोलिखितेषु रिक्तस्थानेषु कोष्ठकात् चित्वा अव्ययपदानि लिखत–
   (न, च, नित्यं, एव, उच्चैः)
   (क) वृद्ध ..... शृणोति।
   (ख) ..... तैलाभ्यङ्गात् नरः अल्पजरः भवति।
   (ग) शिरसि तैलनिषेवणात् केशाः कृष्णाः दीर्घाः ..... भवन्ति।
   (घ) ईश्वरः ..... अस्माकं माता, पिता, बन्धुः सखा च अस्ति।



4. सन्धिं/सन्धिच्छेदं वा कुरुत–
   (क) भवति + अभ्यङ्गः .....
   (ख) दृढमूलाः + च .....
   (ग) च + उपशाम्यति .....
   (घ) ..... + ... स्नेहार्द्रः
   (ङ) ..... + ... चास्य
   (च) ..... + ... नरोऽल्पजरः
5. समस्तपदानां विग्रहं कृत्वा समासनाम अपि लिखत–
   (क) स्नेहाद्रशिरसः (ख) प्रियदर्शनः (ग) सुस्पर्शोपचिताङ्गः (घ) कण्ठशोषः
6. प्रदत्त–प्रकृति–प्रत्ययप्रयोगेन वाक्यपूर्तिं कुरुत–
   (क) (बल + मतुप्) ..... नरः शोभते।
   (ख) सा नारी (रूप + मतुप्) ..... अस्ति।
   (ग) (दान + मतुप्) ..... लक्ष्मीः धन्या।
   (घ) अत्र अयं (श्री + मतुप्) ..... कः आगतः?

3.7 उत्तराणि

बोधप्रश्नाः

1. (क) iii, (ख) iv, (ग) ii,
2. (क) iii, (ख) i, (ग) ii, (घ) v, (ङ) iv
3. (क) बलं, (ख) बलवान्, (ग) कृष्णा, (घ) शिरःशूलं, (ङ) स्थैर्यं।

पाठगतप्रश्नाः

3.1
1. (क) स्नेह + आर्द्रः, (ख) क्षयम् + यान्ति, (ग) दीर्घः + च,
   (घ) स्यात् + च (ङ) स्फुटनात् + भयम्
2. (क) v, (ख) i, (ग) ii, (घ) iii, (ङ) iv,
3. (i) शिरः शूलं न जायते (v) शिरः कपालानां बलं बर्धते।
   (ii) खालित्यं न भवति। (vi) केशाः दृढमूलाः भवन्ति।
   (iii) पालित्यं न भवति। (vii) केशाः दीर्घाः भवन्ति।
   (iv) केशाः न प्रपतन्ति (viii) केशाः कृष्णाः भवन्ति।
4. (क) शिरसः कपालानां बलं केन अभिवर्धते?
   (ख) केशाः कीदृशाः भवन्ति?

(ग) के क्षयं न यान्ति?

(घ) स्नेहार्द्रस्य शिरसः किं न जायते?

3.2 1. (क) i. नरः, ii. बलवान्, iii. अल्पजरः iv. च

(ख) i. सौकुमार्यं, ii. स्थैर्यं, iii. दृष्टिः iv. मरुतः

2. (क) दृष्टिः, (ख) मरुतः, (ग) निद्रालाभः, (घ) बलवान्

3. (क) निद्रालाभः, (ख) प्रियदर्शनः, (ग) अल्पजरः (घ) तैलनिषेवणात्

3.6 पाठान्तप्रश्नाः

1. (क) जायते, (ख) लभते, (ग) भवति, (घ) स्यात्, (ङ) उपशाम्यति
2. (i) शिरसि तैलाभ्यङ्गेन शिरःशूलं न जायते।

   (ii) केशाः दृढमूलाः, दीर्घाः कृष्णाः च भवन्ति।

   (iii). मूर्ध्नि तैलनिषेवणात् इन्द्रियाणि प्रसीदन्ति, आननं सुत्वक् भवति निद्रा च सरलतया आगच्छति।

   (iv) नित्यम् अभ्यङ्गेन नरः बलवान् भवति।

   (v) अभ्यङ्गेन पादयोः बलं वर्धते।

   (vi). अनेन दृष्टिः प्रसादं लभते।
3. (क) उच्चैः, (ख) नित्यं, (ग) च, (घ) एव
4. (क) भवत्यभ्यङ्गः (ख) दृढमूलाश्च (ग) चोपशाम्यति (घ) स्नेह + आर्द्रः

   (ङ) च + अस्य (च) नरः + अल्पजरः।
5. (क) स्नेहेन आर्द्रं शिरः यस्य सः (बहुव्रीहिः)

   (ख) प्रियं दर्शनं यस्य सः (बहुव्रीहिः)

   (ग) सुखेन स्पृश्यानि उपचितानि अङ्गानि यस्य सः (बहुव्रीहिः)

   (घ) कण्ठस्य शोषः (षष्ठी त.)
6. (क) बलवान् (ख) रूपवती (ग) दानवती (घ) श्रीमान्

309sk04

4

वाचां मण्डनं सत्यम्

भवान् जानाति एव यत् संसारे ज्ञानस्य प्राप्तिः प्रश्नमाध्यमेनैव भवति। यदा कोऽपि प्रश्नः मनसि समायाति तदा वयं तस्य प्रश्नस्य उत्तरं ज्ञातुमिच्छामः। यदा उत्तरं प्राप्यते तदा तस्य उपरि चिन्तनं भवति। ''वादे वादे जायते तत्त्वबोधः'' इत्यपि कथ्यते। यथा यथा वयं चिन्तनं कुर्मः तथा तथा अस्माकं ज्ञाने वृद्धिः भवति। उपनिषत्सु अपि प्रश्नमाध्यमेन ज्ञानं प्रदत्तम् अस्ति। भगवता आदिशंकराचार्येण अपि, स्वकीये ग्रन्थे 'प्रश्नोत्तरमालिकायाम्' अस्मभ्यं सुन्दरं ज्ञानं दत्तम्। तस्मात् ग्रन्थात् एव केचन प्रश्नाः तेषाम् उत्तराणि च अस्मिन् पाठे संकलितानि।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- जीवने अपेक्षितानां मूल्यानां वर्णनं कर्तुं समर्थः भविष्यति;
- सज्जनानां गुणान् लेखितुं क्षमः भविष्यति;
- उत्तराणि अधिकृत्य सम्बद्धप्रश्नान् लेखितुं शक्तः भविष्यति;
- 'मोऽनुस्वारः' इति नियमस्य उदाहरणानि चेष्यति;
- विशेषणपदानां विलोमपदानि लेखितुं सक्षमः भविष्यति;
- वाक्येषु प्रयुक्तानि तत्पुरुष, कर्मधारय–बहुव्रीहिसमस्तपदानि चेष्यतिं;
- जश्त्व–श्चुत्वसन्धिं कर्तुं शक्ष्यति;
- विसर्गस्थाने उत्वं, रत्वं, सत्वं च कर्तुं शक्ष्यति;
- त्व–तल् भाववाचकप्रत्यययोः प्रयोगं करिष्यति;
- स्पृह् धातुयोगे चतुर्थी–उपपदविभक्तेः प्रयोगं करिष्यति।

क्रियाकलापः

भवन्तः जानन्ति एव यत् ईश्वरः तस्य एव सहायकः यः उद्यमशीलः भवति। एवमेव सदा सज्जनानां सङ्गतिः करणीया। गुरुजनः सदा सम्माननीयः। ईदृशाः विषयाः एव अत्र प्रश्नोत्तररूपेण प्रदत्ताः सन्ति। तेषां सम्यक् मेलनं कुर्वन्तु–

क (प्रश्नाः)	ख (उत्तराणि)
यथा	
(क) अस्माभिः प्रातः कदा उत्थातव्यम्?	(i) गुरुजनानाम्
(ख) कस्मै भोजनं दातव्यम्?	(ii) ब्राह्ममुहूर्ते
(ग) विद्यालयं कदा गन्तव्यम्?	(iii) संस्कृतिः
(घ) कैः सह संगतिः करणीया?	(iv) यथासमयम्
(ङ) ईश्वरः कस्य सहायकः?	(v) सज्जनैः
(च) केषां सम्मानः करणीयः?	(vi) उद्यमशीलस्य
(छ) स्वर्गादपि गरीयसी का?	(vii) वृक्षाणाम्
(ज) भारतस्य प्रतिष्ठा का?	(viii) बुभुक्षिताय
(झ) केषां संरक्षणं करणीयम्?	(ix) माता

4.1 मूलपाठः

वाचां मण्डनं सत्यम्

सम्प्रति पाठं पठामः

पातुं कर्णाञ्जलिभिः किममृतमिह युज्यते सदुपदेशः
किं गुरुताया मूलं यदेतदप्रार्थनं नाम।।1।।

किं मरणं मूर्खत्वं कि चानर्घं यदवसरे दत्तम्।
आमरणात्किं शल्यं प्रच्छन्नं यत्कृतं पापम् ।।2।।

दानं प्रियवाक्यसहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम्।
वित्तं त्यागसमेतं दुर्लभमेतच्चतुर्भद्रम् ।।3।।

किं शोच्यं कार्पण्यं सति विभवे किं प्रशस्तमौदार्यम्।
कः पूज्यो विद्वद्भिः स्वभावतः सर्वदा विनीतो यः।।4।।

शब्दार्थाः

पातुम् = पीने के लिए
कर्णाञ्जलिभिः = कर्णरूपी अञ्जलियों से,
इह = इस संसार में,
युज्यते = उचित है, ठीक है
सदुपदेशः = सज्जनों का उपदेश,
गुरुतायाः = बड़प्पन का,
अप्रार्थनम् = न मांगना,
अनर्घम् = अमूल्य,
आमरणात् = मरणपर्यन्त,
प्रच्छन्नम् = गुप्त रूप से,
शल्यम = काँटा,
पुंसा = मनुष्य के द्वारा,
अगर्वम्=गर्वरहित,
चतुर् = चार



कः कुलकमलदिनेशः सति गुणविभवेऽपि यो नम्रः।
कस्य वशे जगदेतत्प्रियहितवचनस्य धर्मनिरतस्य।।5।।

कस्मै स्पृहयति कमला त्वनलसचित्ताय नीतिवृत्ताय।
त्यजति च कं सहसा द्विजगुरुसुरनिन्दाकरं च सालस्यम्।।6।।

कि सम्पाद्यं मनुजैर्विद्या वित्तं बलं यशः पुण्यम्।
किं सर्वगुणविनाशी लोभः शत्रुश्च कः कामः।।7।।

को वर्धते विनीतः को वा क्षीयेत यो दृप्तः।
को न प्रत्येतव्यो ब्रूते यश्चानृतं शश्वत् ।।8।।

किं दानमनाकाक्षं किं मित्रं यो निवारयति पापम्।
कोऽलङ्कारः शीलं किं वाचां मण्डनं सत्यम्।।9।।

भद्रम् = कल्याणकारी
सति विभवे = ऐश्वर्य होने पर
गुणविभवे सति = गुणों की सम्पत्ति होने पर भी,
स्पृहयति = इच्छा करती है,
नीतिवृत्ताय = सदाचारी के लिए,
सम्पाद्यम् = करना चाहिए,
मनुजैः = मनुष्यों के द्वारा,
वर्धते = उन्नति करता है,
हीयेत = घटे, क्षीण होवे,
दृप्तः = अभिमानी,
प्रत्येतव्यः = विश्वास के योग्य,
शश्वत् = सदैव,
अनाकांक्षं = बदले में कुछ इच्छा किये बिना
निवारयति = दूर करता है,
वाचाम् = वाणियों की,
मण्डनम् = शोभा

4.2 बोधप्रश्नाः

भवद्भिः मूलपाठः पठितः। अत्र पाठम् आधृत्य बोधप्रश्नाः दत्ताः सन्ति।

1. पाठात् चित्वा प्रश्नान् उत्तरत–

यथा	किं मरणम्?	मूर्खत्वम्
(क)	किं शोच्यम्?	————————
(ख)	कः कुलकमलदिनेशः?	————————
(ग)	किं सम्पाद्यं मनुजैः?	————————
(घ)	कः वर्धते?	————————
(ङ)	कः सर्वगुणविनाशी?	————————

2. श्लोकांशान् रेखया योजयत

(क) कः पूज्यो विद्वद्भिः?	(i) ब्रूते यश्चानृतं शश्वत्
(ख) कस्मै स्पृहयति कमला	(ii) दुर्लभमेतच्चतुर्भद्रम्।
(ग) को न प्रत्येतव्यो	(iii) ज्ञानमगर्वं क्षमान्वितं शौर्यम्।

(घ) दानं प्रियवाक्यसहितं (iv) प्रियहितवचनस्य धर्मनिरतस्य।
(ङ) कस्य वशे जगदेतत् (v) स्वभावतः सर्वदा विनीतो यः।
(च) वित्तं त्यागसमेतम् (vi) किं वाचां मण्डनं सत्यम्।
(छ) किं मरणं मूर्खत्वम् (vii) किं चानर्घं यदवसरे दत्तम्
(ज) कोऽलंकारः शीलम् (viii) त्वनलसचिताय नीतिवृत्ताय

3. विलोमपदानि मेलयत (विपरीतार्थकः शब्दः एव विलोमशब्दः कथ्यते)

यथा सुखम्	**दुःखम्**
(क) विनीतः	(i) औदार्यम्
(ख) कार्पण्यम्	(ii) पापम्
(ग) पुण्यम्	(iii) त्यागः
(घ) अप्रार्थनम्	(iv) शत्रुः
(ङ) मित्रम्	(v) दृप्तः
(च) लोभः	(vi) प्रार्थनम्

4.3 अधुना अवगच्छामः

प्रथमः अंशः

श्लोकः— 1

पातुं कर्णाञ्जलिभिः
किममृतमिह युज्यते सदुपदेशः
किं गुरुताया मूलं
यदेतदप्रार्थनं नाम।।1।।

पदच्छेदः पातुम् कर्णाञ्जलिभिः किम् अमृतम् इह युज्यते सदुपदेशः किम् गुरुतायाः मूलम् यत् एतत् अप्रार्थनम् नाम।

अन्वयः इह कर्णाञ्जलिभिः पातुम् किम् अमृतम् युज्यते? सदुपदेशः। गुरुतायाः मूलम् किम्? यत् एतत् अप्रार्थनम् नाम।

भवन्तः मातापित्रोः गुरोः च मुखात् यदा कदा सदुपदेशं श्रुतवन्तः। अत्रापि विविध जीवनमूल्यानां संकेतः कृतः। अस्मिन् पद्ये प्रश्नद्वयम् वर्तते। एवं हि प्रथमः प्रश्नः कः? अंजलिसदृशैः कर्णैः अस्मिन् संसारे किम् अमृतं पातुं युज्यते?

तस्य किम् उत्तरम्? सदुपदेशः, सताम् सज्जनानाम् उपदेशः। यतः सज्जनानाम् उपदेशः जीवनाय कल्याणकारी भवति।

द्वितीयः प्रश्नः कः? गुरुतायाः मूलं किम्?

'गुरुता' पदस्य कः अर्थः? उच्चता, महत्ता, व्यक्तेः गौरवम् इति।



किम् उत्तरम् दत्तम्? तत् अप्रार्थनम् नाम।

अप्रार्थनम् इति किम्? न प्रार्थना, न याचना, कम् अपि का अपि याचना न करणीया।

भावार्थः– अस्माकं कर्णाः सन्ति। ते कर्णाः अञ्जलिवत् सन्ति। यथा वयम् अञ्जलिभिः जलं पिबामः तथैव कर्णैः सज्जनानाम् उपदेशाः श्रोतव्याः। एवमेव यदा कश्चिद् याचनां करोति, तदा तस्य महत्त्वं क्षीयते। अतएव हीनः भूत्वा याचना न करणीया।

श्लोकः– 2

इदानीं **द्वितीयं श्लोकं** बोधामः।

पदच्छेदः– किम् मरणम् मूर्खत्वम् किम् च अनर्घम् यत् अवसरे दत्तम्। आमरणात् किम् शल्यम् प्रच्छन्नम् यत् कृतम् पापम्।

अन्वयः– मरणम् किम्? मूर्खत्वम्। किम् च अनर्घम्, यत् अवसरे दत्तम्। आमरणात् किम् शल्यम्, यत् प्रच्छन्नम् कृतम् पापम्।

अस्मिन् पद्यांशे त्रयः प्रश्नाः सन्ति। मरणं किम्? मूर्खत्वम् एव मरणम्, मृत्युतुल्यम्। अज्ञानं मनुष्याय मृत्युवत् वर्तते।

अमूल्यं किम्? यत् किमपि अवसरे दत्तम् अर्थात् यत् किमपि यथासमयम् आवश्यकतानुसारं दीयते तदेव अमूल्यम्। यदा कृषिः शुष्का जाता तदा वृष्टेः कः लाभः?

'आमरणात् शल्यं किम्?' अर्थात् मृत्युपर्यन्तं किं रूपं शल्यम् (कण्टकम्) वेदनाप्रदं भवति? एतस्य उत्तरम् अस्ति ''यत् पापं प्रच्छन्नं कृतम्'' अर्थात् यत् पापं गुप्तरूपेण कृतं तत् पापं मृत्युपर्यन्तं वेदनां जनयति।

भावार्थः– यस्य समीपे ज्ञानं नास्ति, यः मूर्खः अस्ति तस्य जीवनं व्यर्थं भवति, सः संसारे किमपि कर्तुं न शक्नोति। अमूल्यं वस्तु तदेव भवति यत् समयेन दीयते। यदि कश्चिद् पिपासार्तः तस्मै जलप्रदानस्य महत्त्वं वर्तते परन्तु यस्य पिपासा शान्ता जाता तस्मै जलप्रदानेन को लाभः। एवमेव मृत्युपर्यन्तं कष्टकरं किं भवति, यत् किमपि पापं गुप्तरूपेण कृतम्। यदि कश्चित् अन्यस्य हत्यां करोति केनापि दृष्टमपि न स्यात् तत्पापं तस्य कृते शल्यवत्, कण्टकवत् वेदनां जनयति।

श्लोकः– 3

इदानीं **तृतीयं श्लोकं** बोधामः

पदच्छेदः– दानम् प्रियवाक्यसहितम् ज्ञानम् अगर्वम् क्षमान्वितम् शौर्यम्। वित्तम् त्यागसमेतम् दुर्लभम् एतत् चतुर्भद्रम्।

अन्वयः– एतत् चतुर्भद्रं दुर्लभम्– प्रियवाक्यसहितम् दानम्, अगर्वम् ज्ञानम्, क्षमान्वितम् शौर्यम्, त्यागसमेतम् वित्तम्।

किं मरणं मूर्खत्वं
कि चानर्घं यदवसरे दत्तम्।
आमरणात् किं शल्यं
प्रच्छन्नं यत्कृतं पापम्।।2।।

दानं प्रियवाक्यसहितं
ज्ञानमगर्वं क्षमान्वितं शौर्यम्।
वित्तं त्यागसमेतं
दुर्लभमेतच्चतुर्भद्रम्।।3।।

भवन्तः अपि जानन्ति यत् 'दानम्, ज्ञानम्, शौर्यम् धनं च' एते चत्वारः विशिष्टाः गुणाः सर्वत्र दुर्लभाः। प्रथमः गुणः कः? दानम्। कीदृशम् दानम्? प्रियवाक्यसहितं, प्रेम्णा दत्तं दानम्, श्रद्धया दत्तं दानम्। द्वितीयः गुणः कः? ज्ञानम्। कीदृशं ज्ञानम्? अगर्वम्, गर्वरहितम्। तृतीयः दुर्लभः गुणः कः? शौर्यम्। कीदृशं शौर्यम्? क्षमायुक्तम्। चतुर्थः गुणः कः? धनम्, यत् दानयुक्तं स्यात्।

भावार्थः मानवेषु एते चत्वारः गुणाः दुर्लभाः सन्ति। जनाः दानं कुर्वन्ति किन्तु अंहकारपूर्वकम् आत्मानं 'दानी' इति मत्वा दानं कुर्वन्ति। अतः प्रथमः गुणः अस्ति प्रियवाक्यैः मधुरवाक्यैः दानम्। द्वितीयः गुणः वर्तते नम्रतायुक्तं ज्ञानम्। प्रायः येषां समीपे किंचिन्मात्रं ज्ञानं भवति ते आत्मानं सर्वज्ञाः इति मन्यन्ते अतः अभिमानरहितं ज्ञानं द्वितीयः गुणः अस्ति। तृतीयः गुणः अस्ति क्षमासहिता वीरता। प्रायः ये वीराः भवन्ति ते क्रूराः अत्याचारिणः भवन्ति परन्तु वीरता क्षमया युक्ता भवेत्। 'क्षमा शक्तस्य भूषणम्' इत्यपि उच्यते। ये जनाः धनिनः भवन्ति ते दानं न कुर्वन्ति परन्तु धनस्य उपयोगः तु दाने एव अस्ति।

व्याकरणबिन्दवः

भवन्तः व्य×जनसन्धेः विषये पूर्वकक्षासु पठितवन्तः एव। अत्र पुनः जशत्व–श्चुत्व सन्धेः उदाहरणानि पश्यामः।

व्यंजनसन्धेः उदाहरणानि

जश्त्वसन्धिः – तृतीयाक्षरस्य नियमः स्वरपरे वर्गस्य प्रथमाक्षरस्य स्थाने तृतीयः वर्णः भवति। (झलां जशोऽन्ते)

यथा–सत्+उपदेशः	= सदुपदेशः	त् + उ	= दु
यत्+एतत्	= यदेतत्	त् + ए	= दे
यदेतत्+अप्रार्थनम्	= यदेतदप्रार्थनम्	त् + अ	= द
यत् + अवसरे	= यदवसरे	त् + अ	= द
एतत्+चतुर्भद्रम्	= एतच्चतुर्भद्रम्	त्+च	= च्च

श्चुत्वसन्धिः – चकारयोगे त् वर्णस्य च् वर्णः भवति। (स्तोः श्चुनाश्चुः)

यथा– तत् + चित्रम् = तच्चित्रम्

समस्तपदानां विग्रहाः

कर्मधारयः– विशेषण–विशेष्यपदयोः समासः। उपमान–उपमेयपदयोः समासः।

यथा– सत्यम् वाक्यम् = सत्यवाक्यम्
बालः मृगः = बालमृगः



उपमान–उपमेयपदे

घन इव श्यामः = घनश्यामः

पुरुषः सिंहः इव = पुरुषसिंहः

अत्र उपमाने एव– घनः, सिंहः च, उपमेयौ च श्यामः, पुरुषः इति।

कर्णः अंजलिः इव	= कर्णाञ्जलिः ताभिः	कर्मधारयः
प्रियं वाक्यम्	= प्रियवाक्यम्	कर्मधारयः
न प्रार्थनम् इति	= अप्रार्थनम्	नञ्तत्पुरुषः
न अर्घम् इति	= अनर्घम्	नञ्तत्पुरुषः
सताम् उपदेशः इति	= सदुपदेशः	षष्ठीतत्पुरुषः
प्रियवाक्येन सहितम्	= प्रियवाक्यसहितम्	तृतीयातत्पुरुषः
सत्येन अन्वितम्	= सत्यान्वितम्	तृतीयातत्पुरुषः
क्षमया अन्वितम्	= क्षमान्वितम्	तृतीयातत्पुरुषः
त्यागेन समेतम्	= त्यागसमेतम्	तृतीयातत्पुरुषः

तत्पुरुषः – उत्तरपदप्रधानः भवति। द्वितीयाविभक्तितः सप्तमीविभक्तिपर्यन्तं भवति।

यथा–	ग्रामम् गतः	= ग्रामगतः	(द्वि. त.)
	मुनिना रचितम्	= मुनिरचितम्	(तृ. त.)
	पाकाय शाला	= पाकशाला	(च. त.)
	सिंहात् भयम्	= सिंहभयम्	(पं. त.)
	रामस्य चरितम्	= रामचरितम्	(ष. त.)
	क्रीडायां निपुणः	= क्रीडानिपुणः	(स.त.)

नञ् तत्पुरुषः – नञ् (न) पदेन सह समासः 'नञतत्परुषः' कथ्यते।

यथा–	न धर्मः	=	अधर्मः
	न उत्तीर्णः	=	अनुत्तीर्णः

तद्धितप्रत्ययप्रयोगः– त्व, तल् प्रत्ययौ भाववाचकप्रत्ययौ। 'त्व' प्रत्ययान्तशब्दः सदा नपुंसकलिङ्गः, तल् प्रत्ययान्तशब्दः स्त्रीलिङ्गः भवति।

यथा–गुरुता	गुरु+तल्,	गुरुत्वम्	(गुरु + त्व)
लघुता	लघु+तल्,	लघुता	(लघु + त्व)

कृत्प्रतयय–प्रयोगः–

पातुम्	पा+तुमुन्	पातुम्	अव्ययम्
दत्तम्	दा+क्त	नपुं. प्र. ए. व.	
कृतम्	कृ+क्त	नपुं. प्र. ए. व.	

प्रच्छन्नम्	प्र+छद्+क्त	नपुं. प्र. ए. व.
जितम्	जि+क्त	नपुं. प्र. एक व.

विभक्तिप्रयोगः

द्वितीयान्तपदानि

कम्	'किम्'	द्वितीया	एकवचनम्
अधमम्	'अधम'	द्वितीया	एकवचनम्
पापम्	'पाप'	द्वितीया	एकवचनम्

तृतीयान्तपदानि

शब्दः	**मूलशब्दः**	**विभक्तिः**	**वचनम्**
कर्णाञ्जलिभिः	कर्णांजलि	तृतीया	बहुवचनम्
पुंसा	पुंस्	तृतीया	एकवचनम्

षष्ठ्यन्तपदानि

गुरुतायाः	गुरुता	षष्ठी	एकवचनम्

सप्तम्यन्तपदानि

अवसरे	अवसर	सप्तमी	एकवचनम्

भावार्थः

कानों से हमें सज्जनों के उपदेश सुनने चाहिए, किसी से मांगने में अपनी प्रतिष्ठा की हानि होती है। ज्ञान ही जीवन है। मूर्खता मृत्यु के समान है। अमूल्य वस्तु वही है जो समय पर दी जाए। यदि हम छिप कर कोई पाप करते हैं तो वह पाप मृत्युपर्यन्त दुःखदायी होता हैं। संसार में चार गुण बहुत ही दुर्लभ हैं 'प्रिय वचनों सहित दान, अभिमान रहित ज्ञान, क्षमा से युक्त वीरता और त्याग से युक्त धन।'

पाठगतप्रश्नाः 4.1

1. विशेषणानि विशेष्यैः सह योजयत

'अ'	**'ब'**
विशेषणानि	**विशेष्याणि**
(क) प्रच्छन्नम्	(i) शौर्यम्
(ख) अगर्वम्	(ii) पापम्
(ग) क्षमान्वितम्	(iii) ज्ञानम्



2. प्रश्नान् उत्तरत

(क) अनर्थं किम्?

(ख) दानम् किम्?

(ग) किं पातुं युज्यते?

(घ) कीदृशं वित्तं दुलर्भम्?

(ङ) शल्यवत् किं पीडयति?

3. विग्रहान् योजयित्वा समस्तपदानि रचयत

(क) प्रियं वाक्यम् ——————————

(ख) त्यागेन समेतम् ——————————

(ग) क्षमया अन्वितम् ——————————

(घ) अंजलिः इव कर्णः ——————————

(ङ) न प्रार्थनम् इति ——————————

द्वितीयः अंशः

श्लोकः – 4

किं शोच्यं कार्पण्यं सति
विभवे किं प्रशस्तमौदार्यम्।
कः पूज्यो विद्वद्भिः स्वभावतः
सर्वदा विनीतो यः।।4।।

पदच्छेदः– किम् शोच्यम् कार्पण्यम्, सति विभवे किं प्रशस्तम् औदार्यम्। कः पूज्यः विद्वद्भिः, स्वभावतः सर्वदा विनीतः यः।

अन्वयः– शोच्यम् किम्? कार्पण्यम्। विभवे सति किं प्रशस्तम्? औदार्यम्। विद्वद्भिः कः पूज्यः? यः सर्वदा स्वभावतः विनीतः।

जीवने शोच्यं किम्? कार्पण्यं, कृपणता, उदारतायाः अभावः। तदेव शोचनीयम्।

विभवे सति किं प्रशस्तम्? औदार्यम्, उदारता। उदारता एव प्रशंसनीया।

कदा औदार्यं प्रशस्तम्? विभवे सति ऐश्वर्ये सति

कः पूज्यः? यः विनीतः (विनम्रः) सः विद्वद्भिः पण्डितैः, विद्वज्जनैः पूज्यः भवति।

अर्थात् यः सर्वदा = सर्वासु अवस्थासु स्वभावतः = प्रकृत्या एव नम्रतायुक्तः भवेत् सः विद्वद्भिः प्रशंसनीयः सम्माननीयः भवति।

भावार्थः– प्रायः जनाः धनिकाः भूत्वा अपि ऐश्वर्यशालिनः भूत्वा अपि कस्मैचित् दानं न कुर्वन्ति न च सहायतां कुर्वन्ति। अतः कृपणता निन्द्या भवति उदारता च स्तुतियोग्या । विद्वज्जनाः कं पूजयन्ति इति प्रश्नस्य उत्तरे कथितम् यत् यः मनुष्यः सर्वदा एव स्वभावतः एव विनम्रः भवति स एव विद्वज्जनैः पूज्यः। ''भवन्ति नम्राः तरवः फलोद्गमैः।''



टिप्पणी

कः कुलकमलदिनेशः सति
गुणविभवेऽपि यो नम्रः।
कस्य वशे जगदेतत्
प्रियहितवचनस्य धर्मनिरतस्य।।5।।

श्लोकः– 5

पदच्छेदः– कः कुलकमलदिनेशः सति गुणविभवे अपि यः नम्रः। कस्य वशे जगत् एतत् प्रियहितवचनस्य धर्मनिरतस्य।

अन्वयः– कुलकमलदिनेशः कः? गुणविभवे अपि सति यः नम्रः। एतत् जगत् कस्य वशे? प्रियहितवचनस्य धर्मनिरतस्य।

अस्मिन् पद्यांशे प्रश्नद्वयम् अस्ति।

कुलकमलदिनेशः कः? यः नम्रः। गुणविभवे सति अपि। गुणानां बाहुल्ये अपि। नम्रजनेन एव कुलस्य कमलं विकसति।

एतत् जगत् कस्य वशे अस्ति? यस्य वचनानि प्रियाणि हितकराणि च भवन्ति। सः प्रियहितवचनः नरः धर्मे निरतः भवेत्।

भावार्थः– कुले अनेके जनाः सन्ति। सूर्यः कमलानि विकासयति। तथैव यः गुणैः सम्पन्नः अपि अस्ति, विनीतः स नरः परिवारस्य सर्वेषां सदस्यानां विकासं करोति। स एव पूज्यः। वाणी एव मनुष्यस्य सर्वोत्तमं भूषणम्। यः नरः प्रियं हितकरं च वचनं ब्रवीति, धर्मे च निरतः सः एव संसारस्य उपरि राज्यं करोति।

कस्मै स्पृहयति कमला
त्वनलसचित्ताय नीतिवृत्ताय।
त्यजति च कं सहसा
द्विजगुरुसुरनिन्दाकरं च
सालस्यम्।।6।।

श्लोकः – 6

इदानीं **षष्ठं श्लोकं** बोधामः

पदच्छेदः– कस्मै स्पृहयति कमला तु अनलसचित्ताय नीतिवृत्ताय। त्यजति च कम् सहसा द्विजगुरुसुरनिन्दाकरम् च सालस्यम्।

अन्वयः– कमला तु कस्मै स्पृहयति, अनलसचित्ताय नीतिवृत्ताय। कम् च सहसा त्यजति, द्विजगुरुसुरनिन्दाकरं सालस्यम् (च)।

अस्मिन् पद्यांशे अपि प्रश्नद्वयम् एव।

कमला इति का? कमला इति लक्ष्मीः

सा कस्मै स्पृहयति? अनलसचित्ताय, आलस्यरहिताय मनुष्याय। नीतिवृत्ताय, नीतिपूर्णम् आचरणं यस्य तस्मै।

कमला कं त्यजति? द्विजगुरुसुरनिन्दाकरम् अर्थात् विदुषां गुरूणां देवतानां च निन्दाकारकम्।

अन्यं कं त्यजति? आलस्येन सह विद्यमानः यः तम् आलस्ययुक्तं जनम्।

भावार्थः– कः लक्ष्मीं प्राप्नोति इति प्रश्ने कृते यः आलस्यं न करोति, नीतेः पालनं करोति, धर्माचरणं करोति। लक्ष्मीः कं सहसा त्यजति इति प्रश्नस्य उत्तरे शंकराचार्यः वदति यः मनुष्यः विद्वज्जनानां गुरूणां देवतानां निन्दां करोति, आलस्यं च करोति लक्ष्मीः तस्य परित्यागं करोति। परनिन्दा न करणीया। उक्तं च ''उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः''



व्याकरणबिन्दवः

विभक्तिप्रयोगः

विभवे सति भावे सप्तमी विभक्तिः, यदा विभवः भवति तदा।

गुणविभवे सति भावे सप्तमी विभक्तिः, गुणानां विभवः यदा भवति तदा।

स्पृह् धातोः योगे चतुर्थीविभक्तिः भवति।

(i) कमला कस्मै स्पृहयति?

(ii) कमला अनलसाय स्पृहयति।

(iii) कमला नीतिवृत्ताय स्पृहयति।

सन्धिप्रयोगः

(क) संयोगः अनुस्वारप्रयोगः च

प्रशस्तम् औदार्यम् = प्रशस्तमौदार्यम् (अत्र मकारस्य अनुस्वारः न जातः) यतः अत्र वर्णानां संयोगः एव न तु सन्धिः।

कम् सहसा = कं सहसा

(यदा परपदे स्वरः भवति तदा मकारस्य अनुस्वारः न भवति किन्तु यदि व्यंजनं भवति तदा मकारस्य स्थाने अनुस्वारः भवति।)

समस्तपदानां विग्रहाः प्रथमं हि बहुव्रीहि–समासविषये सम्यक् पठामः।

बहुव्रीहिः अन्यपदार्थप्रधानः बहुव्रीहिः कथ्यते।

यथा– दश आननानि यस्य सः।

पाठगतसमस्त पदानां विग्रहाः

दिनानाम् ईशः	= दिनेशः	षष्ठीतत्पुरुषः
कुलस्य कमलानां दिनेशः	= कुलकमलदिनेशः	षष्ठीतत्पुरुषः
प्रियं च हितं च	= प्रियहितम्	द्वन्द्वः
प्रियहितं वचनम्	= प्रियहितवचनम्	कर्मधारयः
प्रियहितवचनं यस्य तस्य	= प्रियहितवचनस्य	बहुव्रीहिः
अनलसचित्तं यस्य तस्मै	= अनलसचित्ताय	,,
धर्मे निरतः	= धर्मनिरतः	सप्तमीतत्पुरुषः
द्विजः च गुरवः च सुराः च	= द्विजगुरुसुराः	द्वन्द्वः
द्विजगुरुसुराणां निन्दा	= द्विजगुरुसुरनिन्दा	षष्ठीतत्पुरुषः
द्विजगुरुसुरनिन्दां करोति इति	= द्विजगुरुसुरनिन्दाकरः तम्।	उपपदतत्पुरुषः
आलस्येन सह विद्यमानः तम्	= सालस्यम्	सहपूर्वपदबहुव्रीहिः

भावार्थः– संसार में विनम्रता बहुत बड़ा गुण है। ऐश्वर्ययुक्त होने के साथ–साथ मनुष्य को उदार भी होना चाहिए। मधुर और हितकारी वचन बोलने वाला तथा धर्म में लगा व्यक्ति संसार को भी वश में कर लेता है। आलस्य और परनिन्दा बहुत बड़े दुर्गुण हैं।

पाठगतप्रश्नाः 4.2

1. अधोलिखितानां प्रश्नानाम् उत्तरं लिखत

(क) शोच्यं किम्? ————————————

(ख) प्रशस्तं किम्? ————————————

(ग) पूज्यः कः? ————————————

(घ) कः कुलकमलदिनेशः? ————————————

(ङ) एतत् जगत् कस्य वशे अस्ति? ————————————

(च) कमला कं त्यजति? ————————————

2. विलोमपदानि मेलयत

(क) शोच्यम्	(i) औदार्यम्
(ख) कार्पण्यम्	(ii) द्विजगुरुसुरप्रशंसाकरम्
(ग) अलसचित्ताय	(iii) प्रशस्यम्
(घ) निरालस्यम्	(iv) निरलसचित्ताय
(ङ) द्विजगुरुसुरनिन्दाकरम्	(v) त्यजति
(च) स्पृहयति	(vi) सालस्यम्

3. समस्तपदानि रचयत

(क) (i) प्रियं च हितं च = ——————————

(ii) प्रियं च हितं च वचनम् = ——————————

(iii) प्रियहितवचनं यस्य तस्य = ——————————

(ख) (i) धर्मे निरतः = ——————————

(ग) (i) न अलसम् = ——————————

(ii) आलस्येन सह विद्यमानः तम् = ——————————

(iii) अनलसं चित्तं यस्य तस्मै = ——————————

(घ) (i) द्विजः च गुरुः च सुराः च ——————————

(ii) द्विजगुरुसुराणां निन्दा = ——————————

(ङ) (i) नीतिः एव वृत्तम् = ——————————

(ii) नीतिः एव वृत्तं यस्य तस्मै = ——————————



टिप्पणी

तृतीयः अंशः

श्लोकः – 7

अधुना, **सप्तमं श्लोकं** पठामः।

पदच्छेदः– किम् सम्पाद्यम् मनुजैः विद्या वित्तम् बलम् यशः पुण्यम्। कः सर्वगुणविनाशी लोभः शत्रुः च कः कामः।

अन्वयः– मनुजैः किं सम्पाद्यम्? विद्या, वित्तम्, बलम् यशः पुण्यम्। सर्वगुणविनाशी कः? लोभः। शत्रुः च कः? कामः।

अस्मिन् पद्ये त्रयः प्रश्नाः सन्ति।

सम्पाद्यम् किम्? सम्पाद्यम् प्राप्तव्यम्, अर्जितव्यम् इति। मनुजैः किं किं सम्पाद्यम्? विद्या, वित्तम् (धनम्) बलं (शक्तिः) यशः, पुण्यम् च।

सर्वगुणविनाशी कः? अर्थात् सर्वेषां गुणानां नाशकः कः? लोभः। यदा लोभः आगच्छति, सर्वे गुणाः नश्यन्ति।

कः च शत्रुः? कामः, इच्छा, वासना।

भावार्थः– जीवने प च गुणाः अपेक्षिताः विद्या, धनं, शक्तिः, सत्कर्मभिः अर्जितं यशः, पुण्यम् च। एतेषां गुणानां नाशः भवति यदि वयं लोभं कुर्मः। वासना, अधिकाधिकप्राप्तेः इच्छा तु सर्वेषाम् एव शत्रुः, सर्वेषां रोगाणां मूलम् एव। गीतायाम् अपि कथितम्– इच्छानाम् उपभोगेन आसक्तिः उत्पद्यते, आसक्तेः कामः, कामात् क्रोधः, क्रोधात् सम्मोहः, सम्मोहात् च स्मृतिविभ्रमः, ततश्च मनुष्यस्य पूर्णविनाशः भवति।

किं सम्पाद्यं मनुजैर्विद्या
वित्तं बलं यशः पुण्यम्।
कः सर्वगुणविनाशी लोभः
शत्रुश्च कः कामः।।7।।

इदानीम् **अष्टमं श्लोकं** बोधामः

पदच्छेदः– कः वर्धते? विनीतः, कः वा हीयेत यः दृप्तः। कः न प्रत्येतव्यः ब्रूते यः च अनृतम् शश्वत्।

अन्वयः– कः वर्धते? विनीतः, क वा हीयेत यः दृप्तः। कः च न प्रत्येतव्यः? यः च शश्वत् अनृतं ब्रूते।

अस्मिन् पद्यांशे अपि त्रयः प्रश्नाः।

प्रथमः प्रश्नः– कः वर्धते?	विनीतः / विनम्रः
द्वितीय प्रश्नः– कः वा हीयेत	यः दृप्तः / अभिमानी
तृतीयः प्रश्नः– कः न प्रत्येतव्यः?	यः च शश्वत् अनृतं ब्रूते, यः सदा असत्यं वदति।

भावार्थः– अस्मिन् पद्ये नम्रतायाः वैशिष्ट्यं वर्णितम्। संसारे कः सदा उन्नतिं करोति, यः विनयशीलः विनम्रः भवति। कस्य च सदा क्षयः भवति? निश्चयेन यः अभिमानी भवति सः

को वर्धते? विनीतः,
को वा हीयेत यो दृप्तः।
को न प्रत्येतव्यो
ब्रूते यश्चानृतं शश्वत्।।8।।



टिप्पणी

किं दानमनाकाक्षं किं मित्रं
यो निवारयति पापम्।
कोऽलङ्कारः शीलं
किं वाचां मण्डनं सत्यम्।।9।।

सदा नीचैः एव गच्छति, तस्य पतनं भवति। कस्य विश्वासः न कर्तव्यः इति प्रश्नस्य उत्तरे कथितम् यः सदा अनृतं मिथ्याप्रलापं करोति तस्मिन् विश्वासः न करणीयः।

श्लोकः — 8

इदानीं **नवमं श्लोकं** बोधामः।

पदच्छेदः किम् दानम् अनाकांक्षम्, किम् मित्रम् यः निवारयति पापम्। कः अलंकारः शीलम्, किम् वाचाम् मण्डनम्, सत्यम्।

अन्वयः किम् दानम्? अनाकांक्षम्। किं मित्रम्? यः पापं निवारयति। कः अलंकारः? शीलम्। वाचाम् मण्डनम् किम्? सत्यम्।

व्याख्या—

अत्र चत्वारः प्रश्नाः दत्ताः।

दानं किम्? अनाकांक्षम्, न आकांक्षा यस्मिन् तत्। आकांक्षारहितम्, प्रतिदानस्य इच्छारहितम्। मित्रं किम्? यः पापं निवारयति, यः पापात् रक्षति, यः हितं करोति। कः अलंकारः? शीलम्, सदाचरणम्, सद्व्यवहारः एव मनुष्यस्य परमं भूषणम्। वाचां मण्डनं किम्? सत्यम्, सत्येन एव वाणी भूषिता भवति, असत्येन वाणी अपवित्रा जायते।

भावार्थः— वास्तविकं दानं तदेव यत्र प्रतिदानम् अर्थात् कस्यचित् वस्तुनः आकांक्षा न क्रियते। दीयते इति कृत्वा यत् दानं दीयते तदेव दानं सात्त्विकम्। तदेव मित्रम् यद् अस्मान् पापेभ्यः रक्षति, हिताय योजयते। मनुष्यस्य भूषणं तस्य सद्व्यवहारः एव। अस्माकं वाणी सत्यभाषणेन पवित्रा जायते। अस्माकं राष्ट्रस्य लक्ष्यमपि तदेव अस्ति— 'सत्यमेव जयते'।

संसार में मनुष्य को विद्या, धन, शक्ति और यश प्राप्त करने के लिए प्रयत्न करना चाहिए। लालच सब गुणों को नष्ट करने वाला है, वासना सब रोगों की जड़ है। विनम्र व्यक्ति ही संसार में उन्नति करता है। अहंकारी का सिर अन्त में नीचा ही होता है। झूठ बोलने वाला अपना विश्वास खो बैठता है। दान देने पर प्रतिदान की इच्छा नहीं करनी चाहिए। वही सच्चा मित्र है जो पाप करने से रोके। मनुष्य का सच्चा आभूषण उसका सद्व्यवहार है। सत्य से परिपूर्ण वाणी से ही मनुष्य सुशोभित होता है।

व्याकरणबिन्दवः

विसर्गसन्धिः		**विसर्गस्थाने**
मनुजैः+विद्या	= मनुजैर्विद्या	(: → र्)
कः+वर्धते	= को वर्धते	(: → उ)
कः + वा	= को वा	(: → उ)



कः + न	= को न	(: → उ)
प्रत्येतव्यः + ब्रूते	= प्रत्येतव्यो ब्रूते	(: → उ)
यः + निवारयति	= यो निवारयति	(: → उ)
कः + अलंकारः	= कोऽलंकारः	(: → उ)

समस्तपदानां विग्रहः

सर्वः गुणः	= सर्वगुणः	कर्मधारयः
सर्वगुणानां विनाशी	= सर्वगुणविनाशी	षष्ठी तत्पुरुषः
अनाकांक्षम्	= न आकांक्षा यस्मिन् तत् (दानम्)	नञ्पूर्वपदबहुव्रीहिः

रूपपरिचयः

सम्पाद्यम्	= सम् + पद् + णिच्+ यत् नपुं. प्रथमा एक व.
प्रत्येतव्यः	= प्रति + इ + तव्यत्+ पु. प्रथमा एक व.
हीयेत	= हा + विधिलिङ् प्रथम पु. (नश्येत्)
वाचाम्	= वाच् + षष्ठी बहुवचनम् (वाणीनाम्)

पाठगतप्रश्नाः 4.3

1. प्रश्नान् उत्तरैः सह मेलयत

प्रश्नाः	**उत्तराणि**
(क) सर्वगुणविनाशी कः?	(i) अनाकांक्षम्
(ख) कः न प्रत्येतव्यः?	(ii) सत्यम्
(ग) किं दानम् ?	(iii) लोभः
(घ) कः अलंकारः?	(iv) दृप्तः
(ङ) वाचां मण्डनं किम्?	(v) शीलम्
(च) कः हीयेत ?	(vi) यः शश्वत् अनृतं ब्रूते

2. विलोमपदानि योजयत

पदम्	**विलोमपदम्**
(क) विनीतः	(i) पुण्यम्
(ख) शत्रुः	(ii) अनृतम्
(ग) वर्धते	(iii) मित्रम्

(घ) ऋतम् (iv) हीयते

(ङ) पापम् (v) दृप्तः

3. अधोलिखितेषु अकारान्तनपुंसकलिंङ्गपदानि चित्वा लिखत

वित्तम्, लोभः, पुण्यम्, मित्रम्, शीलम्, यशः, मण्डनम्, वाचाम्, बलम्।

यथा– वित्तम् .....

4.4 किम् अधिगतम्

- प्रश्नमाध्यमेन ज्ञानं वर्धते;
- सदाचरणेन, नम्रतया, दानेन, उद्यमेन, सत्येन जनः पूज्यः भवति।
- तत्पुरुषसमासे उत्तरपदप्रधानम् भवति, बहुव्रीहिसमासे च अन्यपदार्थं प्रधानं भवति।
- विशेषण–विशेष्यपदयोः उपमान–उपमेयपदयोः वा कर्मधारयसमासः भवति।
- म् व्यंजनस्य स्थाने परे व्यंजने सति अनुस्वारः (ं) भवति, स्वरात् पूर्वं 'म्' व्यंजनं तस्मिन् स्वरे एव मिश्रितं भवति।
- जश्त्व संधौ वर्गीयप्रथमवर्णस्य स्थाने तृतीयः वर्णः भवति।
- श्चुत्वसंधौ सकार–तवर्गयोः शकार–चवर्गौ भवतः।
- त्व–तल् भाववाचक प्रत्ययौ।
- विसर्ग स्थाने र्, उ्, स् भवति।
- स्पृह् धातुयोगे चतुर्थी विभक्तिः भवति।

4.5 योग्यताविस्तारः

(क) लेखकपरिचयः

आदिशंकाराचार्यः

विश्वविख्यातस्य आदिशंकराचार्यस्य जन्म 788 तमे वर्षे केरलप्रदेशस्य 'कालडी' इति नाम्नि ग्रामे अभवत्। शंकराचार्यस्य पितुः नाम शिवगुरुः मातुश्च नाम सती आसीत्। अष्टवर्षीयः एव सः संन्यासं स्वीकृत्य गुरुगोविन्दपादस्य आज्ञया धर्मविजयम् आरभत। मण्डमिश्रादीन् विदुषः शास्त्रार्थे पराजित्य वेदान्तस्य प्रचारम् कुर्वन् उत्तरे ज्योतिर्मठम्, दक्षिणे श्रृंगेरीमठं, पूर्वे गोवर्धनपीठम्, पश्चिमे च शारदापीठम् स्थापितम्। तेन अनेके ग्रन्थाः रचिताः येषु ब्रह्मसूत्रभाष्यम्, गीताभाष्यम्, विवेकचूडामणिः प्रश्नोत्तरमालिका इत्यादयः प्रमुखाः सन्ति। द्वात्रिंशत्वर्षीयः एव हिमालयपर्वतस्य केदारनाथस्थले महासमाधौ लीनः अभवत्।



प्रश्नोत्तरमालिकायां 167 पद्यानि सन्ति येषु प्रश्नोत्तराणि दत्तानि।

(ख) भावविस्तारः

कामः

सर्वस्य विद्यते प्रान्तो न वांछायाः कदाचन (स्कन्दपुराणे)

आत्मा संयमितो येन तं यमः किं करिष्यति (आश्वालयनस्मृतिः)

कामात् क्रोधोऽभिजायते। (गीता)

परोपकारः

उत्तमानां स्वभावोऽपि परदुःखसहिष्णुता (स्कन्द पुराणे 9.1)

आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् (मेघ.53)

अपयशः

अपमानं हि लोकेऽस्मिन् मरणादपि गर्हितम्।

अविवेकः

अविवेकः परमापदां पदम्। (किरात 2.30)

उद्यमः

आत्मैव ह्यात्मनो बन्धुरात्मैवरिपुरात्मनः। (गीता 6.5)

वृत्तेन हि भवत्यार्यो न धनेन न विद्यया। (उद्योग 88.52)

इन्द्रियनिग्रहः

वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता। (गीता 2.51)

क्रोधः

क्रोधाभिभूतः कुरुते हिंसां प्राणविघातिनीम्। क्षमा जयति न क्रोधः। (गरुड पु0 2.34.3)

देहोत्पन्नस्तथा क्रोधो देहं दहति दारुणः। (देवीभागवत पु. 4.7.12.)

उत्साहः

सोत्साहस्य हि लोकेषु न किंचिद्पि दुर्लभम्। (वा.रा. 4.1.122)

उत्साहवतां शत्रवोऽपि वशीभवन्ति। (चा. नी. 3.16)

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः। (पंच. 2.137)

दानम्

गतिरेकैव वित्तस्य दानम् अन्याः विपत्तयः। (गरुड पु. 2.26.63)

शीलम्

क्षीणोऽपि न त्यजति शीलगुणान् कुलीनः। (चा. मी. 377)

मित्रम्– आपत्सु मित्रं जानीयात्। (गरुड पु. 10.9.8)

धैर्यम्– धीराः कष्टमनुप्राप्य न भवन्ति विषादिनः। (बृहस्पतिनी 4.24)

निसर्गः स हि धीराणां यदापद्यधिकं दृढाः। (कथासरित् 3.6.31)

सत्यम् – सत्यस्य वचनं श्रेयः (शक्ति 329.13)

मनः सत्येन शुध्यति। (मनु. 5.109)

सत्यं कण्ठस्य भूषणम् (सुभा. 9.59)

लोभः

लोभः पापस्य कारणम्। (हितो. 1. 17)

क्लिश्यन्ते लोभमोहिताः। (हि. 1.26)

अकीर्तिं लोभं हित्वा सुखी भवेत्। (वनपर्व. 31 3. 78)

संभावितस्य चाकीर्तिर्मरणादतिरिच्यते। (वनप. 300 32)

आलस्यम्

कर्मैव हि कर्तव्यं नास्ति सिद्धिरकर्मणः (महा अ. प. 10 26)

उद्यमः

दुर्लभान्यपि कार्याणि सिध्यन्ति प्रोद्यमेन वै। (बुद्धचरितम् 26, 63)

उद्यमो मित्रवद् ग्राह्यः। उत्तिष्ठत, मा स्वपत। प्रमादं शत्रुवत् त्यजेत्।

दर्पः

अतिदर्पाद्धता लंका, अभिमाने च कौरवाः। (चाणक्यशतक..30)

(दानं सत्यं दया चेति साारमेतज्जगत्त्रये। (गरुड पु. 2.28.37)

अहंकारजयं कृत्वा सर्वदा सुखभाग् भवेत्। (देवीभाग.पु. 6.13.50)

विवेकं हन्त्यंहकारः। (नारदपु. 1.7.30)



(ग) भाषा विस्तारः

सर्वनामपदानां रूपाणि पश्यत वैशिष्ट्यम्

- एतेषां रूपाणि त्रिषु लिंगेषु चलन्ति।
- एतेषां सम्बोधनपदं न भवति।
- एतानि विशेषणवत् अपि प्रयुज्यन्ते।

4.6 पाठान्तप्रश्नाः

1. अधोलिखितानां प्रश्नानाम् अतिलघूनि उत्तराणि प्रदेयानि–
   (क) गुरुतायाः मूलं किम्?
   (ख) 'ज्ञानमगर्वम्' अत्र ज्ञानं कीदृशं प्रोक्तम्?
   (ग) किं शोच्यं भवति?
   (घ) कमला का कथ्यते?
   (ङ) सर्वगुणविनाशी कः?
   (च) वाचां मण्डनं किम्?
2. अधोलिखितानां प्रश्नानाम् अतिलघूनि उत्तराणि प्रदेयानि–
   (क) कर्णा जलिभिः किं पातुं युज्यते?
   (ख) आमरणात् किं शल्यं भवति?
   (ग) विद्वद्भिः कः पूज्यः भवति?
   (घ) इदं जगत् कस्य वशे भवेत्?
   (ङ) कमला कस्मै स्पृहयति?
   (च) मनुजैः किं किं सम्पाद्यम्?
   (छ) कः न प्रत्येतव्यः?
3. चतुर्भद्रं दुर्लभं किम्? चतुर्षु वाक्येषु लिखत।
4. अधोलिखितानि उत्तराणि अधिकृत्य पाठानुसारं प्रश्नान् चित्वा लिखत–

उत्तराणि	**प्रश्नाः**
यथा (क) मूर्खत्वम्	(i) किं मरणम्?
(ख) कार्पण्यम्	(ii) ————————

(ग) अनलसचित्ताय नीतिवृत्ताय (iii) ————————————

(घ) विनीतः (iv) ————————————

(ङ) लोभः (v) ————————————

(च) कामः (vi) ————————————

(छ) औदार्यम् (vii) ————————————

5. अधोलिखितेषु प्रश्नेषु 'किम्' शब्दस्य उचितरूपप्रयोगं कुरुत

यथा कः साधुः?

(i) ——— जितम् एतत् जगत्?

(ii) ——— पूज्यः?

(iii) ——— वशे जगदेतत्?

(iv) ——— स्पृहयति कमला?

(v) ——— न प्रत्येतव्यः?

(vi) ——— मित्रम्?

(vii) ——— अलङ्कारः?

(viii) ——— शोच्यम्?

(ix) ——— सर्वगुणविनाशी?

6. एतेषां समस्तपदानि रचयत (एतेषु नञ्तत्पुरुष–तत्पुरुष–कर्मधारय, बहुव्रीहि समासानाम् उदाहरणानि सन्ति)

यथा सताम् उपदेशः	सदुपदेशः
(i) न प्रार्थनम्	————————
(ii) प्रियं हितं वचनं यस्य तस्य	————————
(iii) धर्मे निरतस्य	————————
(iv) अलसेन सह विद्यमानः तम्	————————
(v) अनलसं चित्तं यस्य तस्मै	————————
(vi) प्रियम् वाक्यम्	————————
(vii) सर्वेषां गुणानां विनाशी	————————
(viii) न आकांक्षा यस्मिन् तत्	————————
(ix) त्यागेन समेतम्	————————



7. एतेषु मान्तं पदं किम्, किम् अनुस्वारयुक्तं भविष्यति?

(क) किम् + अमृतम् (ख) किम् + मित्रम्

(ग) रामम् + पश्यति (घ) गृहम् + आगतः

(ङ) पुत्रम् + वदति (च) दिनानाम् + ईशः

8. सन्धिविच्छेदं कुरुत–

(क) यदवसरे ——— + ———

(ख) जगदेतत् ——— + ———

(ग) सदुपदेशः ——— + ———

(घ) एतच्च ——— + ———

(ङ) कोऽलंकारः ——— + ———

(च) दिनेशः ——— + ———

9. सन्धिं कृत्वा लिखत–

(क) शत्रुः + च = ———————

(ख) पूज्यः + विद्वान् = ———————

(ग) कः + वर्धते = ———————

(घ) मनुजैः + विद्या = ———————

10. प्रकृति–प्रत्ययययोगेन निष्पन्नं रूपम् लिखत–

(क) गुरु + तल् = ———————

(ख) महत् + त्व = ———————

(ग) कृ + क्त = ———————

(घ) सि + क्त = ———————

(ङ) दा + क्त = ———————

11. विलोमपदानि मेलयत–

(क) पापम्	(i) औदार्यम्
(ख) शोच्यम्	(ii) दृप्तः
(ग) कार्पण्यम्	(iii) अनृतम्
(घ) ऋतम्	(iv) प्रशस्यम्
(ङ) विनीतः	(v) पुण्यम्

4.7 उत्तराणि

बोध प्रश्नाः

1. (क) कार्पण्यम् (ख) गुणविभवेऽपि नम्रः
   (ग) विद्या वित्तं बलम् यशः पुण्यम् (घ) विनीतः (ङ) लोभः
2. (क) v (ख) viii (ग) i (घ) iii
   (ङ) iv (च) ii (छ) vii (ज) vi
3. (क) v (ख) i (ग) ii
   (घ) vi (ङ) iv (च) iii

पाठगत प्रश्नाः

4.1 1. (क) ii (ख) iii (ग) i

2. (क) यद् अवसरे दत्तम्, (ख) प्रियवाक्यसहितं (ग) उपदेशामृतम्
   (घ) त्यागसमेतम् (ङ) प्रच्छन्नं यत् कृतं पापम्।

3. (क) प्रियवाक्यम् (ख) त्यागसमेतम् (ग) क्षमान्वितम्
   (घ) कर्णांजलिः (ङ) अप्रार्थनम्

4.2 1. (क) कार्पण्यम् (ख) औदार्यम् (ग) विनीतः
   (घ) गुणविभवेऽपि यः नम्रः (ङ) प्रियहितवचनस्य (च) द्विजगुरुसुरनिन्दाकरम्

2. (क) iii (ख) i (ग) iv,
   (घ) vi (ङ) ii (च) v

3. (क) प्रियहितम्, (ii) प्रियहितवचनम्, (iii) प्रियहितवचनस्य
   (ख) (i) धर्मनिरतः (ग) (i) अनलसम्, (ii) अनलसचित्तम्, (iii) अनलसचित्ताय
   (घ) (i) द्विजगुरुसुराः, (ii) द्विजगुरुसुरनिन्दा
   (ङ) (i) नीतिवृत्तम् (ii) नीतिवृत्ताय

4.3 1. (क) iii (ख) vi (ग) i
   (घ) v (ङ) ii (च) iv



2. (क) v (ख) iii (ग) iv
(घ) ii (ङ) i

3. पुण्यम्, बलम्, मित्रम्, शीलम्, मण्डनम्

4.6 पाठान्तप्रश्नाः

1. (क) अप्रार्थनम् (ख) अगर्वम् (ग) कार्पण्यम्
(घ) लक्ष्मीः (ङ) लोभः (च) सत्यम्

2. (क) अमृतरूपः सदुपदेशः
(ख) प्रच्छन्नं कृतं पापम्
(ग) स्वभावतः सर्वदा विनीतः
(घ) प्रियहितवचनस्य धर्मनिरतस्य च
(ङ) अनलसचित्ताय नीतिवृत्ताय
(च) विद्या वित्तं बलं यशः पुण्यं च
(छ) शश्वत् असत्यवादी

3. (क) मधुरवाक्यैः दानं प्रथमः दुर्लभः गुणः अस्ति।
(ख) नम्रतायुक्तं ज्ञानम् द्वितीयः गुणः वर्तते।
(ग) क्षमासहिता वीरता तृतीयः गुणः भवति।
(घ) त्यागसमेतं धनं चतुर्थः गुणः अस्ति।

4. (क) किम् मरणम् (ख) किं शोच्यम् (ग) कस्मै स्पृहयते कमला
(घ) को वर्धते, (ङ) कः सर्वगुणविनाशी (च) कः शत्रुः
(छ) विभवे सति किं प्रशस्तम्

5. (क) केन (ख) कः (ग) कस्य (घ) कस्मै (ङ) कः
(च) किम् (छ) कः (ज) किम् (झ) कः

6. (क) अप्रार्थनम्, (ख) प्रियहितवचनस्य, (ग) धर्मनिरतस्य (घ) सालस्यम्
(ङ) अनलसचित्ताय, (च) प्रियवाक्यम् (छ) सर्वगुणविनाशी
(ज) अनाकांक्षम् (झ) त्यागसमेतम्

7. (ख) किं मित्रम् (ग) रामं पश्यति (ङ) पुत्रं वदति

8. (क) यत् + अवसरे (ख) जगत् + एतत्
(ग) सत् + उपदेशः (घ) एतत् + च
(ङ) कः + अलंकारः (च) दिन + ईशः

9. (क) शत्रुश्च (ख) पूज्यो विद्वान्
(ग) को वर्धते (घ) मनुजैर्विद्या

10. (क) गुरुता (ख) महत्त्वम् (ग) कृत(म्)
(घ) जितम् (ङ) दत्त(म्)

11. (क) v (ख) iv (ग) i
(घ) iii (ङ) ii

309sk05

5

अतिलोभः न कर्तव्यः

भवान् जानाति एव ''लोभो मूलमनर्थानाम्''। यद्यपि लोभवशात् जनाः कार्यशीलाः भवन्ति परंतु यदा अतिलोभः भवति तदा जनाः दुष्टानि कर्माणि कुर्वन्ति, चौर्यं कुर्वन्ति, हत्यां कुर्वन्ति। अतिलोभस्य सीमा नास्ति। मृगतृष्णावत् अतिलोभः अधिकाधिकं वर्धते। अन्ते मनुष्यः पूर्णतया नष्टः भवति। अस्याम् कथायाम् अपि वयम् एतादृशस्य एव मनुष्यस्य विषये पठामः यः अतिलोभवशात् लोभचक्रं मस्तके धारयित्वा रुधिरप्लावितः भवति अन्ते च नश्यति। अतः अतिलोभः विनाशकारकः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- प्रदत्तायाः कथायाः घटनाक्रमानुसारं संक्षेपेण सारं लेखितुं समर्थः भविष्यति;
- लोभाविष्टानां जनानां चारित्रिकलक्षणानि वर्णयितुं शक्तः भविष्यति;
- लोभनिन्दाम् अधिकृत्य अन्यानि समानान्तरपद्यानि सूक्तीः च लेखितुं क्षमः भविष्यति;
- संख्यावाचकशब्दानां संख्यावाचकविशेषणानां च प्रयोगं करिष्यति;
- क्त्वा, ल्यप्, तुमुन् प्रत्ययानां प्रयोगं स्ववाक्येषु कर्तुं शक्ष्यति;
- अव्ययानां प्रयोगं स्ववाक्येषु कर्तुं समर्थः भविष्यति;
- कर्तृपदानुसारम् एव क्रियाप्रयोगं कर्तुं योग्यः भविष्यति।

क्रियाकलापः



5.1

5.2

अधोलिखितानां प्रश्नानां समक्षं सम्बद्धचित्रसंख्यां (✓) इति चिह्नेन दर्शयत–

1. कस्मिन् चित्रे वृद्धव्याघ्रः पथिकं कंकणं दर्शयति? (प्रथमे/द्वितीये)

.....

2. कस्मिन् चित्रे व्याघ्रः पथिकस्य उपरि आक्रमणं करोति? (प्रथमे/द्वितीये)

.....

3. कस्मिन् चित्रे लोभाविष्टः पथिकः व्याघ्रम् उपसरति? (प्रथमे/द्वितीये)

.....

4. कस्मिन् चित्रे व्याघ्रस्य हस्ते स्वर्णकंकणम् अस्ति? (प्रथमे/द्वितीये)

.....

5. कस्मिन् चित्रे पथिकः दुःखी भूत्वा रोदिति? (प्रथमे/द्वितीये)

.....

5.1 मूलपाठः

अतिलोभः न कर्त्तव्यः

एवं पथिकः लोभेन मृत्युं प्राप्नोति। एतादृशीम् एव इदानीम् अन्यां कथां वयम् पठामः।

कस्मिंश्चित् ग्रामे चत्वारि मित्राणि अवसन्। दारिद्र्योपहताः ते अचिन्तयन् यत् धनहीनजीवनात् तु वनवासः एव वरम्। अतः देशान्तरं गच्छामः धनोपार्जनाय इति विचार्य ते चत्वारः बन्धुजनाः उज्जयिनीनगरीं प्राप्तवन्तः। तत्र एकः भैरवानन्दः नाम योगी निवसति स्म। ते तस्य मठम् अगच्छन्। योगी तान् अपृच्छत् ''भवन्तः कुतः समायाताः? कुत्र गच्छन्ति? किं च प्रयोजनम्?'' ते उक्तवन्तः – ''वयं दारिद्र्यपीडिताः धनम् इच्छामः। अतिसाहसिकाः वयम्। कृपया अस्माकं मार्गदर्शनं कुर्वन्तु भवन्तः।

योगी भैरवानन्दः तेभ्यः चतस्रः सिद्ध–वर्तिकाः दत्त्वा अवदत्– ''एताः वर्त्तिकाः स्वीकुर्वन्तु। इतः हिमालयं प्रति गच्छन्तु। यत्र यत्र वर्त्तिका पतिष्यति तत्र तत्र नूनं धनं भविष्यति। तत् स्थानं खनित्वा यथेष्टं धनं स्वीकुरुत परन्तु सावधानाः भवत, अतिलोभः न कर्तव्यः।'' इति।

शब्दार्थाः
कस्मिंश्चित् गामे = किसी गांव में
उपहताः = मारे हुए, सताए गए
धनोपार्जनाय = धन कमाने के लिए
विचार्य = सोचकर
प्राप्तवन्तः = पहुंचे
प्रयोजनम् = काम, उद्देश्य
उक्तवन्तः = बोले
अतिसाहसिकाः = बहुत साहसी
अस्माकम् = हमारा
चतस्रः = चार (स्त्री0)
सिद्धवर्तिकाः = मन्त्र से सिद्ध बत्तियाँ
पतिष्यति = गिरेगी
यथेष्टम् = इच्छानुसार
चत्वारः = चार (पुं0)
गृहीत्वां = लेकर
निस्सरति = निकलता है
गृह्यताम् = ले लिया जाए
उत्तिष्ठ = उठो
ताम्रम् = तांबा
प्रस्थितवन्तः = चल पड़े

5.3

ते चत्वारः सखायः वर्त्तिकाः गृहीत्वा हिमालयं प्रति अगच्छन्। तदा एकस्य जनस्य हस्तात् वर्त्तिका अपतत्। तदनु यावत् स भूमिं खनति तावत् ताम्रं निस्सरति। अहो! गृह्यतां स्वेच्छया ताम्रम् स उच्चैः अवदत्। अन्ये अवदन्– भो मूढ! किम् अनेन ताम्रेण? उत्तिष्ठ, अग्रे गच्छामः। सोऽवदत् मम वर्त्तिका तु पतिता, अहं ताम्रमेव गृहीत्वा गृहं गच्छामि।"

इदानीं त्रयः सुहृदः अग्रे प्रस्थितवन्तः।

अथ किंचिद् दूरं गतेषु तेषु एकस्य अन्यस्य वर्त्तिका अपतत्। सः अपि खनितुम् आरभत, रूप्यमयीं भूमिम् अलभत। अहो! यथेच्छं रूप्यं स्वीकुरुत। नाग्रे गन्तव्यम्। "तौ उक्तवन्तौ – भोः! पूर्वं ताम्रम् पुनः रूप्यं, नूनं अग्रे स्वर्णं भविष्यति। अतः आवाम् तु अग्रे गच्छावः। द्वौ अग्रे गतवन्तौ। द्वितीयः बन्धुः तु यथाशक्ति रूप्यम् आदाय ग्रामं प्रतिनिवृत्तः।

खनितुम् = खोदना
रूप्यमयीं = चांदी की
अलभत = पाया
उक्तवन्तौ = बोले
यथाशक्ति = शक्ति के अनुसार
स्वेच्छया = अपनी इच्छा से
उक्त्वा = कहकर
पिपासाकुलः = प्यास से व्याकुल
रुधिरप्लावितं = खून से सने हुए (मनुष्य को)
उपसृत्य = पास जाकर
अवतीर्य = उतर कर
आगत्य = आकर
भ्रमितुं = घूमना
आरभत = शुरू कर दिया

अथ पुनः अग्रे एकस्य हस्तात् वर्तिका अपतत्। सोऽपि प्रहर्षितः यावत् खनति तावत् सुवर्णमयीं भूमिं दृष्ट्वा विस्मयोत्फुल्ललोचनः उवाच – भोः गृह्यतां स्वेच्छया सुवर्णम्। किमतिलोभेन। अस्माकं कृते एतत् धनं पर्याप्तम्।"

5.4

चतुर्थः अवदत् –'भो मूढ! त्वमेव ग्रामं गच्छ। अहं तु एकाकी एव अग्रे गमिष्यामि। नूनम् इतः परं रत्नानि भविष्यन्ति। "एवमुक्त्वा सः भीषणग्रीष्मर्तौ पिपासाकुलः यत्र तत्र अभ्रमत्।



अथ भ्रमन् असौ एकं रुधिरप्लावितं जनम् अपश्यत्। तस्य मस्तके चक्रं भ्रमति स्म। चक्रस्य भ्रमणात् रुधिरं वहति स्म। वर्तिकायुक्तः जनः तम् उपसृत्य अपृच्छत् ''अहो! तव मस्तके चक्रं कथं भ्रमति? किम् अत्र कुत्रापि जलम् अस्ति? अहम् अतीव पिपासाकुलः इति।'' अहो आश्चर्यम्! तस्मिन् एव क्षणे तत् चक्रं चक्रधरस्य मस्तकात् अवतीर्य वर्त्तिकायुक्तस्य जनस्य मस्तके आगत्य भ्रमितुम् आरभत। रुधिरधारा अवहत्। भयग्रस्तः भयंकरवेदनया पीडितः सन् सः अपृच्छत् –"अये! किमेतत्?" भूतपूर्वः चक्रधरः सुखम् अनुभवन् अवदत् – "एष एव परिणामः अतिलोभस्य। एतत् चक्रं तावत् भ्रमिष्यति यावत् अन्यः अतिलोभाविष्टः त्वां न मिलति।"

अतः उच्यते– **अतिलोभाभिभूतस्य चक्रं भ्रमति मस्तके।**

5.2 बोधप्रश्नाः

1. कथां पठित्वा रिक्तस्थानानि पूरयत

   (क) कस्मिंश्चित् ग्रामे ..... मित्राणि अवसन्।

   (ख) ते ..... बन्धुजनाः उज्जयिनीनगरीं प्राप्तवन्तः।

   (ग) योगी भैरवानन्दः तेभ्यः ..... वर्त्तिकाः अयच्छत्।

   (घ) एकं विहाय .....सुहृदः अग्रे प्रस्थितवन्तः।

   (ङ) तदा ..... अग्रे गतवन्तौ।

   (च) अहम् तु ..... एव अग्रे गमिष्यामि।

2. अधः प्रदत्तेषु प्रत्येकं पदद्वयेन युक्तं पदं पाठात् चित्वा तत् समक्षं लिखत–

   (क) दारिद्र्य + उपहताः = ...

   (ख) हिम + आलयः = ...

   (ग) स्व + इच्छया = ...

   (घ) यथा + इष्टम् = ...

   (ङ) वर्त्तिका + अपतत् = ...

   (च) न + अग्रे = ...

3. अधोलिखितवाक्येषु क्रियापदानि योजयत

   (क) नूनम् अग्रे स्वर्णं .....

(ख) ते तस्य मठम् .....

(ग) कृपया अस्माकं मार्गदर्शनं .....

(घ) इतः हिमालयं प्रति .....

(ङ) तदनु यावत् भूमिं ..... तावत् ताम्रं .....

5.3 अधुना अवगच्छामः

प्रथमः अंशः

कस्मिंश्चिद् ग्रामे ..... ताम्रं गृहीत्वा गृहं गच्छामि।

सम्प्रति कथां सम्यक् अवगन्तुं प्रयत्नं कुर्मः।

मित्राणि केन उपहताः आसन्? दरिद्रतया, निर्धनतया। दरिद्रतां दूरीकर्तुं ते कुत्र गन्तुं निश्चयम् अकुर्वन्? देशान्तरम्। ते उज्जयिन्यां कस्य मठम् प्रति अगच्छन्? योगिभैरवानन्दस्य। भैरवानन्दः योगी तेभ्यः किम् अयच्छत्? चतस्रः सिद्धवर्तिकाः। वर्तिकानां किं वैशिष्ट्यम् आसीत्? यत्र यत्र वर्तिका पतिष्यति तत्र धनं भविष्यति। प्रथमस्य मित्रस्य वर्तिका यत्र अपतत् तत्र कीदृशी भूमिः आसीत्? ताम्रमयी। किं ते चत्वारः एव ताम्रं गृहीत्वा गृहं प्रति निवृत्ताः? नहि, केवलम् एकः एव ताम्रम् गृहीत्वा गृहं प्रत्यागतः।

अनेन स्पष्टं भवति यत्– निर्धनतया पीडिताः चत्वारि मित्राणि स्वदरिद्रतां दूरीकर्तुं देशान्तरं गन्तुं प्रवृत्ताः अभवन्। ते योगिभैरवानन्दस्य मठं गत्वा तं मार्गदर्शनाय न्यवेदयन्। ते अकथयन् यत् ते स्वनिर्धनतायाः निराकरणाय कष्टानि सोढ्वा अपि यत् किमपि कर्तुं कृतनिश्चयाः आसन्। तेषां वचनैः प्रभावितः सन् योगी तेभ्यः सिद्धवर्तिकाः अयच्छत्। वर्तिकानां वैशिष्ट्यम् आसीत् यत् यत्र यत्र वर्तिका पतिष्यति तत्र तत्र धनप्राप्तिः भविष्यति। अग्रे गत्वा प्रथमस्य मित्रस्य वर्तिका यत्र अपतत् तत्र ताम्रमयी भूमिः आसीत्। सः ताम्रं गृहीत्वां गृहं प्रत्यागतः। अत्र अवलोकनीयः यत् यद्यपि ताम्रः बहुमूल्यं धातुः न वर्तते परम् एषः जनः यत् किमपि प्राप्तं तेन सन्तुष्टः भूत्वा प्रत्यावर्तत। तस्य मनसि ततः अधिकस्य लालसा न अभवत्। अर्थात् सः अत्यधिकं लोभाविष्टः न आसीत्।

अतिसाहसिकाः– अत्यधिकं साहसयुक्ताः (अतिसाहस + ठञ्)

संख्यावाचकविशेषणानां प्रयोगार्थं संख्यावचकशब्दानां ज्ञानम् अनिवार्यम्। अतः अत्र एकतः शतपर्यन्तं संख्यावाचकशब्दाः प्रदत्ताः–



संख्या

पूरणी संख्या

1.	एक	प्रथमः मम्–मा
2.	द्वि	द्वितीयः– यम्–या
3.	त्रि	तृतीयः– यम्–या
4.	चतुर्	चतुर्थः– र्थम्–र्थी
5.	प×चन् (प×च)	प×चमः प×चमी
6.	षष् (षट्)	षष्ठः षष्ठी
7.	सप्तन् (सप्त)	सप्तमः सप्तमी
8.	अष्टन् (अष्ट)	अष्टमः अष्टमी
9.	नवन् (नव)	नवमः नवमी
10.	दशन् (दश)	दशमः दशमी
11.	एकादशन् (एकादश)	एकादशः एकादशी
12.	द्वादशन् (द्वादश)	एवमेव
13.	त्रयोदशन् (त्रयोदश)	,,
14.	चतुर्दशन् (चतुर्दश)	,,
15.	प×चदशन् (प×चदश)	,,
16.	षोडषन् (षोडश)	,,
17.	सप्तदशन् (सप्तदश)	,,
18.	अष्टादशन् (अष्टादश)	,,
19.	नवदशन (नवदश) अथवा एकानविंशतिः अथवा उनविंशतिः	
20.	विंशतिः	विंश विंशी
30.	त्रिंशत!	त्रिंश
40.	चत्वारिंशत	
50.	प×चाशत्	
60.	षष्टिः	
70.	सप्ततिः	
80.	अशीतिः	
90.	नवतिः	
100.	शतम्	

संख्यावाचकशब्दानां रूपाणि

यदि 'एक' शब्दस्य अर्थः संख्यावाचकः 'एक' इति भवति तर्हि तस्य रूपाणि त्रिषु लिङ्गेषु केवलम् एकवचने भवन्ति।

'द्वि' शब्दस्य रूपाणि त्रिषु लिङ्गेषु भिन्नानि केवलं द्विवचने भवन्ति।

	एक			द्वि		
	पुल्लिङ्गम्	नपुंसकलिङ्गम्	स्त्रीलिङ्गम्	पुल्लिङ्गम्	नपुंसकलिङ्गम्	स्त्रीलिङ्गम्
प्र0 वि0	एकः	एकम्	एका	द्वौ	द्वे	द्वे
द्वि0 वि0	एकम्	एकम्	एकाम्	द्वौ	द्वे	द्वे
तृ0 वि0	एकेन	एकेन	एकया	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
च0 वि0	एकस्मै	एकस्मै	एकस्यै	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
पं0 वि0	एकस्मात्	एकस्मात्	एकस्याः	द्वाभ्याम्	द्वाभ्याम्	द्वाभ्याम्
ष0 वि0	एकस्य	एकस्य	एकस्याः	द्वयोः	द्वयोः	द्वयोः
स0 वि0	एकस्मिन्	एकस्मिन्	एकस्याम्	द्वयोः	द्वयोः	द्वयोः

'त्रि' 'चतुर' शब्दयोः रूपाणि त्रिषु लिङ्गेषु भिन्नानि केवलं बहुवचने भवन्ति–

	त्रि			चतुर		
	पुल्लिङ्गम्	**नपुंसकलिङ्गम्**	**स्त्रीलिङ्गम्**	**पुल्लिङ्गम्**	**नपुंसकलिङ्गम्**	**स्त्रीलिङ्गम्**
प्र0 वि0	त्रयः	त्रीणि	तिस्त्रः	चत्वारः	चत्वारि	चतस्रः
द्वि0 वि0	त्रीन्	त्रीणि	तिस्त्रः	चतुरः	चत्वारि	चतस्रः
तृ0 वि0	त्रिभिः	त्रिभिः	तिसृभिः	चतुर्भिः	चतुर्भिः	चतसृभ्यः
च0 वि0	त्रिभ्यः	त्रिभ्यः	तिसृभ्यः	चतुर्भ्यः	चतुर्भ्यः	चतसृभ्यः
पं0 वि0	त्रिभ्यः	त्रिभ्यः	तिसृभ्यः	चतुर्भ्यः	चतुर्भ्यः	चतसृभ्यः
ष0 वि0	त्रयाणाम्	त्रयाणाम्	तिसृणाम्	चतुर्णाम्	चतुर्णाम्	चतसृणाम्
स0 वि0	त्रिषु	त्रिषु	तिसृषु	चतुर्षु	चतुर्षु	चतसृषु

प×चन्, षष्, सप्तन्, आदिसंख्यावाचकशब्दानां रूपाणि त्रिषु लिङ्गेषु समानानि केवलं बहुवचने भवन्ति।

	प×चन्	**षष्**	**सप्तन्**	**अष्टेन्**	**नवन्**	**दशन्**
प्र0 वि0	प×च	षट्	सप्त	अष्टौ, अष्ट	नव	दश
द्वि0 वि0	प×च	षट्	सप्त	अष्टौ, अष्ट	नव	दश
तृ0 वि0	प×चभिः	षड्भिः	सप्तभिः	अष्टाभिः, अष्टभिः	नवभिः	दशभिः
च0 वि0	प×चभ्यः	षड्भ्यः	सप्तभ्यः	अष्टाभ्यः, अष्टभ्यः	नवभ्यः	दशभ्यः
पं0 वि0	प×चभ्यः	षड्भ्यः	सप्तभ्यः	अष्टाभ्यः, अष्टभ्यः	नवभ्यः	दशभ्यः
ष0 वि0	प×चानाम्	षण्णाम्	सप्तनाम्	अष्टानाम्	नवानाम्	दशानाम्
स0 वि0	प×चसु	षट्सु	सप्तसु	अष्टासु, अष्टसु	नवसु	दशसु

संख्यावाचक विशेषणपदानां प्रयोगः

विशेषणस्य लिङ्गं विशेष्यवत् भवति यथा

चत्वारि मित्राणि	चतस्रः वर्त्तिकाः	चत्वारः सखायः
चत्वारः बन्धुजनाः	एकस्य जनस्य	त्रयः सुहृदः
एवमेव– प्रथमम् मित्रम्	प्रथमः जनः	प्रथमा वर्तिका
द्वितीयं मित्रम्	द्वितीयः बन्धुः	द्वितीया सखी

क्त्वा/ल्यप् प्रत्ययस्य प्रयोगः

पूवकालिक क्रियार्थे धातोः परं क्त्वा (त्वा) प्रत्ययः भवति। यथा छात्रः पाठं पठ् + क्त्वा = पठित्वा खेलति।

ग्रह् + क्त्वा = गृहीत्वा (ग्रहण करके)

दा + क्त्वा = दत्त्वा (देकर)

वि + चर् + णिच् + ल्यप् = विचार्य (विचार करके)

यदा धातोः पूर्वम् उपसर्गः भवति तदा 'क्त्वा' स्थाने 'ल्यप्' प्रत्ययः भवति।



क्तवतु प्रत्ययस्य प्रयोगः

उक्तवन्तः – ब्रू + वच् + क्तवतु, पुं प्रथमा बहुवचनम्

प्रस्थितवन्तः – प्र + स्था + क्तवतु, पुं प्रथमा बहुवचनम्

समानार्थकशब्दाः

मित्रम्, सखा, सुहृद्, बन्धुजनः

कथासारः

चत्वारि मित्राणि निर्धनाः आसन्। एकः योगी तेभ्यः सिद्धवर्त्तिकाः अयच्छत्। अकथयत् च वर्त्तिकायाः पतनस्थाने धनं भविष्यति। यदा प्रथमा वर्त्तिका अपतत् तत्र ताम्रमयी भूमिः आसीत्। तेषु एकः ताम्रं गृहीत्वा सन्तुष्टः भूत्वा गृहं प्रति अगच्छत्।

चार मित्र, निर्धन होने के कारण, धन कमाने के लिए चल पड़ते हैं। उज्जयिनी पहुंच कर एक योगी उन्हें सिद्ध बत्तियाँ देता है। बत्तियों के गिरने के स्थान पर धन होगा–ऐसा वह योगी बताता है। पहले मित्र की बत्ती जहाँ गिरती है वहाँ तांबा होता है और वह तांबा लेकर सन्तुष्ट होकर घर लौट जाता है। शेष तीन आगे चल पड़ते हैं।

पाठगतप्रश्नाः 5.1

1. अधोलिखितेषु रिक्तस्थानानि समुचितविशेषणैः अथवा विशेष्यैः पूरयत–

	विशेषणानि	**विशेष्याणि**
(क)	.....	ग्रामे
(ख)	चत्वारि	.....
(ग)	.....	सिद्धवर्त्तिकाः
(घ)	यथेष्टं	.....
(ङ)	चत्वारः	.....
(च)	.....	सुहृदः

2. अधोलिखितवाक्येषु क्रियापदानि पूरयत–

(क) अतः देशान्तरं ..... धनोपार्जनाय।

(ख) वयं दारिद्र्यपीडिताः धनम् .....।

(ग) यत्र तत्र वर्त्तिका .....तत्र तत्र नूनं धनम्.....।

(घ) ते चत्वारः हिमालयं प्रति .....।

(ङ) एकस्य जनस्य हस्तात् वर्त्तिका .....।

(च) सः ..... नहि, नहि, अहं तु ताम्रं गृहीत्वा गृहं .....।



3. अधोलिखितवाक्येषु अव्ययपदानि पूरयत–

(क) भवन्तः ..... समायाताः?

(ख) भवन्तः ..... गच्छन्ति?

(ग) वर्त्तिकाः गृहीत्वा हिमालयं ..... गच्छन्तु।

(घ) ..... वर्त्तिका पतिष्यति ..... धनं भविष्यति।

(ङ) तदनु ..... भूमिं खनन्ति ..... ताम्रमयीं भूमिं पश्यन्ति।

द्वितीयः अंशः

द्वितीयांशं पुनः पठामः

अथ किंचिद् दूरं ..... चक्रं भ्रमति मस्तके।

अधोलिखितानि पाठस्य अवबोधने भवतां साहाय्यं करिष्यन्ति।

द्वितीयस्य वर्त्तिका यत्र अपतत् तत्र कीदृशी भूमिः आसीत्? रूप्यमयी अर्थात् रजतमयी।

द्वितीयः बन्धुः किम् आदाय गृहं गतवान्? रजतम्। अन्यौ द्वौ कुत्र गतौ? अन्यौ द्वौ अग्रे गतौ। तौ किम् चिन्तितवन्तौ? अग्रे स्वर्णमयी भूमिः भविष्यति। किम् ताभ्याम् स्वर्णं लब्धम्? आम्, तृतीयवर्त्तिका यत्र अपतत् तत्र स्वर्णम् आसीत्। किम् तौ उभौ एव स्वर्णं गृहीत्वा गृहं गतौ? नहि केवलम् एकः एव गृहं गतवान्। एकः अग्रे गतवान्। अग्रे सः कीदृशस्य धनस्य आशाम् अकरोत्? रत्नानाम्। किम् तेन रत्नानि प्राप्तानि? नहि। सः कीदृशं जनम् अपश्यत्? रुधिरप्लावितम्, तस्य मस्तके चक्रम् भ्रमति स्म।

वर्त्तिकायुक्तः जनः तम् चक्रधरं किम् अपृच्छत्? 1. किम् अत्र जलमस्ति? 2. तव मस्तके चक्रं कथं भ्रमति?

किं वर्त्तिकायुक्तः जनः जलं लब्धवान्? नहि। किम् आश्चर्यम् वर्त्तिकायुक्तेन जनेन अनुभूतम्? चक्रम् अवतीर्य तस्य मस्तकम् आगच्छत्। भूतपूर्वः चक्रधरः कस्य अनुभवम् अकरोत्? सुखस्य चक्रं कस्य परिणामः अभवत्? अतिलोभस्य चक्रम् कदा मस्तकात् अवतरति? यदा कोऽपि अन्यः लोभाविष्टः मिलति। चक्रम् कस्य मस्तके भ्रमति? अतिलोभाभिभूतस्य।

अत्र द्वितीयांशे वर्णितमस्ति यत् द्वितीय मित्रस्य वर्तिका रजतयुक्तानां भूमौ न्यपतत्। सः अपि रजतेन सन्तुष्टः गृहं प्रति गतः। लोभाकृष्टौ अन्यौ स्वर्णलिप्सया अग्रे गतवन्तौ। तृतीयस्य वर्त्तिका स्वर्णयुतायां भूमौ अपतत्। सः स्वर्णलाभेन परमं सन्तोषमनुभवन् ततः प्रत्यावर्तत। परन्तु चतुर्थः तु रत्नप्राप्तेः आशया अग्रे अग्रे गतवान्। तत्र तेन एकः रक्तप्लावितः जनः दृष्टः। तस्य मस्तके चक्रं भ्रमति स्म। वर्त्तिकायुक्तः जनः तम् अपृच्छत्– "किम् अत्र जलम् अस्ति? तव मस्तके चक्रं कथं भ्रमति?" तदनन्तरं चक्रं तस्य मस्तकात् अवतीर्य वर्त्तिकायुक्तस्य जनस्य मस्तकम् आगच्छत्। अत्यधिकं भयाक्रान्तः



सः असह्यपीडामनुभूतवान्। सः सुखमनुभूयमानं तं पूर्वचक्रधरं चक्रागमनस्य कारणम् अपृच्छत्। सः अवदत् यत् अतिलोभस्य कारणात् एवं चक्राक्रमणं भवति। अर्थात् अतिलोभी जनः सदैव भयंकरं कष्टमनुभवति। अतः अतिलोभः न कर्तव्यः।

कथासारः

प्रथमः जनः ताम्रम् आदाय गच्छति। अवशिष्टेषु द्वितीयः जनः रजतम् आप्नोति, सः अपि तत् आदाय गच्छति। एवं तृतीयः स्वर्णम् आदाय प्रतिनिवर्तते। परन्तु चतुर्थः तदापि न सन्तुष्टः। सः अग्रे गच्छति। सः एकं चक्रधरं जनं पश्यति। तं च जलविषये पृच्छति। तस्मिन्नेव क्षणे चक्रम् अवतीर्य तस्य मस्तकम् आरोहति। यः अतिलोभम् करोति तस्य मस्तके चक्रम् एव भ्रमति। वस्तुतः अति लोभात् विनाशः भवति।

चारों मित्रों में से पहला मित्र तांबा लेकर चला जाता है। इसी प्रकार दूसरा और तीसरा चांदी और सोना अपने अपने भाग्य के अनुसार पाकर लौट जाते हैं। चौथा फिर भी लालच नहीं छोड़ता और आगे चला जाता है। प्यास से व्याकुल वह एक चक्रधारी को देखता है जिसके माथे पर चक्र घूम रहा है और खून बह रहा है। चौथे व्यक्ति के मिलने पर वह चक्र उतर कर उसके मस्तक पर आ जाता है। पहला चक्रधर मुक्त हो जाता है। वह कहता है कि चक्र तभी उतरेगा जब कोई और लोभी मनुष्य आकर तुमसे इसी प्रकार मिलेगा। वस्तुतः लालच का परिणाम विनाश ही होता है।

व्याकरणबिन्दवः

लङ्लकारस्य प्रयोगः भूतकाले भवति। पश्यत–

परस्मैपदम्, प्र.पु.एकवचनम्	**आत्मनेपदम् प्र. पु. एकवचनम्**
अपतत् (गिर गई)	आरभत (प्रारम्भ हो गई)
अवदत् (बोला)	अलभत (प्राप्त किया)
अभ्रमत् (घूमा, घूमता रहा)	(अत्र अन्ते अकारः अस्ति अतः हलन्तप्रयोगः नास्ति)
अपश्यत् (देखा)	
अपृच्छत् (पूछा)	

भावे सप्तमी प्रयोगः

दूरं गतेषु तेषु उनके दूर जाने पर

क्त्वा/ल्यप् प्रयोगः धातोः पूर्वं यदि उपसर्गः भवति तदा क्त्वा स्थाने ल्यप् भवति।

उक्त्वा	ब्रू – वच् क्त्वा	(कहकर)
दृष्ट्वा	दृश् क्त्वा	(देखकर)
उपसृत्य	उप सृ ल्यप्	(पास जाकर)

अवतीर्य	अव तृ ल्यप्	(उतर कर)
आदाय	आ दा ल्यप्	(लेकर)

तुमुन् प्रयोगः– निमित्तार्थक क्रियायोगे धातोः परं तुमुन् (तुम्) प्रत्ययः भवति। यथा बालः पठितुम् (पठ् + तुमुन्) विद्यालयं गच्छति।

खनितुम्	खन्	तुमुन्	खोदने के लिए
भ्रमितुम्	भ्रम्	तुमुन्	घूमने के लिए

शतृप्रत्ययस्य प्रयोगः

भ्रमन्	भ्रम् शतृ पुं0 प्रथमा एकवचनम्	घूमते हुए
सन्	अस् शतृ पुं0 प्रथमा एकवचनम्	होते हुए
अनुभवन्	अनु भू शतृ पुं0 प्रथमा एकवचनम्	अनुभव करते हुए

क्तवतु प्रत्ययस्य द्विवचनान्तप्रयोगौ

उक्तवन्तौ (पु.) ब्रू – वच् क्तवतु, प्रथम पुरुषः, द्विवचनम् (वे दो) बोले।

गतवन्तौ (पु.) गम्, क्तवतु, प्रथम पुरुषः, द्विवचनम् (वे दो) गये।

अव्ययपदानि

अग्रे (आगे), नूनम् (निश्चयपूर्वक), अथ (इसके बाद), पुनः (फिर), अपि (भी), यावत्–तावत् (जब तक–तब तक, ज्योंही–त्योंही), कृते –(लिए), एव (ही), तु (तो), इतः परम् (इससे आगे), एवम् (इस प्रकार), यत्र तत्र (जहाँ तहाँ), कथम् (क्यों/ किसलिए)।

कर्ता–क्रिया अन्वितिः

कर्तृपदानुसारम् एव क्रियाप्रयोगः भवति। यदि कर्त्ता प्रथमपुरुषः अस्ति तर्हि क्रिया अपि प्रथमपुरुषस्य एव भवति। यदा कर्ता मध्यमपुरुषः भवति तदा क्रिया मध्यमपुरुषस्य भवति। यदि कर्ता उत्तमपुरुषः अस्ति तदा क्रिया अपि उत्तमपुरुषस्य भवति।

प्रथमपुरुषस्य कर्तृक्रिययोः प्रयोगः

एकवचने

पुं	बालकः/सः/एषः/कः/भवान्
स्त्री0	बालिका/सा/एषा/का/भवती
नपुं	मित्रम्/तत्/एतत्/किम्

द्विवचने

पुं	बालकौ/तौ/एतौ/कौ/भवन्तौ
स्त्री0	बालिके/ते/एते/के/भवत्यौ
नपुं	मित्रे/ते/एते/के

1. गच्छति	लट्लकारः
2. अगच्छत्	लङ्लकारः
3. गच्छतु	लोट्लकारः
4. गच्छेत्	विधिलिङ्लकारः
5. गमिष्यति	लृट्लकारः

1. गच्छतः
2. अगच्छताम्
3. गच्छताम्
4. गच्छेताम्
5. गमिष्यतः



बहुवचने

पुं	बालकाः / ते / एते / के / भवन्तः	1. गच्छन्ति
स्त्री0	बालिकाः / ताः / एताः / काः / भवत्यः	2. अगच्छन्
नपुं	मित्राणि / तानि / एतानि / कानि	3. गच्छन्तु
		4. गच्छेयुः
		5. गमिष्यन्ति

	मध्यमपुरुषस्य कर्तृक्रिययोः प्रयोगः।			उत्तमपुरुषस्य कर्तृक्रिययोः प्रयोगः।		
	त्वम्	**युवाम्**	**यूयम्**	**अहम्**	**आवाम्**	**वयम्**
लट् 1.	गच्छसि	गच्छथः	गच्छथ	गच्छामि	गच्छावः	गच्छामः
लङ् 2.	अगच्छः	अगच्छतम्	अगच्छत	अगच्छम्	अगच्छाव	अगच्छाम
लोट् 3.	गच्छ	गच्छतम्	गच्छत	गच्छानि	गच्छाव	गच्छाम
विधि 4.	गच्छेः	गच्छेतम्	गच्छेत	गच्छेयम्	गच्छेव	गच्छेम
लृट् 5.	गमिष्यसि	गमिष्यथः	गमिष्यथ	गमिष्यामि	गमिष्यावः	गमिष्यामः

पाठगतप्रश्नाः 5.2

1. एकपदेन उत्तरत–
   (क) द्वितीयः जनः किम् आदाय गृहं गतवान्?
   (ख) तृतीयः जनः किम् आदाय गृहं गतवान्?
   (ग) चतुर्थः जनः कीदृशं पुरुषम् अपश्यत्?
   (घ) अतिलोभाविष्टस्य मस्तके किं भ्रमति?
   (ङ) चक्रधरस्य मस्तकात् किम् अवहत्?
   (च) अतिलोभस्य कः परिणामः?
2. उचितपदेन रिक्तस्थानानि पूरयत–
   (क) यथेच्छं रूप्यं स्वीकृत्य ..... न गन्तव्यम्। (अग्रे / ग्रामे)
   (ख) भोः गृह्यतां स्वेच्छया ..... इति तृतीयः अवदत्। (रजतम् / स्वर्णम्)
   (ग) नूनम् इतः परं रत्नानि भविष्यन्ति इति .....वदति। (तृतीयः / चतुर्थः)
   (घ) चक्रधरस्य मस्तकात् चक्रम् ..... वर्त्तिकायुक्तस्य मस्तकम् अगच्छत्। (आरुह्य / अवतीर्य)
   (ङ) अतिलोभाभिभूतस्य ..... भ्रमति मस्तके। (रुधिरम् / चक्रम्)
3. अधोलिखितानां विग्रहाणां समक्षं समस्तपदानि लिखत–
   (क) लोभेन आविष्टः = ...
   (ख) चक्रं धारयति इति = ...

(ग) पिपासया आकुलितः = ...

(घ) भयेन ग्रस्तः = ...

(ङ) मस्तकस्य उपरि = ...

(च) रुधिरेण आप्लावितम् = ...

4. विशेषणानि विशेष्यैः सह योजयत

विशेषणानि	विशेष्याणि
(क) रूप्यमयीम्	(i) जनम्
(ख) द्वितीयः	(ii) क्षणे
(ग) रुधिरप्लावितम्	(iii) भूमिम्
(घ) वर्त्तिकायुक्तः	(iv) चक्रधरः
(ङ) तस्मिन्	(v) बन्धुः
(च) भूतपूर्वः	(vi) जनः

5.4 किम् अधिगतम्

- अस्माभिः कदापि लोभः न कर्तव्यः।
- अतिलोभः अनर्थकारकः भवति। अतिलोभस्य परिणामः विनाशः एव।
- सन्तोषः एव पुरुषस्य परमं निधानम्।
- धातोः पूर्वम् यदि उपसर्गः भवति तदा क्त्वा स्थाने ल्यप् भवति।
- तत्पुरुषसमासे द्वितीयं पदं प्रधानं भवति।
- विशेषणानां प्रयोगः विशेष्यवत् भवति।
- संख्यापदानि अपि विशेषणानि भवन्ति।
- भूतकाले कर्तृवाच्ये लङ्लकारस्य स्थाने क्तवतु प्रत्ययस्य प्रयोगः भवति।

5.5 योग्यताविस्तारः

(क) लेखकपरिचयः

एषा कथा पंचतन्त्रात् संकलिता। पंचतन्त्रस्य रचयिता पं0 विष्णुशर्मा अस्ति। सः विष्णुशर्मा राज्ञः पुत्राणां बोधाय एताः कथाः अश्रावयत्। एताः कथाः श्रुत्वा राजपुत्राः राजनीतिकुशलाः व्यवहारचतुराः च अभवन्। अस्मिन् ग्रंथे प×च भागाः सन्ति– 1. मित्रभेदः, 2. मित्रसम्प्राप्तिः, 3. काकोलूकीयम्, 4. लब्धप्रणाशः, 5. अपरीक्षितकारकं च। अस्य ग्रन्थस्य अरबी–फारसीभाषयोः अनुवादः कृतः अस्ति। आंग्लभाषायाम् 'एरेबियन् नाइट्स' इति अस्य एव अनुवादः।



(ख) भावविस्तारः

समानार्थकसूक्तयः

(i) लोभः प्रतिष्ठा पापस्य प्रसूतिर्लोभ एव च।
द्वेषक्रोधादिजनको लोभः पापस्य कारणम्। (भोजप्रबधः)

(ii) लोभश्चेदगुणेन किम्? (भर्तृहरिः)

(iii) लोभेन बुद्धिश्चलति, लोभो जनयते तृषाम्।
तृषार्तो दुःखमाप्नोति, परत्रेह च मानवः।। (हितोपदेशः / मित्रलाभः / 140)

(iv) धने लोभे जन्तोः स्थितिमुपगते कस्य सुगतिः। (दशावतारचरितम् 6.20)

(v) कासां हि नापदां हेतुरतिलोभान्धबुद्धिता। (कथासरित्सागरम् 5.1.20)

(vi) प्रभूतलोभलुब्धानां मूलस्यापि परिक्षयः। (समयमातृका, 78)

(vii) लोभविष्टो नरो वित्तं वीक्षते न स चापदम्।
दुग्धं पश्यति मार्जारो, न तथा लगुडाहतिम्।। (सुभाषितरत्नभाण्डागारम्)

(ग) भाषाविस्तारः

संस्कृतभाषायां त्रीणि लिङ्गानि भवन्ति। दश लकाराः त्रयः पुरुषाः, त्रीणि वचनानि च। दशलकारेषु वयम् केवल प×चलकाराणाम् एव अत्र अभ्यासं कुर्मः।

(i) लट् लकारे

गच्छामः	गम्	उत्तमपुरुषः	बहुवचनम्	(हम सब जाते हैं)
इच्छामः	इष्	उत्तमपुरुषः	बहुवचनम्	(हम सब चाहते हैं)
निस्सरति	निस्+सृ	प्रथमपुरुषः	एकवचनम्	(निकलता है)
गच्छामि	गम्	उत्तमपुरुषः	एकवचनम्	(मैं जाता हूँ)
खनति	खन्	प्रथमपुरुषः	एकवचनम्	(खोदता है)
भ्रमति	भ्रम्	प्रथमपुरुषः	एकवचनम्	(घूमता है)

(ii) लोट् लकारे

कुर्वन्तु	कृ	प्रथमपुरुषः	बहुवचनम्	(करें)
स्वीकुर्वन्तु	स्वी + कृ	प्रथमपुरुषः	बहुवचनम्	(स्वीकार करें)
गच्छन्तु	गम्	प्रथमपुरुषः	बहुवचनम्	(जायें)
स्वीकुरुत	स्वी + कृ	मध्यमपुरुषः	बहुवचनम्	(स्वीकार करो)

(iii) लङ्लकारे

अवसन्	वस्	प्रथमपुरुषः	बहुवचनम्	(रहते थे)
अचिन्तयन्	चिन्त्	प्रथमपुरुषः	बहुवचनम्	(सोचा)
अगच्छन्	गम्	प्रथमपुरुषः	बहुवचनम्	(गये)

अपृच्छत्	प्रच्छ् (पृच्छ्)	प्रथमपुरुषः	एकवचनम्	(उसने पूछा)
अवदत्	वद्	प्रथमपुरुषः	एकवचनम्	(बाला)
अपतत्	पत्	प्रथमपुरुषः	एकवचनम्	(गिर गई)
अभ्रमत्	भ्रम्	प्रथमपुरुषः	एकवचनम्	(घूमा)
अपश्यत्	दृश्	प्रथमपुरुषः	एकवचनम्	(देखा)
आरभत	आ+रभ् (आ0)	प्रथमपुरुषः	एकवचनम्	(प्रारम्भ किया)
अलभत	लभ् (आ0)	प्रथमपुरुषः	एकवचनम्	(पाया)

(iv) लृट् (भविष्यत्)

भ्रमिष्यति	भ्रम्	प्रथमपुरुषः	एकवचनम्	(घूमेगा/घूमेगी)
पतिष्यति	पत्	प्रथमपुरुषः	एकवचनम्	(गिरेगा/गिरेगी)
भविष्यति	भू	प्रथमपुरुषः	एकवचनम्	(होगा/होगी)
गमिष्यामि	गम्	प्रथमपुरुषः	एकवचनम्	(जाऊँगा/जाऊँगी)

(v) विधिलिङ् (प्रार्थना/इच्छा)

अगच्छेत्	आ + गम्	प्रथमपुरुषः	एकवचनम्	(आये)
भवेत्	भू	प्रथमपुरुषः	एकवचनम्	(होवे)
पठेयुः	पठ्	प्रथमपुरुषः	बहुवचनम्	(पढ़ें)

5.6 पाठान्तप्रश्नाः

1. अधोलिखितवाक्यानि कथाक्रमेण लिखत–

(क) ते चत्वारः सखायः उज्जयिन्याम् योगिनः मठम् प्रति अगच्छन्।

(ख) चतुर्थः जनः रत्नानि अग्रे भविष्यन्ति इति मत्वा अतिलोभेन अग्रे अगच्छत्।

(ग) एकदा चत्वारि मित्राणि धनाभावेन दुःखिताः देशान्तरं प्रति प्रस्थितवन्तः।

(घ) द्वितीयजनस्य वर्त्तिका यत्र अपतत् तत्र रजतमयी भूमिः आसीत्। सोऽपि रजतं गृहीत्वा प्रतिनिवृत्तः।

(ङ) प्रथमः सखा वर्त्तिकापतनानुसारं ताम्रम् आदाय गृहम् अगच्छत्।

(च) तृतीयः जनः अपि स्वर्णं प्राप्य गृहं प्रति निवृत्तः।

(छ) योगी भैरवानन्दः तेभ्यः चतस्रः सिद्धवर्त्तिकाः अयच्छत्।

(ज) अन्ते चतुर्थः जनः रक्तरंजितम् एकं चक्रधरं पुरुषम् अपश्यत्।

(झ) योगी अवदत् ''यत्र यत्र वर्त्तिका पतिष्यति तत्र तत्र धनं भविष्यति''।

(ञ) चक्रं चक्रधरमस्तकात् अवतीर्य वर्त्तिकायुक्तनरस्य मस्तके आगच्छत्।

2. प्रश्नान् उत्तरत

(क) लोभाविष्टाः जनाः भूमिं खनित्वा किम् किम् अलभन्त?



(ख) चतुर्थः जनः किम् उक्त्वा अग्रे गतवान्?

(ग) चतुर्थः जनः अग्रे गत्वा कम् अपश्यत्?

(घ) वर्त्तिकाः कीदृश्यः आसन्?

(ङ) कः वर्त्तिकाः दत्तवान्?

3. अधोलिखितेषु अव्ययपदानि रेखांकितानि कुरुत–

अग्रे, अधः, अहम्, कथम्, अतः, गच्छतः, प्रति, प्रीतिः, तत्र, कुतः, वयम्, तु, ते, एवम्।

4. संख्यापदानि विशेषणानि योजयत

(क) ..... मित्रम्। (प्रथमः/प्रथमम्)

(ख) ..... वर्त्तिकाः। (चत्वारः/चतस्रः)

(ग) ..... बन्धुः। (द्वितीयः/द्वौ)

(घ) ..... जनाः। (तृतीया/त्रयः)

(ङ) ..... जनौ। (द्वे/द्वौ)

(च) ..... चक्रम्। (एकः/एकम्)

5.7 उत्तराणि

बोधप्रश्नाः

1. (क) चत्वारि, (ख) चत्वारः, (ग) चतस्रः,
   (घ) त्रयः, (ङ) द्वौ, (च) एकाकी
2. (क) दारिद्र्योपहताः, (ख) हिमालयः, (ग) स्वेच्छया,
   (घ) यथेष्टम्, (ङ) वर्त्तिकापतत्, (च) नाग्रे
3. (क) भविष्यति, (ख) प्राप्तवन्तः, (ग) कुर्वन्तु,
   (घ) गच्छन्तु, (ङ) खनति, (च) निस्सरति

पाठगतप्रश्नाः

5.1

1. (क) कस्मिंश्चिद्, (ख) मित्राणि, (ग) चतस्रः,
   (घ) धनम्, (ङ) सखायः, (च) त्रयः
2. (क) गच्छामः, (ख) इच्छामः, (ग) पतति–भविष्यति,
   (घ) अगच्छन्, (ङ) अपतत्, (च) अवदत्, गच्छामि
3. (क) कुतः, (ख) कुत्र, (ग) प्रति,
   (घ) यत्र, तत्र, (ङ) यावत्, तावत्

5.2

1. (क) रजतम्, (ख) स्वर्णम्, (ग) रक्तरंजितं चक्रधरम्, (घ) चक्रम्, (ङ) रक्तम्, (च) विनाशः
2. (क) अग्रे, (ख) स्वर्णम्, (ग) चतुर्थः, (घ) अवतीर्य, (ङ) चक्रम्
3. (क) लोभाविष्टः, (ख) चक्रधरः, (ग) पिपासाकुलितः, (घ) भयग्रस्तः, (ङ) मस्तकोपरि, (च) रुधिराप्लावितम्
4. (क) + (iii), (ख + (v), (ग)+ (i), (घ) + (vi), (ङ) + (ii), (च + (iv),

पाठान्तप्रश्नाः

1. ग, क, छ, झ, ङ, घ, च, ख, ज, ञ
2. (क) ताम्रम्, रजतम्, स्वर्णम्
   (ख) अग्रे रत्नानि भविष्यन्ति
   (ग) रुधिरप्लावितं चक्रधरम्
   (घ) सिद्धाः
   (ङ) योगीभैरवानन्दः
3. अग्रे, अधः, कथम्, अतः, प्रति, तत्र, कुतः तु, एवम्
4. (क) प्रथमम्, (ख) चतस्रः, (ग) द्वितीयः, (घ) त्रयः, (ङ) द्वौ, (च) एकम्



309sk06

6

राजते खलु कन्याकुमारी

अहं जानामि ननु भारतं नाम देवभूमिः। भारतस्य उत्तरे मुकुटशिरोमणिः हिमालयो नाम नगाधिराजः विराजते। दक्षिणे त्रयः समुद्राः भारतभूमेः पादप्रक्षालनं कुर्वन्ति। तत्र सागराणां सङ्गमस्थले एव कन्याकुमारी नाम क्षेत्रम् अस्ति। अस्य दिव्यस्थानस्य दर्शनेन स्वामिविवेकानन्दः अपि प्रभावितः जातः। अतः सः समुद्रं तीर्त्वा एव एतत् द्वीपम् उपागच्छत्। अस्य स्थानस्य ऐतिहासिकं भौगोलिकं सामाजिकं च गौरवं वर्तते। प्रकृतेः सौन्दर्यं तु अवर्णनीयम्। प्रस्तुतं पाठं पठित्वा तु वयम् अस्य क्षेत्रस्य विषये अधिकं ज्ञास्यामः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- कन्याकुमारी इति सन्दर्भे प्रचलिताः कथाः स्वशब्दैः लेखितुं समर्थः भविष्यति;
- विवेकानन्दस्मारकस्य वर्णनं कर्तुं शक्ष्यति;
- पाठे विशेषणानि अवचित्य विशेष्यपदैः सह योजनं कर्तुं शक्तः भविष्यति;
- पदानां पर्यायपदानि विलोमपदानि च लेखितुं सक्षमः भविष्यति;
- इकारान्तपुल्लिङ्ग–इकारान्तस्त्रीलिङ्गशब्दानां रूपरचनायाः तुलनां कर्तुं शक्तः भविष्यति;
- तत्पुरुषसमस्तपदानां विग्रहं कर्तुं योग्यः भविष्यति;
- क्त–क्तवतु प्रत्ययानां वाक्येषु प्रयोगं कर्तुं शक्तः भविष्यति;
- टाप्–ङीप् प्रत्ययान्तपदानां चयनं करिष्यति;
- परितः, पुरतः, उपरि, पार्श्वे पदानां योगे उपपदविभक्तेः प्रयोगं करिष्यति।

क्रियाकलापः



6.1

मानचित्रं दृष्ट्वा निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत–

1. दक्षिणभारतस्य प्रदेशानां नामानि लिखत ....

2. त्रयाणां सागराणां नामानि लिखत (क).....

(ख).....

(ग).....

3. सागराणां सङ्गमस्थले दक्षिणकोणे बिन्दुना प्रदर्शितस्थानस्य नाम लिखत



6.1 मूलपाठः

राजते खलु कन्याकुमारी

आम् सः बिन्दुः अस्ति कन्याकुमारी। इदानीं तस्य विषये अधिकं जानीमः।

सम्प्रति वयं मूलपाठं पठामः।

कन्याकुमारी नामकम् अद्वितीयं क्षेत्रं पूर्वसमुद्रस्य पश्चिमसमुद्रस्य दक्षिणसमुद्रस्य च सङ्गमे स्थितम्। त्रयः समुद्राः कन्याकुमार्याः पदतलं निरन्तरं प्रक्षालयन्ति। भारतस्य मानचित्रे तमिलनाडुप्रदेशे दक्षिणकोणस्य अन्ते बिन्दुरूपेण दृश्यते एषा कन्याकुमारी।

कन्याकुमारीविषये नानाविधाः कथाः श्रूयन्ते। प्रजापतेः पुत्रः बाणासुरः शिवात् वरं प्राप्य मदोन्मत्तः जातः। सः विविधान् अत्याचारान् कृत्वा जनान् पीडयति स्म। जनाः देवं विष्णुं प्रार्थितवन्तः। देवः अवदत्– अस्य वधः पराशक्त्या कुमार्या करिष्यते। तपः कृत्वा पराशक्तिः बाणासुरस्य वधम् अस्मिन् एव क्षेत्रे अकरोत्। मरणसमये बाणासुरः देव्यै निवेदितवान् ''देवि! क्षमां कुरु। मह्यं सद्गतिं प्रददातु भवती। इदं स्थलं तीर्थं भवेत्। अत्र ये स्नास्यन्ति ते गङ्गास्नानफलं प्राप्नुयुः इति।'' देवी 'तथैवास्तु' इति उक्त्वा तम् अनुगृहीतवती। बाणतीर्थनामके अस्मिन् स्थाने स्नानं महत् पुण्यदायकम् इति मन्यते। श्रूयते यत् कुमार्या कन्यया सः असुरः हतः इति एतत् क्षेत्रं कन्याकुमारी इति नाम्ना प्रसिद्धं जातम्।

अपरा च कथा एवं श्रूयते यत् पूर्वं भरतः नाम नृपः आसीत्। तस्य अष्ट पुत्राः एका पुत्री च आसीत्। भरतः स्वदेशं नवधा विभज्य दत्तवान्। दक्षिणदेशः कुमारीनाम्न्यै पुत्र्यै दत्तः। अतः सः देशः कुमारीक्षेत्रम् इत्येव प्रसिद्धः अभवत्।

अस्मिन् स्थाने एकं मन्दिरम् अस्ति। तत्र देवी जपमालां गृहीत्वा तपः आचरन्ती इव दृश्यते। विजयादशमीदिने तु बाणासुरस्य वधार्थमेव प्रस्थितायाः धनुर्बाणादिभूषितायाः देव्याः कन्याकुमार्याः शोभायात्रा भवति। नवरात्रदिनेषु मन्दिरे विशेषपूजाः प्रचलन्ति। विशाखानक्षत्रे जलयात्रा–उत्सवः आयोज्यते। एतेषु सर्वेषु उत्सवेषु असंख्याः भक्ताः तत्र सम्मिलन्ति।

शब्दार्थाः

अद्वितीयं = अद्भुत
सङ्गमे = मिलने के स्थान पर
पदतलं = चरणों को
प्रक्षालयन्ति = धोते हैं
नानाविधाः = अनेक प्रकार की
मदोन्मत्तः = घमण्ड के नशे में चूर
प्रार्थितवन्तः = प्रार्थना की।
स्नास्यन्ति = स्नान करेंगे
तथैवास्तु = ऐसा ही हो
अपरा = दूसरी

नवधा = नौ भागों में
विभज्य = बाँटकर
वधार्थं = वध के लिए
विशाखा नक्षत्रे = विशाखा नक्षत्र में
तपः आचरन्ती = तपस्या करती हुई
वैशिष्ट्यम् = विशेषता
शिलामये द्वीपे = शिला से निर्मित द्वीप पर
प्रकोष्ठे = कमरे में

धनुर्बाणादिभूषितायाः = धनुष–बाणादि से सुशोभित

6.2 विवेकानंद स्मारक

शब्दार्थाः
बृहत् = बड़ी
भविष्यविषये = भारत के भविष्य के विषय में
रम्या = सुन्दर
पुरतः = सामने
परितः = चारों ओर
नीलजलधेः = नीले सागर की
अरुणवर्णं = लालरंग के
भास्करं = सूर्य को
कनकमयमिव = स्वर्णमय जैसा
असंख्यशुक्तिमालाः = असंख्य सीपियों की मालाएँ
भारतभूम्यै = भारत भूमि के लिए
समर्पयन्ति = समर्पित करती हैं

मन्दिरस्य नातिदूरे एव दक्षिणसमुद्रे स्थिते शिलामये द्वीपे बृहत् विवेकानन्दशिलास्मारकम् निर्मितम् अस्ति। विवेकानन्दः 1892 तमे वर्षे कन्याकुमारीक्षेत्रम् आगतः। शिलामयं द्वीपं दृष्ट्वा सः बाहुबले एव विश्वासं कृत्वा समुद्रं तीर्त्वा तत्र प्राप्तवान्। तत्र च ध्यानमग्नः सन् भारतस्य भविष्यविषये चिन्तनं कृतवान्। अतः श्री एकनाथ रानाडे महाभागः 1970 तमे वर्षे महता प्रयत्नेन विवेकानन्दशिलास्मारकस्य निर्माणम् अकारयत्। स्मारकस्य मध्ये विवेकानन्दस्य रम्या प्रतिमा दृष्टिगोचरा भवति। अत्र विशिष्टं ध्यानमन्दिरम् अस्ति। स्मारकस्य अन्धकारमये प्रकोष्ठे पुरतः 'ऊँ' इत्यस्य चित्रं दृश्यते। अत्र सर्वे मौनं तिष्ठन्ति। शिलास्मारकस्य विशाले परिसरे देशविदेशेभ्यः पर्यटकाः आगत्य अस्य सुन्दरतां पश्यन्ति साधनां च कुर्वन्ति। ध्यानयोगादिमाध्यमेन चिकित्सामपि प्राप्नुवन्ति। स्मारकस्य पार्श्वे एव तिरुवल्लुवर कवेः प्रतिमा अपि विराजते। अयं 'तिरुक्कुरल' इति नामकस्य ग्रन्थस्य प्रणेता।

एतस्य भवनस्य पुरतः अस्ति श्रीपादशिला। भगवती कन्याकुमारी तत्रैव एकपादेन स्थित्वा तपः आचरितवती। तत्र शिलायां दक्षिणपादस्य चिह्नं स्पष्टतया दृश्यते। अतएव सा शिला श्रीपादशिला इति प्रसिद्धा जाता।



6.3 विवेकानंद शिला

द्वीपं परितः सागराणां शोभा अवर्णनीया एव। नीलजलधेः उपरि आगच्छन्तम् अरुणवर्णं भगवन्तं भास्करं दृष्ट्वा कस्य मनः न प्रसीदति। सम्पूर्णं समुद्रजलं कनकमयम् इव प्रतिभाति। एतत् एव तत् स्थलं यत्र सूर्योदयः तथा च सूर्यास्तः एकस्मात् एव स्थानात् द्रष्टुं शक्यते। प्रतिक्षणं सागरतरङ्गाः असंख्यशुक्तिमालाः शंखमालाः च भारतभूम्यै समर्पयन्ति। अहो! 'राजते खलु कन्याकुमारी।'



6.2 बोधप्रश्नाः

1. सम्बद्धान् वाक्यांशान् योजयत–

(क) तमिलनाडुप्रदेशे दक्षिणकोणस्य अन्ते	(i) नानाविधाः कथाः श्रूयन्ते।
(ख) कन्याकुमारीविषये	(ii) एका पुत्री च आसीत्।
(ग) तस्य अष्ट पुत्राः	(iii) बिन्दुरूपेण दृश्यते एषा कन्याकुमारी।
(घ) स्मारकस्य मध्ये विवेकानन्दस्य	(iv) शोभा अवर्णनीया एव।
(ङ) द्वीपं परितः सागराणां	(v) रम्या प्रतिमा दृष्टिगोचरा भवति।
(च) सम्पूर्णं समुद्रजलं	(vi) कनकमयम् इव प्रतिभाति।

2. रिक्तस्थानेषु क्रियापदानि लिखत–
   (क) त्रयः समुद्राः कन्याकुमार्याः पदतलं निरन्तरं .....।
   (ख) देवि! क्षमां कुरु। मह्यं सद्गतिं ..... भवती।
   (ग) दक्षिणदेशः 'कुमारी' नाम्न्यै पुत्र्यै .....।
   (घ) अत्र सर्वे मौनं .....।
   (ङ) एतस्य भवनस्य पुरतः ..... श्रीपादशिला।
   (च) सम्पूर्णं समुद्रजलं कनकमयम् इव .....।
3. मूलपाठात् उचितपदानि चित्वा रिक्तस्थानानि पूरयत–
   (क) प्रजापतेः पुत्रः ..... शिवात् वरं प्राप्य मदोन्मत्तः जातः।
   (ख) अत्र ..... स्नास्यन्ति .....गङ्गास्नानफलं प्राप्नुयुः।
   (ग) बाणतीर्थनामके अस्मिन् स्थाने ..... महत् पुण्यदायकम्।
   (घ) ..... देवं विष्णुं प्रार्थितवन्तः।
   (ङ) ..... तथैवास्तु इति कथयित्वा तम् अनुगृहीतवती।
   (च) ..... 1892 तमे वर्षे कन्याकुमारीक्षेत्रम् आगतः।

6.3 अधुना अवगच्छामः

'कन्याकुमारी' इति प्रदेशस्य विषये पुनः पठामः। इदं स्थानं, बाणासुरस्य वधकारणात् पुण्यस्थलं जातम्। अस्य स्थलस्य महत्त्वं वयम् ज्ञास्यामः।

प्रथमः अंशः

कन्याकुमारी ..... सम्मिलन्ति।

(क) त्रयः समुद्राः कन्याकुमार्याः पदतलं निरन्तरं प्रक्षालयन्ति।

के एते त्रयः समुद्राः? पूर्वः समुद्रः = बङ्गः–आख्यातः समुद्रः

पश्चिमः समुद्रः = अरबसागरः

दक्षिणः समुद्रः = हिन्दमहासागरः

एते समुद्राः किं कुर्वन्ति? कन्याकुमार्याः पदतलं प्रक्षालयन्ति।

कन्याकुमारी का? कन्याकुमारी एका देवी अस्ति। तस्याः नाम्ना तमिलनाडुप्रदेशे दक्षिणकोणस्य अन्ते बिन्दुरूपेण दृश्यते एकं क्षेत्रम्।त्रयः समुद्राः तस्याः कन्याकुमार्याः चरणौ प्रक्षालयन्ति। वस्तुतः अत्र त्रयाणां समुद्राणां सङ्गमः वर्तते। कन्याकुमार्याः नाम्ना इदं स्थलं कन्याकुमारीक्षेत्रं कथ्यते।

(ख) प्रजापतेः पुत्रः बाणासुरः शिवात् वरं प्राप्य मदोन्मत्तः अभवत्।

बाणासुरः कः? प्रजापतेः पुत्रः।

तेन कस्मात् वरः प्राप्तः? शिवात्। कथम्? प्रचण्डेन तपसा सः शिवं प्रसन्नम् अकरोत्। प्रसन्नो भूत्वा शिवः तस्मै वरम् अयच्छत्। एवं तस्य उपरि शिवस्य महती कृपा जाता।

कृपां प्राप्य सः कीदृशः अभवत्? कृपां प्राप्य सः मदोन्मत्तः जातः। उन्मत्तः स जनान् पीडयति स्म।

(ग) बाणतीर्थनामके अस्मिन् स्थाने स्नानं महत् पुण्यदायकम् इति मन्यते

कस्मिन् स्थाने स्नानं पुण्यदायकम्? बाणतीर्थनामके स्थाने।

स्थानस्य नाम बाणतीर्थं कथम् जातम्? बाणासुरस्य वधकारणात्। वस्तुतः मदोन्मत्तः बाणासुरः पराशक्त्या देव्या हतः। तत् वधस्थलं सः तीर्थस्थलं कर्तुं प्रार्थितवान्।

प्रार्थना कथं सफला जाता? बाणासुरस्य प्रार्थनया भगवती तत् स्थानं तीर्थस्थलम् अकरोत्। 'ये तत्र स्नास्यन्ति ते गङ्गास्नानफलं प्राप्स्यन्ति' इति वरम् भगवती अददात्। अतः देव्याः आशीर्वादैः तत्र स्नानं पुण्यदायकं भवति इति मन्यते।

सारः

तमिलनाडुराज्ये भारतस्य दक्षिणे कोणे कन्याकुमारी नामकं प्रसिद्धं तीर्थम् अस्ति। अत्र त्रयः समुद्राः मिलन्ति। 'कन्याकुमारी' इति नामविषये अनेकाः कथाः सन्ति। बाणासुरवधः, भरतस्य राज्यप्रदानम् इति प्रमुखे कथे। अस्मिन् मन्दिरे नवरात्रपूजनं, शोभायात्रायाः आयोजनं भव्यं भवति।

तमिलनाडु राज्य में भारत के दक्षिणी छोर पर तीन ओर समुद्र से घिरे एक स्थान का नाम कन्याकुमारी है। इस स्थल का नाम कन्याकुमारी कैसे पड़ा इस संदर्भ में अनेक दन्त कथाएँ हैं जिनमें बाणासुर तथा राजा भरत की कथाएँ प्रमुख हैं। कन्याकुमारी देवी



के मन्दिर में नवरात्र के दिनों में विशेष पूजा तथा शोभायात्रा का आयोजन किया जाता है।

व्याकरणबिन्दवः

या विभक्तिः यत् लिङ्गं च विशेष्यपदे भवति तदुनसारम् एव विशेषणपदं वर्तते यथा– एकम् मन्दिरम्, असंख्याः भक्ताः, अस्मिन् स्थाने।

सन्धयः

बाणासुरः =	बाण + असुरः	अ + अ = आ (दीर्घसन्धिः)
मदोन्मत्तः =	मद + उन्मत्तः	अ + उ = ओ (गुणसन्धिः)
तथैव =	तथा + एव	आ + ए = ऐ (वृद्धिसन्धिः)
तथैवास्तु =	तथैव + अस्तु	अ + अ = आ (दीर्घसन्धिः)
इत्येव =	इति + एव	इ + ए = य (यण्सन्धिः)

समासाः

अद्वितीयम् =	न द्वितीयम्	नञ् तत्पुरुषसमासः
मदोन्मत्तः =	मदेन उन्मत्तः	तृतीयातत्पुरुषः
मरणसमये =	मरणस्य समये	षष्ठीतत्पुरुषः
गङ्गास्नानफलम् =	गङ्गास्नानस्य फलम्	षष्ठीतत्पुरुषः
समुद्रतीरे =	समुद्रस्य तीरे	षष्ठीतत्पुरुषः

क्त–क्तवतुः– क्त (त), क्तवतु (तवत्) प्रत्ययौ भूतकालिक प्रत्ययौ। 'क्त' प्रत्ययस्य प्रयोगः प्रायः कर्मवाच्ये, भाववाच्ये च भवति, क्तवतु प्रत्ययस्य प्रयोगः कर्तृवाच्ये भवति। विशेषणरूपे अपि अनयोः प्रयोगः भवति अतः त्रिषु लिङ्गेषु एतयोः प्रयोगः भवति।

यथा– क्त (1) तेल फलं खादितम्।

(2) मया बाला दृष्टा।

(3) गुरुणा बालः पृष्टः।

क्तवतु (1) गृहं गतवान् बालः। (पु.)

(2) गृहं गतवती बाला। (स्त्री.)

पदपरिचयः (प्रकृति–प्रत्ययविभागः)

पदानि	प्रकृतिः	प्रत्ययः	लिङ्गम्	विभक्तिः / पुरुषः	वचनम्
हतः	हन्	क्त	पुं0	प्रथमा	एकवचनम्
स्थितम्	स्था	क्त	नपुं0	प्रथमा	एकवचनम्
दत्तः	दा	क्त	पुं0	प्रथमा	एकवचनम्
प्रार्थितवन्तः	प्र+अर्थ	क्तवतु	पुं0	प्रथमा	बहुवचनम्
निवेदितवान्	नि+विद् णिच्	क्तवतु	पुं0	प्रथमा	एकवचनम्
अनुगृहीतवती	अनु+ग्रह्	क्तवतु	स्त्री0	प्रथमा	एकवचनम्
दत्तवान्	दा	क्तवतु	पुं0	प्रथमा	एकवचनम्
आचरन्ती	आ+चर्	शतृ	स्त्री0	प्रथमा	एकवचनम्
गृहीत्वा	ग्रह्	क्त्वा			अव्ययम्
प्राप्य प्र+आप्	ल्यप्			अव्ययम्	
विभज्य	वि+भज्	ल्यप्			अव्ययम्
अस्मिन्	इदम्		पुं0	सप्तमी	एकवचनम्
पराशक्त्या	पराशक्तिः		स्त्री0	तृतीया	एकवचनम्
कुमारीनाम्नै	कुमारीनाम्नी		स्त्री0	चतुर्थी	एकवचनम्
कन्याकुमार्याः	कन्याकुमारी		स्त्री0	षष्ठी	एकवचनम्
प्रजापतेः	प्रजापति		पुं0	षष्ठी	एकवचनम्

क्रियापदपरिचयः

	धातुः	वाच्यम्	लकारः	पुरुषः	वचनम्
दृश्यते	दृश्	कर्मवाच्ये	लट्	प्रथमपुरुषे	एकवचनम्
श्रूयन्ते	श्रू	कर्मवाच्ये	लट्	प्रथमपुरुषे	बहुवचनम्
आयोज्यते	आ युज् णिच्	कर्मवाच्ये	लट्	प्रथमपुरुषे	एकवचनम्
पीडयति	पीड्	कर्तृवाच्ये	लट्	प्रथमपुरुषे,	एकवचनम्
करिष्यति	कृ	,,	लृट्	प्रथमपुरुषे	एकवचनम्
स्नास्यन्ति	स्ना	,,	लृट्	प्रथमपुरुषे	बहुवचनम्
सम्मिलन्ति	सम् + मिल्	,,	लट्	प्रथमपुरुषे	बहुवचनम्
प्रक्षालयन्ति	प्र + क्षाल्	,,	लट्	प्रथमपुरुषे	बहुवचनम्

पाठगतप्रश्नाः 6.1

1. अधोलिखितपदेभ्यः पूर्वम् उपयुक्तविशेषणपदानि कोष्ठकात् चित्वा योज्यन्ताम्
(नानाविधाः, कुमार्याः, विविधान्, त्रयः, कुमारीनाम्नै, अपरा)
(क) ..... समुद्राः



(ख) ..... कथा

(ग) ..... अत्याचारान्

(घ) ..... कन्यया

(ङ) ..... कथाः

(च) ..... पुत्र्यै

2. अधोलिखतवाक्येषु यत् सत्यं तत् (✓) इति चिह्नेन असत्यं च (×) इति चिह्नेन चिह्नितं कुरुत

(क) कन्याकुमार्याः पूर्वे, पश्चिमे, दक्षिणे च समुद्राः सन्ति ( )

(ख) बाणासुरः जनान् रक्षति। ( )

(ग) भरतेन स्वदेशः अष्टधा विभज्य दत्तः ( )

(घ) मन्दिरे दीपावलि–उत्सवे विशेषपूजाः शोभायात्राः च आयोज्यन्ते। ( )

(ङ) बाणासुरः कन्याकुमार्या हतः। ( )

(च) तत्र देवी कन्याकुमारी जपमालां गृहीत्वा तपः आचरन्ती इव दृश्यते।( )

3. एकपदेन उत्तरत–

(क) बाणासुरः कस्य पुत्रः आसीत्? .....

(ख) बाणासुरः देवीं कदा निवेदितवान्? .....

(ग) कस्मिन् स्थाने स्नानं पुण्यदायकम्?

(घ) भरतेन दक्षिणदेशः कस्मै दत्तः? .....

(ङ) मन्दिरे विशेषपूजाः कदा प्रचलन्ति? .....

(च) कन्याकुमार्या कः हतः? .....

द्वितीयः अंशः

अधुना द्वितीयम् अंशं बोधामः।

मन्दिरस्य नातिदूरे ..... राजते खलु कन्याकुमारी।

(क) मन्दिरस्य नातिदूरे दक्षिणसमुद्रे स्थिते शिलामये द्वीपे बृहत् विवेकानन्दस्मारकं निर्मितम्

दक्षिणसमुद्रे किं निर्मितम्? एकं बृहत् स्मारकम् निर्मितम्। स्मारकं कस्य अस्ति? स्वामिविवेकानन्दस्य इदं स्मारकम्। द्वीपः कीदृशः? अयं शिलामयः द्वीपः। 1892तमे वर्षे विवेकानन्दः तीर्त्वा तत्र अगच्छत्। तत्रैव सः ध्यानमग्नः भूत्वा भारतस्य भविष्यविषये चिन्तनम् अकरोत्। स्मारकं केन निर्मितम्? श्री एकनाथरानाडे महाभागेन 1970 तमे वर्षे

निर्मितम्। किम् इदं केवलं शिलास्मारकम्? नहि, इदं तु तीर्थस्थलम् अपि अस्ति। अत्र विवेकानन्दस्य प्रेरणादायिनी रम्या मूर्तिः दृश्यते। अत्र किंचित् वैशिष्ट्यम् अपि वर्तते? अत्र एकं ध्यानमन्दिरं वर्तते यस्मिन् अन्धकारमये प्रकोष्ठे प्रकाशमानं 'ऊँ' इत्यस्य चित्रं दृश्यते। ध्यानमन्दिरे जनाः किं कुर्वन्ति? जनाः मौनं भूत्वा साधनां कुर्वन्ति।

(ख) समस्तं समुद्रजलं कनकमयमिव दृश्यते

समुद्रजलं कथम् इव दृश्यते? समुद्रजलं स्वर्णमयम् इव दृश्यते। केन कारणेन जलं कनकमयं भाति? प्रभाते सूर्यस्य वर्णः अरुणः भवति। यदा अस्य अरुणिमा समुद्रतले पतति तदा समस्तं जलं कनकमयं प्रतीयते।

सारः

दक्षिणसमुद्रे एकस्मिन् द्वीपे विवेकानन्दस्मारकः अस्ति। अत्र ध्यानप्रकोष्ठे ऊँ इति चित्रम् अस्ति। अत्र जनाः ध्यानं कुर्वन्ति। अत्रैव तिरुक्कुरलप्रणेतुः तिरुवल्लुवरस्य अपि प्रतिमा अस्ति। एकेन पदेन तिष्ठन्ती कन्याकुमारीप्रतिमा अपि अत्र विराजते। समुद्रस्य जलं सूर्योदये स्वर्णमयं भवति। सागराः शंखमालाः शक्तिमालाः च समर्पयन्ति।

दक्षिण समुद्र के एक शिलामय द्वीप पर सन् 1970 में श्री एकनाथ रानाडे द्वारा स्थापित विवेकानन्द स्मारक है। यहाँ एक ध्यान मन्दिर है जिसके अँधेरे कमरे में 'ऊँ' का देदीप्यमान चित्र दिखाई देता है। देश विदेश से आए सैंकड़ों दर्शनार्थी यहाँ मौन साधना करते हैं। स्मारक के समीप तिरुक्कुरल नामक ग्रन्थ के प्रणेता तिरुवल्लुवर की प्रतिमा भी है। एक पैर से खड़े होकर तपस्या करती हुई कन्याकुमारी की मूर्ति भी यहाँ दिखाई देती है। प्रातः कालीन सूर्य की किरणें जब समुद्र पर पड़ती हैं तो समुद्र का जल स्वर्ण जैसा प्रतीत होता है। सागर प्रतिपल असंख्य सीपमालाएं और शंखमालाएं भारतभूमि को समर्पित करता रहता है।

व्याकरणबिन्दवः

सन्धयः

नातिदूरे =	न + अतिदूरे	अ + अ = आ (दीर्घसन्धिः)
किञ्चित् =	किम् + चित्	म् + च = च (व्यंजनसन्धिः)
शताधिकाः =	शत + अधिकाः	अ + अ = आ (दीर्घसन्धिः)
इत्यस्य =	इति + अस्य	इ + अ = य् (यण्सन्धिः)
तत्रैव =	तत्र + एव	अ + ए = ऐ (वृद्धिसन्धिः)

समासः

नीलजलधेः–	नीलः चासौ जलधिः, तस्य	कर्मधारयसमासः
अरुणवर्णम्–	अरुणं वर्णम्	कर्मधारयसमासः



पद–परिचयः

पदानि	प्रकृतिः	प्रत्ययः	लिङ्गम्	विभक्तिः / पुरुषः	वचनम्
निर्मितम्	निर् + मा	क्त	नपुं0	प्रथमा	एकवचनम्
आगतः	आ + गम्	क्त	पुं0	प्रथमा	एकवचनम्
जाता	जन्	क्त	स्त्री0	प्रथमा	एकवचनम्
अवर्णनीया	अ + वर्ण	अनीयर्	स्त्री0	प्रथमा	एकवचनम्
दृष्ट्वा	दृश्	क्त्वा	अव्ययम्		
प्राप्तवान्	प्र + आप्	क्तवतु	पुं0	प्रथमा	एकवचनम्
कृतवान्	कृ	क्तवतु	पुं0	प्रथमा	एकवचनम्
द्रष्टुम्	दृश्	तुमुन्	अव्ययम्		
शिलायाम्	शिला शब्दः		स्त्री0	सप्तमी	एकवचनम्
भारतभूम्यै	'भारतभूमि' शब्दः		स्त्री0	चतुर्थी	एकवचनम्

क्रियापद–परिचयः

पदानि	प्रकृतिः	लकारः	पुरुषः	वचनम्
सिध्यति	सिध्	लट्	प्रथम	एक0
विराजते	वि + राज्	लट्	प्रथम	एक0
प्रसीदति	प्र + सद्	लट्	प्रथम	एक0
शक्यते	शक् कर्मवाच्यम्	लट्	प्रथम	एक0
समर्पयन्ति	सम् + अर्प	लट्	प्रथम	एक0

उपपदविभक्तिः

परितः– अस्य पदस्य योगे द्वितीया विभक्तिः भवति। यथा– द्वीपं परितः सागराणां शोभा अवर्णनीया

पुरतः– एतेषां पदानां योगे षष्ठी विभक्तिः भवति।

उपरि– यथा वृक्षस्य पुरतः मयूरः।

गृहस्य उपरि वानरः।

पार्श्वे– विद्यालयस्य पार्श्वे वाटिका

टाप् ङीप् – टाप् (आ), ङीप् (ई) प्रत्ययौ स्त्रीलिङ्गे-वाचक शब्द– निर्माणाय प्रयुज्येते।

यथा–
अज + टाप् = अजा
बाल + टाप् = बाला
श्वेत + टाप् = श्वेता
कुमार + ङीप् = कुमारी
देव + ङीप् = देवी
पुत्र + ङीप् = पुत्री
भवत् + ङीप् = भवती

पाठगतप्रश्नाः 6.2

1. विशेषणं विशेष्यं च पृथक् कृत्वा लिखत

	विशेषणम्	विशेष्यम्
(क)	बृहत्	स्मारकम्
(ख)	द्वीपं	शिलामयम्
(ग)	प्रकाशमानं	चित्रम्
(घ)	अरुणवर्णं	भगवन्तम्
(ङ)	महता	प्रयत्नेन
(च)	अन्धकारमये	प्रकोष्ठे

2. कोष्ठकेषु दत्तानां पदानां समानार्थकपदानि मूलपाठात् चित्वा लिखत
   (क) मन्दिरस्य ..... (समीपे) विवेकानन्दस्मारकं दृश्यते।
   (ख) मध्यभागे विवेकानन्दस्य रम्या ..... (मूर्तिः) दृष्टिगोचरा भवति।
   (ग) स्मारकस्य ..... (निकटे) एव तिरुवल्लुवरप्रतिमा अपि विराजते।
   (घ) भगवन्तं ..... (सूर्य) दृष्ट्वा कस्य मनः न प्रसीदति।
   (ङ) सम्पूर्णं समुद्रजलं ..... (स्वर्णमयम्) इव दृश्यते।
   (च) द्वीपं ..... (सर्वतः)सागराणां शोभा अवर्णनीया।
3. प्रश्ननिर्माणं कुरुत
   (क) शिलामयं द्वीपं दृष्ट्वा सः तीर्त्वा तत्र प्राप्तवान्।
   (ख) स्मारकस्य मध्ये विवेकानन्दस्य रम्या प्रतिमा दृष्टिगोचरा भवति।
   (ग) भगवती कन्याकुमारी तत्रैव एकपदेन स्थित्वा तपः आचरितवती।
   (घ) तत्र शिलायां दक्षिणपादस्य चिह्नं स्पष्टतया दृश्यते।
   (ङ) द्वीपं परितः सागराणां शोभा अवर्णनीया एव।
   (च) सागरतरङ्गाः असंख्यशुक्तिमालाः शंखमालाः च भारतभूम्यै समर्पयन्ति।

6.4 किम् अधिगतम्

1. भारतस्य दक्षिणे भागे 'कन्याकुमारी' नाम्नः स्थलस्य विषये अनेकाः कथाः प्रचलिताः।
2. कन्याकुमार्याः मन्दिरे नवरात्रदिनेषु विशेषपूजाः शोभायात्राः च आयोज्यन्ते।
3. दक्षिणसमुद्रे शिलामयद्वीपे विवेकानन्दस्य स्मारकं वर्तते।
4. 'तिरुवल्लुवरप्रतिमा', 'श्रीपादशिला' च अपि प्रसिद्धे।
5. एकस्मात् स्थानात् एव सूर्योदयः सूर्यास्तः च द्रष्टुं शक्येते।
6. क्त, क्तवतु भूतकालिक कृत् प्रत्ययौ।



7. तत्पुरुषसमासे उत्तरपदं प्रधानं भवति। समासे विग्रहस्य अवस्थायां पूर्वपदस्य विभक्तेः लोपः भवति।
8. क्त्वा, ल्यप्, तुमुन्, –प्रत्ययानां योगेन अव्ययपदानि भवन्ति।
9. ईकारान्तस्त्रीलिङ्ग इकारान्तस्त्रीलिङ्गशब्दरचनयोः भेदः ज्ञातः।
10. परितः योगे द्वितीया, पुरतः, उपरि, पार्श्वे योगे च षष्ठी उपपदविभक्तिः भवति।
11. टाप् (आ) ङीप् (ई) स्त्रीवाचकप्रत्ययौ।

6.5 योग्यताविस्तारः

(क) कन्याकुमारीक्षेत्रस्य विशिष्टपरिचयः

- कन्याकुमारी इति तीर्थस्थानं जगत्प्रसिद्धम् अस्ति। अत्र प्रमुखदर्शनीयस्थानम् अस्ति 'विवेकानन्दस्मारकम्' यत् 1970 तमे वर्षे स्थापितम् अभवत्।
- कन्याकुमारीतः यन्त्रचालितया नौकया स्मारकं प्रति गन्तुं शक्यते।
- तिरुक्कुरल् नामकः ग्रन्थः तमिलुवेदः अपि कथ्यते। तिरुवल्लुरस्य प्रतिमायाः पदतलं प्राप्य नमस्कृत्य ततः पुनः नौका स्मारकं प्रति गच्छति।
- स्मारकस्य एकस्मिन् भागे विवेकानन्दसाहित्यस्य वेदान्तसाहित्यस्य विक्रयव्यवस्था अपि अस्ति।
- स्मारके यदा कदाचित् विशाला प्रदर्शनी अपि आयोज्यते।
- तत्र संस्कृतनाटकादीनां मंचनम् अपि भवति।

(ख) भाषाविस्तारः

पाठे अधोलिखितानाम् अकारान्तपुंल्लिङ्गशब्दानां रूपाणां प्रयोगः अस्ति। प्रथमे पाठे द्वादशशब्दानां रूपाणि दर्शितानि। तथैव एतेषां शब्दानां रूपाणि अपि भवन्ति।

अकारान्तपुल्लिंगशब्दाः (रामवत्)

समुद्रः, संगमः, कोणः, पुत्रः, बाणासुरः, शिवः, वरः, अत्याचारः, जनः, देवः, वधः, समयः, भरतः, नृपः, पुत्रः, देशः, उत्सवः, भक्तः, विवेकानन्दः, विश्वासः, प्रयत्नः, पर्यटकः, परिसरः, विदेशः, योगः, ग्रन्थः, पादः, सागरः, भास्करः, सूर्योदयः, सूर्यास्तः, तरङ्गः।

अकारान्तनपुंसकलिङ्गशब्दाः (फलवत्)

जलम्, भारतम्, क्षेत्रम्, बिन्दुरूपम्, मानचित्रम्, पदतलम्, स्थलम्, तीर्थम्, फलम्, स्थानम्, मन्दिरम्, दिनम्, नक्षत्रम्, द्वीपम्, स्मारकम्, बलम्, निर्माणम्, प्रकोष्ठम्, ध्यानम्, भवनम्।

आकारान्तस्त्रीलिङ्गशब्दाः (मालावत्)

माला, कथा, कन्या, शोभा, जपमाला, शिला, क्षमा, प्रतिमा, सुन्दरता, अपरा, शोभायात्रा, चिकित्सा, भूषिता, साधना, पूजा, रम्या, प्रस्थिता, इच्छा, प्रचलिता।

इकारान्तपुल्लिङ्गशब्दः (प्रजापति) स्त्रीलिङ्गश्च (भूमिः) तयोः तुलनात्मकरूपाणि

विभक्तिः	एकवचने	द्विवचने	बहुवचने
प्रथमा	प्रजापतिः (पुं.)	प्रजापती	प्रजापतयः
	भूमिः (स्त्री.)	भूमी	भूमयः
द्वितीया	प्रजापतिम्	प्रजापती	प्रजापतीन्
	भूमिम्	भूमी	भूमीः
तृतीया	प्रजापतिना	प्रजापतिभ्याम्	प्रजापतिभिः
	भूम्या	भूमिभ्याम्	भूमिभिः
चतुर्थी	प्रजापतये	प्रजापतिभ्याम्	प्रजापतिभ्यः
	भूमये/भूम्यै	भूमिभ्याम्	भूमिभ्यः
पंचमी	प्रजापतेः	प्रजापतिभ्याम्	प्रजापतिभ्यः
	भूमेः/भूम्याः	भूमिभ्याम्	भूमिभ्यः
षष्ठी	प्रजापतेः	प्रजापत्योः	प्रजापतीनाम्
	भूमेः/भूम्याः	भूम्योः	भूमीनाम्
सप्तमी	प्रजापतौ	प्रजापत्योः	प्रजापतिषु
	भूमौ/भूम्याम्	भूम्योः	भूमिषु
सम्बोधन	हे प्रजापते	हे प्रजापती	हे प्रजापतयः
	हे भूमे	हे भूमी	हे भूमयः

इकारान्तस्त्रीलिङ्ग (गतिः) – ईकारान्तस्त्रीलिङ्ग (देवी) रूपेषु भेदं पश्यत

विभक्तिः	एकवचने	द्विवचने	बहुवचने
प्रथमा	गतिः	गती	गतयः
	देवी	देव्यौ	देव्यः
द्वितीया	गतिम्	गती	गतीः
	देवीम्	देव्यौ	देवीः
तृतीया	गत्या	गतिभ्याम्	गतिभिः
	देव्या	देवीभ्याम्	देवीभिः
चतुर्थी	गतये/गत्यै	गतिभ्याम्	गतिभ्यः
	देव्यै	देवीभ्याम्	देवीभ्यः
पंचमी	गतेः/गत्याः	गतिभ्याम्	गतिभ्यः
	देव्याः	देवीभ्याम्	देवीभ्यः
षष्ठी	गतेः/गत्याः	गत्योः	गतीनाम्
	देव्याः	देव्योः	देवीनाम्
सप्तमी	गतौ/गत्याम्	गत्योः	गतिषु
	देव्याम्	देव्योः	देवीषु
सम्बोधन	हे गते!	हे गती!	हे गतयः!
	हे देवि!	हे देव्यौ!	हे देव्यः!



ध्यातव्यः केवलम् प्रथमा विभक्त्यां सर्वेषु वचनेषु, द्वितीयाविभक्त्याम् द्विवचने, सम्बोधने च एकवचने एव भेदः भवति।

क्त्वाप्रत्ययान्तशब्दाः अव्ययपदानि भवन्ति। दृष्ट्वा, गृहीत्वा, पठित्वा, कृत्वा, तीर्त्वा, स्थित्वा।

धातोः पूर्वं यदि उपसर्गः योज्यते तथा 'क्त्वा' प्रत्ययस्य स्थाने 'ल्यप्' प्रत्ययस्य प्रयोगः भवति, तत्पदम् अपि अव्ययं भवति।

यथा आदाय, प्राप्य, विभज्य, आगत्य।

6.6 पाठान्तप्रश्नाः

1. रेखाङ्कितपदानां विलोमपदं पाठात् चित्वा रिक्तस्थानेषु लिखत–

(क) जन्मसमये तुलसीदासेन 'राम' इति शब्दः उच्चारितः इति मन्यते।	(1) ..... बाणासुरः देव्यै निवेदितवान्, "देवि! क्षमां कुरु।"
(ख) मम गृहस्य पृष्ठतः एकम् उद्यानं वर्तते।	(2) एतस्य भवनस्य .....अस्ति श्रीपादशिला।
(ग) भूलोकस्य नीचैः पाताललोकः अस्ति।	(3) नीलजलधेः ..... आगच्छन्तम् अरुणवर्णं भास्करं दृष्ट्वा कस्य मनः न प्रसीदति।
(घ) पिपासिताय जलं दत्त्वा अहं प्रसन्ना जाता।	(4) तत्र देवी कन्याकुमारी जपमालाम्..... तपः आचरन्ती इव दृश्यते।
(ङ) प्रकाशमये स्थाने वयं सर्वं द्रष्टुं शक्नुमः।	(5) स्मारकस्य ..... प्रकोष्ठे पुरतः प्रकाशमानम् 'ऊँ' इत्यस्य चित्रं दृश्यते।

2. समस्तपदस्य निर्माणं कृत्वा लिखत–

(क) न द्वितीयम् .....
(ख) गङ्गायां स्नानस्य फलम् .....
(ग) समुद्रस्य तीरे .....
(घ) मरणस्य समये .....
(ङ) सद्गत्याः दानेन .....
(च) तीर्थस्य क्षेत्रम् .....

3. कन्याकुमारी नामके स्थाने 'श्रीपादशिला वर्तते। अस्याः विषये त्रीणि वाक्यानि लिखत।

4. निर्दिष्टधातुभिः सह क्त प्रत्ययप्रयोगेन वाक्यपूर्तिं कुरुत–

(क) प्रजापतेः पुत्रः बाणासुरः शिवात् वरं प्राप्य मदोन्मत्तः ..... । (जन् + क्त)

(ख) श्रूयते यत् कुमार्या कन्यया सः असुरः .....। (हन् + क्त)
(ग) एतत् नगरं कन्याकुमारी नाम्ना प्रसिद्धं .....। (जन् + क्त)
(घ) दक्षिणदेशः कुमारीनाम्न्यै पुत्र्यै .....। (दा + क्त)
(ङ) विवेकानन्दः 1892 तमे वर्षे कन्याकुमारीक्षेत्रम् .....। (आ + गम् + क्त)
(च) अतएव सा शिला 'श्रीपादशिला' इति प्रसिद्धा .....। (जन् + क्त)

5. विवकानन्दशिलास्मारकस्य वर्णनं प×चवाक्येषु कुरुत।

6. पूर्णवाक्येन उत्तरत–
(क) कन्याकुमारीक्षेत्रे कति समुद्राणां सङ्गमः अस्ति?
(ख) का बाणासुरस्य वधम् अकरोत्?
(ग) 'जलयात्रा–उत्सवः' कदा आयोज्यते?
(घ) स्मारकस्य अन्धकारमये प्रकोष्ठे किं दृश्यते?
(ङ) भगवती कन्याकुमारी कथं तपः आचरितवती?
(च) प्रतिक्षणं सागरतरङ्गाः भारतभूम्यै काः काः समर्पयन्ति?

7. अधोलिखितेषु शब्देषु अकारान्त पुल्लिंगशब्दान्, अकारान्त नपुंसकलिंगशब्दान्, आकारान्त स्त्रीलिङ्ग शब्दान् च पृथक् पृथक् कृत्वा लिखत–

सङ्गमः, कन्याः, परिसरः, क्षेत्रम्, कथा, ध्यानम्, पर्यटकः, स्मारकम्, सूर्योदयः, प्रतिमा, मन्दिरम्, पूजाः, नक्षत्रम्।

6.7 उत्तराणि

बोध प्रश्नाः

1. (क) + (iii), (ख) + (i), (ग) + (ii), (घ) + (v), (ङ) + (iv), (च) + (vi)
2. (क) प्रक्षालयन्ति, (ख) प्रददातु, (ग) दत्तः, (घ) तिष्ठन्ति, (ङ) अस्ति, (च) प्रतिभाति।
3. (क) बाणासुरः, (ख) ये ....ते, (ग) स्नानम्, (घ) जनाः, (ङ) देवी, (च) विवेकानन्दः

पाठगतप्रश्नाः 6.1

1. (क) त्रयः (ख) अपरा, (ग) विविधान् (घ) कुमार्या, (ङ) नानाविधाः, (च) कुमारीनाम्न्यै
2. (क) (✓), (ख) (×), (ग) (✓), (घ) (×), (ङ) (✓), (च) (✓)
3. (क) प्रजापतेः, (ख) मरणसमये, (ग) बाणतीर्थे,
(घ) कुमार्यै, (ङ) विजयादशमीदिने, (च) बाणासुरः



6.2

1. **विशेषणम्** **विशेष्यम्** **विशेषणम्** **विशेष्यम्**
   (क) बृहत् स्मारकम् (घ) अरुणवर्णम् भगवन्तम्
   (ख) शिलामयम् द्वीपम् (ङ) महता प्रयत्नेन
   (ग) प्रकाशमानम् चित्रम् (च) अन्धकारमये प्रकोष्ठे
2. (क) नातिदूरे, (ख) प्रतिमा, (ग) पार्श्वे,
   (घ) भास्करम्, (ङ) कनकमयम्, (च) परितः
3. (क) कम्, (ख) कस्य, (ग) केन,
   (घ) कस्याम्, (ङ) कम्, (च) कस्यै

6.5 पाठान्तप्रश्नाः

1. (क) मरणसमये, (ख) पुरतः, (ग) उपरि,
   (घ) आदाय, (ङ) अन्धकारमये,
2. (क) अद्वितीयम्, (ख) गङ्गास्नानफलम्, (ग) समुद्रतीरे,
   (घ) मरणसमये, (ङ) सद्गतिदानेन, (च) तीर्थक्षेत्रम्
3. 1. भवनस्य पुरतः श्रीपादशिला वर्तते।
   2. तत्र भगवती कन्याकुमारी एकपदेन स्थित्वा तपः आचरितवती।
   3. शिलायां दक्षिणपादस्य चिह्नं दृश्यते।
4. (क) जातः, (ख) हतः, (ग) जातम्,
   (घ) दत्तः, (ङ) आगतः, (च) जाता
5. द्वीपं परितः सागराणां शोभा अद्वितीया अस्ति। नीलसागरे आगच्छन्तम् अरुणवर्णं भगवन्तं सूर्यं दृष्ट्वा मनः प्रसीदति। समुद्रजलं स्वर्णमयं प्रतीयते। अत्र सूर्योदयः सूर्यास्तः च एकस्मात् एव स्थानात् द्रष्टुं शक्यते। प्रतिक्षणं सागरतरङ्गाः असंख्यशुक्तिमालाः शंखमाला च भारतभूम्यै समर्पयन्ति।
6. (क) कन्याकुमारीक्षेत्रे त्रयाणाम् समुद्राणां सङ्गमः अस्ति।
   (ख) पराशक्तिः कन्याकुमारी बाणासुरस्य वधम् अकरोत्।
   (ग) विशाखानक्षत्रे जलयात्रा उत्सवः आयोज्यते।
   (घ) स्मारकस्य अन्धकारमये प्रकोष्ठे ऊँ दृश्यते।
   (ङ) एकपादेन स्थित्वा कन्याकुमारी तपः आचरितवती।
   (च) प्रतिक्षणं सागरतरङ्गाः भारतभूम्यै असंख्यशुक्तिमालाः, शंखमालाः च समर्पयन्ति।
7. **अकारान्तपुल्लिङ्गशब्दाः** **अकारान्त नपुंसकलिङ्गशब्दाः** **आकारान्त स्त्रीलिंङ्गशब्दाः**

सङ्गमः	क्षेत्रम्	कन्याः
परिसरः	ध्यानम्	कथा
पर्यटकः	स्मारकम्	पूजाः
सूर्योदयः	मन्दिरम्	प्रतिमाः
	नक्षत्रम्	

309sk07

7

एतद् उपास्यम्

प्राचीनकाले भारतीयसंस्कृतौ मानवानां कृते चत्वारः आश्रमाः स्वीकृताः। ते च ब्रह्मचर्य–गृहस्थ–वानप्रस्थ–संन्यासाः इति। ब्रह्मचर्याश्रमे छात्राः गुरुकुले स्थित्वा विद्याग्रहणं कुर्वन्ति स्म। वेद–वेदांगानि पाठयित्वा आचार्यः अध्ययनस्य समाप्तौ शिष्यान् उपदिशति स्म। ते एव उपदेशाः अद्यत्वे अपि दीक्षान्तभाषणरूपेण प्रसिद्धाः सन्ति। वेदानां रहस्यं साररूपेण उपनिषत्सु उपलभ्यते। वस्तुतः वैदिकसाहित्यस्य अन्तिमं स्वरूपम् उपनिषद्रूपेण सुरक्षितम्। यत् ज्ञानं शिष्यः गुरोः समीपम् उपविश्य प्राप्नोति तत् एव उपनिषद्। तैत्तिरीयोपनिषदि गुरुणा उपदिष्टाः उपदेशाः अस्मिन् पाठे संकलिताः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- सदाचारविषये उपदेशवाक्यानि सम्यक् अवबोद्धुं समर्थः भविष्यति;
- पाठानुसारं करणीयानां कर्मणां निषिद्धकर्मणां च सूचीं निर्मार्तुं शक्तः भविष्यति;
- कर्मणः आचारस्य वा विषये संदेहे सति किं करणीयम् इति लेखितुं शक्ष्यति;
- लोट् लकारस्य विधिलिङ्. लकारस्य च प्रयोगं वाक्येषु कर्तुं सक्षमः भविष्यति;
- नञ्तत्पुरुषसमासस्य प्रयोगं कर्तुं योग्यः भविष्यति;
- तव्यत्, अनीयर्, यत्, प्रत्ययानां प्रयोगं कर्तुं समर्थः भविष्यति;
- युग्म–अव्ययानां वाक्येषु प्रयोगं करिष्यति;
- पदानां वर्णविश्लेषणं करिष्यति।

क्रियाकलापः

अधः चित्रद्वयं प्रदत्तम् अस्ति। एकस्मिन् चित्रे गुरुः छात्रान् पाठयति। द्वितीये चित्रे छात्रजीवनं समाप्य गृहं प्रस्थितान् छात्रान् आचार्यः सम्बोधयति। उभयचित्रसम्बद्धानि अत्र कानिचित् वाक्यानि लिखितानि। तेषु वाक्येषु यानि वाक्यानि अध्ययनरत–छात्रेभ्यः सन्ति 'क' स्तम्भे, यानि च छात्रजीवनं समाप्य गृहं गच्छतः छात्रान् प्रति सन्ति तानि 'ख' स्तम्भे लिखत।

7.1

7.2

वाक्यानि–

1. अस्माभिः सुचरितानि एव पालनीयानि।
2. पुष्पाणि चित्वा आनयत।
3. दानं श्रद्धया यच्छेत्।
4. आजीवनं स्वाध्यायं प्रवचनं च न त्यजेत्।
5. स्वपाठं ध्यानेन पठत।
6. सदा धर्मस्य पालनं कुर्यात्।
7. यज्ञाय समिधम् आनयत।
8. त्वया सदा परोपकारः कर्तव्यः।
9. वनात् अर्जुनवृक्षस्य त्वचम् आनय।
10. इमान् मन्त्रान् सस्वरं पठत।

'क' स्तम्भः (अध्ययनरत छात्रेभ्यः)	**'ख' स्तम्भः (गृहं गमनोत्सुकेभ्यः)**
1	1
2	2
3	3
4	4
5	5

7.1 मूलपाठः

एतद् उपास्यम्

इदानीं वयम् मूलपाठं ध्यानेन पठामः।

वेदम् अनूच्य आचार्योऽन्तेवासिनम् अनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां च न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्।

मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि। नो इतराणि। ये के चास्मच्छ्रेयांसो ब्राह्मणाः तेषां त्वया ऽऽसनेन प्रश्वसितव्यम्।

श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्। अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्, ये तत्र ब्राह्मणाः सम्मर्शिनः युक्ता आयुक्ताः अलूक्षाः धर्मकामाः स्युः यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु ये तत्र ब्राह्मणाः सम्मर्शिनः युक्ता आयुक्ताः अलूक्षा धर्मकामाः स्युः यथा ते वर्तेरन् तथा तेषु वर्तेथाः। एषः आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम् एवमुपासितव्यम्। एवम् चैतदुपास्यम्।

शब्दार्थाः

अनूच्य = पढ़ाकर, अन्तेवासिनम् = शिष्य को, अनुशास्ति = उपदेश देता है।, स्वाध्यायात् = पढ़ने से, मा प्रमदः = आलस्य मत करो, आहृत्य = लाकर, प्रजातन्तुम् = सृष्टि (सन्तान) के क्रम को, मा व्यवच्छेत्सीः = मत तोड़ो, धर्मात् न प्रमदितव्यम् = कर्तव्य से विमुख मत होवो।, कुशलात् = आत्मरक्षा के लिए किए जाने वाले कर्म से, न प्रमदितव्यम् = आलस्य नहीं करना चाहिए।, भूत्यै = विभूति–ऐश्वर्य देने वाले मांगलिक कार्यों के प्रति, स्वाध्यायप्रवचनाभ्याम् = अध्ययन और अध्यापन से।, देवपितृकार्याभ्याम् = पूजा यज्ञ आदि, देवकार्य और श्राद्ध तर्पण आदि, पितृ कार्य से, मातृदेवो भव = माता को देवता समझने वाला बनो, यानि अनवद्यानि = जो भी निन्दा रहित, सेवितव्यानि = आचरण करना चाहिए, नो इतराणि = इनसे विपरीत का नहीं। यानि अस्माकं सुचरितानि = हम आचार्य लोगों के भी सुचरित (शुभ चरित) अर्थात् शास्त्र के अनुकूल कर्म हैं, उपास्यानि = उन्हीं की तुझे उपासना करनी चाहिए।, नो इतराणि = दूसरे इनसे विपरीत की नहीं।, अस्मच्छ्रेयांसः = जो हमसे श्रेष्ठ विद्वान् हैं। आसनेन = आसन आदि देकर, प्रश्वसितव्यम् = उनकी थकान दूर करनी चाहिए।, श्रद्धया देयम् = श्रद्धा से दान देना चाहिए, श्रिया देयम् = सम्मानपूर्वक देना चाहिए, ह्रिया देयम् = लज्जापूर्वक देना चाहिए, भिया देयम् = भय मानते हुए देना चाहिए। संविदा = मैत्री भाव, सद्भाव से, अथ यदि = फिर इस प्रकार व्यवहार करते हुए, कर्मविचिकित्सा = कर्म के विषय में संशय अर्थात् कार्य–अकार्य का निर्णय न कर सकना, वृत्तविचिकित्सा = आचरण के विषय में संशय, ये तत्र ब्राह्मणाः = वहाँ उस देश काल में जो विद्वान्, सम्मर्शिनः = विचारशील, विवेकी, युक्ताः = कर्म में नियुक्त, ज्ञान–विज्ञान में निपुण, आयुक्ता = स्वेच्छा से कर्मपरायण (आजकल कमिश्नर के लिए आयुक्त शब्द का प्रयोग किया जाता है), अलूक्षाः = कोमल, सरल, बुद्धि वाले, धर्मकामाः स्युः = धर्माभिलाषी, विद्वान् हों, यथा ते वर्तेरन् = जैसा वे व्यवहार करें, तथा तत्र वर्तेथाः = वैसा ही तुम भी वहाँ करना, अभ्याख्यातेषु = दोषारोपित लोगों पर, संशययुक्तों पर, आदेशः = आज्ञा, विधि, वेदोपनिषत् = वेदों का रहस्य, अनुशासनम् = नियमानुकूल आचरण, उपासितव्यम् = उपासना करनी चाहिए। उपास्यम् = उपासना के योग्य है।



7.2 बोधप्रश्नाः

1. मूल पाठम् आधृत्य सम्बद्धान् वाक्यांशान् योजयत

'क' स्तम्भः	'ख' स्तम्भः
(क) आचार्याय प्रियं धनमाहृत्य	(1) वेदोपनिषत्
(ख) स्वाध्यायप्रवचनाभ्यां च	(2) प्रजातन्तुं मा व्यवच्छेत्सीः
(ग) यान्यनवद्यानि कर्माणि	(3) अदेयम्
(घ) अश्रद्धया	(4) न प्रमदितव्यम्
(ङ) यथा ते वर्तेरन्	(5) तानि सेवितव्यानि
(च) एषा	(6) तथा तेषु वर्तेथाः

उपयुक्तम् उत्तरं चिह्नीकुरुत

2. आचार्यः कम् अनुशास्ति?

(क) शिष्यम् (ख) गृहस्थं (ग) संन्यासिनं (घ) आचार्यं

3. गुरुजनानां कथंविधानि चरितानि उपास्यानि?

(क) सुचरितानि (ख) दुश्चरितानि (ग) इतराणि (घ) गृहस्य कर्माणि

4. दानं कथं न देयम्?

(क) श्रिया (ख) ह्रिया (ग) श्रद्धया (घ) अश्रद्धया

5. पाठम् आधृत्य रिक्तस्थानानि पूरयत

(क) स्वाध्यायात् ..... प्रमदः।

(ख) यान्यस्माकं सुचरितानि ..... त्वया उपास्यानि।

(ग) भिया .....।

(घ) ..... आदेशः।

(ङ) देवपितृकार्याभ्यां न .....।

(च) ..... इतराणि।



7.3 अधुना अवगच्छामः

प्रथमः अंशः

वेदम् अनूच्य ..... प्रश्वसितव्यम्।

अत्र प्रश्नोत्तरमाध्यमेन प्रथमम् अंशं बोधामः।

(क) वेदमनूच्याचार्योऽन्तेवासिनम् अनुशास्ति

कः अनुशास्ति? आचार्यः अनुशास्ति = उपदिशति। कम् उपदिशति? अन्तेवासिनम् अर्थात् शिष्यम्।

किम् अनूच्य? वेदम् अनूच्य–वेदं पाठयित्वा अर्थात् गुरुवर्यः अध्ययनात् परं शिष्याय जीवने हितकरान् उपदेशान् प्रयच्छति।

(ख) आचार्याय प्रियधनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः

कीदृशं धनम् आचार्याय यच्छेत्? आचार्याय विद्यानिष्पादनार्थं प्रियम्–इष्टं धनम् आहृत्य (आनीय) यच्छेत्। आचार्यस्य प्रियं धनं किम्? आचार्यस्य प्रियं धनं छात्रः।

कं मा व्यवच्छेत्सीः? प्रजातन्तुं सन्तानक्रमं मा व्यवच्छेत्सीः छिन्धि अर्थात् आचार्येण अनुज्ञातः त्वम् अनुरूपया कन्यया सह विवाहं कृत्वा सन्तानपरम्परां पालय। कस्मात् न प्रमदितव्यम्? कुशलान्न प्रमदितव्यम्, कुशलात् अर्थात् आत्मरक्षार्थं कर्मणः न प्रमदितव्यम्

मातृदेवो भव– मातृदेवो = मातरं देवताम् इव मन्यस्व। (मातृदेवो = माता देवता यस्य सः) अर्थात् त्वया माता देवतावत् उपास्या। एवमेव पिता, गुरुः, अतिथिः, अपि देवता वत् उपासनीयाः = पूज्याः।

(ग) यान्यनवद्यानि कर्माणि तानि सेवितव्यानि

कीदृशानि कर्माणि सेवितव्यानि? अनवद्यानि अवद्यं निन्द्यं न अवद्यम् इति अनिंद्यम् अर्थात् निन्दारहितानि कर्माणि शिष्टाचारलक्षणानि कर्माणि कर्तव्यानि।

(घ) ये के चास्मच्छ्रेयांसो ब्राह्मणाः तेषां त्वयाऽऽसनेन प्रश्वसितव्यम्

ब्राह्मणः कः भवति? ब्रह्म इति अक्षरम्। तत् अक्षरम् पठति = आचरति इति ब्राह्मणः अर्थात् विद्वान् एव ब्राह्मणः। के विद्वांसः प्रश्वसितव्याः? न सर्वे विद्वांसः, अपितु अस्मच्छ्रेयांसो ये अस्मत् श्रेयांसः अर्थात् आचार्यत्वादिधर्मैः अस्मत् श्रेयांसः प्रशस्यतराः, ते विद्वांसः एव त्वया प्रश्वसितव्याः। प्रश्वसितव्यम् इत्यस्य कोऽर्थः? प्रश्वसनं प्रश्वासः श्रमापनयः। तेषां श्रमः त्वया अपनेतव्यः। केन प्रकारेण? आसनं दत्त्वा तेषां श्रमः दूरीकर्तव्यः।



भावार्थः

वेदान् पाठयित्वा आचार्यः अन्तेवासिने शिष्याय जीवने हितकरान् उपदेशान् प्रयच्छति। जीवने सदा धर्मस्य मार्गे चलितव्यम्। आचार्याय तस्य प्रियं धनम् (सत्कर्मणा उपार्जितम्)/शिष्यं वा आहृत्य सन्तानपरम्परा पालनीया। धनार्जनात् अध्ययनात्, अध्यापनात्, देवपितृकार्याभ्याम् च आलस्यं न कर्तव्यम्। मातरं पितरम् आचार्यम् अतिथिं च देवता इव मन्यस्व। अस्माकं सदाचरणानि एव अनुसरणीयानि। समाजे अस्मदपि श्रेष्ठाः ये विद्वांसः सन्ति ते आसनादिप्रदानेन सदा सम्माननीयाः।

वेदों का अध्ययन कराने के बाद आचार्य अन्तेवासी शिष्य को जीवन के लिए उपयोगी एवं हितकारी उपदेश देता है, "सदा सत्य एवं धर्म के मार्ग पर चलो। आचार्य के लिए उसका अभीष्ट धन रूपी शिष्य लाना तथा सन्तानपरम्परा का निर्वाह करो। धनसम्पत्ति अर्जन करने में, अध्ययन और अध्यापन में तथा देवताओं और पितरों के कार्यों से आलस्य मत करो। माता, पिता, आचार्य एवं अतिथि को देवतुल्य मानो। हमारे केवल सद्गुणों को अपनाओ। समाज में हमसे भी अधिक जो सम्मानयोग्य विद्वान् हैं, उन्हें आसनादि देकर सम्मानित करो।

व्याकरण–बिन्दवः

पदपरिचयः

अन्तेवासिनम् =	अन्तेवासिन् शब्दः	द्वितीया विभक्तिः	एकवचनम्
भूत्यै =	"भूति" शब्दः	चतुर्थी विभक्तिः	एकवचनम्
श्रेयांसः =	'श्रेयस्' शब्दस्य	प्रथमा विभक्तिः	बहुवचनम्
इतराणि =	'इतर' शब्दः	नपुंसकलिंगम् प्रथमा विभक्तिः	बहुवचनम्
अनुशास्ति =	अनु + शास् +	लट् लकारः, प्रथमः पुरुषः	एकवचनम्
व्यवच्छेत्सीः =	वि + अव + छिद् +	विधिलिङ्, मध्यम पुरुषः	एकवचनम्
भव =	भू धातुः +	लोट् लकारः, मध्यमः पुरुषः	एकवचनम्

कृत्प्रत्ययानां प्रयोगः

अनूच्य = अनु + ब्रू (→ वच् → उच्) + क्त्वा (ल्यप्)

(धातोः पूर्वम् उपसर्गकारणात् क्त्वा स्थाने ल्यप् प्रत्ययः भवति।)

आहृत्य = आ + हृ + ल्यप् (अव्ययम्)

प्रमदितव्यम् = प्र + मद् + तव्यत् + नपुंसकलिङ्गम्, एकवचनम्

(प्र + मद् योगे पंचमी विभक्तिः प्रयुज्यते यथा सत्यात् न प्रमदितव्यम्, धर्मात् न प्रमदितव्यम्। कुशलात् न प्रमदितव्यम्।)

उपास्यानि = उप + आस् + यत् प्रत्ययः, नपुंसकलिङ्गम् बहुवचनम्

सन्धिच्छेदाः

आचार्योऽन्तेवासिनम्	= आचार्यः	+ अन्तेवासिनम्	
स्वाध्यायान्न	= स्वाध्यायात्	+ न	
यान्यनवद्यानि	= यानि	+ अनवद्यानि	
चास्मच्छ्रेयांसः	= च	+ अस्मत्	+ श्रेयांसः

समासाः

मातृदेवः = माता देवः यस्य सः	बहुव्रीहिसमासः
स्वाध्यायप्रवचनाभ्याम् = स्वाध्यायः प्रवचनम् च स्वाध्यायप्रवचने, ताभ्याम्	द्वन्द्वसमासः
प्रजातन्तुम् = प्रजानां तन्तुम्,	षष्ठीतत्पुरुषः
अनवद्यानि = न अवद्यानि	नञ्तत्पुरुषसमासः

वर्ण विश्लेषणम् (क) आचार्यः = आ + च् + आ + र् + य् + अः

(ख) प्रियम् = प् + र् + इ + य् + अ + म्

(ग) धर्मम् = ध् + अ + र् + म् + अ + म्

पाठगतप्रश्नाः 7.1

1. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत–

प्रश्नाः	उत्तराणि
(क) वेदम् अनूच्य आचार्यः कम् अनुशास्ति?	.....
(ख) आचार्याणां कीदृशानि कर्माणि शिष्येन उपास्यानि?	.....
(ग) श्रेयांसः विद्वांसः केन प्रश्वसितव्याः?	.....
(घ) कानि कर्माणि शिष्येन सेवितव्यानि?	.....



(ङ) आचार्यः कम् न छेत्तुं कथयति? .....

(च) कस्यै न प्रमदितव्यम्? .....

2. पाठात् चित्वा क्रियापदानि रिक्तस्थानेषु पूरयत–

(क) सत्यात् न .....

(ख) आचार्याय प्रियं धनम् आहृत्य प्रजातन्तुं मा .....

(ग) अतिथिदेवो .....

(घ) तानि त्वया .....

(ङ) तेषां त्वया आसनेन .....

(च) धर्मं .....

3. उपयुक्तेन पदेन रिक्तस्थानानि पूरयत–

(क) ..... अनूच्य आचार्यः अन्तेवासिनम् अनुशास्ति। (वेदम्/पुराणम्/रघुवशंम्)

(ख) शिष्येण आचार्याणां ..... उपास्यानि। (अवद्यानि/सुचरितानि/सर्वाणि चरितानि)

(ग) आचार्यः ..... न छेत्तुं कथयति। (प्रजातन्तुं/काष्ठं/रज्जुं)

(घ) श्रेयांसः विद्वांसः ..... प्रश्वसितव्याः। (धनेन/जलेन/आसनेन)

(ङ) .....न प्रमदितव्यम्। अकुशलात्/सत्यात्/अधर्मात्)

4. निर्दिष्टधातुभिः तव्यत् प्रत्ययप्रयोगेन वाक्यपूर्तिं कुरुत–

(क) कुशलात् न .....। (प्र + मद् + तव्यत्)

(ख) अनवद्यानि कर्माणि .....। (सेव् + तव्यत्)

(ग) आचार्यः सदा .....। (उप + आस् + तव्यत्)

(घ) मातृसेवा श्रद्धया .....। (कृ + तव्यत्)

(ङ) पिता देवतावत् .....। (पूज् + तव्यत्)

(च) श्रेयांसः ब्राह्मणाः .....। (प्र + श्वस् + तव्यत्)

द्वितीयः अंशः

श्रद्धया देयम् ..... चैतदुपास्यम्।

अत्र पुनः द्वितीयम् अंशम् पठित्वा गुरुणा प्रदत्तान् उपदेशान् बोधामः।

(क) अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्

अत्र 'अथ' इति शब्दस्य कोऽर्थः? अथ = एवं वर्तमानस्य अर्थात् अनेन प्रकारेण व्यवहारं कुर्वतः (ते)

कस्मिन् विचिकित्सा स्यात्? कदाचित् तव कर्मविचिकित्सा अर्थात् कार्ये अकार्ये उचिते, अनुचिते च कर्मणि विचिकित्सा, संशयः स्यात्।

वृत्ते विचिकित्सा इत्यस्य कोऽर्थः? वृत्ते = आचारविषये संशयः स्यात् चेत् तदा ....

(ख) ये तत्र ब्राह्मणाः सम्मर्शिनः युक्ताः आयुक्ताः अलूक्षाः धर्मकामाः स्युः

तत्र इत्यस्य कोऽर्थः? तस्मिन् देशे काले वा

कीदृशाः ब्राह्मणाः स्युः? सम्मर्शिनः—विचारशीलाः विवेकिनः, सहनशीलाः च ब्राह्मणाः स्युः, युक्ताः = कर्मणि वृत्ते वा पूर्णतः तत्पराः च स्युः। आयुक्ताः = अपरप्रयुक्ताः स्वेच्छया प्रवृत्ताः। अलूक्षाः = अरूक्षाः= अक्रूरमतयः= सरलहृदययुक्ताः विद्वांसः स्युः। अर्थात् यदा कर्मणि व्यवहारे वा कोऽपि संदेहः भवेत् तदा ईदृशाः एव ब्राह्मणाः अनुसरणीयाः।

(ग) एषा वेदोपनिषत्

किं वेदोपनिषत्? एतत् सर्वं यत् वर्णितं तत् वेदानां रहस्यम् अस्ति अर्थात् अयं वेदार्थः एव।

भावार्थः

दानविषये आचार्यः शिष्यं शिक्षयति यत् दानं सदा श्रद्धया, सम्मानेन, भयेन, लज्जया, सद्भावनया च देयम्। यदि कर्मणि आचरणविषये वा संशयः स्यात् तदा विवेकशीलानां विदुषाम् आचरणम् अनुकरणीयम्। एतत् एव वेदानां रहस्यम्। एतदेव अनुशासनम्।

दान के विषय में बताते हुए आचार्य कहते हैं कि श्रद्धा, सम्मान, लज्जा, डर तथा सद्भावना से दान दो। जीवन में यदि कभी कर्म अथवा आचरण के विषय में संशय हो तो उस देश काल में जो विवेकशील, विचारवान् तथा सरल हृदय वाले विद्वान् हों, वे जैसा व्यवहार करें, तुम भी वैसा ही करो। यह आदेश है। यही वेदों का रहस्य है। यही अनुशासन है, यही आचरण करने योग्य है। इसी प्रकार आचरण करना चाहिए।

व्याकरणबिन्दवः

नञ्तत्पुरुषसमासः—भवता 'राजते कन्याकुमारी' इति पाठे तत्पुरुषसमासः पठितः। इदानीम् एकम् अन्यं अस्य समासस्य भेदं नञ्तत्पुरुषसमासम् पठामः।



अभावस्य अर्थे नञ् तत्पुरुषस्य प्रयोगः क्रियते। अस्मिन् पाठे नञ्तत्पुरुषस्य प्रयोगः द्रष्टव्यः–

अनवद्यानि – न अवद्यानि

अश्रद्धया – न श्रद्धया

अलूक्षाः – न लूक्षाः

(1) अत्र वयं पश्यामः यत् यदि उत्तरपदे पदारम्भे व्यञ्जनं वर्तते तदा 'न' स्थाने अ वर्णस्य किन्तु यदि उत्तरपदे पदारम्भे स्वरः वर्तते तदा अन् शब्दस्य प्रयोगः क्रियते यथा

न आगतम् – अनागतम्

न उद्वेगकरम् – अनुद्वेगकरम्

न उपस्थितः – अनुपस्थितः

न ऋतम् – अनृतम्

न विद्या – अविद्या

न सत् – असत्

न ध्रुवम् – अध्रुवम्

न ब्राह्मणः – अब्राह्मणः

(2) हिन्दीभाषायां 'चाहिए– इत्यर्थे संस्कृतभाषायां धातुना सह 'तव्यत्' 'यत्' 'अनीयर्' प्रत्ययानां प्रयोगः क्रियते यथा प्र + मद् + तव्यत् = प्रमदितव्यम्, सेव् + तव्यत् = सेवितव्यम्, प्र + श्वस् + तव्यत् = प्रश्वसितव्यम्। उप + अस् + यत् = उपास्यम्, दा + यत् = देयम्, अ + वद् + यत् = अवद्यम्। पठ् + अनीयर् = पठनीयम्, दृश् + अनीयर् = दर्शनीयम्, कृ + अनीयर् = करणीयम्। एतेषां प्रत्ययानां प्रयोगः सदा कर्मवाच्ये भाववाच्ये वा क्रियते। कर्तरि तृतीया कर्मणि प्रथमा क्रिया च कर्मानुसारं भवति यथा मया पुस्तकं पठितव्यम्। त्वया पाठः पठितव्यः। तेन कथा कथयितव्या। भाववाच्ये क्रिया नपुंसकलिङ्गे एकवचने एव भवति यथा मया चलितव्यम्। तैः हसितव्यम्।

(3) संस्कृतव्याकरणे 22 उपसर्गाः सन्ति। उपसर्गाः धातोः प्रारम्भे प्रयुक्ताः तस्य अर्थे परिवर्तनं कुर्वन्ति तथा अस्मिन् पाठे प्र + श्वस् → प्रश्वासः = श्रमापनयः, उप + आस् = उपास् – पूजार्थकं भवति। प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अध अपि अति सु उत् अभि प्रति परि उप–एते प्रादयः।

''उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
प्रहाराहार–संहार–विहार–परिहारवत्।।''

पृथक् पृथक् उपसर्गेण सह मूलधातोः अर्थः भिन्नः भवति यथा

उपसर्गः	धातुः	रूपः	अर्थः
प्र	हा	प्रहारः	आघातः
आङ्	हा	आहारः	भोजनम्
सम्	हा	संहारः	नाशनम्
वि	हा	विहारः	भ्रमणम्
परि	हा	परिहारः	समाधानम्, त्यागः

केषांचित् अव्ययानां प्रयोगः युग्मरूपेण भवति। यथा

(4) यत्र–तत्र, यदा–तदा, यावत्–तावत्, यथा–तथा

उदाहरणानि

(i) यत्र धूमः तत्र अग्निः।

(ii) यत्र श्रीकृष्णः तत्र जयः।

(iii) यत्र देवालयः तत्र भक्ताः।

(iv) यथा ते वर्तेरन् तथा वर्तेथाः।

(v) यथा राजा तथा प्रजा।

(vi) यथा कर्म तथा फलम्।

(viii) यदा सूर्यः उदेति तदा अन्धकारः नश्यति।

(ix) यदा गुरुः प्रविशति तदा छात्राः उत्तिष्ठन्ति।

(x) यावत् दीयते तावत् धनस्य सदुपयोगः भवति।

(vii) यदा वसन्तागमनं भवति तदा कोकिलः कूजति।

(xi) यावत् स्थास्यन्ति गिरयः तावत् रामायणकथा प्रचरिष्यति।

(xii) यावत् शरीरं तावत् परोपकारः करणीयः।

पदपरिचयः

(क) श्रद्धया = 'श्रद्धा' शब्दः स्त्रीलिंगे तृतीयाविभक्तिः एकवचनम्
श्रिया = 'श्री' शब्दः तृतीयाविभक्तिः एकवचनम्
संविदा = 'संविद्' शब्दः तृतीयाविभक्तिः एकवचनम्
सम्मर्शिनः = 'सम्मर्शिन्' शब्दः प्रथमाविभक्तिः बहुवचनम्
अभ्याख्यातेषु = अभि + आख्यात + सप्तमी विभक्तिः बहुवचनम्

(ख) स्यात् = अस् + विधिलिङ् + प्रथमपुरुषः एकवचनम्
स्युः = अस् + विधिलिङ् + प्रथमपुरुषः बहुवचनम्
वर्तेरन् = वृत् + विधिलिङ् + प्रथमपुरुषः बहुवचनम्
वर्तेथाः = वृत् + विधिलिङ् + मध्यमपुरुषः एकवचनम्

एतानि क्रियापदानि विधिलिङ्प्रयुक्तानि। लोट् लकारे एतेषां रूपाणि एवं भविष्यन्ति–

विधिलिङ्	**लोट्लकारे**
स्यात्	अस्तु
स्युः	सन्तु



वर्तेरन्	वर्तन्ताम्
वर्तेथाः	वर्तस्व

कृत्प्रत्ययप्रयोगाः

देयम् = दा + यत् प्रत्ययः, नपुंसकलिंगम्

आयुक्ताः = आ + युज् + क्त, पुल्लिंगम्, प्रथमाविभक्तिः बहुवचनम्

उपास्यम् = उप + आस् + यत्, नपुंसकलिंगम्

सन्धिच्छेदाः

अश्रद्धयाऽदेयम् = अश्रद्धया + अदेयम्

अथाभ्याख्यातेषु = अथ + अभ्याख्यातेषु

वेदोपनिषत् = वेद + उपनिषत्

एवमु = एवम् + उ

चैतदुपास्यम् = च + एतत् + उपास्यम्

समासः

अश्रद्धया = न श्रद्धया नञ् तत्पुरुषसमासः

वर्ण–विश्लेषणम्–

(क) श्रद्धया – श् + र् + अ + द् + ध् + अ + य् + आ

(ख) ह्रिया – ह् + र् + इ + य् + आ

(ग) अलूक्षाः – अ + ल् + ऊ + क् + ष् + आः

पाठगतप्रश्नाः 7.2

1. कोष्ठकेषु दत्तानां समानार्थद्योतकपदानि मूलपाठात् चित्वा वाक्यपूर्तिं कुरुत–

यथा (क) संविदा (सद्भावनया) देयम्।

(ख) ये तत्र ब्राह्मणाः ..... (विचारशीलाः) स्युः।

(ग) एषा ..... (वेदानां रहस्यम्)।

(घ) ये ..... (अरूक्षाः) धर्मकामाः स्युः।

(ङ) यदि ते ..... (कार्ये–अकार्ये संशयः) स्यात्।

(च) ..... (लज्जया) देयम्।

2. विशेषणं निर्दिशत–

	विशेषणम्
(क) श्रेयांसः ब्राह्मणाः	(क) .....
(ख) ब्राह्मणाः सम्मर्शिनः	(ख) .....
(ग) विद्वांसः धर्मकामाः	(ग) .....
(घ) कर्माणि अनवद्यानि	(घ) .....
(ङ) प्रियं धनम्	(ङ) .....
(च) अलूक्षाः ब्राह्मणाः	(च) .....

3. लोट् लकारे विधिलिङ् लकारे च प्रयुक्तानि क्रियापदानि पृथक्–पृथक् कृत्वा लिखत

	लोट् लकारे	विधिलिङ् लकारे
(क) सत्यं वद।	.....	.....
(ख) प्रजातन्तुं मा व्यवच्छेत्सीः।	.....	.....
(ग) यथा ते वर्तेरन्।	.....	.....
(घ) मातृदेवो भव।	.....	.....
(ङ) ये तत्र ब्राह्मणाः सम्मर्शिनः स्युः।	.....	.....
(च) आचार्यदेवो भव।	.....	.....

7.4 किम् अधिगतम्

अध्ययनस्य समाप्तौः छात्रः जीवनोपयोगिनम् उपदेशं गृह्णाति यथा–

1. सत्यमेव जीवनस्य आधारशिला।
2. धर्मात्, कुशलात्, भूत्यै, स्वाध्यायप्रवचनाभ्यां देवपितृकार्याभ्यां न प्रमदितव्यम्।
3. माता, पिता, आचार्यः, अतिथिः च देवतुल्याः सन्ति।
4. श्रेयांसः विद्वांसः एव सम्माननीयाः।
5. यदि कर्मणि आचरणे वा संशयः स्यात् तर्हि सम्मर्शिणां विदुषां समीपे गन्तव्यम्।
6. आचार्यस्य उपदेशाः उपासितव्याः।
7. अभावस्य योगे नञ् तत्पुरुषस्य प्रयोगः भवति।
8. तव्यत्, यत्, ल्यप् प्रत्ययानां धातुषु प्रयोगः।

9. यत्र–तत्र, यदा–तदा यथा–तथा, यावत्–तावत् युग्म–अव्ययानां वाक्येषु प्रयोगः भवति।

10. पदेषु वर्णानां विश्लेषणं क्रियते।

7.5 योग्यताविस्तारः

(क) ग्रन्थपरिचयः

प्रसिद्धेषु उपनिषद्ग्रन्थेषु तैत्तिरीयोपनिषद् एका प्रसिद्धा उपनिषद् अस्ति।

'उपनिषद्' इति शब्दस्य व्युत्पत्तिः एवम् अस्ति– 'उप+ नि+ सद् – गत्यवसानेषु'। अर्थात् सा विद्या या सांसारिकप्रपंचान् नाशयति यस्याः माध्यमेन ज्ञानस्य उपलब्धिः भवति सा विद्या एव उपनिषत्सु वर्तते। सद् धातोः अर्थः स्था – तिष्ठ् अपि भवति। अतः यदा शिष्यः गुरोः समीपं विनयीभूत्वा श्रद्धया तिष्ठति तदा गुरुः ब्रह्मविषये यत्किंचित् उपदिशति तत् ज्ञानं रहस्यं वा उपनिषद् कथ्यते।

शंकराचार्येण कथितम् यत् इमां ब्रह्मविद्याम् उपनयन्ति आत्मभावेन श्रद्धाभक्तिपुरस्सरं सन्तः इति उपनिषद्।

उपनिषदां संख्या असीमिता किन्तु ईश, केन, कठ, प्रश्न, मुण्डक, माण्डूक्य, तैत्तिरीय, ऐतरेय, छान्दोग्य, बृहदारण्यक, श्वेताश्वतर इति एकादश– उपनिषदां एव विशिष्टं महत्त्वं वर्तते।

भारतीयतत्त्वज्ञानस्य धर्मसिद्धान्तस्य च मूलाधाररूपेण उपनिषद्ग्रंथाः एव वर्तन्ते। भारतीयसंस्कृत्याः उपनिषदां च परस्परम् घनिष्ठः सम्बन्धः अस्ति। विदेशेषु अपि उपनिषदां प्रशंसकाः सन्ति। सप्तदशे शतके दाराशिकोहमहोदयेन, नवदशे शतके जर्मनस्य शोपेनहावरमहोदयेन महाकविगेटे–महोदयेन च उपनिषदां महती प्रशंसा कृता।

(ख) भावविस्तारः

समानभावपरकाः सूक्तयः

1. यं मातापितरौ क्लेशं सहेते संभवे नृणाम्।
   न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि।
2. माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा।
3. अश्वमेधसहस्रं च सत्यं च तुलया धृतम्।
   अश्वमेधसहस्राद् हि सत्यमेव विशिष्यते।।
4. सत्येव जयते नानृतम्।
5. अध्येतव्या त्रयी नित्यं, भवितव्यं विपश्चिता।

6. आतिथेयं परं तीर्थम्।
7. धर्मो रक्षति रक्षितः।
8. यतोऽभ्युदयनिःश्रेयस्सिद्धिः स धर्मः।
9. किं कर्म किमकर्मेति कवयोऽप्यत्रमोहिताः।

(ग) भाषाविस्तारः

आज्ञार्थे लोट्लकारस्य प्रयोगः क्रियते विधिलिङ्लकारस्य च प्रयोगः इच्छा–निमन्त्रण–प्रार्थनार्थे क्रियते। तत्र भेदं पश्यत।

धातुरूपाणि

		लोट् लकारः			विधिलिङ् लकारः		
धातु	पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
वद् (बोलना)	प्रथमः	वदतु	वदताम्	वदन्तु	वदेत्	वदेताम्	वदेयुः
अस् (होना)	प्रथमः	अस्तु	स्ताम्	सन्तु	स्यात्	स्याताम्	स्युः
चर् (आचरण करना)	प्रथमः	चरतु	चरताम्	चरन्तु	चरेत्	चरेताम्	चरेयुः
भू (होना)	प्रथमः	भवतु	भवताम्	भवन्तु	भवेत्	भवेताम्	भवेयुः
वृत् (होना)	प्रथमः	वर्तताम्	वर्तेताम्	वर्तन्ताम्	वर्तेत	वर्तेयाताम्	वर्तेरन्
वद्	मध्यमः	वद	वदतम्	वदत	वदेः	वदेतम्	वदेत
अस्	मध्यमः	एधि	स्तम्	स्त	स्याः	स्यातम्	स्यात्
भू	मध्यमः	भव	भवतम्	भवत	भवेः	भवेतम्	भवेत
वृत्	मध्यमः	वर्तस्व	वर्तेथाम्	वर्तध्वम्	वर्तेथाः	वर्तेयाथाम्	वर्तेध्वम्
वद्	उत्तमः	वदानि	वदाव	वदाम	वदेयम्	वदेव	वदेम
अस्	उत्तमः	असानि	असाव	असाम	स्याम्	स्याव	स्याम
चर्	उत्तमः	चराणि	चराव	चराम	चरेयम्	चरेव	चरेम
भू	उत्तमः	भवानि	भवाव	भवाम	भवेयम्	भवेव	भवेम
वृत्	उत्तमः	वर्तै	वर्तावहै	वर्तामहै	वर्तेय	वर्तेवहि	वर्तेमहि

उदाहरणानि

लोट्लकारः

सत्यं वद।
अतिथिदेवो भव।
सर्वे छात्राः तिष्ठन्तु।
आचार्याय जलम् आनय।
यूयम् फलानि खादत।

विधिलिङ् लकारः

आचार्याः अलूक्षा स्युः।
यथा ते वर्तेरन् तथा वर्तेथाः।
ईश्वरः तव रक्षकः भवेत्।
सर्वप्राणिषु बन्धुभूतः स्यात्।
भवन्तः उत्तीर्णाः भवेयुः।



7.6 पाठान्तप्रश्नाः

1. रेखांकितपदम् आधृत्य प्रश्ननिर्माणं कुरुत–

(क) वेदम् अनूच्य आचार्यः अन्तेवासिनम् अनुशास्ति।

(ख) आचार्यः प्रजातन्तुं न छेत्तुं कथयति।

(ग) धर्मात् न प्रमदितव्यम्।

(घ) श्रेयांसः विद्वांसः आसनेन प्रश्वसितव्याः।

(ङ) भूत्यै न प्रमदितव्यम्।

2. रेखांकितेषु पदेषु सर्वनामपदानि केभ्यः प्रयुक्तानि–

(क) त्वया कुशलात् न प्रमदितव्यम्।

(ख) ये अस्मत् श्रेयांसः ब्राह्मणाः तेषां त्वया आसनेन प्रश्वसितव्यम्।

(ग) यानि अस्माकं सुचरितानि तानि उपास्यानि।

3. समस्तपदानि रचयत–

(क) न लूक्षाः इति ——————————

(ख) न श्रद्धया इति ——————————

(ग) न अवद्यानि इति ——————————

(घ) स्वाध्यायात् प्रवचनात् च ताभ्याम् ——————————

(ङ) माता देवः यस्य सः ——————————

(च) प्रजायाः तन्तुम् ——————————

4. अधोलिखितेषु वाक्येषु रेखांकितपदं विलोमपदे परिवर्त्य लिखत

(क) असत्यात् प्रमदितव्यम् (1) ..... प्रमदितव्यम्।

(ख) अश्रद्धया न देयम् (2) ..... देयम्।

(ग) यानि अवद्यानि कर्माणि तानि न सेवितव्यानि। (3) यानि ..... कर्माणि तानि सेवितव्यानि।

(घ) यानि अस्माकं कुचरितानि तानि त्वया न उपास्यानि। (4) यानि अस्माकं ..... तानि त्वया उपास्यानि।

(ङ) आचार्याः लूक्षाः न स्युः (5) आचार्याः ..... स्युः।

(च) अधर्मं मा चर (6) ..... चर।

5. संक्षेपेण उत्तरत–

(क) ''एतद् उपास्यम्'' इति पाठे उपदेशाः केन कस्मै प्रदत्ताः?

(ख) दानं कथं देयम् कथं च न देयम्?

(ग) यदि कदाचित् कर्मणि आचरणे च सन्देहः भवति तदा किं कुर्यात्?

(घ) गुरुजनानां कानि चरितानि अनुकरणीयानि?

6. उचितम् अव्ययं चित्वा अधोलिखितानि वाक्यानि पूर्यन्ताम्

मा, न, च, अथ, यदि, वा, यथा, तथा, तत्र

(क) चिन्ता ..... कार्या, बालकः पित्रा सह बहिर्गतः।

(ख) असत्यं ..... वद।

(ग) रमा सीता ..... विद्यालयं गच्छतः।

(घ) ..... महाभारतकथा प्रारभ्यते।

(ङ) ..... ते वर्तेरन् ..... वर्तेथाः।

(च) भवान् चायं पास्यति दुग्धं .....।

(छ) विद्यालये एकं क्रीडास्थलं वर्तते, छात्राः ..... क्रीडन्ति।

(ज) ..... पठिष्यसि तर्हि उत्तीर्णः भविष्यसि।

7. पदानां वर्णविश्लेषणं कुरुत

(क) धर्मम् (ख) प्रमदः (ग) श्रिया (घ) युक्ताः

7.7 उत्तराणि

7.3 बोध प्रश्नाः

1. (क) + 2, (ख) + 4, (ग) + 5,
   (घ) + 3, (ङ) + 6, (च) + 1
2. शिष्यम् 3. सुचरितानि 4. अश्रद्धया
5. (क) मा (ख) तानि (ग) देयम् (घ) एषः (ङ) प्रमदितव्यम् (च) नो

पाठगतप्रश्नाः

7.1 1. (क) अन्तेवासिनम् (ख) सुचरितानि (ग) आसनेन (घ) अनवद्यानि
(ङ) प्रजातन्तुम् (च) भूत्यै

2. (क) प्रमदितव्यम् (ख) व्यवच्छेत्सीः (ग) भव (घ) उपास्यानि (ङ) प्रश्वसितव्यम्
(च) चर



3. (क) वेदम् (ख) सुचरितानि (ग) प्रजातन्तुं (घ) आसनेन (ङ) सत्यात्

4. (क) प्रमदितव्यम् (ख) सेवितव्यानि (ग) उपासितव्यः (घ) कर्तव्या (ङ) पूजयितव्यः (च) प्रश्वसितव्याः

7.2 1. (क) संविदा (ख) सम्मर्शिनः (ग) वेदोपनिषत्
(घ) अलूक्षाः (ङ) कर्मविचिकित्सा (च) ह्रिया

2. (क) श्रेयांसः (ख) सम्मर्शिनः (ग) धर्मकामाः
(घ) अनवद्यानि (ङ) प्रियं (च) अलूक्षाः

3.

लोट् लकारे क्रियापदानि	**विधिलिङ् लकारे क्रियापदानि**
सत्यं वद	प्रजातन्तुं मा व्यवच्छेत्सीः
मातृदेवो भव	यथा ते वर्तेरन्
आचार्यदेवो भव	ये तत्र ब्राह्मणाः सम्मर्शिनः स्युः

7.6 पाठान्तप्रश्नाः

(क) कः, (ख) किम्/कम् (ग) कस्मात् (घ) केन (ङ) कस्यै

2. (क) अन्तेवासिने (ख) श्रेयोभ्यः ब्राह्मणेभ्यः (ग) गुरुवर्येभ्यः

3. (क) अलूक्षाः (ख) अश्रद्धया (ग) अनवद्यानि (घ) स्वाध्यायप्रवचनाभ्याम्
(ङ) मातृदेवः (च) प्रजातन्तुम्

4. (क) सत्यात् (ख) श्रद्धया (ग) अनवद्यानि (घ) सुचरितानि (ङ) अलूक्षाः (च) धर्मम्

5. (क) 'एतद् उपास्यम्' इति पाठे उपदेशाः आचार्येण शिष्याम दत्ताः।
(ख) दानं श्रद्धया देयम् अश्रद्धया च न देयम्।
(ग) कर्मणि आचरणे च सन्देहे सति ब्राह्मणा सम्मर्शिनः स्युः।
(घ) गुरुजनानां सुचरितानि अनुकरणीयानि।

6. (क) न (ख) मा (ग) च (घ) अथ (ङ) यथा, तथा (च) वा (छ) तत्र (ज) यदि

7. (क) ध् + अ + र् + म् + अ + म्
(ख) प् + र् + अ + म् + अ + द् + अः
(ग) श् + र् + इ + य् + आ
(घ) य् + उ + क् + त् + आः

309sk08

8

परार्थे आत्मोत्सर्गः

मार्गे यदि भवान् कमपि जनं जीवं वा संकटे पश्यति तर्हि भवतः मनः करुणया द्रवितं जायते। अपि च यदि भवान् कारुणिकः अस्ति तर्हि तु तस्य सहायतामपि करोति। वस्तुतः परोपकाराय सतां विभूतयः। मानवजीवने परोपकारस्य अतिमहत्वमस्ति। अयं गुणः मानवान् पशुभ्यः पृथक् करोति। प्रस्तुतपाठे विक्रमादित्यस्य परोपकारभावनायाः विषये उल्लेखः अस्ति। एकदा राज्ये भ्रमन् विक्रमादित्यः एकेन पक्षिमाध्यमेन कस्यचिद् राक्षसस्य नृशंसतां ब्राह्मणस्य विवशतां च अशृणोत्। सः तस्य कष्टानि वारणार्थम् आत्मोत्सर्गं कृत्वा प्रजानां कल्याणम् अकरोत्। जीवने विषमपरिस्थितिषु 'किं करणीयम् किं च न करणीयम् इति विषये अस्याम् कथायाम् वयम् पठामः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- कथासारं लेखितुं समर्थः भविष्यति;
- विक्रमादित्यस्य चरित्र–चित्रणं स्वशब्दैः कर्तुं शक्तः भविष्यति;
- भिन्नक्रमेण दत्तानि वाक्यानि घटनाक्रमानुसारं योजयिष्यति;
- आत्मोत्सर्गस्य महत्त्वं वर्णयितुं शक्ष्यति;
- मानवीयमूल्यानां विषयमधिकृत्य सम्बद्धसूक्तीनाम् संचयनं कर्तुं सक्षमः भविष्यति;
- नकारान्तपुल्लिंगशब्दानां रूपाणि चेतुं शक्तः भविष्यति;
- वाच्यपरिवर्तनं कृत्वा भावं प्रेषयितुम् समर्थः भविष्यति;
- वृद्धिसन्धियुक्तानां पदानां सन्धिच्छेदं करिष्यति;
- वर्ण–संश्लेषणेन पदनिर्माणं करिष्यति;
- प्रातिपदिक–शब्दानां चयनं करिष्यति।

क्रियाकलापः

एतानि चित्राणि ध्यानेन पश्यत–

8.1



8.2

8.3

चित्राणि दृष्ट्वा प्रदत्तशब्दानां साहाय्येन कथापूर्तिः कर्त्तव्याः (परोपकारार्थं, शिविः, स्वमांसं, कपोतं, शरणम्)

1. पुरा ———————— नाम राजा बभूव।
2. एकदा एकः बुभुक्षितः श्येनः ———————— हन्तुम् उद्यतः आसीत्।
3. भीतः कपोतः राज्ञः ———————— आगतः।
4. राजा शिविः कपोतप्राणरक्षार्थं ————————श्येनाय अयच्छत्।
5. शिविना ————————स्वशरीरं समर्पितम्।

8.1 मूलपाठः

परार्थे आत्मोत्सर्गः

इदानीम् वयम् एतादृशीम् एव कथां ध्यानेन पठामः।

अथ भोजे सिंहासनम् आरोढुम् प्रवृत्ते सति अन्या पुत्तलिका कथयति–भो राजन् श्रूयताम्–विक्रमस्य राज्ये कोऽपि जनः पिशुनः तस्करः पापकर्मनिरतः च नासीत्। एकदा स राज्यभारं मन्त्रिषु निधाय स्वयं योगिवेशेन देशान्तरं निर्गतः। एवं पर्यटन् स एकस्मिन् दिवसे यदा महारण्यमध्ये प्राविशत् तदा सूर्यः अस्तंगतः। स राजा एकस्य वृक्षस्य मूलम् आश्रित्य रात्रौ स्थितः। तस्य वृक्षस्योपरि एकः चिरंजीवी नामकः खगः अन्यैः पक्षिभिः सह संलापं करोति स्म। राजाऽपि वृक्षमूले स्थितः तं संलापं शृणोति। भो पुत्राः! युष्माभिः नानादेशान् पर्यटद्भिः किं विचित्रम् दृष्टम्? तत्र एकेन पक्षिणा भणितम्– मया यत् दृष्टम् तमवलोक्य मम चेतसि महद्दुःखम् भवति। चिरंजीविना उक्तम् तत्कथय किं निमित्तं दुःखम्? तेनोक्तम्–केवलं कथनेन किं भवति। वृद्धेनोक्तम्–''भो पुत्र! यो दुःखी, स सुहृदि दुःखं निवेद्य सुखी भवति।''

तस्य वाक्यं श्रुत्वा स पक्षी दुःखकारणं कथयति– भो तात! श्रूयताम्। अस्ति उत्तरदेशे शैवालघोषो नाम पर्वतः। तस्य पर्वतस्य निकटे पलाशनगरमस्ति। तस्मिन् पर्वते स्थितः कश्चिद् राक्षसः प्रतिदिनं नगरमागत्य सम्मुखायातं यं कंचन मानुषं स्त्रियं वा बालकादिकं वा पर्वतं नीत्वा भक्षयति। एकदा स नगरवासिभिर्जनैरुक्तः– भो वकासुर! त्वं यथेच्छं सम्मुखपतितं यं कमेव मा भक्षय। वयं तुभ्यं प्रतिदिनमाहारार्थमेकं मानवं दास्यामः। तद्वचः तेनांगीकृतम्।

तदनन्तरं तत्रत्यो जनः प्रतिदिनं गृहक्रमेणैकैकं मानुषं तस्मै प्रयच्छति। एवं महान् कालो गतः। अद्य पूर्वजन्मनि स×जातसौहार्दस्य मम मित्रस्य कस्यचिद् ब्राह्मणस्य वारः समायातः। तस्यैकः एव पुत्रः। पुत्रं ददाति चेत् सन्ततिच्छेदो भवति। आत्मानं प्रयच्छति चेत् भार्या विधवा भविष्यति। वैधव्यं पुनर्महादुःखम् पत्नीं दास्यति चेत् आश्रमभ्रंशो भवति। तेषां दुःखेनाहं महादुःखी इति मम महद्दुःखकारणम्।

शब्दार्थाः
अथ = मंगल, प्रारम्भ इसके बाद
आरोढुम् = चढने के लिए
प्रवृत्ते सति = लगे होने पर
पुत्तलिका = पुतली, गुड़िया
पिशुनः = चुगलखोर
तस्करः = चोर डाकू
निरतः = संलग्न
निधाय = रखकर
निर्गतः = चला गया
देशान्तरं = दूसरे देश में
महारण्यमध्ये = विशाल जंगल में
संलापम् = वार्तालाप को
भणितम् = कहा
निमित्तं = कारण से
सुहृदि = मित्र पर
निवेद्य = कहकर, निवेदन कर,
शैवालघोषः = शैवालघोष नामक पर्वत
पलाशनगरम् = पलाशनगर नामक नगर
कश्चिद् = कोई
आयातं = आते हुए को
कंचन = किसी को
मानुषं = मनुष्य को
नीत्वा = लाकर
वकासुरः = वकासुर नामक राक्षस
सम्मुखपतितं = सामने पड़े/गिरे हुए को
अंगीकृतम् = स्वीकार कर लिया गया
तदनन्तरम् = उसके बाद
तत्रत्यः = वहाँ रहने वाले
सन्ततिच्छेदः = वंशनाश
आश्रमभ्रंशः = गृहस्थाश्रम का नाश
तत्रस्थैः = वहाँ के
प्रयच्छति = देता है,
आत्मनं = स्वयं को
वारः = क्रम
समायातः = आया
चेत् = यदि
भार्या = पत्नी



तस्य वचनं श्रुत्वा तत्रस्थैः पक्षिभिर्भणितम्– अहो, अयमेव सुहृत्, य सुहृदो दुःखेन स्वयं दुःखी भवति। एतदेव मित्रत्वम्, उक्तंच–

सुखिते सुखी सुहृदि यो दुःखिते दुःखी स च बन्धुर्भवति।

पक्षिणो वचः श्रुत्वा राजा तत्र नगरे वध्यशिला–समीपे गतः। तत्र ब्राह्मणं निरीक्ष्य, अभयं दत्वा, स्वगृहं सम्प्रेष्य च, तत्समीपस्थे सरोवरे स्नात्वा वध्यशिलायामुपविष्टः।

तस्मिन् समये राक्षसः समागत्य प्रसन्नवदनं पुरूषं दृष्ट्वा विस्मितस्तं वदति– भो महासत्व! अत्र शिलायां प्रतिदिनं य उपविशति, स मदागमनात्पूर्वमेव म्रियते। त्वं पुनः महाधैर्यसम्पन्नः प्रसन्नवदनः दृश्यसे। यस्य मरणकालः समायाति, तस्येन्द्रियाणि ग्लानिं प्राप्नुवन्ति। त्वं पुनरधिकां कान्तिं प्राप्य प्रहससि! तर्हि कथय को भवान्? राजा भणति– मया परार्थमेतच्छरीरं दीयते स्वेच्छया, अतो न मे कापि ग्लानिः। यद् भवतु। किमनेन विचारेण तव? त्वमात्मनः मनोरथं पूरय।

तदा राक्षसेन स्वमनसि विचारितम्– अहो साधुरयं यः आत्मनः सुखभोगेच्छां विहाय परदुःखेन दुःखी भूत्वा अत्र आगतः। उक्तं च–

त्यक्त्वात्मसुखदुःखेच्छां सर्वसत्वसुखैषिणः।

भवन्ति परदुःखेन साधवोऽत्यन्तदुःखिनः।।

एवं विचार्य स राजानमब्रवीत् भो महापुरूष! त्वं सर्वस्यार्तिहरो गुरूः, यतस्त्वं विश्वस्यार्तिं परिहरसि। परार्थं शरीरं प्रयच्छतस्तवैव एतच्छरीरं श्लाध्यम्। भो महाभाग। अनेनैव परोपकारेण त्वं सर्वाः सम्पदः प्राप्नोषि। यदुक्तम्–

परोपकारव्यापारः पुरूषो यः प्रजायते।

सम्पदः स समाप्नोति परत्रापि परं पदम्।।

एवं भणित्वा पुनरपि राजानमब्रवीत्–भो महासत्व! तवाहं तुष्टोऽस्मि। वरं वृणीष्व। राज्ञोक्तम्–भो राक्षस! त्वं यदि मयि प्रसन्नोऽसि, तर्हि अद्य प्रभृति मनुष्यभक्षणं परित्यज। यथा मनुष्यस्य आत्मनः प्राणाः प्रियाः तथैव सर्वेषाम् जीवानां प्राणाः प्रियाः भवन्ति। अतः सर्वेषाम् प्राणिनां रक्षा करणीया। तदाप्रभृति राक्षसः जीवहिंसां त्यक्तवान्। राजा च स्वनगरीम् अगच्छत्।

इमां कथां कथयित्वा पुत्तलिका भोजराजं प्रति अब्रवीत्– 'त्वयि एवं परोपकारादयः गुणाः विद्यन्ते चेत् तर्हि अस्मिन् सिंहासने समुपविश'। राजा तूष्णीमासीत्।

सुखिते = सुखी होने पर
दुःखिते = दुःखी होने पर
निरीक्ष्य = देखकर
अभयं = भय से मुक्ति को
सम्प्रेष्य = भेजकर
सरोवरे = तालाब में
उपविष्टः = बैठ गए
समागत्य = आकर
विस्मितः = आश्चर्यचकित
म्रियते = मर जाता है।
वदनः = मुख
कान्तिं = आभा को
प्रहससि = जोरसे हँसते हो
ग्लानिं = मलिनता को, दुःख को
समायाति = आ जाता है।
मनसि = मन में
साधु = सज्जन
विहाय = छोड़कर
भूत्वा = होकर
सुखैषिणः = सुख चाहने वाले
सर्वास्यर्तिहरः = सभी के दुःखो को हरने वाले।
विश्वास्यार्तिं = संसार के दुःखों को
परिहरसि = दूर करते हो
प्रयच्छ = दो
श्लाघ्याम् = प्रशंसनीय
परोपकारव्यापारः = परोपकारी
समाप्नोति = प्राप्तकरता है।
परत्रापि = परलोक में भी
परं पदम् = श्रेष्ठ स्थान को
वरं = वरदान को
वृणीष्व = चुनो
अद्यप्रभृति = आज से
परित्यज = छोड़ दो
तदाप्रभृति = तब से
समुपविश = बैठो।

8.2 बोधप्रश्नाः

1. पाठं पठित्वा अधोदत्तान् प्रश्नान् एकशब्देन उत्तरत–
   (क) राजा रात्रौ कुत्र स्थितः?
   (ख) सिंहासनम् आरोढुं कः प्रवृत्तः?
   (ग) सम्मुखम् आयातं जनं कः भक्षयति स्म?
   (घ) सर्वां कथां का श्रावयति?
2. अधोलिखितं केन उक्तम्? तस्य नाम चिनुत।
   (क) भो पुत्र! यो दुःखी, स सुहृदि दुःखं निवेद्य सुखी भवति। (पक्षी/ वृद्धः)
   (ख) अयमेव सुहृत् य सुहृदो भूत्वा दुःखेन स्वयं दुःखी भवति। (पक्षिणः/जनाः)
   (ग) कथय, को भवान्? (राजा/राक्षसः)
   (घ) त्वम् आत्मनः मनोरथं पूरय। (ब्राह्मणः/राजा)
   (ङ) सर्वेषां प्राणिनां रक्षा करणीया। (राजा/पुत्तलिका)
3. अर्थमेलनं कुरुत

खण्डः 'क'	**खण्डः 'ख'**
(क) भणित्वा	(i) आयातम्
(ख) अवदत्	(ii) भोजनाय
(ग) आगतम्	(iii) उक्त्वा
(घ) खगः	(iv) सुहृत्
(ङ) आहारार्थम्	(v) पक्षी
(च) मित्रम्	(vi) अब्रवीत्

8.3 अधुना अवगच्छामः

प्रथमः अंशः

अथ भोजे सिंहासनम् ..... दुःखं निवेद्य सुखी भवति।

पुत्तलिकया राजानं प्रति श्रावितां कथां पुनः पठामः बोधामः च यत् दुःखी जनः अपि मित्रं प्रति निजं दुःखं कथयित्वा सुखी भवति।

कः सिंहासनम् आरोढुम् प्रवर्तते? राजा भोजः।

का कथाम् श्रावयति? पुत्तलिका।



विक्रमादित्यस्य राज्ये जनाः कीदृशाः न आसन्? पिशुनाः, तस्कराः, पापकर्मनिरताः च।

राजा कीदृशं वेशं धृत्वा देशान्तरं निर्गतः? योगिवेशम् धृत्वा।

राजा कदा वृक्षस्यमूलम् आश्रयत्? रात्रौ।

कः पक्षिभिः सह संलापं करोति स्म?चिरंजीवी नामकः खगः।

राजा रात्रौ किम् अशृणोत्? संलापम् अशृणोत्।

खगः संलापे किम् कथयति? संलापे विचित्रता–विषये कथयति।

दुःखस्य कारणम् कः पृच्छति? चिरंजीवी नामकः खगः।

दुःखी जनः कथं सुखी भवति? मित्रे दुःखम् निवेद्य जनः सुखी भवति। यथोक्तं च अभिज्ञानशाकुन्तले–''संविभक्तं हि दुःखं सह्यवेदनं भवति।

सारः

एकदा राजा भोजः विक्रमादित्यस्य सिंहासने उपविशति। तदा सिंहासने संलग्ना पुत्तलिका कथाम् श्रावयन्ती कथयति यत् एकदा राजा विक्रमः वनं गच्छति। तस्मिन् वने सः खगानां वार्तालापं शृणोति। दिने खगः यत् आश्चर्यम् पश्यति तद् दृष्ट्वा दुःखी भवति। खगानां पिता, चिरंजीवी, दुःखनिदानस्य उपायं कथयति– ''दुःखी जनः सुहृदि दुःखं निवेद्य सुखी भवति।''

(राजा भोज विक्रमादित्य के सिंहासन पर चढ़ने को प्रवृत्त होते हैं। तभी सिंहासन में लगी पुत्तलिका एक कथा सुनाती है कि एक बार राजा विक्रमादित्य घूमते हुए जंगल गए। वहाँ पक्षियों का वार्तालाप सुना जिसमें एक पक्षी अपने पिता से एक आश्चर्य के विषय में बताकर दुःखी होता है। उसके पिता चिरंजीवी दुःख निवारण का उपाय बताते हैं कि मनुष्य मित्रों के साथ यदि दुःख बांटे तो उसका दुख कम हो जाता है और वह सुखी हो सकता है।)

व्याकरण बिन्दवः

1. नकारान्त पुल्लिङ्गशब्दयोः रूपाणि

	राजन् शब्द			आत्मन् शब्द		
	एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा वि.	राजा	राजानौ	राजानः	आत्मा	आत्मानौ	आत्मानः
द्वितीया वि.	राजानम्	राजानौ	राज्ञः	आत्मानम्	आत्मानौ	आत्मनः
तृतीया वि.	राज्ञा	राजभ्याम्	राजभिः	आत्मना	अत्मभ्याम्	आत्मभिः
चतुर्थी वि.	राज्ञे	राजभ्याम्	राजभ्यः	आत्मने	आत्मभ्याम्	आत्मभ्यः
प×चमी वि.	राज्ञः	राजभ्याम्	राजभ्यः	आत्मनः	आत्मभ्याम्	आत्मभ्यः
षष्ठी वि.	राज्ञः	राज्ञोः	राज्ञाम्	आत्मनः	आत्मनोः	आत्मनाम्
सप्तमी वि.	राज्ञि	राज्ञोः	राजसु	आत्मनि	आत्मनोः	आत्मसु
सम्बोधनम्	हे राजन्	हे राजानौ	हे राजानः	हे आत्मन्	हे आत्मानौ	हे आत्मानः



2. वर्णसंश्लेषणम्

वर्णानाम् संश्लेषणेन पदनिर्माणं भवति। वर्ण–विश्लेषणस्य विषये भवन्तः सप्तमे पाठे पठितवन्तः एव। अत्र वयं वर्ण–संश्लेषणेन पदनिर्माणं कुर्मः।

(क) प् + अ + र् + आ + र् + थ् + ए = परार्थे

(ख) प् + र् + अ + व् + ऋ + त् + त् + ए = प्रवृत्ते

(ग) श् + र् + ऊ + य् + अ + त् + आ + म् = श्रूयताम्

(घ) स् + ऊ + र् + य् + अः = सूर्यः

(ङ) व् + ऋ + क् + ष् + अ + स् + य् + अ = वृक्षस्य

(च) द् + ऋ + ष् + ट् + अ + म् = दृष्टम्

(छ) भ् + अ + व् + अ + त् + इ = भवति

3. प्रातिपदिकम्– धातुं प्रत्ययं च वर्जयित्वा कोऽपि अर्थवान् शब्दः 'प्रतिपादिकम्' कथ्यते। यदा प्रातिपदिकम् विभक्तियुक्तं भवति तदा तस्य वाक्ये प्रयोगः क्रियते। राम–वृक्ष–पुष्प, सिंह, वानर, नर, छात्र, ग्रन्थ दिल्ली, गङ्गा आदयः शब्दाः प्रातिप्रदिकानि एव।

वाक्येषुप्रयोगः

(क) रामः मातरं नमति।
(ख) वृक्षे फलानि सन्ति।
(ग) पुष्पेषु कमलं प्रसिद्धम्।
(घ) सिंहः गर्जति।
(ङ) गङ्गायाः जलम् अमृतम्।

पाठगतप्रश्नाः 8.1

1. एकपदेन उत्तरत

(क) भोजे सिंहासनम् आरोढुं प्रवृत्ते सति का कथां कथयति?

(ख) कस्य राज्ये कोऽपि जनः पापकर्मनिरतः नासीत्?

(ग) राजा भोजः केषु राज्यभारं निधाय देशान्तरं निर्गतः?



(घ) अन्यैः खगैः सह कः संलापं करोति स्म?

(ङ) खगानां संलापं कः शृणोति स्म?

2. सन्धिं सन्धिच्छेदं वा कृत्वा रिक्तस्थानानि पूरयत–

(क) वृक्षस्य + उपरि = ————————

(ख) चिरंजीविना + ———————— = चिरंजीविनोक्तम्

(ग) ——— + एकेन = तत्रैकेन

(घ) सूर्यः + अस्तंगतः = ———————

(ङ) ——————— + तम् = स्थितस्तम्

3. धातुभिः रिक्तस्थानानि पूरयत

(क) गतः = गम् + क्त

(ख स्थितः = ——— + क्त

(ग) दृष्टम् = ——————— + क्त

(घ) भणितम् = ——— + क्त

(ङ) उक्तम् = ——— + क्त

द्वितीयः अंशः

सम्प्रति कथायाः द्वितीयांशं अवगन्तुम् अधोलिखितानि प्रश्नोत्तराणि पठामः।

तस्य वाक्यं श्रुत्वा ..... त्वमात्मनः मनोरथं पूरय।

कः दुःखस्य कारणम् कथयति? पक्षी।

शैवालघोषो नाम पर्वतः कुत्र अस्ति? उत्तरदेशे।

तत्पर्वतनिकटे किम् नाम नगरम् अस्ति? पलाशनगरम्।

पर्वते कः निवसति? एकः वकासुरः नाम राक्षसः।

राक्षसः कीदृशं अत्याचारं करोति? राक्षसः नगरमागत्य मानुषं स्त्रियं वा गृहीत्वा पर्वतं नीत्वा भक्षयति।

अत्याचारनिवारणार्थम् जनाः राक्षसं किम् कथयन्ति? वयं तुभ्यं प्रतिदिनमाहारार्थमेकं मानवं दास्यामः। राक्षसेन तेषां वाक्यं स्वीकृतम् न वा? स्वीकृतम्। कालान्तरम् कस्य वारः समायातः? एकस्य ब्राह्मणस्य।

ब्राह्मणस्य कति पुत्रा आसन्? तस्य एकः पुत्रः आसीत्।

खगस्य दुःखस्य कारणं किम् अस्ति? खगस्य दुःखस्य कारणम् ब्राह्मणस्य दुःखम् अस्ति।

वन्धुः कः भवति? यः मित्रे सुखिते सुखी तस्मिन् दुःखिते वा दुःखी भवति।

खगस्य वचनम् श्रुत्वा कः वध्यशिलासमीपे गतः? राजा विक्रमः

राक्षसः किं दृष्ट्वा विस्मितः भवति? एकं प्रसन्नवदनं पुरुषम्।

राजा राक्षसं प्रति किं भणति? राजा राक्षसं प्रति भणति यत् मया स्वेच्छया परार्थमेतत् शरीरं दीयते अतः न मे ग्लानिः।

नृपस्य वचनं श्रुत्वा राक्षसः किं करोति? राक्षसः प्रसन्नः भूत्वा अभयदानं ददाति।

सारः

खगः कथां श्रावयति। शैवालघोषपर्वते पलाशनगरे वकासुरः नामकः राक्षसः प्रतिदिनं एकं मानवं भक्षयति। संत्रस्ताः जनाः तस्मै प्रतिदिनं गृहक्रमेण एकम् मानुषं दातुम् वचनं यच्छन्ति। अनेन प्रकारेण बहुकालः व्यतीतः। क्रमेण एकस्य ब्राह्मणस्य वारः आगतः। सः ब्राह्मणः पूर्वजन्मनि खगस्य मित्रम् आसीत्। तं दृष्ट्वा सः खगः अपि दुःखी भवति। एतत् श्रुत्वा पक्षिणः कथयन्ति यत् वस्तुतः तद् एव मित्रम् यत् मित्रस्य दुःखे दुःखी सुखे च प्रसन्नः भवति। खगानां वचनानि श्रुत्वा राजा विक्रमादित्यः ब्राह्मणाय अभयं दत्वा स्वयमेव वध्यशिलायाम् उपविशति। प्रसन्नमुखं राजानं दृष्ट्वा विस्मितः राक्षसः तस्य प्रसन्नतायाः कारणं पृच्छति। राजा कथयति यत् परार्थे एव स्वेच्छया सः प्राणान् दातुम् उद्यतः अस्ति। अतः सः प्रसन्नः अस्ति। राक्षसः आत्मनः मनोरथं पूरयतु।

(पक्षी अपने दुःख का कारण बताते हुए एक कथा सुनाता है कि शैवालघोष पर्वत पर पलाशनगर में वकासुर नामक राक्षस प्रतिदिन किसी भी मनुष्य को खा जाता है। भयभीत नगरवासी उसे प्रतिदिन एक मनुष्य भेजने का वचन देते हैं। इस प्रकार बहुत सा समय बीत जाता है। क्रमानुसार एक ब्राह्मण की बारी आती है जो पूर्वजन्म में एक पक्षी का मित्र था। मित्र को दुःखी देखकर वह पक्षी भी दुःखी हो जाता है। यह सुनकर अन्य पक्षी कहते हैं कि वास्तव में वही मित्र है जो अपने मित्र के दुःख में दुःखी और सुख में प्रसन्न होता है। पक्षियों के वचन सुनकर राजा विक्रमादित्य ब्राह्मण को अभयदान देकर स्वयं राक्षस के भोजनार्थ वध्यशिला पर बैठता है। राजा को प्रसन्न देखकर आश्चर्यचकित राक्षस राजा की प्रसन्नता का कारण पूछता है। राजा कहता है कि मैं दूसरों की रक्षा के लिए अपने प्राण देने के लिए तैयार हूँ। यही कारण है कि मैं प्रसन्न हूँ। आप अपनी इच्छा की पूर्ति करो।

व्याकारणबिन्दवः

वृद्धि सन्धिः अ/आ एताभ्यां वर्णाभ्यां परे ए/ऐ वर्णौ भवतः चेत् तर्हि पूर्वपरयोः स्थाने 'ऐ' वर्णः भवति। यदि अ/आ वर्णाभ्यां परे ओ/औ वर्णौ भवतः तदा 'औ' भवति।

यथा – (i) एक + एकः = एकैकः



(ii) तस्य + एकः = तस्यैकः

(iii) महा + ऐश्वर्यम् = महैश्वर्यम्

(iv) नव + ओदनम् = नवौदनम्

(v) मम + औषधम् = ममौषधम्

पाठगतप्रश्नाः 8.2

1. कोष्ठकात् समुचितपदं चित्वा रिक्तस्थानं पूरयत–

   (क) अस्ति.....शैवालघोषो नाम पर्वतः। (मध्यदेशे / उत्तरदेशे)

   (ख) राक्षसः मानुषं स्त्रियं वा .....नीत्वा भक्षयति। (ग्रामं / पर्वतं)

   (ग) एकदा कस्यचिद् .....वारः समायातः। (ब्राह्मणस्य / शशकस्य)

   (घ) राजा .....स्नात्वा वध्यशिलायां उपविष्टः। (नद्यां / सरोवरे)

   (ङ) यस्य.....समायाति तस्य इन्द्रियाणि ग्लानिं प्राप्नुवन्ति (जन्मकालः / मरणकालः)

2. रेखांकितपदानि अधिकृत्य उदाहरणानुसारं प्रश्नान् लिखत

   उदाहरणम् शैवालघोषपर्वतस्य समीपे पलाशनगरम् अस्ति।

   प्रश्नः कस्य समीपे पलाशनगरम् अस्ति?

   (क) वकासुरः प्रतिदिनं **जनान्** भक्षयति।

   (ख) **नगरवासिभिः** उक्तम् 'वयं तुभ्यं प्रतिदिनं आहारार्थमेकं मानवं दास्यामः।

   (ग) ब्राह्मणस्य दुःखेन **खगः** दुःखी भवति।

   (घ) त्वं पुनरधिकां **कान्तिं** प्राप्य प्रहससि।

3. रेखांकितपदानि संशोध्य वाक्यानि / पुनः लिखत

   (क) तस्य एकम् एव पुत्रः आसीत्।––––––––––

   (ख) त्वं महाधैर्यसम्पन्नं पुरूषः दृश्यसे। ––––––––

   (ग) न मे कः अपि ग्लानिः? ––––––

   (घ) त्वम् अधिकः कान्तिं प्राप्य प्रहससि।–––––––––

   (ङ) किम् अनया विचारेण तव? ––––––

तृतीयः अंशः

कथायाः तृतीयम् अंशं पुनः पठामः। वयम् ज्ञास्यामः यत् कथं राक्षसः राज्ञः वचांसि श्रुत्वा जीवहत्यां त्यजति।

तदा राक्षसेन स्वमनसि ..... राजा तूष्णीमासीत्।

केन स्वमनसि विचारितम्? राक्षसेन। कथायां 'साधुः' पदम् कस्मै प्रयुक्तः? राजाविक्रमादित्याय। साधुः कां विहाय आगतः? आत्मनः सुखभोगेच्छाम्। साधुः कस्य दुःखेन दुःखी भूत्वा आगतः? ब्राह्मणस्य। साधवः कीदृशाः भवन्ति? ते सर्वप्राणिनां सुखम् इच्छन्ति। साधवः केन दुःखिनः भवन्ति? परेषां दुःखेन। राक्षसः कम् प्रति स्वविचारं प्रकटयति? राजानं प्रति। राक्षसः किम् विचारयति? राजा भोजः सर्वस्य दुःखहरः अस्ति। किम् श्लाध्यम्? परार्थे प्रदत्तं शरीरम्। राजा विक्रमादित्यः केन सर्वाः सम्पदः प्राप्नोति? परोपकारव्यापारेण। राक्षसः कथं संतुष्टः अभवत्? राज्ञः त्यागभावनया। संतुष्टः राक्षसः राज्ञे किम् दातुम् उद्यतः अभवत्? वरं दातुम्। राजा वरे किम् अयाचत? मनुष्यभक्षणं त्यज इति। प्राणिनां रक्षा किमर्थं करणीया? सर्वेषां प्राणिनाम् एव प्राणाः प्रियाः भवन्ति। कः जीवहिसां त्यक्तवान्? राक्षसः। राजा कुत्र अगच्छत्? स्वनगरीम्। पुत्तलिका भोजं प्रति किम् अब्रवीत्? राजन् यदि त्वम् परोपकारादि गुणयुक्तः असि तर्हि सिंहासने समुपविश। पुत्तलिकायाः वचनं श्रुत्वा राजा किम् अकरोत्?राजा तूष्णीम् अतिष्ठत्।

श्लोकानाम् अन्वयः

1. त्यक्त्वात्मसुखदुःखेच्छां सर्वसत्वसुखैषिणः।
   भवन्ति परदुःखेन साधवोऽत्यन्तदुःखिनः।।

   अन्वयः सर्वसत्वसुखैषिणः साधवः आत्मसुखदुःखेच्छां त्यक्त्वा परदुःखेन अत्यन्त दुःखिनः भवन्ति

2. परोपकारव्यापारः पुरुषो यः प्रजायते।
   सम्पदः स समाप्नोति परत्रापि परं पदम्।।

   अन्वयः यः पुरुषः परोपकारव्यापारः प्रजायते सः (इह) सम्पदः आप्नोति) परत्र अपि परं पदम् समाप्नोति।

सारः

राक्षसः महाराजविक्रमादित्यस्य परार्थे शरीरत्यागस्य गुणं दृष्ट्वा तं 'साधुः' इति कथयति। सः राजानं कथयति यत् भवान् सर्वेषां प्राणिनां दुःखानि निवारयसि अतः त्वं धनसम्पदः प्राप्नोषि। तव परोपकारभावनया अहम् अतीव प्रसन्नः अस्मि। तदनन्तरम् वरदानाय आग्रहं करोति। 'राजा तु ''भवान् जीवहिंसां त्यजतु'' इति वरं याचते। राक्षसः जीवहिंसां त्यजति। पुत्तलिका पुनः राजानं भोजं सिंहासने उपवेष्टुम् प्रेरयति।



राक्षस विक्रमादित्य के परहित में शरीर त्याग के गुण से अत्यन्त प्रसन्न होकर उन्हें साधु के रूप में कहते हुए एक वरदान लेने के लिए कहता है। राजा राक्षस से जीवहिंसा त्यागने का वर माँगता है। राक्षस जीवहत्या त्याग देता है। यह कथा सुनाकर पुत्तलिका पुनः राजाभोज को सिंहासन पर बैठने के लिए प्रेरित करती है कि हे राजन्! यदि तुममें राजा विक्रमादित्य जैसे इस प्रकार के गुण हैं तो इस सिंहासन पर बैठ सकते हो।

पाठगतप्रश्नाः 8.3

1. एकपदेन उत्तरत–

   (क) परदुःखेन के दुःखिनः भवन्ति?

   (ख) राक्षसः किं व्यक्तवान्?

   (ग) सर्वेषां के प्रियाः?

   (घ) सर्वेषां जीवानां का करणीया?

2. उदाहरणं दृष्ट्वा वाच्यपरिवर्तनं कुरुत

   कर्तृवाच्यम्– एकदा नगरवासिनः तम् अकथयन्।

   कर्मवाच्यम्– एकदा नगरवासिभिः सः कथितः।

   (क) कर्तृवाच्यम्– अहं परार्थे एतत् शरीरं ददामि।

   कर्मवाच्यम्–

   (ख) कर्तृवाव्यम्– राजा भणति।

   भाव/कर्मवाच्यम्–

   (ग) कर्तृवाच्यम्– राक्षसः जीवहिंसा त्यजति।

   कर्मवाच्यम्–

   (घ) कर्तृवाच्यम्– पुत्तलिका कथां कथयति।

   कर्मवाच्यम्–

3. अधोलिखितं कथनं कः कं प्रति कथयति–

कथनम्	**कः**	**कम् प्रति**
(क) अहं संतुष्टोऽस्मि।	———	———
(ख) जीवहिंसां त्यजतु	———	———
(ग) सिंहासने समुपविश।	———	———
(घ) साधवः परदुःखेन दुःखिनः भवन्ति।	———	———

4. कोष्ठकात् अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत–
(यथा, तदाप्रभृति, यदि, तथा, तर्हि, एवं)
(क) ——— विचार्य सः राजानम् अब्रवीत्।
(ख) ——— मनुष्यस्य आत्मनः प्राणाः प्रियाः ——— सर्वेषां प्राणिनाम्।
(ग) त्वं ——— मम प्रसन्नः असि,——— जीवहिंसां त्यज।
(घ) ———राक्षसः जीवहिंसां त्यक्तवान्।

व्याकरणबिन्दवः

क्त प्रत्ययस्य प्रयोगः

निर्गतः निर्+ गम्+ क्त – (चले गए) पुं. प्रथमा एकवचनम्

स्थितः– स्था+ क्त (रूके) पुं.

दृष्टम्– दृश् + क्त – नपंसकलिंगम् प्रथमा एकवचनम्

भणितम्– भण्+ क्त– नपुंसकलिंगम् प्रथमा एकवचनम्

उक्तम्– वच्+ क्त– नपुसकलिंगम् प्रथमा एकवचनम्

भाववाच्ये 'क्त' प्रत्ययस्य प्रयोगः भवति।

सकर्मक कृ धातुना सह कर्मवाच्ये अपि प्रयोगः भवति।

ल्यप् प्रत्ययस्य प्रयोगः

निधाय– नि+ धा+ ल्यप् – (रखकर)

आश्रित्य– आ+ श्रि+ ल्यप्– (आश्रित होकर, सहारा लेकर)

अवलोक्य– अव+ लोक्+ ल्यप्– देखकर

निवेद्य– नि+ विद्+ ल्यप्– निवेदित करके

(भवान् जानाति एव यत् यदा धातोः पूर्वम् उपसर्गः भवति तदा क्त्वा स्थाने ल्यप् प्रत्ययः भवति।)

पदपरिचयः

चेतसि– 'चेतस्', सप्तमी एकवचनम्

श्रूयताम्– 'श्रु' धातुः (कर्मवाच्ये) लोट्लकारः, प्रथमपुरूषः एकवचनम्

कत्वा/ल्यप् प्रत्ययस्य प्रयोगः

श्रु + क्त्वा – श्रुत्वा

नी + क्त्वा – नीत्वा

स्ना + क्त्वा – स्नात्वा



दा + क्त्वा – दत्त्वा

दृश् + क्त्वा – दृष्ट्वा

आ + गम् + ल्यप्– आगत्य

निर् + ईक्ष् + ल्यप्– निरीक्ष्य

प्र + आप् + ल्यप्– प्राप्य

सम् + प्रेष् + ल्यप्– सम्प्रेष्य

समासप्रयोगः

दिनं दिनं प्रति– प्रतिदिनम्, अव्ययीभावसमासः

दुःखस्य कारणम्– दुःखकारणम्, षष्ठीतत्पुरूष समासः

सम्मुखपतितम्– सम्मुखे पतितं – सप्तमीतत्पुरूष समासः

महत् च तत् दुःखम् महादुःखम्– कर्मधारय समासः

अधोलिखितानि वाक्यानि ध्यानेन पठत

(क) युष्माभिः किं दृष्टम्?

(ख) पक्षिणा भणितम्।

(ग) चिरजीविना उक्तम्।

(घ) तेन उक्तम्।

(ङ) वृद्धेन उक्तम्।

एतेषु सर्वेषु वाक्येषु कर्ता तृतीयाविभक्त्याम् अस्ति क्रिया च प्रथमा–एकवचने एव। इदं भाववाच्यं कथ्यते। वाच्यम् इति कथनस्य प्रकारः क्रियायाः प्रयोगः वा। अस्य त्रयः भेदाः भवन्ति। (1) कर्तृवाच्यम् (2) कर्मवाच्यम् (3) भाववाच्यम्। कर्तृवाच्ये क्रियाकर्तृपदानुसारं विद्यते। कर्मवाच्ये कर्मानुसारं, भाव वाच्ये तु प्रथम पुरुषे एकवचने एव।

विसर्गसन्धिप्रयोगः

(विसर्गस्य उत्वम्– : + अ = ो ऽ)

साधवोऽत्यन्तदुःखिनः– साधवः+ अत्यन्त दुःखिनः

(स्+आ+ध्+व्+अ+ः+अत्यन्तदुःखिनः)= अत्र विसर्गस्य स्थाने 'उ' भवति

(अ+उ+अ) = ओ ऽ

तुष्टोऽस्मि – तुष्टः+ अस्मि

प्रसन्नोऽसि– प्रसन्नः + असि

पदपरिचयः

वृणीष्व– 'वृ' धातु (आत्मनेपदी) लोट्लकारः, मध्यमपुरूषः एकवचनम्

आत्मनः– आत्मन् पुं. पंचमी / षष्ठी एकवचनम्

समुपविश– सम्+उप+विश् लोट् लकारः, मध्यमपुरूषः, एकवचनम्

म्रियते – मृ 'धातुः' (आत्मनेपदी) लट्लकारः, प्रथम पुरुषः, एकवचनम्

8.4 किम् अधिगतम्

- 'परार्थे आत्मोत्सर्गः' इति पाठः 'सिंहासनद्वात्रिंशिका' ग्रन्थात् उद्धृतः।
- महाराजविक्रमादित्यः दयालुः, परोपकारी, प्रतापी च नृपः आसीत्।
- सर्वेषां जीवानां प्राणाः प्रियाः। अतः अस्माभिः जीवरक्षा करणीया।
- साधवः स्वयं कष्टं सोढ्वा सर्वसत्त्वहितैषिणः भवन्ति।
- अव्ययानां रूपपरिवर्तनं न भवति।
- धातुना सह 'क्त' प्रत्ययं संयोज्य भूतकालिक–अर्थः जायते।
- यदा धातोः पूर्वम् उपसर्गः आयाति तदा क्त्वा स्थाने ल्यप् प्रत्ययः भवति, तत्पदं च अव्ययं भवति।
- वाच्यं त्रिविधं भवति– कर्तृवाच्यम्, कर्मवाच्यम्, भाववाच्यम् च।
- वर्ण–संश्लेषणेन पदनिर्माणं भवति।

8.5 योग्यताविस्तारः

(क) ग्रन्थपरिचयः

'सिंहासनद्वात्रिंशिका' नाम ग्रन्थः एकः मनोरंजकः शिक्षाप्रदश्च कथासंग्रहः अस्ति। अयं ग्रन्थः 'द्वात्रिंशत्पुत्तलिका' एवं च 'विक्रमचरितम्' नामभ्यामपि प्रसिद्धः। यदा महाराजः भोजः विक्रमादित्यस्य सिहासनं अरोढुम् प्रयतते तदा सिंहासनजटिताः पुत्तलिकाः भोजस्य योग्यतां परीक्षितुम् एकैकशः द्वात्रिंशत् पुत्तलिकाः विक्रमादित्यस्य शौर्यकथाः श्रावयन्ति। अस्याः कथायाः द्विविधं संस्करणं प्राप्यते– एकम् उत्तरभारतीयम् द्वितीयं दक्षिणभारतीयम् च। दक्षिणभारतीयं संस्करणं 'विक्रमचरितम्' इति कथ्यते। लेखकविषये पूर्णज्ञानं नोपलभ्यते।

(ख) भावविस्तारः

परोषाम् उपकारः परोपकारः इति कथ्यते। अस्मिन् संसारे सत्पुरुषाः परोपकाराय जीवनं धारयन्ति। ते आत्मसुखं दुःखं वा अविचिन्त्य अहर्निशं समाजस्य देशस्य च कल्याणाय एव प्रयासरताः भवन्ति। अस्माकं देशे परोपकारस्य अत्यधिकं महत्त्वं वर्तते। परोपकारविषये व्यासेन उक्तम्–



अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्।।

परोपकारिणः पुरुषाः स्वभावेन एव विनम्राः भवन्ति। तेषां हृदयानि सागराणाम् इव विस्तृतानि भवन्ति।

भवन्ति नम्रास्तरवः फलोद्गमैः
नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धता सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्।।

अपि च– श्रोत्रं श्रुतनैव न कुण्डलेन दानेन पाणिर्नतु कंकणेन।
विभाति कायः करुणापराणां परोपकारेण न तु चन्दनेन।।

ये जनाः उदारहृदयाः भवन्ति तेषां कृते सम्पूर्णं जगत् परिवार इव भवति–

अयं निजः परोवेति गणना लघुचेतसाम्।
उदारचरितानान्तु वसुधैव कुटुम्बकम्।। (हितोपदेशः)

न केवलं मानवाः अपितु प्रकृतिः अपि सर्वदा परोपकारे संलग्ना भवति–

परोपकाराय फलन्ति वृक्षाः,
परोपराय वहन्ति नद्यः।
परोपकाराय दुहन्ति गावः,
परोपकारार्थमिदं शरीरम्।।

एवमेव– पिबन्ति नद्यः स्वयमेव नाभ्भः,
स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः,
परोपकाराय सतां विभूतयः।।

अस्याः कथायाः विषये क्षेमेन्द्रस्य वृहत्कथामंजरीनामके पुस्तके, सोमदेवस्य कथासरित्सागर नामके पुस्तके च संक्षिप्तरूपेण विवरणं प्राप्यते।

राजा भोजः विक्रमादित्य इव परोपकारी, सदाचारी, विद्वद्जनानां प्रेमी आसीत्। भोजस्य पितुः नाम सिन्धुलः, नगर्याः नाम च धारा आसीत्। सः सप्तपंचाशत्वर्षाणि राज्यमकरोत्। तस्य राज्ये जनाः सदाचारिणः सन्तुष्टाः, धार्मिकाः च आसन्। भोजस्य राज्ये चतुर्दिक्षु सुव्यवस्था आसीत्। तस्य राजभवने नवरत्नाः आसन्। कलाकौशलादीनां विकासः सुष्ठुरूपेण च अभवत्।

विक्रमादित्यस्य राज्ये जनाः सदाचारिणः आसन्। कोऽपि जनः कस्यचिद् जनस्य निन्दां न अकरोत्। कोऽपि जनः चौरकर्मे प्रवृत्तः न आसीत्। तस्य राज्यम् पापशून्यम् आसीत्। सर्वाः व्यवस्थाः सुचारुरूपेण प्रचलन्ति स्म। जनाः स्व–स्व कार्येषु संलग्नाः आसन्। सर्वे जनाः धर्मयुक्ताः भूत्वा सुखेन, संतोषेण च जीवनं यापयन्ति स्म।

(ग) भाषाविस्तारः

वाच्यम्

वाच्यम् कथनस्य प्रकारम्।

यथा– 1. रामः पाठान् पठति। 2. रामेण पाठाः पठ्यन्ते। 3. रामेण पठ्यते।

प्रथमे वाक्ये 'रामः' कर्तृपदे प्रथमा विभक्तौ अस्ति। क्रियापदम् कर्तृपदस्य पुरुषवचनानुसारेण भवति। अतः अस्य कथनस्य प्रकारः कर्तृवाच्यम्।

द्वितीये वाक्ये 'रामेण' कर्तृपदम् अप्रधानम् (गौणम्) भूत्वा तृतीया विभक्तौ अस्ति। 'पाठाः' कर्मपदं प्रधानं भूत्वा प्रथमा विभक्तौ अस्ति। 'पठ्यन्ते' क्रियापदम् प्रधान कर्मपदस्य पुरुषवचनानुसारेण अस्ति। अत्र कर्मपदं प्रधानम् अस्ति। अतः अस्य कथनस्य प्रकारः कर्मवाच्यम्। कर्मवाच्ये धातु + य + आत्मनेपदम्। कर्मवाच्ये पठ् धातोः रूपाणि पश्यतु–

पठ् (कर्मवाच्ये) लट्लकारः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथम पुरुषः	पठ्यते	पठ्येते	पठ्यन्ते
मध्यम पुरुषः	पठ्यसे	पठ्येथे	पठ्यध्वे
उत्तम पुरुषः	पठ्ये	पठ्यावहे	पठ्यामहे

अन्यानि उदाहरणानि

तेन पुस्तकं पठ्यते, तेन पुस्तके पठ्येते, तेन पुस्तकानि पठ्यन्ते

तेन त्वम् दृश्यते, तेन युवाम् दृश्येथे, तेन युयम् दृश्यध्वे

तेन अहम् कथ्ये, तेन आवाम् कथ्यावहे, तेन वयं कथ्यामहे

तृतीये वाक्ये

'रामेण' कर्त्ता अप्रधानम् भूत्वा तृतीयाविभक्तौ अस्ति।

अत्र कर्मपदस्य अभावः अस्ति। भाववाच्ये क्रिया प्रधानम् अस्ति। भावपदस्य अर्थः क्रिया अस्ति। भाववाच्ये बहुवचने अपि क्रियापदं सदा प्रथमपुरुषस्य एकवचने एव भवति। यथा तेन सुप्यते, ताभ्यां सुप्यते, तैः सुप्यते, त्वया गम्यते, युवाभ्यां गम्यते, युष्माभिः गम्यते, मया पठ्यते, आवाभ्यां पठ्यते, अस्माभिः पठ्यते।



8.6 पाठान्तप्रश्नाः

1. राज्ञः विक्रमादित्यस्य चारित्रिकगुणाः चतुर्वाक्येषु लिखत।
2. अस्मात् पाठात् चित्वा तिस्रः सूक्तीः लिखत।
3. निम्नलिखितप्रश्नान् उत्तरत–
   (क) विक्रमस्य राज्ये कीदृशाः जनाः न आसन्?
   (ख) वृक्षस्य उपरि चिरंजीवी नामकः खगः किं करोति स्म?
   (ग) वृद्धेन पक्षिणा किम् उक्तम्?
   (घ) राक्षसः पर्वते किं करोति स्म?
   (ङ) पक्षिणः वचः श्रुत्वा राजा किम् अकरोत्।
4. यथानिर्दिष्टं पदपरिचयं लिखत

पदानि	मूलशब्दः	विभक्तिः	वचनम्
मन्त्रिषु	.....	.....	.....
चिरजीविना	.....	.....	.....
चेतसि	.....	.....	.....
तुभ्यम्	.....	.....	.....
सम्पदः	.....	.....	.....

5. अधोलिखितानि वाक्यानि घटनाक्रमेण लिखत–
   (क) वृक्षस्योपरि चिरंजीवी आसीत्।
   (ख) एकदा विक्रमः योगिवेशेन देशान्तरं गतः।
   (ग) सरोवरे स्नात्वा राजा वध्यशिलायाम् उपविष्टः।
   (घ) महारण्यमध्ये राजा रात्रौ वृक्षमूलमाश्रित्य स्थितः अभवत्।
   (ङ) पक्षिणः वचः श्रुत्वा राजा वध्यशिलासमीपे गतः।
   (च) तदाप्रभृति राक्षसः जीवमारणं त्यक्तवान्।
   (छ) उत्तरदेशे शैवालघोषो नाम पर्वतः आसीत्।
   (ज) कश्चित् राक्षसः प्रतिदिनं मानुषं स्त्रियं वा भक्षयति।
6. रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरूत–
   (क) <u>वृक्षमूले</u> स्थितः राजा तद्वचः शृणोति।
   (ख) पर्वतनिकटे <u>पलाशनगरम्</u> अस्ति।
   (ग) क्रमेण एकदा <u>ब्राह्मणस्य</u> वारः समायातः।
   (घ) <u>कथां</u> कथयित्वा पुत्तलिका भोजराजं प्रति अब्रवीत्।
   (ङ) तदा <u>राक्षसेन</u> मनसि विचारितम्।

7. रेखांकितपदानाम् अशुद्धिं संशोध्य पुनः तानि लिखत–
   (क) तस्मात् मृत्युभयेन तेऽपि गताः।
   (ख) एवं भणित्वा पुनरपि राजम् अब्रवीत्।
   (ग) स मदागमने पूर्वमेव म्रियत।
   (घ) पुत्तलिका भोजराजेन प्रति अब्रवीत्।
   (ङ) नृपम् नमः।
8. वर्ण–संश्लेषणं कुरुत
   (क) र् + आ + क् + ष् + अ + स् + अः =
   (ख) र् + आ + ज् + ञ् + आ =
   (ग) प् + उ + त् + त् + अ + ल् + इ + क् + आ =

8.7 उत्तराणि

8.3 बोधप्रश्नाः

1. (क) वृक्षमूले, (ख) भोजः, (ग) राक्षसः, (घ) पुत्तलिका
2. (क) वृद्धः, (ख) पक्षिणिः, (ग) राक्षसः, (घ) राजा (ङ) राजा
3. क. iii, ख. vi, ग. i, घ. v, ङ ii, च. iv

पाठगतप्रश्नाः

8.1 1. (क) पुत्तलिका, (ख) विक्रमस्य, (ग) मन्त्रिषु (घ) चिरंजीवी ङ राजा
2. (क) वृक्षस्योपरि, (ख) उक्तम्, (ग) तत्र, (घ) सूर्योऽस्तंगतः, (ङ) स्थितः
3. (क) गम्, (ख) स्था, (ग) दृश्, (घ) भण्, (ङ) वच्।

8.2 1. (क) उत्तरदेशे, (ख) पर्वतं (ग) ब्राह्मणस्य, (घ) सरोवरे, (ङ) मरणकालः।
2. (क) कस्य (ख) कान् (ग) कैः (घ) कः (ङ) काम्
3. (क) एकः, (ख) महाधैर्यसम्पन्नः, (ग) का, (घ) अधिकां, (ङ) अनेन।

8.3 1. (क) साधवः, (ख) जीवहिसाम्, (ग) प्राणाः, (घ) रक्षा।
2. (क) मया परार्थे एतत् शरीरं दीयते। (ख) राज्ञा भणितम्।
   (ग) राक्षसेन जीवहिंसा त्यज्यते। (घ) पुत्तलिकया कथा कथ्यते।
3. (क) राक्षसः राजान प्रति (ख) राजा–राक्षसम्
   (घ) पुत्तलिका–राजानम् (घ) राक्षसः–राजानम्
4. क. एवं, ख. यथा–तथा, ग. यदि–तर्हि, घ. तदाप्रभृति



8.6 पाठान्त प्रश्नाः

1. (i) राजा विक्रमादित्यः धैर्यसम्पन्नः प्रसन्नवदनः च आसीत्।
   (ii) सः वेशपरिवर्तनं कृत्वा राज्यस्य सर्वं वृत्तान्तं ज्ञातुं प्रयतते स्म।
   (iii) राजा स्वबलिदानेन अपि प्रजायै अभयदानम् अकरोत्।
   (iv) राज्ञः व्यवहारेण प्रेरितः राक्षसः अपि जीवहिंसां त्यजति स्म।
2. स्वयं कुरुत।
3. (क) विक्रमस्य राज्ये पिशुनः तस्कराः, पापकर्मनिरताः जनाः न आसन्।
   (ख) वृक्षस्य उपरि चिरंजीवी नामकः खगः अन्यैः पक्षिभिः सह संलापं करोति स्म।
   (ग) वृद्धेन पक्षिणा उक्तम्– ''भो पुत्र! यो दुःखी स सुहृदि दुःखं निवेद्य सुखी भवति''।
   (घ) राक्षसः प्रतिदिनं नगरमागत्य मानुषं स्त्रियं बालं वा पर्वते नीत्वा भक्षयति स्म।
   (ङ) पक्षिणः वचः श्रुत्वा राजा वध्यशिलासमीपे गतः। तत्र ब्राह्मणं दृष्ट्वा तस्मै अभयं दत्त्वा स्वगृहं च सम्प्रेष्य, सरोवरे स्नात्वा वध्यशिलायाम् उपविष्टः।
4. मन्त्रिन्, सप्तमी, बहुवचनम्
   चिंरजीविन्, तृतीया, एकवचनम्
   चेतस्, सप्तमी, एकवचनम्
   युष्मद्, चतुर्थी, एकवचनम्
   सम्पत्, प्रथमा, एकवचनम्
5. (ख) (घ) (क) (छ) (ज) (ङ) (ग) (च)
6. (क) कुत्र, (ख) किम् (ग) किं नाम नगरम्, (ग) कस्य (घ) काम्, (ङ) केन।
7. (क) मृत्युभयात्, (ख) राजानम्, (ग) मदागमनात्, (घ) भोजराजम्, (ङ) नृपाय।
8. (क) राक्षसः (ख) राज्ञा (ग) पुत्तलिका

309sk09

9

काले फलति सौभाग्यम्

को न जानाति खलु काले एव वृक्षाः फलन्ति। काले एव वृष्टिः जायते। काले एव भवनस्य निर्माणं भवति। प्रथमे कुद्दालाघाते एव भूतलात् जलं न निस्सरति। क्षेत्रेषु धान्यम् अपि समये एव प्ररोहति। अतः अस्माभिः धैर्येण कार्यं करणीयम्। निराशः भूत्वा मध्यमार्गे एव प्रयत्नः न त्यक्तव्यः। कथम् एकः निर्धनः जनः धैर्यम् अवलम्ब्य धनवान् भवति इति पठामः वयम् अस्मिन् हास्यनाटके।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- नाट्यांशस्य सारांशं लेखितुं शक्ष्यति;
- पाठे प्रयुक्तानां पात्राणां चरित्रचित्रणं कर्तुं शक्ष्यति;
- इन् प्रत्ययान्तपदानां रूपाणि ज्ञात्वा वाक्यप्रयोगं कर्तुं शक्ष्यति;
- पूर्वरूपसन्धियुक्तपदानां सन्धिच्छेदं करिष्यति;
- तत्पुरुषसमस्तपदानि चित्वा विग्रहं करिष्यति;
- क्त्वा प्रत्ययस्य स्थाने ल्यप् प्रत्ययस्य प्रयोगं कर्तुं क्षमः भविष्यति;
- क्तवतु प्रत्ययस्य स्थाने लङ् लकारस्य क्रियापदानि लेखिष्यति;
- भू, शक्, क्री धातूनां लटादि–प×च लकारेषु रूपाणां प्रयोगं करिष्यति।

क्रियाकलापः



9.1: **बीजचक्रं**

उपर्युक्तचित्रे बीजचक्रं प्रदर्शितम्। चित्रं दृष्ट्वा अधोलिखितवाक्यानि पूरयन्तु

(क)	बीजात्	अङ्कुरः	प्रजायते
(ख)	.....	पादपः	.....
(ग)	.....	.....	प्रजायते
(घ)	वृक्षात्	.....	.....
(ङ)	.....	फलम्	.....
(च)	फलात्	.....	.....

9.1 मूलपाठः

काले फलति सौभाग्यम्

यथा बीजं तस्मिन्नेव क्षणे फलं न उत्पादयति तथैव पुण्यकर्मणां फलमपि तत्क्षणमेव न भवति। पठामः तावत् अतिमनोर×जकम् एतत् नाटकम्।

(राजसभायाः दृश्यम्। सिंहासने उपविश्टः राजा पार्श्वे मन्त्री च)

प्रतीहारी – (प्रविश्य) जयतु महाराजः। प्रभो! कश्चन जीर्णवस्त्रधारी निर्धनः भवद्दर्शनाभिलाषी द्वारे तिष्ठति।

राजा – सादरं तम् अन्तः प्रवेशय।

प्रतीहारी – यथाज्ञापयति महाराजः। (प्रतीहारी गच्छति)

राजा – (स्वगतम्) कथं मम राज्ये जीर्णवस्त्रधारी निर्धनः?

प्रतीहारी – (लब्धदत्तेन सह प्रविश्य) जयतु महाराजः।

लब्धदत्तः – जयतु महाराजः।

राजा – भोः कथं मम राज्ये निर्धनः, दीपस्य अधः अन्धकारः।

लब्धदत्तः – महाराज! किं करोमि, मम भाग्यम् एव विपरीतम्।

मन्त्री – महाराज! किं न अभिजानाति, एषः एव एकदा वने महाराजस्य प्राणान् रक्षितवान्।

लब्धदत्तः – मातृभूमेः महाराजस्य च ऋणं प्रत्यर्पयितुं मया प्रयासः एव कृतः।

राजा – आम् स्मरामि। तदा अपि भवान् न किमपि याचितवान्। भवतः विनम्रतया प्रसन्नः अस्मि। वदतु किम् इच्छति?

लब्धदत्तः – भवतां दर्शनार्थम् एव आगतवान्।

राजा – (पार्श्वं दृष्ट्वा) प्रतीहारिन्। मम शयनागारे एकं बीजपूरफलम् अस्ति। शीघ्रं तत् आनय।

प्रतीहारी – यथाज्ञापयति महाराजः। (निष्क्रम्य, प्रविश्य च)

प्रतीहारी – जयतु महाराजः। एतद् बीजपूरफलम्।

राजा – (स्वीकृत्य) भोः लब्धदत्त। स्वीकरोतु एतत् फलम्। इतः परं बहुमूल्यं वस्त्रं परिधाय एव राजसभायाम् आगच्छतु भवान्।

शब्दार्थाः

राजसभायाः = राजदरबार का
प्रतीहारी = द्वारपाल
प्रविश्य = पहनकर
जीर्णवस्त्रधारी = फटे पुराने कपड़े पहने
प्रवेशय = प्रवेश कराओ
स्वगतम् = एक ओर बोली जाने वाली बात जो अन्य पात्रों को सुनाई न दे।
अभिजानन्ति = पहचानता है
प्रत्यर्पयितुम् = वापस करने के लिए, चुकाने के लिए
शयनागारे = सोने के कक्ष में
बीजपूरफलम् = बीजों से भरा फल
परिधाय = पहन कर
ज्ञास्यसि = जान जाओगे



लब्धदत्तः – (किञ्चिद् नैराश्यम् अनुभवन्) धन्यः अस्मि। (फलं गृहीत्वा गच्छति।)

मन्त्री – महाराज। किम् एकेन फलेन तस्य दारिद्र्यं दूरीभविष्यति?

राजा – समयेन ज्ञास्यसि, हे मन्त्रिन्!

प्रतीहारी – जयतु महाराजः। महाराज! एकः साधुः राजदर्शनाकांक्षी द्वारे तिष्ठति।

राजा – सम्मानपूर्वकम् आनय तम्। (ततः साधुः प्रविशति।)

साधुः – जयतु महाराजः। एकम् अपूर्वं फलं भवते अर्पयितुम् आगतोऽहम्। कृपया स्वीकरोतु।

राजा – (गृहीत्वा साश्चर्यम्) अहो एतत् तु तदेव फलम्। भोः साधो! कुतः प्राप्तम् एतत् फलम्?

साधुः – राजन्! मार्गे एकः अतीव निर्धनः जनः एतत् फलं विक्रीणाति स्म। दिव्यं प्रकाशमानम् एतत् फलं दृष्ट्वा अहम् एकं रूप्यकं दत्त्वा क्रीतवान् अत्र च आनीतवान्।

राजा – अतिशोभनम्। भवान् मम अतिथिगृहे विश्रान्तिम् अनुभवतु।

साधुः – कृतज्ञोऽस्मि, राजन्। (गच्छति)

राजा – प्रतीहारिन्! पुनः तं जीर्णवस्त्रधारिणम् लब्धदत्तम् आह्वयतु।

प्रतीहारी – यथा आज्ञापयति महाराजः। (गच्छति, लब्धदत्तेन सह प्रविश्य) एषः लब्धदत्तः।

लब्धदत्तः – जयतु महाराजः। क्षम्यताम्। बुभुक्षया पीडितोऽहं तत्फलम् एकेन रूप्यकेण विक्रीतवान्।

राजा – चिन्ता मा अस्तु। पुनः स्वीकरोतु तदेव फलम्। (लब्धदत्तः फलं स्वीकृत्य निर्गच्छति।)

प्रतीहारी – (प्रविश्य) जयतु महाराजः। कोऽपि राजदर्शनार्थी द्वारे तिष्ठति।

राजा – तम् अन्तः प्रवेशय।

प्रतीहारी – यथाज्ञापयति महाराजः। (गच्छति, पुनः व्यापारिणा सह प्रविशति।)

व्यापारी – जयतु महाराजः। महाराज, भवते एकं दिव्यं फलम् उपहाररूपेण अर्पयामि। कृपया स्वीकरोतु।

राजदर्शनाकांक्षी = राजा का दर्शन चाहने वाला
अपूर्वम् = अनोखा
अर्पयितुम् = देने के लिए
विक्रीणाति स्म = बेचता था
प्रकाशमानम् = चमकता हुआ
आनीतवान् = ले आया
विश्रान्तिम् = आराम, विश्राम
आह्वयतु = बुलाइए
आज्ञापयति = आज्ञा देता है
बुभुक्षया = भूख से
मा अस्तु = मत हो
समर्पणीयम् = देना है, सौंपना है
मन्ये = मानता हूँ
प्रकाशम् = जोर से, सबको सुनाई देने लायक शब्दों से

राजा – (साश्चर्यम्, स्वगतम्) अरे, पुनः तदेव फलम्। मन्ये सः मूर्खः पुनः एतत् फलम् एकेन रूप्यकेण विक्रीतवान्। (प्रकाशम्) भो व्यापारिन्, कुतः प्राप्तम् एतत् फलम्।

व्यापारी – महाराज! एकः जीर्णवस्त्रधारी एतत् फलं विक्रीणाति स्म। बहुमूल्यम् अद्भुतम् इति च मत्वा तस्मै वस्त्रयुगलं दत्त्वा अत्र आनीतवान्।

राजा – प्रीतोऽस्मि भवतः राजभक्त्या। मन्त्रिन्। एनं यथोचितं सत्कृत्य प्रेषयतु। तं लब्धदत्तं च पुनः आह्वयतु।

मन्त्री – यथा आदिशति भवान्।

राजा – (स्वगतम्) कथं मूर्खः सः लब्धदत्तः न अभिजानाति फलस्य दिव्यताम्। (व्यापारी गच्छति, लब्धदत्तः पुनः प्रविशति)

लब्धदत्तः – जयतु महाराजः। पश्यतु भगवन्। भवतां कृपया अद्य नूतनं वस्त्रयुगलं धारयामि। महान् आनन्दः वर्तते।

राजा – भवान् अल्पसन्तुष्टः लोभरहितः इति दृष्ट्वा प्रसन्नः अस्मि। पुनः एतत् फलं स्वीकरोतु। भवतः सर्वे मनोरथाः पूर्णाः भविष्यन्ति।

लब्धदत्तः – अनुगृहीतोऽस्मि। (फलं गृहीत्वा गच्छति)

(ततः प्रविशति एका नर्तकी)

नर्तकी – जयतु महाराजः। महाराज! अहम् एकं दिव्यं फलं भवते उपहारार्थम् आनीतवती।

राजा – (स्वगतम्) अहो! पुनरपि तदेव फलम्। सर्वे अस्य दिव्यतां परिज्ञाय एतत् अत्र आनयन्ति। सः तावत् अल्पमूल्यार्थम् एतत् विक्रीणाति। (प्रकाशम्) गच्छतु भवती अद्य। (नर्तकी गच्छति)

राजा – प्रतीहारिन्! पुनरपि सः लब्धदत्तः आनीयताम्।

लब्धदत्तः – (प्रविश्य, भीत्या) क्षम्यताम्। महाराज! प्रतिदिनम् उदरभरणम् माम् एतत् फलं विक्रेतुं बाध्यं करोति। इतः परं तथा न करिष्यामि। मम दोषः नास्ति।

राजा – अलं भयेन। भवतः सत्यवचनेन अहं सन्तुष्टः। भवान् विनम्रः, सरलः, अभिमानरहितः, लोभरहितः च। अतः पुनः एतत् फलं स्वीकरोतु। (लब्धदत्तः गृह्णाति)

प्राप्तम् = मिला
वस्त्रयुगलम् = वस्त्रों का एक जोड़ा
दत्त्वा = देकर
प्रीतोऽस्मि = खुश हूँ, प्रसन्न हूँ
सत्कृत्य = सम्मान देकर
प्रेषयतु = भेजें
आदिशति = आदेश देता है
उपहारार्थम् = उपहार के लिए, भेंट के लिए
परिज्ञाय = जानकर
आनयन्ति = लाते हैं
आनीयताम् = ले आइए
भीत्या = डर से
विक्रेतुम् = बेचने के लिए
बाध्यम् = विवश, मजबूर
इतः परम् = इसके बाद

राजा – इदानीं सर्वेषां पुरतः एतत् फलं खण्डयतु। (लब्धदत्तः फलं खण्डयति। तस्मात् रत्नानि अधः पतन्ति। सर्वत्र तेषां ज्योतिः प्रसरति।)

लब्धदत्तः – (आश्चर्येण) अहो रत्नमयम् आसीत् एतत् फलम्। अत एव भासते स्म।

मन्त्री – (स्वगतम्) एवम् दिव्यम् आसीत् फलम्! (प्रकाशम्) भो लब्धदत्त। पश्य, त्रिवारम् एतत् फलं भवते प्रदत्तम्। भवान् सम्प्राप्तां लक्ष्मीं पुनः पुनः तिरस्कृतवान्।

लब्धदत्तः – (नैराश्येन) महाराज! मम भाग्ये लक्ष्मीः नासीत् अतएव अहम् एतत् फलं न परिज्ञातवान्। (राज्ञः चरणयोः पतति)।

राजा – (लब्धदत्तम् उत्थापयन्) उत्तिष्ठ! सत्कर्मणः सद्विचाराणां च फलं कदापि न नश्यति। भवद्भिः मम प्राणरक्षा कृता। त्रिवारं मया विविधाः जनाः भवतः परीक्षार्थं प्रेषिताः। भवान् लोभं न कृत्वा अल्पेनैव मूल्येन एतत् फलं विक्रीतवान्। सर्वदा सत्यमेव उक्तम्। अतः इदानीम् एतानि सर्वाणि रत्नानि भवते दास्यामि। स्वीकरोतु।

लब्धदत्तः – जयतु महाराजः! अनुगृहीतोऽस्मि। चिरं जीवतु भवान् सर्वदा प्रजाहितचिन्तकः। नूनं भवतां राज्ये कोऽपि निर्धनः भवितुं न शक्नोति।

मन्त्री – धन्यः अस्ति अस्माकं महाराजः– **नूनम् सत्यमेव उक्तम्–काले फलति सौभाग्यम्।**

(पटाक्षेपः)

खण्डयतु = तोड़िए– फोड़िए
भासते स्म = चमक रहा था
सम्प्राप्ताम् = पाई हुई
तिरस्कृतवान् = अपमान कर दिया
नैराश्येन = निराशा से
परिज्ञातवान् = पहचाना, जाना
उत्थापयन् = उठाता हुआ
परीक्षार्थं = जाँच के लिए
नूनम् = अवश्य
पटाक्षेपः = पर्दे का गिरना

9.2 बोधप्रश्नाः

1. भवद्भिः मूलपाठः पठितः। तदनुसारमेव उत्तरं ददतु। कः कं प्रति कथयति?

	कः	कम्
यथा– भोः। कथं मम राज्ये निर्धनः?	राजा	लब्धदत्तम्
(क) जयतु महाराजः। एतद् बीजपूरफलम् ।	.....	.....
(ख) किम् एकेन फलेन तस्य दारिद्र्यं दूरीभविष्यति?	.....	.....
(ग) बहुमूल्यम् अद्भुतम् इति मत्वा तस्मै वस्त्रयुगलं दत्त्वा अत्र आनीतवान्	.....	.....

(घ) अहम् एकं रूप्यकं दत्त्वा क्रीतवान् ....

(ङ) भवते उपहारार्थं दिव्यं फलम् आनीतवती ....

2. अधोलिखिते संवादे रिक्तस्थानानि पूरयत

लब्धदत्तः (प्रविश्य) (i)..... महाराजः। प्रतिदिनं (ii)..... माम् एतत् फलं (iii).....बाध्यं करोति। इतः (iv).....न करिष्यामि। मम (v)..... नास्ति।

राजा अलं (vi).....। (vii)..... सत्यवचनेन अहं सन्तुष्टः। भवान् (viii)..... सरलः (ix)..... लोभरहितः च। अतः पुनः (x)..... फलं स्वीकुरु।

3. क्रियापदानि योजयन्तु

(क) कश्चन निर्धनः भवद्दर्शनम् .....।

(ख) किं..... मम भाग्यम् एव विपरीतम्।

(ग) भो लब्धदत्त। ..... एतत् फलम्।

(घ) महाराज। भवते एकं दिव्यं फलम् उपहाररूपेण.....।

(ङ) इदानीं सर्वेषां पुरतः एतत् फलं.....।

9.3 अधुना अवगच्छामः

प्रथमः अंशः

राजसभायाः दृश्यम् ..... समयेन ज्ञास्यसि हे मन्त्रिन्।

व्याख्या–

भवन्तः जानन्ति एव यत् अद्यापि समाजे नाटकानाम् अभिनयः प्रचलति। दूरदर्शने अपि वयं नाटकम् पश्यामः। नाटकम् अभिनयप्रधानं भवति। अस्य उद्देश्यम् न केवलं मनोर जनम् अपितु प्रेरणाप्रदानम् अपि भवति। वयम् अत्रापि नाटके कथम् एकः जीर्णवस्त्रः निर्धनः राजदर्शनम् इच्छति राजा च तस्य समस्यां कथं दूरीं करोति इति प्रथमांशे पठामः।

(क) दीपस्य अधः अन्धकारः– राजसभां गतं निर्धनं जीर्णवस्त्रधारिणं लब्धदत्तं दृष्ट्वा राजा चकितः सन् इदम् उक्तवान् ''कथं दीपस्य अधः अन्धकारः– अर्थात् दानिनः राज्ञः शासनेऽपि कथम् एतादृशः निर्धनः? कथं दानेन वञ्चितः सः? एषा वार्ता तु राज्ञः कृते अपयशस्करी।

(ख) ऋणं प्रत्यर्पयितुं मया प्रयासः कृतः– आत्मनः प्रशंसां प्रति उदासीनः लब्धदत्तः तु कथयति, ''मया तु कर्त्तव्यस्य निर्वाहः एव कृतः। अहम् अस्य देशस्य नागरिकः। अत्र एव स्वजीवननिर्वाहं करोमि। अतः राज्ञः रक्षाम् मातृभूमेः च रक्षणं अहं कृतवान्।''



(ग) समयेन ज्ञास्यसि– उचितसमये एव कस्यापि कर्मणः फलं प्राप्यते। परं कर्म तु कर्त्तव्यमेव।

प्रथमांशसारः

एकः राजा अतीव बुद्धिमान् प्रजावत्सलः च आसीत्। सः स्वराज्ये कमपि जनं निर्धनं द्रष्टुं न वा×छति स्म। तस्य सभायाम् एकः लब्धदत्तः नाम जीर्णवस्त्रधारी निर्धनः प्रविशति। तेन एकवारं राज्ञः प्राणरक्षा अपि कृता आसीत्। लब्धदत्तः विनम्रः आसीत् अतः किमपि न अयाचत्। राजा तस्मै एकं बीजपूरं फलं प्रयच्छति। 'किमर्थम्' इति मन्त्री अपि न जानाति स्म। अन्ते तस्य रहस्यम् उद्घाटितम् भवति।

एक राजा बहुत परोपकारी तथा प्रजा का हित चाहने वाला था। उसकी सभा में एक फटेहाल निर्धन प्रवेश करता है। उसने पहले कभी एक बार राजा की प्राणरक्षा भी की थी किन्तु विनम्रता के कारण वह स्वयं कुछ नहीं मांगता। राजा उसे एक बीजों से भरा फल देता है। क्यों? इस बात को मन्त्री भी नहीं समझ पाता। इसका उत्तर अन्त में मिलता है।

व्याकरणबिन्दवः

अत्र वयम् अधः उपपदविभक्तिप्रयोगं, इन् (तद्धित प्रत्ययं) क्त्वा–ल्यप्–क्तवतु (कृत्) प्रत्ययप्रयोगं च पश्यामः।

प्रतीहारी	(प्रतीहार + इन्) प्रतीहारिन् शब्दः, प्रथमाविभक्तिः, एकवचनम्
मन्त्री	(मन्त्र + इन्) मन्त्रिन् शब्दः, प्रथमाविभक्तिः, एकवचनम् मन्त्रं परामर्शं ददाति इति। सम्बोधने मन्त्रिन् भवति।
महाराजः	महान् चासौ राजा। महाराज शब्दः, प्रथमाविभक्तिः, एकवचनम्। सम्बोधने–महाराज! इति भवति।
दीपस्य अधः	अत्र अधः इति योगे षष्ठी, किन्तु 'अधोऽधः' इति योगे द्वितीया भवति।

ल्यप् प्रत्यय प्रयोगः

प्रविश्य	प्र + विश् + ल्यप्	प्रवेशं कृत्वा
निष्क्रम्य	निस् + क्रम् + ल्यप्	निष्क्रमणं कृत्वा, बहिर्गत्वा
परिधाय	परि + धा + ल्यप्	धारणं कृत्वा, धारयित्वा
स्वीकृत्य	स्वी + कृ + ल्यप्	स्वीकारं कृत्वा

क्त्वा प्रत्ययान्तभाब्दाः

दृष्ट्वा	दृश्+क्त्वा (अव्यय)	दृष्टिपातं कृत्वा
गृहीत्वा	ग्रह्+क्त्वा (अव्यय)	ग्रहणं कृत्वा

क्तवतुप्रत्ययप्रयोगः

'क्तवतु' (तवत्) प्रत्ययः भूतकालिककृत्प्रत्ययः। अयं धातोः परं योज्यते। क्तवतुप्रत्ययान्तपदं न केवलं भूतकालिकक्रियायाः अर्थं व्यक्तं करोति। अस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति। यथा– छात्रः गृहं गतवान् (गम् + क्तवतु) = भूतकालिक क्रियापदम् – अगच्छत् 'इति अर्थः।

रक्षितवान्	रक्ष् + क्तवतु, पु0 प्रथमा विभक्तिः, एकवचनम्, अरक्षत्–रक्षणम् अकरोत्।
आगतवान्	आ+गम् क्तवतु, पु0, प्रथमा वि., एकवचनम्।
याचितवान्	याच् क्तवतु, पुं0, प्रथमा वि0, एकवचनम्, अयाचत–याचनाम् अकरोत्।

पाठगतप्रश्नाः 9.1

1. सम्बोधनं प्रथमान्तं पदं वा लिख्यताम्

प्रथमान्तं पदम्	**सम्बोधनम्**
यथा प्रतीहारी	हे प्रतीहारिन्
(क) मन्त्री	.....
(ख)	हे राजन्
(ग) महाराजः	.....
(घ)	हे दर्शनाभिलाषिन्

2. स्त्रीलिङ्गरूपस्य स्थाने पुल्लिंगरूपं लिखन्तु

यथा सा रक्षितवती	सः रक्षितवान् ।
(क) सा आगतवती	सः ..... ।
(ख) सा याचितवती	सः ..... ।
(ग) सा स्वीकृतवती	सः ..... ।
(घ) सा गृहीतवती	सः ..... ।

3. अनया पंक्त्या कः चारित्रिकः गुणः प्रकटितः भवति?

(क) राजा– कथं मम राज्ये निर्धनः?	दानवीरता / कृपणता
(ख) मन्त्री –एतेन एकदा राज्ञः प्राणरक्षा कृता।	तीक्ष्णा स्मृतिः / मन्दबुद्धिः
(ग) लब्धदत्तः– भवतां दर्शनार्थम् अत्र आगतवान्।	कुटिलता / विनम्रता
(घ) राजा–समयेन ज्ञास्यसि।	अज्ञानम् / चातुर्यम्
(5) मन्त्री– महाराज! किम् एकेन फलेन तस्य दारिद्र्यं दूरीभविष्यति।	परहितचिन्ता / उदारता



द्वितीयः अंशः

प्रतीहारी–जयतु महाराजः ..... फलं गृहीत्वाग गच्छति।

सम्प्रति वयम् द्वितीयांशम् प्रश्नोत्तरशैल्या बोधामः–

द्वारे कः उपस्थितः? एकः साधुः। साधुः राज्ञे किम् अर्पयति? अपूर्वं फलम्। साधुः तत् अपूर्वं फलं कुतः प्राप्तवान्? साधुः तत् अपूर्वं फलं तस्माद् एव लब्धदत्तात् क्रीत्वा आनीतवान्। साधुः लब्धदत्ताय फलस्य किं मूल्यं दत्तवान्। एकं रूप्यकम्। राजा साधवे किं पारितोषिकं ददाति? राजा साधवे अतिथिगृहे भोजनस्य व्यवस्थां कारयति। एतेन साधुं प्रति राज्ञः सम्मानभावना प्रकटीभवति। लब्धदत्तः किमर्थं फलं विक्रीतवान्? लब्धदत्तः बुभुक्षया पीडितः आसीत्। किं राजा तं दण्डयति? नहि। राजा तं न दण्डयति। अपितु पुनः तस्मै तदेव फलं ददाति। कालान्तरे कः अन्यः प्रविशति? एकः व्यापारी। व्यापारी पुनः राज्ञे किम् अर्पयति? व्यापारी पुनः राज्ञे तदेव फलम् अर्पयति। व्यापारी कुतः तत् फलम् आनीतवान्? लब्धदत्तात् व्यापारी लब्धदत्ताय वस्त्रयुगलं दत्त्वा फलं क्रीतवान्। राज्ञा आहूतः लब्धदत्तः किं धारयित्वा आनन्दं प्रकटयति? लब्धदत्तः व्यापारिणा दत्तं वस्त्रयुगलं धारयित्वा आनन्दं प्रकटयति। किं राजा तस्मै कुप्यति? नैव। राजा तु तम् अल्पसन्तुष्टं लोभरहितं मत्वा प्रसन्नः भवति। राजा किं कथयित्वा पुनः तस्मै तदेव फलं ददाति? ''तव सर्वे मनोरथाः पूर्णाः भविष्यन्ति।'' इति लब्धदत्तः राजानं प्रति किं कथयित्वा गच्छति? ''अनुगृहीतः अस्मि'' इति कथयित्वा गच्छति।

द्वितीयांशसारः

लब्धदत्तः राज्ञा प्रदत्तं फलं गृहीत्वा गच्छति। एकः साधुः लब्धदत्तात् एकेन रूप्यकेण फलं क्रीत्वा राज्ञे समर्पयति। राजा पुनः तत् फलं लब्धदत्ताय प्रयच्छति। पुनः एकः व्यापारी तत् फलं लब्धदत्तात् क्रीणाति, तस्मै एकं वस्त्रयुगलं ददाति पुनः च राज्ञे ददाति। राजा द्वितीयं वारमपि लब्धदत्ताय तत् फलं प्रयच्छति।

लब्धदत्त राजा के दिये फल को लेकर चला जाता है। एक साधु उसे एक रुपया देकर फल खरीदकर पुनः राजा को दे देता है। राजा फिर से उसे लब्धदत्त को ही दे देता है। कुछ समय बाद एक व्यापारी लब्धदत्त को वस्त्रों का जोड़ा देकर फल ले लेता है और फल पुनः राजा को लाकर देता है। राजा दूसरी बार भी फल लेकर लब्धदत्त को देता है।

1. **'स्वगतम्'** नाटके यदा किमपि पात्रम् स्वमनोभावम् एवं वदति, येन म×चे समक्षं स्थितं पात्रं न शृणोति इव, परं दर्शकाः शृण्वन्ति– एवम्भूतं कथनं 'स्वगतम्' उच्यते। यथा हि ''अश्राव्यं खलु यद्वस्तु तदिह स्वगतम् मतम्'' इति।
2. **'प्रकाशम्'** एतद्विपरीतं यत् सर्वश्राव्यं कथनं भवति तत्कृते 'प्रकाशम्' इति प्रयुज्यते।

व्याकरणबिन्दवः

अत्र वयं पदानां विग्रहं, सम्बोधनरूपं, क्त्वा–ल्यप्–क्तवतुप्रत्ययान्तरूपं च बोधामः

समस्तपदानि	**विग्रहाः**
राजदर्शनम्	राज्ञः दर्शनम्
राजदर्शनाकांक्षी	राजदर्शनस्य आकांक्षी
अतिथिगृहे	अतिथीनां गृहम्, अतिथिगृहं तस्मिन् इति अतिथिगृहे।
जीर्णवस्त्रम्	जीर्णं वस्त्रम्
वस्त्रयुगलम्	वस्त्रस्य युगलम्
राजभक्त्या	राज्ञः भक्तिः राजभक्तिः तया इति राजभक्त्या
अल्पसन्तुष्टः	अल्पेन सन्तुष्टः
लोभरहितः	लोभेन रहितः

त्त्वा/ल्यप् प्रत्ययबोधः

गृहीत्वा	ग्रह् + क्त्वा
दृष्ट्वा	दृश् + क्त्वा
दत्त्वा	दा + क्त्वा
मत्वा	मन् + क्त्वा
स्वीकृत्य	स्वी + कृ + ल्यप्
सत्कृत्य	सत् + कृ + ल्यप्

क्तवतुप्रत्ययान्तशब्दाः

क्रीतवान्	क्री +	क्तवतु प्रत्ययः, प्रथमा एकवचनम् (पु.)
आनीतवान्	आ + नी +	क्तवतु प्रत्ययः, प्रथमा एकवचनम् (पु.)
विक्रीतवान्	वि + क्री +	क्तवतु प्रत्ययः, प्रथमा एकवचनम् (पु.)

सम्बोधनपदानि	**प्रथमान्तपदानि**
महाराज!	महाराजः
साधो!	साधुः
राजन्	राजा
प्रतीहारिन्	प्रतीहारी
व्यापारिन्	व्यापारी
मन्त्रिन्	मन्त्री
भगवन्	भगवान्



पाठगतप्रश्नाः 9.2

1. (क) कौ द्वौ जनौ पुनः तत् दिव्यं फलं क्रीत्वा आनीतवन्तौ?
   (ख) साधुः लब्धदत्ताय किं दत्त्वा फलं प्राप्तवान्?
   (ग) व्यापारी लब्धदत्ताय किम् अयच्छत्?
   (घ) राजा तत्फलं प्राप्य पुनः कस्मै दत्तवान्?
2. अधोलिखितविग्रहान् पठित्वा समस्तपदानि रचयत।
   (क) अल्पेन सन्तुष्टः
   (ख) लोभात् विरहितः
   (ग) अतिथये गृहम्
   (घ) जीर्णं वस्त्रम्
   (ङ) राज्ञः भक्त्या
3. अधोलिखितवाक्येषु पाठानुसारं क्रियापदानि योजयत
   (क) भवान् मम अतिथिगृहे भोजनादिकं स्वीकृत्य.....
   (ख) पुनः तं जीर्णवस्त्रधारिणम् लब्धदत्तम् .....
   (ग) मन्त्रिन्। एनं यथोचितं सत्कृत्य .....
   (घ) राजा– भवान् पुनः तदेव फलं .....
   (ङ) राजा– लब्धदत्तं च पुनः .....
4. अधोलिखितवाक्येषु विशेषणपदं रेखांकितं कुरुत
   (क) एकः साधुः द्वारे तिष्ठति।
   (ख) पुनः तं जीर्णवस्त्रधारिणं लब्धदत्तम् आह्वयतु।
   (ग) अहं तत् फलं रूप्यकेण क्रीतवान्।
   (घ) भवतां कृपया अद्य नूतनं वस्त्रयुगलं धारयामि।
   (ङ) महान् आनन्दः वर्तते।

तृतीयः अंशः

ततः प्रविशति एका नर्तकी ..... पटाक्षेपः।

इदानीम् वयं तृतीयम् अंशं बोधामः–

फलं विक्रेतुं लब्धदत्तः किमर्थं बाध्यः आसीत्? क्षुधापूर्त्यै अथवा उदरंभरणाय। पुनः तत् फलं राज्ञे का आनीतवती? नर्तकी। राजा नर्तक्यै किं ददाति? न किमपि, अपितु सः तां

गन्तुं कथयति। राजा पुनः कस्य आह्वानाय आदेशं ददाति? लब्धदत्तस्य। राज्ञा कति जनाः लब्धदत्तस्य परीक्षायै प्रेषिताः आसन्? के च ते? त्रयः, साधुः, व्यापारी, नर्तकी च। ते जनाः कथं लब्धदत्तं परीक्षितवन्तः? ते तस्मात् फलं क्रीत्वा पुनः राज्ञे समर्पितवन्तः। लब्धदत्ते के के गुणाः आसन्? लब्धदत्तः विनम्रः, लोभरहितः, अल्पसन्तुष्टः अभिमानरहितः च आसीत्। राज्ञा तत् फलं लब्धदत्ताय कति वारं दत्तम्? त्रिवारम्। किं लब्धदत्तः सत्यं वदति स्म अथवा असत्यम्? सः राज्ञः पुरतः आगम्य सर्वदा सत्यमेव उक्तवान्। अन्ते राजा किं करोति? राजा अन्ते तानि रत्नानि लब्धदत्ताय एव दत्तवान्। सत्कर्मणां फलं कीदृशं भवति शुभम् अशुभं वा? सत्कर्मणां फलं शुभं भवति। फले किम् आसीत्? फले रत्नानि आसन्।

तृतीयांशसारः

पूर्ववत् एव पुनः एका नर्तकी लब्धदत्तात् फलं स्वीकृत्य राज्ञे ददाति। राजा लब्धदत्तम् आह्वयति, फलं च खण्डयितुम् आदिशति। खण्डितात् फलात् रत्नानि अधः पतन्ति। लब्धदत्तः विस्मितः तानि पश्यति। राजा लब्धदत्तस्य सत्यभाषणेन, विनम्रतया, सन्तोषवृत्त्या च प्रसीदति तस्मै च सर्वाणि रत्नानि प्रयच्छति। वस्तुतः साधुः, व्यापारी, नर्तकी सर्वे एव राज्ञा लब्धदत्तस्य परीक्षायै प्रेषिताः आसन्। लब्धदत्तः परीक्षायां सफलः भवति। पुण्यकर्मणां फलम् अवश्यं प्राप्यते परन्तु कालेन एव। अतः नरः धैर्येण पुण्यकर्माणि कुर्वन् जीवेत्।

पूर्व की भांति एक नर्तकी लब्धदत्त से फल लेकर पुनः राजा को देती है। राजा उसी प्रकार लब्धदत्त को बुलाता है और फल तोड़ने के लिए कहता है। टूटे हुए फल से रत्न पृथ्वी पर गिर पड़ते हैं। राजा लब्धदत्त की सरलता, सन्तोषवृत्ति, सत्यभाषिता से प्रसन्न होकर सारे रत्न उसे दे देता है। वास्तव में साधु, व्यापारी तथा नर्तकी राजा के द्वारा ही लब्धदत्त की परीक्षा के लिये भेजे जाते हैं जिसमें लब्धदत्त खरा उतरता है। पुण्यकर्मों का फल अवश्य मिलता है लेकिन समय आने पर ही। अतः मनुष्य धैर्यपूर्वक पुण्यकर्म करते हुए ही जीवन यापन करे।

व्याकरणबिन्दवः

अत्र वयं पुनः अर्थशब्दयुक्त–पदानां विग्रहं, भवत् शब्दरूपाणि, क्तवतु प्रत्ययप्रयोगं, अव्ययपदानि, उपपदविभक्ति प्रयोगं च बोधामः

(क)	उपहारार्थम्	उपहाराय	इदम्
	अल्पमूल्यार्थम्	अल्पमूल्याय	इदम्
	परीक्षार्थम्	परीक्षायै	इदम्
(ख)	भवते	भवत् चतुर्थी एकवचनम्	(आपके लिये)
	भवतः	भवत् षष्ठी एकवचनम्	(आपका)
	भवान्	भवत् पु. प्रथमा एकवचनम्	(आप)



	भवद्भिः	भवत् पु. तृतीया बहुवचनम्	(आप के द्वारा)	
	भवताम्	भवत् पु. षष्ठी बहुवचनम्	(आप सबका)	
(ग)	परिज्ञाय	परि ज्ञा ल्यप्	अभिज्ञानं कृत्वा	(पहचान करके)
	विक्रेतुम्	वि क्री तुमुन्	विक्रयं कर्तुम्	(बेचने के लिये)

क्तवतु प्रययान्तशब्दाः

आनीतवती	आ नी + क्तवतु, स्त्री., प्रथमा एकवचनम्, पुंल्लिंगे आनीतवान्।
तिरस्कृतवान्	तिरस्कृ + क्तवतु, पु., प्रथमा एकवचनम्, स्त्रीलिंगे, तिरस्कृतवती।
विक्रीतवान्	वि क्री + क्तवतु, पु, प्रथमा एकवचनम्, स्त्रीलिंगे विक्रीतवती।

अव्ययपदानि

पुनः (फिर), एव (वही), अत्र (यहां), तावत् (तो, तब तक) अद्य (आज), इतः परम् (इसके बाद), तथा (वैसा) अलम् (बस करो, मत करो), च (और), अतः (इसलिये) पुरतः (सामने, आगे) अधः (नीचे), सर्वत्र (सब जगह), अतएव (इसीलिये), एवम् (इस प्रकार), कदापि (कभी भी), त्रिवारम् (तीन बार), चिरम् (बहुत दिन तक), नूनम् (निश्चय पूर्वक), न (नहीं),

उपपदविभक्तिप्रयोगः

(i) विना योगे द्वितीया तृतीया पंचमी अपि भवति। (ii) अलम् योगे तृतीया–अलम् भयेन।
(iii) 'दा' योगे चतुर्थी–भवते प्रदत्तम्। पर्याप्त्यर्थे अलम् योगे तु चतुर्थी भवति। यथा मल्लः मल्लाय अलम्।

धातुरूपाणि

$\sqrt{शक्}$ लट् लकारः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	शक्नोति	शक्नुतः	शक्नुवन्ति
मध्यमपुरुषः	शक्नोषि	शक्नुथः	शक्नुथ
उत्तमपुरुषः	शक्नोमि	शक्नुवः	शक्नुमः

लोट् लकारः

प्रथमपुरुषः	शक्नोतु	शक्नुताम्	शक्नुवन्तु
मध्यमपुरुषः	शक्नुहि	शक्नुतम्	शक्नुत
उत्तमपुरुषः	शक्नुवानि	शक्नुवाव	शक्नुवाम

लृट् लकारः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	शक्ष्यति	शक्ष्यतः	शक्ष्यन्ति
मध्यमपुरुषः	शक्ष्यसि	शक्ष्यथः	शक्ष्यथ
उत्तमपुरुषः	शक्ष्यामि	शक्ष्यावः	शक्ष्यामः

लङ् लकारः

प्रथमपुरुषः	अशक्नोत्	अशक्नुताम्	अशक्नुवन्
मध्यमपुरुषः	अशक्नोः	अशक्नुतम्	अशक्नुत
उत्तमपुरुषः	अशक्नुवम्	अशक्नुव	अशक्नुव

विधिलिङ्

प्रथमपुरुषः	शक्नुयात्	शक्नुयाताम्	शक्नुयुः
मध्यमपुरुषः	शक्नुयाः	शक्नुयातम्	शक्नुयात
उत्तमपुरुषः	शक्नुयाम्	शक्नुयाव	शक्नुयाम

विशेषः– एवमेव 'आप्' धातोः रूपाणि भविष्यन्ति। यथा– आप्नोति (लटि) आप्नोतु (लोटि), आप्स्यति (लृटि), आप्नोत् (लङ्), आप्नुयात् (विधिलिङि)

क्री (खरीदना)

लट् लकारः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	क्रीणाति	क्रीणीतः	क्रीणन्ति
मध्यमपुरुषः	क्रीणासि	क्रीणीथः	क्रीणीथ
उत्तमपुरुषः	क्रीणामि	क्रीणीवः	क्रीणीमः

लोट् लकारः

प्रथमपुरुषः	क्रीणातु	क्रीणीताम्	क्रीणन्तु

लङ् लकारः

प्रथमपुरुषः	अक्रीणात्	अक्रीणीताम्	अक्रीणन्

लृट् लकारः

प्रथमपुरुषः	क्रेष्यति	क्रेष्यतः	क्रेष्यन्ति

विधिलिङ्

प्रथमपुरुषः	क्रीणीयात्	क्रीणीयाताम्	क्रीणीयुः



पाठगतप्रश्नाः 9.3

1. अधोलिखितपंक्तिषु सम्बोधनपदं योजयन्तु
   (क) .....! पुनरपि स लब्धदत्तः आनीयताम्।
   (ख) .....! अहम् एकं दिव्यं फलं भवते उपहारार्थम् आनीतवती।
   (ग) .....! पश्य, त्रिवारम् एतत् फलं भवते दत्तम्।
   (घ) .....! प्रतिदिनम् उदरपूर्तिः माम् एतत् फलं विक्रेतुं बाध्यं करोति।
   (ङ) .....! मम भाग्ये लक्ष्मीः नासीत्।
2. कोष्ठकात् उचितं पदं चित्वा वाक्यानि पूरयन्तु
   (क) एतानि सर्वाणि रत्नानि ..... दास्यामि। (भवते/भवतः)
   (ख) नूनं ..... राज्ये कोऽपि निर्धनः भवितुं न शक्नोति। (भवता/भवताम्)
   (ग) ..... विनम्रः सरलः लोभरहितः च। (भवतः/भवान्)
   (घ) ..... सत्यवचनेन अहं सन्तुष्टः। (भवतः/भवद्भिः)
   (ङ) ..... मम प्राणरक्षा कृता। (भवद्भिः/भवद्भ्यः)
3. सन्धिरहितानि पदानि सन्धियुक्तानि कुरुत
   (क) अनुगृहीतः + अस्मि .....
   (ख) कः + अपि .....
   (ग) न + अस्ति .....
   (घ) अल्पेन + एव .....
   (ङ) उपहार + अर्थम् .....
4. निर्दिष्टशब्देषु उचितम् उपपद–विभक्तिः प्रयुज्यताम्
   (क) (मित्र) ..... विना सुखं नास्ति।
   (ख) धनी (निर्धन) ..... धनं ददाति।
   (ग) अलं ..... (कोलाहल)।
   (घ) सिंहः (गज) ..... अलम्।

9.4 किम् अधिगतम्

- लब्धदत्तः सत्यवक्ता, अल्पसंतोषी, निर्लोभः, विनम्रः च आसीत्।
- सर्वदा सत्यम् एव जयते।

- धैर्येण कार्यं करणीयम्।
- सत्कर्मणां फलं सदैव शुभं भवति।
- 'अर्थम्' 'के लिये' इति अर्थे विग्रहे पूर्वपदे चतुर्थी भवति।
- अलम् योगे निषेधार्थे तृतीयाविभक्तिः प्रयुज्यते, पर्याप्त्यर्थे च चतुर्थी।
- भूतकालस्य अर्थे 'क्तवतु' प्रत्ययस्य प्रयोगः अपि भवति।
- उपसर्गपूर्वकं धातोः परं क्त्वा स्थाने ल्यप् प्रत्ययः भवति।
- प्रतीहारी मन्त्री, व्यापारी शब्दाः इन् प्रत्ययान्ताः सन्ति।
- भू, शक्, आप्, क्री धातूनां रूपाणि।

9.5 योग्यताविस्तारः

(क) लेखक–ग्रन्थ–परिचयः

प्रस्तुतनाटकस्य कथा संस्कृतवाङ्मयस्य ''कथासरित्सागरः'' इति प्रसिद्धकथाग्रन्थात् उद्धृता अस्ति। तामेव कथामाधृत्य लिखितं ''काले वर्षति पर्जन्यः'' इति नामकं नाटकं ''सम्भाषण सन्देशः'' इति संस्कृतपत्रिकायाः 1999 वर्षस्य नवम्बर मासस्य अंके प्रकाशितम् वर्तते। नाटकस्य लेखकः श्री नी. ना. मध्यस्थः अस्ति। ''काले वर्षति पर्जन्यः'' इति प्रकाशितस्य मूलशीर्षकस्य परिवर्तनं कृत्वा अत्र ''काले फलति सौभाग्यम्'' इति नाटकस्य नाम प्रदत्तम् अस्ति। अल्पेन सन्तुष्टः, लोभरहितः, सत्यवादी, निर्धनः लब्धदत्तः स्व् सत्कर्मणां रत्नरूपाणि फलानि समये आगते अलभत।

प्रमुखनाट्यतत्त्वानि

नाटकम् नाटकं ख्यातवृत्तं स्यात् पंचसंधिसमन्वितम्।
विलासार्घ्यादिगुणवद्युक्तं नानाविभूतिभिः।।
सुखदुःखसमुद्भूतिं नानारसनिरन्तरम्।।
पंचादिका दशपरास्तत्रांकाः परिकीर्त्तिताः।
नायकः त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।
दक्षोऽनुरक्तलोकः तेजोवैदग्ध्यशीलमन्नेता।।

नाटकम् रूपकस्य एकः भेदः। तस्य आख्यानं प्रसिद्धम् ऐतिहासिकं पौराणिंक वा भवति। तत्र एकः प्रख्यातनायकः भवति। नाटके वीरशृंगारकरुणेषु एकः प्रधानः रसः भवति।

नान्दी नाटकस्य प्रारम्भे विघ्नविनाशाय क्रियमाणा स्तुतिः नान्दीति कथ्यते।

सूत्रधारः नाटके मंचसंचालनस्य सर्वम् उत्तरदायित्वं यः निर्वहति सः सूत्रधारः कथ्यते।



प्रतीहारी राजानम् उपगम्य बहिः आगन्तुकस्य वृत्तं यः कथयति स द्वारपालः एव प्रतीहारी कथ्यते।

कंचुकी वयसा वृद्धः गुणी विप्रः, यः अन्तःपुरचरोऽपि भवति सर्वकार्येषु कुशलश्च भवति, स राजभवननिवासी कंचुकी इत्यभिधीयते।

विदूषक 'कुसुम', 'वसन्त' इत्यादिनाम्ना अभिधीयमानः वेशभावादिभिः हास्यकरः, कलह–प्रेम प्रवीणः, मंचे वर्तमानः विदूषकः इति कथ्यते।

आकाशभाषितम् आकाशे लक्ष्यं कृत्वा यद् उच्यते तत् आकाशभाषितम् इति।

भरतवाक्यम् नाटकसमाप्तौ सामाजिकेभ्यः यदाशीःदीयते शुभकामना वा क्रियते तत् भरतवाक्यमिति कथ्यते।

नेपथ्यम् रंगमंचस्य पृष्ठतः वेश–परिधान–परिवर्तनाय नाटकीयपात्राणां निर्धारितं स्थानं गृहं वा नेपथ्यम् इत्युच्यते।

(ख) भाषाविस्तारः

इन् प्रत्ययान्तशब्दाः

प्रतीहारिन्, जीर्णवस्त्रधारिन्, दर्शनाभिलाषिन्, राजदर्शनाकांक्षिन्, व्यापारिन् एतेषां रूपाणि अधोलिखितवत् भवन्ति। भवता द्वितीये पाठे इन् प्रत्ययान्तशब्दाः करिन्, चक्रिन् आदयः पठिताः। अस्मिन् पाठे अपि अनेके इन प्रत्ययान्तशब्दाः सन्ति। यथा–

	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
प्रथमा	प्रतीहारी	प्रतीहारिणौ	प्रतीहारिणः
द्वितीया	जीर्णवस्त्रधारिणम्	जीर्णवस्त्रधारिणौ	जीर्णवस्त्रधारिणः
तृतीया	दर्शनाभिलाषिणा	दर्शनाभिलाषिभ्याम्	दर्शनाभिलाषिभिः
चतुर्थी	दर्शनाकांक्षिणे	दर्शनाकांक्षिभ्याम्	दर्शनाकांक्षिभ्यः
पंचमी	व्यापारिणः	व्यापारिभ्याम्	व्यापारिभ्यः
षष्ठी	प्रतीहारिणः	प्रतीहारिणोः	प्रतीहारिणाम्
सप्तमी	जीर्णवस्त्रधारिणि	जीर्णवस्त्रधारिणोः	जीर्णवस्त्रधारिषु
सम्बोधन	हे दर्शनाभिलाषिन्	हे दर्शनाभिलाषिणौ	हे दर्शनाभिलाषिणः

एवमेव तपस्विन्, मनस्विन्, धनिन्, गुणिन्, सुखिन्, पापिन्, रोगिन्, तेजस्विन्, स्वामिन् इत्यादिशब्दानां रूपाणि भवन्ति।

क्तवतुप्रत्ययान्तपदानि

धातुः	**नपुंसकलिंगे**	**पुल्लिंगे प्रथमा एकवचने**	**स्त्रीलिंगे प्रथमा एकवचने**
गम्	गतवत्	गतवान्	गतवती
पठ्	पठित	पठितवान्	पठितवती

पत्	पतितवत्	पतितवान्	पतितवती
क्रीड्	क्रीडितवत्	क्रीडितवान्	क्रीडितवती
पा–(पिब्)	पीतवत्	पीतवान्	पीतवती
नी–(नय्)	नीतवत्	नीतवान्	नीतवती
दृश् (पश्य्)	दृष्टवत्	दृष्टवान्	दृष्टवती
त्यज्	त्यक्तवत्	त्यक्तवान्	त्यक्तवती
ज्ञा	ज्ञातवत्	ज्ञातवान्	ज्ञातवती
हन्	हतवत्	हतवान्	हतवती
दा	दत्तवत्	दत्तवान्	दत्तवती
स्था	स्थितवत्	स्थितवान्	स्थितवती
श्रु	श्रुतवत्	श्रुतवान्	श्रुतवती
लभ्	लब्धवत्	लब्धवान्	लब्धवती
कृ	कृतवत्	कृतवान्	कृतवती
स्मृ	स्मृतवत्	स्मृतवान्	स्मृतवती
चुर्	चोरितवत्	चोरितवान्	चोरितवती
प्रच्छ्	पृष्टवत्	पृष्टवान्	पृष्टवती
मिल्	मिलितवत्	मिलितवान्	मिलितवती
अस् भू	भूतवत्	भूतवान्	भूतवती

एकवचने **भूतकाले प्रयोगः**

पुं0	बालकः / सः / एषः / कः / भवान् / अहम् / त्वम्	गतवान्
स्त्री0	बालिका / रमा / एषा / का / भवती / अहम् / त्वम्	गतवती
नपु0	वाहनम् / तत् / एतत् / किम्	गतवत्

9.6 पाठान्तप्रश्नाः

1. (क) एकदा वने महाराजस्य प्राणान् कः रक्षितवान्?
   (ख) राजा बीजपूरफलदानसमये लब्धदत्तं कीदृशं वस्त्रं परिधाय राजसभाम् आगन्तुम् अकथयत्?
   (ग) साधुः किं दत्त्वा लब्धदत्तात् दिव्यं फलं क्रीतवान्?
   (घ) वस्त्रयुगलं दत्त्वा लब्धदत्तात् दिव्यं फलं कः क्रीतवान्?
   (ङ) राजा लब्धदत्ताय कतिवारं बीजपूरफलं दत्तवान्?
   (च) लब्धदत्तः किमर्थं पुनः पुनः बीजपूरफलं विक्रीतवान्?
   (छ) लब्धदत्तः फले खण्डिते सति किम् अपश्यत्?



2. (क) राज्ञः द्वौ गुणौ लिखत।
   (ख) लब्धदत्तस्य त्रयः गुणाः के?
   (ग) मन्त्रिणः एकं गुणं लिखत।
3. लब्धदत्तस्य चरित्रं पंचवाक्येषु वर्णयत।
4. राज्ञः वैशिष्ट्यं चतुर्वाक्येषु लिखत।
5. 'काले फलति सौभाग्यम्' अस्य सारांशं प×च/षट् वाक्येषु लिखत।
6. अधोलिखितवाक्येषु उचित–अव्ययपदानि योजयत
   (एव, सह, कुतः, एकदा, अत्र)
   (क) एष एव ..... महाराजस्य प्राणान् रक्षितवान्।
   (ख) इतः परं बहुमूल्यं वस्त्रं धारयित्वा..... राजभवने आगन्तव्यम्।
   (ग) प्रतीहारी लब्धदत्तेन ..... प्रविशति।
   (घ) भो व्यापारिन्! ..... प्राप्तम् एतत् फलम्?
   (ङ) तस्मै वस्त्रयुगलं दत्त्वा फलम् ..... आनीतवान्।
7. अधोलिखितवाक्येषु लङ्लकारस्य स्थाने 'क्तवतु' प्रत्ययस्य प्रयोगं कृत्वा लिखत
   (क) अहम् एतत् फलम् अत्र आनयम्।
   (ख) तदा अपि लब्धदत्तः राजानम् किमपि न अयाचत।
   (ग) लब्धदत्तः राज्ञः सभायाम् आगच्छत्।
   (घ) नर्तकी दिव्यं फलं राज्ञे आनयत्।
   (ङ) भवान् अल्पेनैव मूल्येन एतत् फलं व्यक्रीणात्।
8. रेखाङ्कितपदानां विग्रहः कार्यः।
   (क) लब्धदत्तः अल्पसंतुष्टः लोभरहितः आसीत्।
   (ख) सः राजदर्शनम् इच्छति।
   (ग) त्वं पीतवस्त्रं कथं धारयसि।
   (घ) एतत् उपहारार्थम् एव।
9. क्त्वा/ल्यप् प्रत्ययययोगेन वाक्यपूर्तिः क्रियन्ताम्
   (क) साधुः तस्मै एकरूप्यकं (दा + क्त्वा) ..... फलं क्रीतवान्।
   (ख) मन्त्री लब्धदत्तं (परि + ज्ञा + ल्यप्) ..... अवदत्।
   (ग) लब्धदत्तः रत्नानि (दृश् + क्त्वा)..... चकितः जातः।
   (घ) मन्त्रिन्! राष्ट्रभक्तं यथोचितं (सत् + कृ + ल्यप्) प्रेषयतु।

10. उचित धातुरूपेण वाक्यपूर्तिः क्रियन्ताम्

(क) वयम् शिक्षिताः ..... (भवामि/भवामः)

(ख) त्वम् चित्रम् द्रष्टुं ..... (शक्ष्यति/शक्ष्यसि)

(ग) छात्रः पुस्तकं ..... (क्रीणातु/क्रीणीहि)

(घ) सायम् मम जन्मोत्सवः ..... (भू + लङ्)

(ङ) सः पुरस्कारम् ..... (आप् + लट्)

9.7 उत्तराणि

9.2 बोधप्रश्नाः

1. (क) प्रतीहारी – राजानम् (ख) मन्त्री – राजानम्
   (ग) व्यापारी – राजानम् (घ) साधुः – राजानम्
   (ङ) नर्तकी – राजानम्

2. (i) जयतु (ii) उदरपूर्तिः (iii) विक्रेतुम् (iv) परम्
   (v) दोषः (vi) भयेन (vii) भवतः (viii) विनम्रः
   (ix) अभिमानरहितः (x) एतत्

3. (क) इच्छति (ख) करोमि (ग) स्वीकरोतु (घ) अर्पयामि
   (ङ) खण्डयतु

पाठगतप्रश्नाः

9.1 1. (क) हे मन्त्रिन् (ख) राजा (ग) हे महाराज (घ) दर्शनाभिलाषी

2. (क) आगतवान् (ख) याचितवान् (ग) स्वीकृतवान् (घ) गृहीतवान्

3. (क) दानवीरता (ख) तीक्ष्णा स्मृतिः (ग) विनम्रता (घ) चातुर्यम्
   (ङ) परहितचिन्ता

9.2 1. (क) साधुः नर्तकी च तत् दिव्यं फलं क्रीत्वा आनीतवन्तौ।

(ख) साधुः लब्धदत्ताय एकं रूप्यकं दत्त्वा फलं प्राप्तवान्।

(ग) व्यापारी लब्धदत्ताय फलार्थम् वस्त्रयुगलम् अयच्छत्।

(घ) राजा तत्फलं प्राप्य पुनः लब्धदत्ताय दतवान्।

2. (क) अल्पसन्तुष्टः (ख) लोभविरहितः (ग) अतिथिगृहम् (घ) जीर्णवस्त्रम्
   (ङ) राजभक्त्या

3. (क) गच्छतु (ख) आह्वयतु (ग) प्रेषयतु
   (घ) स्वीकुरु (ङ) आह्वयतु



4. (क) एकः (ख) जीर्णवस्त्रधारिणं (ग) तत्
(घ) नूतनं (ङ) महान्

9.3 1. (क) प्रतीहारिन् (ख) महाराज (ग) लब्धदत्त
(घ) महाराज (ङ) महाराज

2. (क) भवते (ख) भवतां (ग) भवान्
(घ) भवतः (ङ) भवद्भिः

3. (क) अनुगृहीतोऽस्मि (ख) कोऽपि (ग) नास्ति
(घ) अल्पेनैव (ङ) उपहारार्थम्

4. (क) मित्रम्/मित्रेण/मित्रात् (ख) निर्धनाय
(ग) कोलहलेन (घ) गजाय

9.6 पाठान्तप्रश्नाः

1. (क) लब्धदत्तः (ख) बहुमूल्यं (ग) एकं रूप्यकम् (घ) व्यापारी
(ङ) त्रिवारं (च) बुभुक्षाशमनार्थम् (छ) पतितानि दिव्यरत्नानि
2. (क) राजा बुद्धिमान् प्रजावत्सलः च आसीत्।
(ख) लब्धदत्तः लोभरहितः, अल्पसन्तुष्टः, विनम्रः च असीत्।
(ग) मन्त्री उदारः आसीत्।
3. स्वेच्छया प×चवाक्यानि रचयत।
4. स्वेच्छया चतुर्वाक्यानि रचयत।
5. स्वेच्छया पंच/षट् वाक्येषु सारांशं लिखत।
6. (क) एकदा (ख) एव (ग) सह (घ) कुतः (ङ) अत्र
7. (क) आनीतवान् (ख) याचितवान् (ग) आगतवान् (घ) आनीतवती (ङ) विक्रीतवान्
8. (क) अल्पेन संतुष्टः, लोभात् रहितः (ख) राज्ञः दर्शनम् (ग) जीर्णम् वस्त्रम्
(घ) उपहाराय इदम्
9. (क) दत्त्वा (ख) परिज्ञाय (ग) दृष्ट्वा (घ) सत्कृत्य
10. (क) भवामः (ख) शक्ष्यसि (ग) क्रीणातु (घ) अभवत्
(ङ) आप्नोति

309sk10

10

पतन्ति परपीडकाः

कृष्णस्य बालचरितविषये तु भवन्तः पठितवन्तः श्रुतवन्तः च। लोकप्रियं सुखदम् अद्भुतं च कृष्णस्य बालचरितम् इति वयं जानीमः एव। कृष्णः वसुदेवस्य पुत्रः आसीत्। देवकी च तस्य जननी अभवत्। मथुराधिपः कंसः अतीव प्रजापीडकः आसीत्। कृष्णः बाल्यकाले एव तं दुष्टं कंसं हतवान्। पाठेऽस्मिन् कृष्णस्य तदद्भुतं बालचरितं नाट्यशैल्यां प्रस्तुतं वर्तते। तद्विषये ज्ञातुं वयम् इमं पाठं पठामः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- भासकवेः परिचयं लेखितुं शक्तः भविष्यति;
- कृष्णस्य चरित्रचित्रणं कर्तुं समर्थः भविष्यति;
- पाठस्य सारं स्वशब्दैः लेखितुं शक्ष्यति;
- पद्यांशानां वाक्यांशानां च भावार्थं चेष्यति;
- संवादकौशलपूर्वकम् अभिनयं कर्तुं क्षमः भविष्यति;
- 'लोट्' लकारे प्रयुक्तानि वाक्यानि लट्लकारे परिवर्तयिष्यति;
- परसवर्णसन्धिं कर्तुं शक्ष्यति;
- अव्ययीभाव– द्वन्द्व–द्विगु–समासानाम् उदाहरणानि चित्वा समासविग्रहं करिष्यति;
- शतृ–शानच् प्रत्ययान्तपदानि चेष्यति।

क्रियाकलापः

अधः चित्रं पश्यतु

10.1

उपर्युक्तं चित्रं दृष्ट्वा कोष्ठके प्रदत्तपदानां च सहायतया इमानि वाक्यानि पूरयत
(मथुरां, देवकी, कृष्णः, दुष्टः, अत्याचारी, उग्रसेनस्य, वसुदेवेन)

(क) कंसः ——— पुत्रः अभवत्।

(ख) सः अतीव——— आसीत्।

(ग) ————————कंसस्य भगिनी आसीत्।

(घ) देवक्याः विवाहः ——— सह अभवत्।

(ङ.) ——— वसुदेव–देवक्योः पुत्रः आसीत्।

(च) बलरामः कृष्णः च ——— गतवन्तौ।

(छ) आश्चर्यम् ——— कंसः तु बालकृष्णेन हतः।

8.1 मूल पाठः

पतन्ति परपीडकाः

अयं नाट्यांशः महाकवेः भासस्य 'बालचरितम्' नाम नाटकात् संगृहीतः। प्रथमं वयं अत्रत्यानां पात्राणां विषये जानीमः पश्चात् च पाठं पठिष्यामः।

पात्र–परिचयः

राजा	–	मथुराधिपतिः कंसः
भटः	–	ध्रुवसेनः नाम राजसेवकः
चाणूरः/मुष्टिकः	–	द्वौ मल्लौ (दो पहलवान)

दामोदरः – वसुदेवस्य पुत्रः श्रीकृष्णः, नन्दपुत्रः अपि कथ्यते

बलरामः – श्रीकृष्णस्य अग्रजः

प्रतीहारी – मधुरिका नाम सेविका द्वारं रक्षति

कुब्जिका – मदनिका नाम सेविका

राजा (आत्मगतम्) नूनम् अद्य बलरामेण सह दामोदरं रङ्गगतं मल्लेन घातयामि। (प्रकाशम्) ध्रुवसेन! ध्रुवसेन!

भटः (प्रविश्य) जयतु महाराजः।

राजा ध्रुवसेन! किमागतो नन्दपुत्रः?

भटः श्रोतुमर्हति महाराजः। नन्दपुत्रः आगतः इति श्रुत्वा महामात्येन 'उत्पलापीडो, नाम गन्धहस्ती तम् अभिघातयितुं प्रेषितः। दामोदरः आयान्तं तम् अद्रिनिभं गजेन्द्रं वीक्ष्य दन्तं समाकृष्य जघान।

राजा कथं जघानेति। गच्छ भूयो ज्ञायतां वृत्तान्तः।

भटः यदाज्ञापयति महाराजः। (निष्क्रम्य प्रविश्य) जयतु महाराजः। एष इदानीं नन्दगोपपुत्रः राजमार्गं प्रविश्य राजद्वारे गन्धद्रव्ययुक्तहस्तां मदनिकानाम्नीं कुब्जिकां दृष्ट्वा तस्याः हस्ताद् गन्धमादाय स्वगात्रम् अनुलिप्य तेनैव हस्तेन कुब्जरहितां पूर्णस्वस्थां तां कृत्वा धनुःशालाभिमुखो गतः।

राजा किन्नु खलु तेन व्यवसितम्? तेन हि शीघ्रं गच्छ। भूयो ज्ञायतां वृत्तान्तः।

शब्दार्थाः
नूनम्= निश्चित ही
र गतम् = मल्लशाला में,
मल्लेन = पहलवान के द्वारा
घातयामि = मरवा देता हूँ
दामोदरं = कृष्ण को
श्रोतुमर्हति = सुन सकते हैं,
प्रविशन् = प्रवेश करते हुए
महामात्येन = महामंत्री के द्वारा
गंधहस्ती = मस्ती में आया हुआ हाथी
अभिघातयितुं = मारने के लिए
आयान्तं = आते हुए
अद्रिनिभं = पर्वत के समान विशाल
वीक्ष्य = देखकर
समाकृष्य = खींचकर
जधान = मार डाला
निष्क्रम्य = निकल कर
इदानीं = इस समय
गन्धद्रव्ययुक्तहस्तां = सुगन्धित द्रव्यों को हाथ में लिये हुए
स्वगात्रम् = अपने शरीर पर
अनुलिप्य = चुपड़कर
कुब्ज = कूबड़
कुब्जिकां = कुबड़ी को
धनुःशालामिमुखः = धनुःशाला की ओर
व्यवसितम् = किया गया

10.2



टिप्पणी

भटः यदाज्ञापयति महाराजः। (निष्क्रम्य प्रविश्य) जयतु महाराजः। धनुःशालारक्षकेण सिंहबलेन वार्यमाणः तं कर्णमूले प्रहारं कृत्वा धनुः समादाय द्विखण्डं कृत्वा साम्प्रतं सभामण्डपं प्रति गतः।

राजा सावेगमिव मे हृदयम्। गच्छ यथानिर्दिष्टौ चाणूरमुष्टिकौ प्रवेशय।

भटः यदाज्ञापयति महाराजः। (निष्क्रान्तः)

राजा यावदहमपि प्रासादमारुह्य चााणूरमुष्टिकयोर्युद्धं पश्यामि। (आरुह्य) मधुरिके! विघाट्यतां द्वारम्।

प्रतिहारी यद् भर्ता आज्ञापयति।

(राजा प्रविश्योपविशति)

(ततः प्रविशतः चाणूरमुष्टिकौ)

भटः एष महाराजः। उपसर्पेतां भवन्तौ।

उभौ (उपेत्य) जयतु भर्ता।

राजा चाणूरमुष्टिकौ! सर्वप्रयत्नेन युवाभ्यामानृण्यं कर्तव्यम्।

उभौ शृणोतु भर्ता। करणसन्धाबन्धप्रहारैः युद्धविशेषैः सिद्धिं गच्छामः।

राजा बाढमेवं क्रियताम्। ध्रुवसेन। प्रवेशय गोपदारकौ।

भटः यदाज्ञापयति महाराजः। (निष्क्रान्तः)

(ततः प्रविशतः दामोदरबलरामौ ध्रुवसेनेन सह)

भटः एष महाराजः। उपसर्पेतां भवन्तौ।

उभौ आः कस्य महाराजः!

भटः सर्वस्य, जगतोऽस्माकं च।

दामोदरः अद्यप्रभृति न भविष्यति।

भटः जयतु महाराजः। एतौ तौ।

राजा (विलोक्य) अयं स दामोदरः। अयं नु ललितगम्भीराकृतिः पूर्वजः। ध्रुवसेन! प्रवर्ततां युद्धम्।

भटः यदाज्ञापयति महाराजः। (मालां क्षिपति)

वार्यमाणः = रोके जाते हुए
साम्प्रतं = इस समय
सावेगम् = आवेश सहित
विघाट्यतां = खोल दो
उपसर्पेतां = पास आएँ
उपेत्य = पास जाकर
आनृण्यं = ऋण मुक्त
करणसन्धाबन्धप्रहारैः = करणसन्ध और आबन्ध प्रहारों से
सिद्धिं = सफलता को
बाढम् = अच्छा
प्रवेशय = प्रवेश करायें
अद्यप्रभृति = आज से
अ घो = अरे
ललित = सुन्दर
पूर्वजः = बड़ा भाई
रामः = बलराम
प्रवर्ततां = शुरू करो

मल्लौ अङ्घो! वादयत वादयत सङ्ख्यपटहान्।

चाणूरः एहि दामोदर! अद्य मे भुजबलेन सिद्धिं गच्छ।

दामोदरः प्राप्तोऽस्मि, तिष्ठ, मम वेगमिमं सहस्व।

मुष्टिकः ए ए राम! अद्य मे मुष्टिप्रहारैः गलितरुधिरगात्रः जीवितमुज्झसि।

बलरामः त्वामद्य मुष्टिक! यमाय निवेदयामि।

(सर्वे युद्धं कुर्वन्ति)

दामोदरः (चाणूरं निहत्य) भग्नास्थिरेष निहतः।

बलरामः निहतो मयापि।

वादयत= बजाओ
सङ्ख्यपटहान् = युद्ध के बाजों को।
सहस्व = सहो
गलितरुधिरगात्रः = खून से भीगे शरीरवाला
उज्झसि = छोड़ दोगे
निहतः = मार दिया गया
निगृह्य = पकड़कर
विस्तीर्णलोहितमुखः = मुख से बहते हुए रक्त वाला
परिवृत्तनेत्रः घूम गए हैं नेत्र जिसके
अंस = कंधे
पतिता गद = भुजा का भूषण गिर गया है
लम्बसूत्रः = यज्ञोपवीत
वज्रप्रभग्नशिखरः = वज्र से टूटे शिखर वाले
अक्षयविजयिनौ = तुम दोनो सदा विजयी हो

10.3

दामोदरः कंसासुरं च यमलोकमहं नयामि।

(प्रासादमारुह्य कंसं शिरसि निगृह्य पातयित्वा)

एष एव दुरात्मा कंसः!

विस्तीर्णलोहितमुखः परिवृत्तनेत्रो
भग्नांसकण्ठकटिजानुकरोरूजङ्घः।
विच्छिन्नहारपतिताङ्गदलम्बसूत्रो
वज्रप्रभग्नशिखरः पतितो यथाद्रिः।।

(नेपथ्ये)

हा हा महाराजः!

10.4

(ततः प्रविशति वसुदेवः)

बलरामः (विलोक्य) अये तात! बलरामोऽहम् अभिवादये।

दामोदरः तात! दामोदरोऽहम् अभिवादये।

वसुदेवः (सस्नेहं विलोक्य) अक्षयविजयिनौ भवेतां भवन्तौ। सत्पुत्रजन्मफलमद्य प्राप्तवानस्मि।

उभौ अनुगृहीतौ स्वः।



10.2 बोधप्रश्नाः

उपयुक्तम् उत्तरं (✓) चिह्नीकुर्वन्तु

1. बलरामेण सह दामोदरं कः हन्तुम् इच्छति?
   (क) राजा कंसः (ख) भटः ध्रुवसेनः (ग) मदनिका नाम दासी
2. कुब्जिकां कुब्जरहितां पूर्णस्वस्थां च कः अकरोत्?
   (क) बलरामः (ख) श्रीकृष्णः (ग) कंसः
3. चाणूरः मुष्टिकः च किमर्थम् आहूतौ?
   (क) मेलनाय (ख) खेलनाय (ग) दामोदरं बलरामं च मारणाय
4. मूलपाठं पठित्वा रिक्तस्थानपूर्तिः क्रियताम्
   (क) दामोदरः अद्रिनिभं गजेन्द्रं ..... समाकृष्य हतवान्।
   (ख) दामोदरः धनुः समादाय ..... कृत्वा साम्प्रतं सभामण्डपं गतः।
   (ग) वादयत वादयत ..... ।
   (घ) वज्रप्रभग्नशिखरः ..... यथाद्रिः।
5. एतेषां कथनानां कः कः वक्ता? प्रत्येकं सम्मुखं लिखन्तु
   (क) दामोदरं रङ्गगतं मल्लेन घातयामि। ....
   (ख) एष महाराजः। उपसर्पेतां भवन्तौ। ....
   (ग) युवाभ्यामानृण्यं कर्त्तव्यम्। ....
   (घ) तिष्ठ, मम वेगमिमं सहस्व। ....
   (ङ.) अक्षयविजयिनौ भवेतां भवन्तौ। ....

10.3 अधुना अवगच्छामः

प्रथमः अंशः

राजा आत्मगतम् ..... प्रविश्योपविशति।

इदानीं पुनः पठामः यत् कथं कंसः विविधैः षड्यन्त्रैः कृष्णं बलरामं च हन्तुं प्रयासं करोति।

व्याख्या

कः बलरामेण सह दामोदरं घातयितुं चिन्तयति? राजा कंसः। राजा कंसः दामोदरं कुत्र केन च घातयितुं विचारयति? रङ्गशालायाम्, मल्लेन।

दामोदरं दण्डयितुं महामात्येन किं कृतम्? महामात्येन दामोदरं मारयितुं उत्पलापीडः नाम गन्धहस्ती प्रेषितः। गजेन्द्रः केन समः आसीत्? गजेन्द्रः अद्रिनिभः (पर्वतेन सदृशः विशालः) आसीत्। दामोदरः आयान्तं पर्वतसदृशं गजेन्द्रं वीक्ष्य किम् किम् अकरोत्? दामोदरः तु आयान्तं तं पर्वतसदृशं विशालं गजेन्द्रं वीक्ष्य तस्य दन्तम् आकृष्य हतवान्। मदनिका का आसीत्? सा 'कुब्जिका' इति कथम् कथ्यते? मदनिका राजसेविका आसीत्। तस्याः पृष्ठं कुब्जम् आसीत्। एतस्मात् कारणात् सा कुब्जिका इति कथ्यते। मदनिकायाः हस्ते किम् आसीत्? गन्धद्रव्याणि। गन्धद्रव्याणि दृष्ट्वा दामोदरः किम् अकरोत्? दामोदरः तस्याः हस्ताद् गन्धद्रव्याणि गृहीत्वा स्वशरीरे अनुलिम्पति। दामोदरः मदनिकायाः गन्धद्रव्याणि स्वशरीरे अनुलिप्य तां कुब्जिकां किम् अकरोत्? दामोदरः तां कुब्जिकां कुब्जरहिताम् अकरोत्। कृष्णः कुब्जिकां पूर्णस्वस्थां कृत्वा कुत्र गतः? कृष्णः कुब्जिकां पूर्णस्वस्थां कृत्वा धनुःशालां गतः। कृष्णः धनुःशालां प्राप्य किम् अकरोत्? कृष्णः तत्र. स्थापितं धनुः द्विखण्डं कृतवान्। ''धनुः समादाय द्विखण्डं कृत्वा साम्प्रतं सभामण्डपं गतः'' इति वार्तां कः कं प्रति ज्ञापयति? भटः महाराजं प्रति। 'सावेगमिव मे हृदयम्' इति कः अनुभवति? कथम् च? राजा कंसः, यतः उत्पलापीडहस्तिनः हनने, कुब्जिकास्वस्थकरणे, धनुर्भङ्गकरणे च कृष्णस्य अतुलः पराक्रमः दृश्यते। चाणूरमुष्टिकौ कौ? कंसस्य विशिष्टौ मल्लौ।

प्रथमांशसारः

कंसः विविधैः षड्यन्त्रैः कृष्णं बलरामं च घातयितुमिच्छति। कृष्णः बलरामः च मथुरानगरं प्रविशतः। मन्त्रिणा पीडितः मदोन्मत्तः उत्पलापीडनामकः हस्ती अपि हतः। राजद्वारे स्थितायाः मदनिका नाम कुब्जायाः कुब्जत्वं दूरीकृतम्। ततश्च धनुःशालां प्राप्य धनुर्भङ्गः कृतः। कंसः अतीव उद्विग्नः सन् चाणूर–मुष्टिकौ मल्लौ आह्वयति येन तौ तु युद्ध्वा कृष्णबलरामौ हन्येताम्। एतैः कृत्यैः कृष्णस्य अद्भुतं पराक्रमकौशलं सिद्ध्यति।

राजा कंस मल्लशाला में दामोदर और बलराम को बुलाकर मरवाना चाहता है। इधर भट राजा को सूचना देता है कि दामोदर (कृष्ण) ने बलराम के साथ नगर में प्रवेश कर मन्त्री द्वारा प्रेषित मतवाले उत्पलापीड नामक हाथी को भी मार डाला। राजद्वार में खड़ी मदनिका कुब्जा के कुबड़ेपन को दूर कर दिया। उसके बाद धनुःशाला में धनुष के दो टुकड़े कर दिये। राजा कंस यह सुनकर दुःखी होता है और चाणूर व मुष्टिक नामक दो पहलवानों को, उन दोनों को युद्ध में मरवाने के लिए बुलाता है।

व्याकरणबिन्दवः

अत्र वयं पदानां विविधं स्वरूपं पश्यामः।

सन्धिविच्छेदः

यदाज्ञापयति = यत् + आज्ञापयति
धनुःशालाभिमुखः = धनुःशाला + अभिमुखः
प्रविश्योपविशति = प्रविश्य + उपविशति



प्रकृतिप्रत्ययप्रयोगः

(i) आदिश्य = आ+दिश्+ल्यप्

(ii) आच्छिद्य = आ+छिद्+ल्यप्

(iii) प्रविशन् = प्र+विश्+शतृ, पुं. प्र. ए.

(iv) गृहीतवान् = ग्रह+क्तवतु, पु. प्रथमा एकवचनम्

(v) आयान्तम् = आ+या+शतृ, पुं. द्वि.ए.

(vi) समाकृष्य = सम्+आ+कृष्+ ल्यप्

(vii) आदाय = आ+ दा+ल्यप्

(viii) प्रहृत्य = प्र+हृ+ल्यप्

(ix) वार्यमाणः = वृ+णिच्+शानच्

(x) निष्क्रान्तः = निस्+क्रम्+क्त, पुं., प्र. ए.

क्रियापदपरिचयः

जयतु = जि, लोट्, प्र.पु., ए.

प्रवेशय = प्र+विश्+णिच्, लोट्, म.पु.ए.

गच्छ = गम्, लोट् म.पु.ए.

समस्तपदविग्रहाः

नन्दगोपपुत्रः = नन्दगोपस्य पुत्रः (ष. त.)

सभामण्डपम् = सभायाः मण्डपम् (ष.त.)

सावेगम् = आवेगेन सह (अव्ययी.)

शतृ–शानचौ

शतृ (अत्) शानच् (आन/मान) वर्तमानकालिक–कृत्प्रत्ययौ। शतृ–शानच् प्रत्ययान्तशब्दौ विशेषणरूपे भवतः। अतः एतयोः त्रिषु लिङ्गेषु रूपाणि भवन्ति।

यथा– (i) बालः चित्रं पश्यन् (दृश् + शतृ) खादति।

(ii) क्रीडन्तं (क्रीड् + शतृ) शिशुं पश्य।

(iii) मोदमानः (मुद् + शानच्) छात्रः आगच्छति।

(iv) उपहारं लभमाना (लभ् + शानच्) बालिका मोदते।

(v) अत्र भ्रमत् (भ्रम् + शतृ) चक्रं वर्तते।

एवं शतृ (अत्) प्रत्ययः परस्मैपदिधातुभ्यः, शानच् (आन/मान) प्रत्ययः आत्मनेपदि धातुभ्यः लगति।

पाठगतप्रश्नाः 10.1

1. प्रश्नानाम् उत्तराणि लिखत

(क) रङ्गगतं दामोदरं कः मल्लेन घातयितुम् इच्छति?

(ख) रजकेभ्यः वस्त्राणि आच्छिद्य कः गृहीतवान्?

(ग) महामात्येन दामोदरम् अभिघातयितुं कः प्रेषितः?

(घ) मदनिका का आसीत्? सा कुत्र स्थिता आसीत्?

(ङ.) धनुःशालां गत्वा दामोदरः किम् अकरोत्?

(च) चाणूर–मुष्टिकौ कौ आस्ताम्?

2. विशेषण–विशेष्यमेलनं क्रियताम्

क	**ख**
(क) रङ्गगतम्	(i) गजेन्द्रम्
(ख) अद्रिनिभम्	(ii) दामोदरम्
(ग) सावेगम्	(iii) कुब्जिकाम्
(घ) गन्धद्रव्ययुक्तहस्तां	(iv) हृदयम्

3. प्रकृतिप्रत्ययोः योगः क्रियताम्

यकथा प्र+विश्+ल्यप् = प्रविश्य

(क) सम्+आ+कृष्+ल्यप् = ----------

(ख) अनु+लिप्+ल्यप् = ----------

(ग) प्र+हृ+ल्यप् = ----------

(घ) प्र+विश्+शतृ = ----------

(ङ) गम्+क्त = ----------

(च) श्रु+तुमुन् = ----------

(छ) हन्+क्त्वा = ----------

7. सन्धिः क्रियताम्

(क) गज+इन्द्रम् = ----------

(ख) यत्+आज्ञापयति = ----------

(ग) तेन+ एव = ----------

(घ) शीघ्रम्+गच्छ = ----------



द्वितीयः अंशः

ततः प्रविशति चाणूर ..... सर्वे युद्धं कुर्वन्ति।

अधुना पुनः पठामः यत् भयाकुलः कंसः मल्लयुद्धे निपुणौ चाणूरमुष्टिकौ कथं प्रेरयति–

व्याख्या

'सर्वप्रयत्नेन युवाम्यामानृण्यं कर्तव्यम्' इति कः कौ प्रति कथयति। राजा कंसः चाणूरमुष्टिकौ प्रति आनृण्यं कं प्रति? कंसं प्रति। आनृण्यं कथं स्यात्? युद्धे कृष्णबलरामौ हत्वा एव राज्यभोगभुक्तानां निस्तारः स्यात्। चाणूर–मुष्टिकौ कस्मिन् युद्धविशेषे कुशलौ अस्ताम्? करणसन्ध–आबन्धयुद्धप्रहारेषु कुशलौ आस्ताम्। 'ललितगम्भीराकृतिः पूर्वजः' अत्र 'पूर्वजः' कः कथितः? बलरामः। 'अद्य मे भुजबलेन सिद्धिं गच्छ' इति कथनं कस्य कम्प्रति? चाणूरस्य दामोदरं प्रति। ''अद्य मे मुष्टिप्रहारैः गलितरुधिरगात्रः जीवितमुज्झसि'' इति कथनं कस्य कम्प्रति? मुष्टिकस्य बलरामं प्रति। 'गलितरुधिरगात्रः जीवितमुज्झसि' अस्य कः भावः? मम मुष्टिप्रहारैः तवशरीरात् रक्तधाराः प्रवाहिताः स्युः अतः रक्तशून्यं तव जीवनमपि गतं स्यात्।

द्वितीयांशसारः

कृष्णस्य अद्भुतकृत्यैः भीतः राजा कंसः विशिष्टमल्लौ चाणूरमुष्टिकौ प्रेरयति येन तौ मल्लयुद्धे कृष्णबलरामौ हत्वा तस्य ऋणमुक्तौ भवेताम्। ततः चाणूर–कृष्णयोः, मुष्टिक–बलरामयोः च परस्परं घोरं मल्लयुद्धं भवति। सर्वे पश्यन्ति।

कृष्ण के अद्भुतकार्यों से डरा हुआ कंस कुश्ती में निपुण चाणूर और मुष्टिक से कृष्ण और बलराम को मारकर राजा के प्रति ऋण से मुक्त होने के लिए कहता है। दोनों उसे कृष्ण और बलराम को मारने का पूर्ण विश्वास दिलाते हैं। युद्ध के लिए नगाड़े बजते हैं। दामोदर का चाणूर के साथ तथा बलराम का मुष्टिक के साथ युद्ध होता है।

व्याकरणबिन्दवः

अत्रापि वयं पद–परिचयादीन् व्याकरणबिन्दून् बोधामः।

(क) सन्धिविच्छेदः

जगतोऽस्माकम् = जगतः + अस्माकम् (पूर्वरूपम्)
पूर्वजोऽस्य = पूर्वजः + अस्य (पूर्वरूपम्)
प्राप्तोऽस्य = प्राप्तः + अस्मि (पूर्वरूपम्)

(ख) पदपरिचयः

उपसर्पेताम् – उप+सृप् विधिलिङ्, प्र. पु. द्वि.
प्रवेश्येताम् – प्र+ विश्+यक्, लोट, प्र. पु. द्वि.

एहि – इण्, लोट्, म. पु. ए.
तिष्ठ – स्था, लोट्, म. पु. ए.
सहस्व – सह्, लोट् म. पु. ए.
शृणोतु – श्रु, लोट्, प्र. पु. ए.
गच्छ – गम्, लोट्, म. पु. ए.

(ग) विग्रहः

चाणूरमुष्टिकौ	– चाणूरः च मुष्टिकः च	(द्वन्द्वः)
महाराजः	– महान् च असौ राजा	(कर्मधारयः)
सर्वप्रयत्नेन	– सर्वः प्रयत्नः तेन	(कर्मधारयः)
गोपदारकौ	– गोपस्य दारकौ	(षष्ठी तत्पुरुषः)
दामोदर बलरामौ	– दामोदरः च बलरामः च	(द्वन्द्वः)
गलितरुधिरगात्रः	– गलितं रुधिरं गात्रेभ्यः यस्य सः	(ब.व्री.)
ललितगम्भीराकृतिः	– ललिता गम्भीरा च आकृतिः यस्य सः	(ब. व्री.)
मुष्टिप्रहारैः	– मुष्टेः प्रहाराः तैः	(षष्ठी तत्पुरुषः)

पाठगतप्रश्नाः 10.2

1. प्रश्नान् उत्तरत

(क) 'युवाभ्यामानृण्यं कर्तव्यम्' इति कंसः कौ प्रति कथयति?

(ख) चाणूरमुष्टिकौ कस्मिन् युद्धविशेषे दक्षौ आस्ताम्?

(ग) बलरामः स्वरूपेण कीदृशः आसीत्?

(घ) 'तिष्ठ, मम वेगमिमं सहस्व' इति कः कं प्रति उक्तवान्?

2. इमानि वाक्यानि लोट्लकारे परिवर्तयत

यथा– बालः अतिथिं नमति। (लट् लकारे) = बालः अतिथिं नमतु।

(क) उमा कथां शृणोति = ----------

(ख) त्वम् अपि तत्र तिष्ठसि = ----------

(ग) आचार्यः उपदिशति = ----------

(घ) त्वम् तत्र गच्छसि = ----------

(ङ) यूयम् ढक्कां वादयथ = ----------



3. रेखांङ्कितपदेषु समस्तपदानि रचयन्तु

(क) अत्र कौ गोपस्य दारकौ?

(ख) एषः महान् च असौ राजा तिष्ठति।

(ग) ललिता गम्भीरा आकृतिः यस्य सः बलरामः अस्ति।

(ध) दामोदरः च बलरामः च धनुःशालां गच्छतः।

तृतीयः अंशः

दामोदरः ..... अनुगृहीतौ स्वः।

नाटकस्य अन्तिमं चरणं पुनः पठामः यत्र कृष्णः चाणूरं बलरामः च मुष्टिकं मारयतः। ततः कंसस्य वधम् अपि भवति।

व्याख्या

मल्लयुद्धे चाणूरं कः हतवान्? मुष्टिकं च कः? चाणूरं दामोदरः मुष्टिकं च बलरामः।

दामोदरः कंसं कथम् अमारयत्? दामोदरः प्रासादम् आरुह्य कंसं च शिरसि गृहीत्वा भूमौ नीचैः अपातयत्। ततः कंसस्य शरीरस्य कीदृशी दशा अभवत्? 1. कंसस्य मुखात् रक्तम् अवहत्। 2. नेत्रे तु परिवृत्ते। 3. स्कन्धौ, कण्ठः, कटिः, जानुः बाहू, उरू, जङ्घे च छिन्नाः जाताः।

कंसस्य आभूषणानां का स्थितिः जाता? कंसस्य हारः त्रुटितः केयूरौ पतितौ, यज्ञोपवीतः अपि शरीरात् बहिः पतितः। तदा कंसस्य शरीरं किमिव पतितं जातम्? वज्रेण खण्डितशिखरः पर्वत इव कंसस्य शरीरं पतितं तिष्ठति।

ततः वसुदेवेन स्वपुत्राभ्यां कृते कीदृशः आशीर्वादः प्रदत्तः? ''अक्षयविजयिनौ भवेताम् भवन्तौ'' इति। कृष्णस्य सामर्थ्यं कीदृशम् आसीत्? कृष्णः संसारस्य सर्वान् क्षत्रियान् पराजेतुं समर्थः आसीत्।

तृतीयांशसारः

युद्धे कृष्णः चाणूरं बलरामः च मुष्टिकं हन्ति। ततः परं कृष्णः प्रासादम् आरुह्य मल्लयुद्धं पश्यन्तं दुरात्मानं कंसं, शिरसि शिखां गृहीत्वा, तं भूमौ पातयति। तेन सः रक्तमुखः भग्नाङ्गशरीरः प×चत्वं गतः। ततः तत्र तयोः पिता वसुदेवः आगत्य स्वपुत्रौ कृष्णं बलरामं च स्नेहं कृत्वा आशीर्वादं यच्छति। सः अद्य ''सत्पुत्रजन्मनः फलं प्राप्तम्'' इति सहर्षम् अनुभवति।

दामोदर चाणूर को तथा बलराम मुष्टिक को युद्ध में मार देते हैं। इसके बाद कृष्ण महल में बैठे, युद्ध देखते हुए कंस को, शिर की चोटी पकड़कर, उसे नीचे गिरा कर मार देते हैं। उसके बाद उनके पिता वसुदेव आते हैं और अपने दोनों पुत्रों को आशीर्वाद देते हैं। उन्हें सत्पुत्रों का पिता होने की सुखद अनुभूति होती है।

व्याकरणबिन्दवः

अत्र वयं पुनः पदानां सन्धिच्छेदं पदपरिचयं, विग्रहं च बोधामः।

सन्धिच्छेदाः

भग्नास्थिरेषः = भग्न + अस्थिः + एषः
मयापि = मया + अपि
कंसासुरम् = कंस + असुरम्
करोरुजङ्घः = कर + ऊरुजङ्घः
यथाद्रिः = यथा + अद्रिः
बलरामोऽहम् = बलरामः + अहम्

पद–परिचयः

(क) शिरसि = शिरस् शब्दः सप्तमी, ए.व0।
मया = अस्मद्, तृतीया ए.व.।
भवन्तः = भवत्, प्रथमा ब.व.।
(ख) नयामि = नी, लट्, उत्तमपुरुषः, ए. व.।
शृण्वन्तु = श्रु, लोट्, प्रथमपुरुषः, ब.व.।
भवेताम् = भू, विधिलिङ्., प्र.पु. द्वि.व.।
(ग) निहतः = नि+ हन्+क्त (पुं. प्र. वि.ए.)
निहत्य = नि+ हन्+ल्यप्
निगृह्य = नि+ग्रह्+ल्यप्
पातयित्वा = पत्+णिच्+क्त्वा
प्राप्तवान् = प्र + आप्+ क्तवतु (पुं. प्र. वि. ए.)
विलोक्य = वि+ लोक्+ल्यप्

विग्रहः

भग्नास्थिः	–	भग्नम् अस्थि यस्य सः	(बहुव्रीहिः)
कंसासुरम्	–	कंसः एव असुरः तम्	(कर्म)
दुरात्मा	–	दुष्टः आत्मा यस्य सः	(ब.व्री.)
विस्तीर्णलोहितमुखः	–	विस्तीर्णं लोहितं मुखात् यस्य सः	(ब. व्री.)
परिवृत्तनेत्रः	–	परिवृत्ते नेत्रे यस्य सः	(ब.व्री)
वज्रप्रभग्नशिखरः	–	वज्रेण प्रभग्नं शिखरं यस्य सः	(ब. व्री.)
सस्नेहम्	–	स्नेहेन सह	(अव्ययी.)
सत्पुत्रजन्मफलम्	–	सत्पुत्रस्य जन्म (ष.त.) सत्पुत्रजन्मनः फलम्	(ष.त.)



पाठगतप्रश्नाः 10.3

1. प्रश्नान् उत्तरन्तु

   (क) चाणूरं कः हतवान्?

   (ख) दामोदरः कंसं कथम् अमारयत्?

   (ग) ''अक्षयविजयिनौ भवेतां भवन्तौ'' इति वचनं कः कौ प्रति वदति?

   (घ) सत्पुत्रजन्मफलं कः प्राप्तवान्?

2. विशेषण–विशेष्यमेलनं क्रियताम्

क	ख
(क) दुरात्मा	(i) भवन्तौ
(ख) विच्छिन्नः	(ii) हारः
(ग) अक्षयविजयिनौ	(iii) कंसः

3. विग्रहवाक्यानां समस्तपदानि रचयन्तु

   (क) दुष्टः आत्मा यस्य सः ———

   (ख) परिवृत्ते नेत्रे यस्य सः ————

   (ग) पतितं लम्बसूत्रं यस्य सः ————

   (घ) वज्रेण प्रभग्नं शिखरं यस्य सः ——————

व्याकरणबोधः

(क) अनुस्वारः – 'म्' स्थाने अनुस्वारः (ं) इति नियमः। कदा?

यदा ''पदस्य अन्ते 'म्' भवेत् पश्चात् च व्यंजनवर्णः भवेत् तदा 'म्' स्थानेऽनुस्वारः भवति। यथा– ग्रामम् प्रति गच्छ = ग्रामं प्रति गच्छ।

हरिम् + वन्दे = हरिं वन्दे, मधुरम् हसति, = मधुरं हसति

(ख) परसवर्णः 'अनुस्वार' स्थाने परसवर्णः भवति।

यदि अनुस्वारात् (–ं–) परं व्यंजनवर्णः भवेत्, तदा अनुस्वारः वर्गस्य पंचमाक्षरे परिवर्तते।

यथा– सम् + गमः = सङ्गमः

मृत्युम् + जयः = मृत्यु जयः

शुभम् + करः = शुभङ्करः

अव्ययीभावः

पूर्वपदार्थप्रधानः अव्ययीभावः। अव्ययपदेन सह समासः भवति। अव्ययीभावसमासः षोडशप्रकारेण भवति। अन्यप्रमुखानि उदाहरणानि प्रस्तुतानि सन्ति।

अव्ययम्	समस्तपदम्	विग्रहः
1. यथा	(i) यथाशक्ति	शक्तिम् अनतिक्रम्य
	(ii) यथाकालम्	कालम् अनतिक्रम्य
2. प्रति–	(i) प्रत्येकम्	एकम् एकम् प्रति (वीप्सा–अर्थे)
	(ii) प्रतिदिनम्	दिनम् दिनम् प्रति
3. उप (समीपार्थे)	उपवनम्	वनस्य समीपम्
4. अनु (योग्यार्थे)	अनुरूपम्	रूपस्य योग्यम्
5. सह (सहितार्थे)	सस्नेहम्	स्नेहेन सह
6. निर् (अभावार्थे)	निर्जनम्	जनानाम् अभावः
7. आङ्. (मर्यादा/अभिविधि)	आजन्म	जन्मनः आरभ्य
	आजीवनम्	जीवन पर्यन्तम्

द्वन्द्वः 'चार्थे द्वन्द्वः'। 'च' अर्थे वर्तमानयोः द्वयोः शब्दयोः तदधिकशब्दानां वा द्वन्द्वः समासः भवति। द्वन्द्वः मुख्यतः द्विधा– इतरेतरः समाहारश्च।

इतरेतरः– द्वयोः पदयोः भवति, बहूनां पदानाम् अपि भवति। पदयोः पदानाम् वा एकस्मिन् क्रियापदे अन्वयः।

यथा– हरिः च हरः च = हरिहरौ
शिवः च केशवः च = शिवकेशवौ
माता च पिता च = मातापितरौ/पितरौ
चाणूरः मुष्टिकः च = चाणूरमुष्टिकौ
हेमन्तः च शिशिरः च वसन्तः च = हेमन्तशिशिरवसन्ताः

समाहारद्वन्द्वः– समाहारः = समूहः। विग्रहे 'समाहार' शब्दस्य प्रयोगः भवति।

यथा– पाणी च पादौ च एतेषां समाहारः = पाणिपादम्
अहिः च नकुलः च तयोः समाहारः= अहिनकुलम्

द्विगुः– सङ्ख्यावाचकपदस्य अन्यपदेन सह समासः भवति। विग्रहे 'समाहार' शब्दस्य प्रयोगः क्रियते। समासान्ते स्त्रीलि ˙ नपुंसकलि ˙ वा भवति।

यथा– त्रयाणाम् भवनानाम् समाहारः = त्रिभुवनम्
चतुर्णां युगानां समाहारः = चतुर्युगम्
त्रयणां लोकानां समाहारः = त्रिलोकी
प चानां वटानां समाहारः = प चवटी
नवानां रात्रीणां समाहारः = नवरात्रम्

10.4 किम् अधिगतम्

- दामोदरस्य बालचरितम् अत्यदभुतम् अस्ति।
- उग्रसेनस्य पुत्रः कंसः अतीव दुष्टः आसीत्।
- मधुराधिपः कंसः दामोदरं मारयितुं नैकान् यत्नान् अकरोत्।
- दामोदरः गजेन्द्रं हत्वा मदनिकां कुब्जिकां कुब्जरहिताम् अकरोत्
- दामोदरः धनुःशालायाम् धनुः द्विखण्डं कृत्वा चाणूरं हतवान्, मुष्टिकं च बलरामः हतवान्।
- दामोदरः प्रासादे स्थितं कंसं शिरसि निगृह्य पातयित्वा च अमारयत्।
- परसवर्णः तु वर्गीयपंचमाक्षरस्य नियमः।
- अव्ययीभावः पूर्वपदप्रधानः द्वन्द्वः उभयपदप्रधानः, द्विगुः च पूर्वपदसंख्याप्रधानः भवति।
- शतृ–शानच्प्रत्ययौ वर्तमानकालिककृत्प्रत्ययौ।

10.5 योग्यताविस्तारः

(क) कविपरिचयः महाकविः भासः कालिदासात् अपि पूर्ववर्ती कविः अस्ति। अस्य कालः ईसातः पूर्वं पंचमी षष्ठी वा शताब्दी इति डॉ. गणपतिः घोषयति। महाकवेः भासस्य त्रयोदश नाटकानि प्रसिद्धानि। सर्वप्रथमं टी. गणपतिः शास्त्री एव एतेषां पाण्डुलिपिं लब्धवान्। एतानि नाटकानि सन्ति–

1. स्वप्नवासवदत्तम् 2. प्रतिज्ञायौगन्धरायणम् 3. अविमारकम् 4. चारुदत्तम् 5. प्रतिमा 6. अभिषेकम् 7. पंचरात्रम् 8. दूतवाक्यम् 9. मध्यमव्यायोगः 10. दूतघटोत्कचम् 11. कर्णभारम् 12 ऊरुभङ्गम् 13. बालचरितम्

(ख) ग्रन्थपरिचयः 'बालचरितम्' पंचाङ्कमितं सुन्दरं नाटकम्। प्रस्तुतः पाठः अस्मादेव नाट्यग्रन्थात् उद्धृतः। अस्य कथानकः महाभारतम् आधृतः वर्तते। अस्मिन् नाटके श्रीकृष्णस्य जन्मनः आरभ्य कंसवधपर्यन्तम् कथावस्तु सरसं सुललितं च सुबद्धम् अस्ति।

(ग) भावविस्तारः

राजा

(क) प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।
नात्मप्रियं प्रियं राज्ञः प्रजानां तु प्रियं प्रियम्'' । (कौटिल्यः)

(ख) नृपस्य प्रियं प्रभो धर्मः प्रजानां परिपालनम्
दुष्टनिग्रहणं नित्यं न नीत्यान्तौ विना ह्युभे।। (शुक्रनीतिः)

(ग) रंजिताश्च प्रजाः सर्वास्तेन राजेति शब्द्यते। (महाभारते शान्तिपर्व)

(घ) मोहाद्राजा स्वराष्ट्रं य कर्षयत्यनवेक्षया।
सोऽचिराद् भ्रश्यते राजा जीविताच्च सबान्धवः।। (मनुस्मृतिः)

(ड.) आपत्त्यात्मनि प्रायो दोषोऽन्यस्य चिकीर्षतः। (कथासरित्सागरम्)

(च) विद्या विवादाय धनं मदाय
शक्तिः परेषां परिपीडनाय
खलस्य साधोः विपरीतमेतत्
ज्ञानाय दानाय च रक्षणाय।।

(छ) अष्टादश पुराणेषु व्यासस्य वचनद्वयम्
परोपकारः पुण्याय पापाय परपीडनम्।।

(घ) भाषाविस्तारः

'लोट्' लकारे प्रयुक्तानां वाक्यानां लट् लकारे परिवर्तनम्

'लट्' लकारे क्रियापदानि (वर्तमानकालिके)

उदाहरणार्थ – 'गम्' धातुः

	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
प्रथम पुरुषः	गच्छति	गच्छतः	गच्छन्ति
मध्यम पुरुषः	गच्छसि	गच्छथः	गच्छथ
उत्तम पुरुषः	गच्छामि	गच्छावः	गच्छामः

'लोट्' लकारे क्रियापदानि (आज्ञार्थके)

प्रथम पुरुषः	गच्छतु	गच्छताम्	गच्छन्तु
मध्यम पुरुषः	गच्छ	गच्छतम्	गच्छत
उत्तम पुरुषः	गच्छति	गच्छाव	गच्छाम

विशेषः कर्तृपदानुसारम् एव क्रियापदं प्रयुज्यते। कर्तृपदं प्रथमपुरुषः भवति, अथवा मध्यमपुरुषः भवति अथवा उत्तमपुरुषः भवति तर्हि क्रियापदम् अपि तमेव पुरुषं वचनं च अनुसरति। अत्र वयम् पश्यामः।

आज्ञा–पालनम्

'लोट्' लकारे प्रयुक्तवाक्यानि	लट् लकारे प्रयुक्तवाक्यानि
1. बालकः विद्यालयं गच्छतु।	बालकः विद्यालयं गच्छति।
2. बालकौ विद्यालयं गच्छताम्।	बालकौ विद्यालयं गच्छतः।
3. बालकाः गृहं गच्छन्तु।	बालकाः गृहं गच्छन्ति।
4. त्वम् उद्यानम् गच्छ।	त्वम् उद्यानं गच्छसि।



5.	युवाम् नदीम् गच्छताम्।	युवाम् नदीम् गच्छथः।
6.	यूयम् तडागम् गच्छत।	यूयम् तडागं गच्छथ।
7.	अहम् वाटिकां गच्छानि।	अहम् वाटिकां गच्छामि।
8.	आवाम् विपणिं गच्छाव।	आवाम् विपणिं गच्छावः।
9.	वयम् देवालयं गच्छाम।	वयम् देवालयं गच्छामः।

एवमेव

	लोट् (आज्ञा)	**लट् (वर्तमानकालः)**
1.	सूर्यः उदेतु।	सूर्यः उदेति।
2.	सर्वे सुखिनः भवन्तु।	सर्वे सुखिनः भवन्ति।
3.	छात्राः सत्यं वदन्तु।	छात्राः सत्यं वदन्ति।
4.	श्रुतिः प्रीतिः च गीतं गायताम्।	श्रुतिः प्रीतिः च गीतं गायतः।
5.	मेघाः जलं वर्षन्तु।	मेघाः जलं वर्षन्ति।
6.	त्वम् दुग्धं पिब।	त्वम् दुग्धं पिबसि।
7.	युवाम् प्रश्नं पृच्छतम्।	युवाम् प्रश्नं पृच्छथः।
8.	यूयम् स्वकर्त्तव्यम् पालयत।	यूयम् स्वकर्त्तव्यम् पालयथ।
9.	किं भोः, अहम् अन्तः प्रविशानि?	अहम् अन्तः प्रविशामि।
10.	किम् आवाम् नाटकं पश्याव?	अस्तु, आवां नाटकं पश्यावः।
11.	किम् वयम् स्वघटनां कथयाम?	आम्, वयम् स्वघटनां कथयामः।

वयं पश्यामः यत् उपर्युक्तवाक्येषु प्रतिवाक्यं क्रियापदं कर्तृपदानुसारमेव पुरुषं वचनं च अनुसरति। लोट् लकारस्य वाक्यानां लट् लकारे परिवर्तनं तु तात्पर्यतः 'आज्ञायाः परिपालनमेव' भवति।

10.6 पाठान्तप्रश्नाः

1. एकेन वाक्येन उत्तरं दीयताम्
   (क) राजा कंसः रङ्गगतं कम् घातयितुम् इच्छति?
   (ख) दामोदरः कस्याः कुब्जं दूरीकृतवान्?
   (ग) चाणूर–मुष्टिकौ कौ आस्ताम्?
   (घ) वज्रप्रभग्नशिखरः पर्वत इव कः पतितः केन च पातितः?
   (ङ) वसुदेवः कः आसीत्? सः स्वपुत्राभ्याम् किम् आशीर्वादम् अयच्छत्?
   (च) अयं पाठः कस्माद् ग्रन्थात् उद्धृतः कश्च तस्य लेखकः?
2. कोष्ठकाद् उचितपदमादाय रिक्तस्थानपूर्तिं कुरुत।
   (क) ––––––महामात्येन प्रेषितं गजेन्द्रं हतवान्। (बलरामः/ दामोदरः)

(ख) मदनिका ———स्थिता आसीत्। (राजकुलद्वारे / अन्तःपुरे)

(ग) ——————मुष्टिकं हतवान्। (दामोदरः / बलरामः)

3. त्रिषु चतुर्षु वा वाक्येषु उत्तरं लिखत–

(i) कंसः कः आसीत्? स चाणूर–मुष्टिकौ किमर्थम् आह्वयत्?

(ii) मदनिकायाः नाम 'कुब्जिका' इति कथम् अभवत्?

(iii) श्रीकृष्णस्य चरित्रम् वर्णयन्तु।

4. आशयं स्पष्टीकुर्वन्तु

(i) सत्पुत्र–जन्मफलमद्य प्राप्तवानस्मि

(ii) त्वामद्य यमाय निवेदयामि

5. प्रकृति–प्रत्ययययोगेन वाक्यपूर्तिं कुरुत

(क) दामोदरः रङ्गशालां (प्र+विश्+शतृ) ——— एव गजेन्द्रं हतवान्।

(ख) नन्दगोपपुत्रः कुब्जिकां (दृश्+क्त्वा) ——— तस्याः हस्ताद् गन्धं गृह्णाति।

(ग) भटः निष्क्रम्य (प्र+विश्+ल्यप्) ——— च ज्ञापयति।

(घ) कंसः प्रासादम् (आ+रुह्+ल्यप्) ——— युद्धं पश्यति।

(ङ) एषः कंसः दामोदरेण (नि+ हन्+क्त) ——तिष्ठति।

6. रेखांकितपदानां विग्रहं प्रदर्शयत

(क) राजमार्गम् गच्छति गजेन्द्रः।

(ख) अमात्यः राज्ञः कर्णमूले किमपि कथितवान्।

(ग) दामोदर–बलरामौ वसुदेवं प्रणमतः।

(घ) जनकः पुत्रं सस्नेहं पश्यति।

(ङ) ललितगम्भीराकृतिः रामः।

(च) प×चवटी तु रम्या।

7. लट्लकारे प्रयुक्तक्रियापदानि लोट्लकारे परिवर्तयत

यथा– दामोदरः बलरामेण सह गच्छति। (लटि)

दामोदरः बलरामेण सह गच्छतु। (लोटि)

(क) भटः प्रविशति। (ख) सः धनुःशालां पश्यति।

(ग) त्वम् प्रासादे तिष्ठसि। (घ) सर्वे युद्धं कुर्वन्ति।

8. सन्धिविच्छेदः कार्यः

(क) यदाज्ञापयति (ख) भग्नास्थिः

(ग) दामोदरोऽहम् (घ) ज्ञायतां वृत्तान्तः



9. निर्दिष्टधातुभिः सह शतृ/शानच् प्रत्ययप्रयोगेन वाक्यपूर्तिं कुर्वन्तु

(क) गृहं ..... छात्रः गुरुं नमति। (गम् + शतृ)

(ख) फलानि ..... ते गच्छन्ति। (खाद् + शतृ)

(ग) वृद्धं ..... बालः धन्यः। (सेव् + शानच्)

(घ) ताः ..... भ्रमन्ति। (मुद् + शानच्)

10.7 उत्तराणि

10.2 बोधप्रश्नाः

1. 1. (क) 2. (ख) 3. (ग)

4. (क) दन्तं (ख) द्विखण्डं (ग) सङ्ख्यपटहान् (घ) पतितो

5. (क) राजा (ख) भटः (ग) राजा (कंसः) (घ) दामोदरः (ड.) वसुदेवः

पाठगतप्रश्नाः

10.1 1. (क) राजा (कंस) (ख) दामोदरः (ग) उत्पलापीडो नाम गन्धहस्ती

(घ) कुब्जिका,, राजकुलद्वारे (ङ) धनुः समादाय द्विखण्डम् अकरोत्

(च) कंसस्य विशिष्टौ मल्लौ

2. (क) + ii (ख) + i (ग) + iv (ङ) + iii

3. (क) समाकृष्य (ख) अनुलिप्य (ग) प्रहृत्य (घ) प्रविशत् (पुं–प्रविशन्)

(ङ) गत (च) श्रोतुम् (छ) हत्वा

4. (क) गजेन्द्रम् (ख) यदाज्ञापयति (ग) तेनैव (घ) शीघ्रं गच्छ

10.2 1. (क) चाणूरमुष्टिकौ प्रति (ख) करणसन्ध–आबन्धयुद्धप्रहारेषु

(ग) ललितगम्भीराकृतिः (घ) दामोदरः चाणूरं प्रति

2. (क) शृणोतु (ख) तिष्ठ (ग) उपदिशतु (घ) गच्छ (ड.) वादयत

3. (क) गोपदारकौ (ख) महाराजः (ग) ललितगम्भीराकृतिः (घ) दामोदरबलरामौ

10.3 1. (क) दामोदरः (ख) दामोदरः प्रासादम् आरुह्य कंसं च शिरसि गृहीत्वा नीचैः अपातयत्। (ग) वसुदेवः, दामोदरबलरामौ प्रति (घ) वसुदेवः

2. (क) कंसः (ख) हारः (ग) भवन्तौ

3. (क) दुरात्मा (ख) परिवृत्तनेत्रः (ग) पतितलम्बसूत्रः (घ) वज्रप्रभग्नशिखरः

10.6 पाठान्तप्रश्नाः

1. (क) दामोदरम्

   (ख) मदनिकायाः

   (ग) कंसस्य विशिष्टौ मल्लौ

   (घ) कंसः, दामोदरेण

   (ङ) वसुदेवः, दामोदर–बलरामयोः पिता आसीत्। सः स्वपुत्राभ्यां अक्षयविजयिनौ भवेताम् इति आशीर्वादम् अयच्छत्।

   (च) 'बालचरितम्' इति ग्रन्थात्, महाकविः भासः

2. (क) दामोदरः (ख) राजकुलद्वारे (ग) बलरामः

3. स्वयमेव लिखन्तु

4. स्वयमेव लिखन्तु

5. (क) प्रविशन् (ख) दृष्ट्वा (ग) प्रविश्य (घ) आरुह्य (ड.) निहतः

6. (क) राज्ञः मार्गम् (ख) कर्णयोः मूले (ग) दामोदरः बलरामः च (घ) स्नेहेन सहितम् (ड.) ललिता गम्भीरा आकृतिः यस्य सः (च) प×चानां वटानां समाहारः

7. (क) प्रविशतु (ख) पश्यतु (ग) तिष्ठ (घ) कुर्वन्तु

8. (क) यत्+आज्ञापयति (ख) भग्न+अस्थिः (ग) दामोदरः+अहम्

   (घ) ज्ञायताम् वृत्तान्तः

9. (क) गच्छन् (ख) खादन्तः (ग) सेवमानः (घ) मोदमानाः

309sk11

11

अनुच्छेदलेखनम्

भाषा एव मानवजीवनस्य वैशिष्ट्यम्। पशूनामपि भाषा भवति परन्तु सा तु केवलं सांकेतिकरूपेण विद्यते। वयं मानवाः चिन्तयितुं किंचिद् नवीनं विचारयितुं कल्पयितुं च शक्नुमः। अस्माकं विचाराणाम् अभिव्यक्तिः द्विधा भवति भाषणेन लेखनेन वा। लेखने अपि अनेके विधयः भवन्ति—गद्यमयं, पद्यमयं नाट्यमयं च। 'गद्यं कवीनां निकषं वदन्ति' इति कथनानुसारं गद्यलेखनं सुकरं न भवति। गद्यरचनायां कथानिबन्धानुच्छेदादयः अनेकाः विधाः सन्ति। अस्मिन् पाठे वयं केवलम् अनुच्छेदलेखनविषयकं चिन्तनं कुर्मः। अनुच्छेदे वयं शीर्षकविषयकम् एकं बिन्दुम् एव आधारीकृत्य संक्षेपेण विचाराणाम् अभिव्यक्तिं कुर्मः। एवम् अनुच्छेदे कस्यापि एकस्य विचारस्य चिन्तनस्य भावादेश्च संक्षेपेण प्रवाहयुक्तं वर्णनं भवति।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- अनुच्छेदस्य उपांगानि वर्णयितुं समर्थः भविष्यति;
- शब्दानां वर्णविश्लेषणं कर्तुं शक्तः भविष्यति;
- पदैः वाक्यानि उपवाक्यानि च निर्मास्यति;
- अनुच्छेदस्य रूपरेखानिर्माणं कर्तुं योग्यतां प्राप्स्यति;
- अनुच्छेदान्तर्गतवाक्यानाम् अन्तःसम्बन्धं सम्यक् ज्ञातुं शक्तः भविष्यति;
- अनुच्छेदस्य समापनवाक्यं योजयितुं योग्यः भविष्यति;
- लघुनिबन्धम् आधारीकृत्य शीर्षकं लेखितुं सक्षमः भविष्यति।

क्रियाकलापः

अत्र वाक्येषु केचन संकेताः दर्शिताः। तेषु यः संकेतः भाषया सम्बद्धः, तस्य अग्रे (✓) इति चिह्नेन चिह्नीकुर्वन्तु

	वाक्यम्	उत्तरम्
1.	गौः वत्सं जिघ्रति।	भाषा / भावः
2.	काकः कॉव कॉव इति करोति।	भाषा / संकेतः
3.	नेता भाषणं करोति।	भाषा / संकेतः
4.	बालकः वंशीं वादयति।	भाषा / स्वरः
5.	कारचालकः नादं करोति।	भाषा / ध्वनिः
6.	बालिका गीतं गायति।	भाषा / स्वरमात्रम्
7.	बालिका नृत्यति।	भाषा / भावाभिव्यक्तिः
8.	राजा आदेशं ददाति।	भाषा / ध्वनिः

11.1 अधुना अवगच्छामः

अनुच्छेद–लेखनम्

अस्माभिः दृष्टं यत् भाषया वयं विचाराणाम् अभिव्यक्तिं कुर्मः। भाषायाः कति उपांगानि भवन्ति इति अधुना विचारयामः।

अनुच्छेदस्य उपांगानि

अधोलिखितं चित्रं पश्यन्तु

- वर्णः
- प्रातिपदिकम्
- पदम्
- वाक्यम्
- अनुच्छेदः



प्रारम्भः मध्यः समापनम् शीर्षकम् इति मिलित्वा अनुच्छेदः भवति। भाषायाः प्रारम्भः वर्णैः भवति। स्वरव्यंजनादयः वर्णाः।



वयम् पश्यामः यत् वर्णैः प्रातिपदिकानां रचना भवति यथा र+आ+म्+ अ = इति मिलित्वा 'राम' प्रातिपदिकं भवति। परन्तु प्+अ+ठ् = पठ् इति धातुः प्रातिपदिकम् न उच्यते। प्रत्येकं पदे मूलरूपेण यद् विराजते तत् प्रातिपदिकम्। प्रातिपदिकैः सह सुप् विभक्तीनां योगेन सुबन्तपदानां निर्माणं भवति, धातुभिः सहः तिङ् प्रत्ययानां योगेन तिङन्तपदानि जायन्ते। कथ्यते च 'सुप्तिङन्तं पदम्'। अत्र मञ्जूषायां केचन वर्णाः, कानिचित् प्रातिपदिकानि, कानिचित् च सुबन्तपदानि अन्यानि च तिङन्तपदानि मिश्रितानि सन्ति। वयम् एतानि पृथक् पृथक् चित्वा विभिन्नस्तम्भेषु लिखामः।

मंजूषा

हरि, तु, गम्, वयम्, गच्छामः, हस्, पठामः य्, सीता, राम, लतायै, अस्मभ्यम्, लिख्, सीते!, च्, च, युष्मद्, म्, मा, वद्, पठ, त्, विचरन्ति, पठ्, न्, न, फलानि, प्रातः

स्तम्भेषु वर्गीकरणम्

क्रमांकः	वर्णः	प्रातिपदिकम्	धातुः	सुबन्तानि	तिङन्तानि	अव्ययानि
1.	य्	हरि	गम्	वयम्	गच्छामः	च
				लतायै	पठामः	मा
2.	च्	सीता		अस्मभ्यम्		
3.	म्	राम	लिख्		विचरन्ति	न
4.	त्	युष्मद्	वद्	सीते	हस्	तु
5.	न्		पठ्	फलानि	पठ्	प्रातः

ध्यातव्यं यत् वर्णैः प्रातिपदिकानां, पदानां च रचना भवति। अतः वर्णानां मेलनं शब्दनिर्माणे प्रथमं सोपानं भवति।

वर्णों से मिलकर शब्द बनते हैं। शब्दों में सुबन्त प्रत्यय लगाकर विभिन्न विभक्तियों में रूप चलते हैं। धातुओं में तिङन्त प्रत्यय जोड़कर विभिन्न क्रियापद बनाए जाते हैं। 'य्' वर्ण है, यत् सर्वनाम शब्द है, यः सर्वनाम है, 'या' धातु है, याति 'जाता है' क्रिया है।

पाठगतप्रश्नाः 11.1

1. अधोलिखितमञ्जूषायां दत्तानि पदानि, वर्णाः, सुबन्तानि, तिङन्तानि, अव्ययपदानि च पृथक् स्तम्भेषु लिखत

   बालिके, नदी, च, य्, यः, पठत, सवितुः भ्रातृ, सूर्याय, वद, वद्, स्, सः, तद्, क्, रोचते, अद्य, ह्यः, गौः, गो, बहिः, गच्छ, गच्छ्, जिघ्रति, ज्, परश्वः, घ्रा, भू, नम्, अ, उ, यत्, किम्, लिख्, नम, श्वः,

क्रमांकः	वर्णः	प्रतिपादिकम्	धातुः	सुबन्तानि	तिङन्तानि	अव्ययानि
1	––	––	––	––	––	––
2	––	––	––	––	––	––
3.	––	––	––	––	––	––
4.	––	––	––	––	––	––
5.	––	––	––	––	––	––
6.	––	––	––	––	––	––

11.2 पदैः वाक्यनिर्माणम्

प्रथमे एकांशे अस्माभिः पठितं यत् वर्णैः प्रातिपदिकानां धातूनां च रचना भवति। वाक्ये प्रायः सुबन्तानि तथा तिङन्तानि पदानि भवन्ति। संज्ञासर्वनामविशेषणादीनां कृते सुबन्तानि पदानि प्रयुज्यन्ते। क्रियापदानां कृते तिङन्तानां पदानां प्रयोगः भवति। अव्ययपदानि अपि सुबन्तानि एव भवन्ति परन्तु तेषां विभक्तिलोपः जायते, तेषां रूपे किमपि परिवर्तनं न भवति। अधोलिखिते गतिविधौ वयम् सुबन्ततिङ्न्तपदयोगेन वाक्यरचनां करिष्यामः। क्रियापदानि पञ्चलकारेषु एव दत्तानि, तेषाम् अर्थसंगतिं दृष्ट्वा एव प्रयोगः करणीयः।

	कर्तृपदानि		क्रियापदानि
(क)	वयम्	(i)	गच्छन्तु
(ख)	बालकाः	(ii)	पठिष्यथः
(ग)	भवन्तः	(iii)	पठेः
(घ)	यूयम्	(iv)	अक्रीडन्
(ङ)	तौ पुरुषौ	(v)	नमामि
(च)	ते बालिके	(vi)	हसावः
(छ)	आवाम्	(vii)	तरतः
(ज)	युवाम्	(viii)	अलिखाम
(झ)	त्वम्	(ix)	गच्छत
(ट)	अहम्	(x)	धावतः

ध्यानेन पश्यन्तु। वाक्ये क्रियापदं कर्तृपदानुसारम् एव भवति। कर्तृपदस्य पुरुषानुसारं, वचनानुसारम् एव क्रियापदं प्रयुज्यते। अनुच्छेदे वाक्यैः सह उपवाक्यानाम् अपि प्रयोगः भवति। मुख्यवाक्ये आश्रितानि वाक्यानि उपवाक्यानि उच्यन्ते। अनुच्छेदे परस्परं वाक्यानि सम्बद्धानि भवन्ति। अत्र क्रियाकलापे दश वाक्यानि समाहितानि। एतानि एवं सन्ति–

वयम् अलिखाम। बालकाः अक्रीडन्। भवन्तः गच्छन्तु। यूयम् गच्छत। तौ पुरुषौ तरतः। ते बालिके धावतः। आवाम् हसावः। युवाम् पठिष्यथः। त्वं पठेः। अहं नमामि।



एतानि वाक्यानि तु सार्थकानि परन्तु अनुच्छेदकृते परस्परं सम्बद्धानि न सन्ति। किं वयम् एतानि वाक्यानि मेलयित्वा अयम् अनुच्छेदः इति कथयितुं शक्नुमः? नैव। एतानि वाक्यानि तु असम्बद्धानि। एतानि वाक्यानि मिलित्वा किमपि स्पष्टीकर्तुं न शक्नुवन्ति। अतः अनुच्छेदे सर्वाणि वाक्यानि परस्परं सम्बद्धानि भवन्ति। अधोलिखितानि वाक्यानि पश्यत–

क्रियाकलापः–2

वयं प्रातः उत्तिष्ठामः। स्नानं कुर्मः। ध्यानं कुर्मः, विद्यालयं गच्छामः। पाठान् पठामः। क्रीडाक्षेत्रे क्रीडामः। गीतानि गायामः। मध्याह्ने गृहम् आगच्छामः। भोजनं कुर्मः। विश्रामं कुर्मः। सायंकाले उद्याने भ्रमामः। ततः आगच्छामः। गृहकार्यं कुर्मः। पठितान् पाठान् पुनः पठामः। रात्रौ दशवादने शयनं कुर्मः।

उपरिलिखितेषु वाक्येषु मूलबिन्दुः कः?

सुष्ठु चिन्तितम्– एषा केषाञ्चन छात्राणां दिनचर्या। अत्र किं शीर्षकं भवितुं शक्नोति? सम्भवतः ''अस्माकं दिनचर्या'' इति।

सारांशतः

- अनुच्छेदे वाक्यानि भवन्ति।
- वाक्येषु क्रियापदं कर्त्रनुसारं भवति। क्रियापदं विना वाक्यं पूर्णं न भवति।
- वाक्यानि परस्परं सम्बद्धानि सन्ति।
- वाक्यानाम् आधारबिन्दुः एक एव, तद् एव शीर्षकम्।

अनुच्छेद वाक्यों से बनता है। वाक्यों में क्रियापद कर्ता के अनुसार होते हैं। वाक्यों के परस्पर जुड़े हुए होने से ही अनुच्छेद बनता है।

क्रियाकलापः–3

अधोलिखितानां वाक्यानाम् आधारबिन्दुः कः?

प्रातःकालः अस्ति। आकाशे सूर्यः उदितः। खगाः कलरवं कुर्वन्ति। जनाः भ्रमणं कुर्वन्ति। बालकाः विद्यालयं गच्छन्ति। मार्गेषु यानानि धावन्ति। केचन यानस्थानकं प्रति गच्छन्ति। सर्वत्र व्यस्तता अस्ति। केचन वृद्धाः मन्दिरं गच्छन्ति। नूनम् ये उद्यमं कुर्वन्ति ते स्वस्थाः भवन्ति। अलसाः किमपि न प्राप्नुवन्ति। उक्तं हि, ''उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः''।

अत्र अनुच्छेदस्य आधारबिन्दुः कः? नूनम् उद्यमः। कथं ज्ञायते? प्रातःकाले उत्थाय सर्वे जनाः उद्यमे संलग्नाः। वस्तुतः उद्यमशीलाः एव ऐश्वर्यं लभन्ते। अलसाः तु किमपि न प्राप्नुवन्ति। अन्ते दत्ता सूक्तिः अपि इदम् एव तात्पर्यं सूचयति। अतः प्रायः अनुच्छेदस्य समाप्तौ काचित् सूक्तिः, सुभाषितं वा योज्यते।

क्रमबद्धता

अनुच्छेदे क्रमः अपि अत्यन्तम् आवश्यकः। यदि अनुच्छेदे क्रमबद्धता, तारतम्यता नास्ति तर्हि भावस्य अभिव्यक्तिः सम्यक् न भवति। अतः अस्माभिः ध्यातव्यं यत् अनुच्छेदे सार्थकता भवेत्, क्रमिकता भवेत्, अपि च वाक्यानि शुद्धानि भवेयुः। अन्ते च काचित् सूक्तिः सुभाषितं वा भवेत्।

अनुच्छेद में सम्बद्धता, क्रमबद्धता, तारतम्यता होनी आवश्यक है।

पाठगतप्रश्नाः 11.2

1. अधोलिखिते अनुच्छेदे असम्बद्धवाक्यानि चित्वा लिखन्तु–

   सर्वेषाम् एव अहंकारः भवति। कस्यचित् स्वल्पः कस्यचित् मध्यमः। अहंकारः मानवम् अन्धं करोति। सः कथयति अहं तु सर्वेभ्यः महान्। सः चिन्तयति– अहं सर्वेभ्यः दीनः इति। सर्वे तस्य अहंकारं पश्यन्ति परन्तु सः कथयति अहं तु सर्वेभ्यः महान्। कोऽपि मया सदृशः विद्वान् नास्ति। सः सर्वदा सर्वेषां सेवां कर्तुं तत्परः भवति। अहंकारी निन्दां न शृणोति। सः सर्वदा प्रशंसाम् एव इच्छति। अन्ते स रावणवत् विनश्यति।

2. उपर्युक्ते अनुच्छेदे कः मुख्यबिन्दुः?
3. एतस्य अनुच्छेदस्य कृते शीर्षकं लिखन्तु।
4. अधोलिखितासु सूक्तिषु का सूक्तिः अन्ते योजयितुं शक्यते?

   (i) शरीराणि विनाशीनि न शरीरी विनश्यति। (अग्निपुराण– 14 / 2)

   (ii) उद्यमो मित्रवद् ग्राह्यः, प्रमादं शत्रुवत् त्यजेत्। (बुद्धचरितम् 26–73)

   (iii) हन्ति मानः महद् यशः (महाभारतम् अनुशासनपर्व 69.19)

   (iv) त्यक्त्वाऽभिमानं पुरुषो जानाति परमेश्वरम् (शिवपुराणम् 3.8.58)

   (v) क्रोधो हन्ता मनुष्याणां, क्रोधो भावयिता पुनः (महाभारतवनपर्व 29.1)

11.3 रूपरेखाम् अधिकृत्य अनुच्छेदलेखनम्

अनुच्छेदलेखनात् पूर्वं विषयमधिकृत्य रूपरेखानिर्माणम् अत्यधिकम् आवश्यकम्। कांश्चन विषयान् अधिकृत्य रूपरेखानिर्माणं कुर्मः।

वसन्तः (रूपरेखा)

षड् ऋतवः, ऋतुराजः, वृक्षाः, पुष्पाणि, भ्रमराः, लताः सौरभप्रसारः, जलाशयाः, कमलानि, नवीनानि पत्राणि, कोकिलाः, आम्रमञ्जर्यः, आकाशः निर्मलः भवति।

एतां रूपरेखाम् अनुसृत्य वयं लघुनिबन्धं लिखामः

ऋतुराजः वसन्तः

भारते षड् ऋतवः भवन्ति। वसन्तः, ग्रीष्मः, वर्षा, हेमन्तः, शरत्, शिशिरः। वसन्तः ऋतूनां राजा कथ्यते। वृक्षाः कुसुमैः पूर्णाः। पुष्पेषु भ्रमराः गुञ्जन्ति। लतासु नवीनानि पत्राणि आगच्छन्ति। सर्वत्र सुगन्धः प्रसरति। जलाशयेषु कमलानि विकसन्ति। आम्रवृक्षेषु मंजर्यः प्रस्फुटन्ति। कोकिलाः पंचमस्वरेण गायन्ति। आकाशः अपि निर्मलः। वयम् अपि आकाशवत् उदारमनाः स्वस्थचित्ताः भवेम, स्वकर्मणां शुभां कीर्तिं प्रसारयामः। तदैव वसन्तवत् अस्माकं जीवनमपि धन्यं भवेत्।

चित्राधारितम् अनुच्छेदलेखनम्

चित्रम् आधारीकृत्य अपि अनुच्छेदलेखनं भवति। अत्र प्रदत्त चित्रं पश्चत–

प्रातःकोल पतिः पत्नी वार्तालापं कुरुतः। तयोः हस्तयोः चषकौ स्तः। पश्चात् दूरदर्शनम् अपि अस्ति । तौ समाचारं शृणुतः। हास्यप्रदां कामपि घटनां श्रुत्वा हसतः। आनन्दमयं वातावरणम्। पारिवारिकशान्तेः उदाहरणम्। वेदेषु उक्तम् समानमस्तु वो मनः।

पाठगतप्रश्नाः 11.3

1. (क) एवमेव अधोलिखितान् विषयान् अधिकृत्य अनुच्छेदं लेखितुं रूपरचनायाः निर्माणं कुर्वन्तु

परिश्रमः

परिश्रमेण सुखप्राप्तिः, ...

(ख) उक्तरूपरेखां पठित्वा अनुच्छेदं लिखन्तु

2. 'अस्माकं भारतम्' इति विश्यमधिकृत्य अनुच्छेदं लिखत।

3. चित्राधारितम् अनुच्छेदलेखनम्

अत्र प्रदत्तशब्दानां सहायतया अनुच्छेदं लिखत–

शीतः ऋतुः, द्वौ जनौ, पर्वतवासिनौ, शीतार्तौ, मध्ये अङ्गारिका (अंगीठी), हस्तौ तापयतः, अग्नेः ज्वालाः उष्णीषम् (पगड़ी) धारयतः।

3. अस्माकं देशः भारतम्

जन्मभूमिः, उत्तरे हिमालयः, तिसृषु दिशासु सागराः, अनेकाः नद्यः, मध्ये विन्ध्याचलः, महती संस्कृतिः, महान्तः कवयः, महान्तः ग्रन्थाः, विपुलं साहित्यम्, वीराङ्गनाः देशभक्ताः, सूक्तिः—जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

11.4 सौन्दर्यविधायकानि तत्त्वानि अनुच्छेदं लिखत

वाक्ये पदानां शुद्धता, उपयुक्तपदानां चयनं, तेषां सम्यक्संयोजनं च अनुच्छेदस्य सौन्दर्यविधायकानि तत्त्वानि। यदि कुत्रचिदपि अशुद्धिः वर्तते तर्हि निश्चप्रचं सौन्दर्यं नश्यति। अतः भाषायाः शुद्धता अपरिहार्या। प्रायः संयुक्तव्यंजनानां मेलने प्रातिपदिकानां शब्दानां वा लेखने वर्तनी गताःअशुद्धयः भवन्ति।

उदाहरणार्थं वयं कानिचित् वर्तनीगताशुद्धियुक्तानि वाक्यानि पठामः—

1. भवान् विवाहोत्सवे वरवधूभ्याम् आर्शिवादप्रदानाय गच्छति।
2. मया कालीदासस्य अभिग्यानशाकुन्तलं नाटकं पठितम्।
3. अद्य तस्याः मौनवृतम् अस्ति।
4. नारी ग्रहलक्ष्मी कथ्यते।
5. अहं नित्यं विष्णुसहस्त्रनामस्त्रोत्रस्य पाठं करोमि।
6. शिवेः करूणाभावः अनुकरणीयः।

सम्प्रति तासाम् अशुद्धीनां शोधनं कृत्वा लिखामः—

1. आशीर्वादप्रदानाय
2. कालिदासस्य अभिज्ञानशाकुन्तलम्।
3. मौनव्रतम्
4. गृहलक्ष्मीः
5. विष्णुसहस्रनामस्तोत्रस्य
6. करुणाभावः

भाषायाः शुद्धतायाः तात्पर्यं यत् भाषा व्याकरणसम्मता भवेत्। वाक्ये कारकक्रिया लिङ्गवचनादीनां समुचितः अन्वयः अनिवार्यः। द्वितीयांशे अस्माभिः पठितं यत् वाक्ये क्रियापदं कर्तृपदानुसारम् एव भवति। यथा मौनव्रतम् अस्ति। अहं करोमि। अत्र एतदपि स्मर्तव्यं यत् कर्मवाच्ये क्रिया कर्मपदानुसारं भवति। यथा—मया गीता पठ्यते। भाववाच्ये च क्रिया एकवचने एव भवति। यथा बालकैः सुप्यते। विशेषणस्य लिङ्गं वचनं विभक्तिश्च विशेष्यानुसारम् एव भवन्ति। यथा— खेलते बालकाय। गच्छत् यानम्.....। वाक्ये अशुद्धिपरिहाराय एते नियमाः सावधानेन पालनीयाः।



अनुच्छेदलेखने पदचयने अपि उपयुक्तानाम् एव पदानां चयनं करणीयम्। संस्कृतं सर्वाधिकं समृद्धम्। अत्र एकस्य अर्थस्य द्योतकाः बहवः शब्दाः वर्तन्ते। परन्तु प्रत्येकं शब्दे काचित् विशेषता विद्यते। यदि कश्चित् कथयति– ''पात्रे सलिलम् अस्ति।'' अत्र 'सलिलम्' इति पदस्य प्रयोगः अनुपयुक्तः। यतः पात्रे स्थितं जलं 'सलिलं' न भवति। सलिलं (लीलया सहितम्) तु नदीनां निर्झराणाम् एव जलं भवति।

अनुच्छेदलेखने प्रयत्नः विधेयः यत् शुद्धानाम् उपयुक्तानां च शब्दानाम् एव प्रयोगः क्रियते। यथा– 'शुष्कः वृक्षः तिष्ठति अग्रे'' इत्यस्य स्थाने 'नीरसः तरुः पुरतः भाति' अधिकं रोचते।

अधुना वयम् एकं सुन्दरम् अनुच्छेदं पठामः।

मित्राणि शत्रवस्तथा

मानवजीवने मातापित्रोरनन्तरं सखा एव उल्लासप्रदः क्लेशपरिहारकश्च भवति। बाल्यादारभ्य एव मानवः मित्रसङ्गहं करोति। समानस्वभावाः, विद्याभ्यासे क्रीडासु च सहकारिणः कार्यक्षेत्रे सहोद्योगिनश्च मित्राणि भवन्ति। गृहपरिसरे वर्तमानाः प्रतिवेशिनोऽपि मित्राणि भवन्ति। जीवननिर्वाहावसरे केचन रिपवः अपि जायन्ते। बाल्ये एव स्वभावभेदात् स्वार्थप्रसङ्गात् च केचन रिपवः भवन्ति। कार्यक्षेत्रे अपि स्पर्धाप्रसङ्गात् आसक्तिभेदात् केचन रिपवः जायन्ते। एतौ मित्रशत्रुभावौ समाजजीविनः मानवस्य अविभाज्यौ अङ्गौ। तथापि मित्रत्वस्य वर्धने शत्रुत्वस्य परिहारे निरन्तरं प्रयत्नः विधेयः। अतः सुष्ठूक्तं केनचित् कविना–

''न कश्चित् कस्यचिन् मित्रं न कश्चित् कस्यचिद्रिपुः।

व्यवहारेण जायन्ते मित्राणि शत्रवस्तदा।।''

1. अस्मिन् अनुच्छेदे मित्रताभावः शत्रुताभावश्च केन्द्रीभूतविचाररूपेण वर्तेते।
2. सर्वेषु वाक्येषु तारतम्यता विराजते।
3. अस्मिन् अनुच्छेदे कुत्रचिदपि वर्तनीगता अशुद्धिः न दृश्यते।
4. अत्र सर्वत्र क्रियापदं कर्तृपदानुसारम् एव। यथा– मानवः ..... करोति। मित्राणि भवन्ति।
5. विशेषणपदानां लिङ्गवचनविभक्त्यादयः विशेष्यानुसारमेव। यथा– सखा एव उल्लासप्रदः क्लेशापहारकश्च। वर्तमानाः प्रतिवेशिनः।
6. सर्वाणि वाक्यानि परस्परसम्बद्धानि सन्ति।
7. अस्मिन् उपयुक्तानां पदानां प्रयोगः कृतः यथा 'सखा' इत्यस्य विशेषणरूपेण 'उल्लासप्रदः क्लेशापहारकः इति। अत्र उपयुक्तानां मधुराणां पदानां प्रयोगः दर्शनीयः।
8. अन्ते एका सम्बद्धा सूक्तिः प्रदत्ता।

पाठगतप्रश्नाः 11.4

1. प्रदत्तानां पदानां वर्णविश्लेषणं कृत्वा लिखन्तु–

   यथा– मूर्तः – म् + ऊ + र् + त् + त् + अः

   (क) अर्थः –

   (ख) चक्रम् –

   (ग) प्रकाशः –

   (घ) विश्रामः –

   (ङ) ब्रह्मविद्या –

   (च) चिह्नम् –

   (छ) किंचित् –

   (ज) उद्धारः –

   (झ) शृंखला –

2. उपयुक्तेन पदेन रिक्तस्थानानि पूरयन्तु–

   (क) बालकाः गृहं .....। (गच्छति / गच्छन्ति)

   (ख) मया रामायणं .....। (पठ्यते / पठ्येते)

   (ग) ..... हस्यते। (बालिकया / बालिका)

   (घ) खेलतीभ्यां .....। (बालकाभ्याम् / बालिकाभ्याम्)

   (ङ) पतत् .....। (फलम् / फलानि)

11.5 किम् अधिगतम्

- वर्णानां योगेन प्रातिपदिकानि भवन्ति।
- प्रातिपादिकैः पदनिर्माणं क्रियते।
- पदानि मिलित्वा वाक्यं रचयन्ति।
- परस्परसम्बद्धानि वाक्यानि एव मिलित्वा अनुच्छेदं रचयन्ति।
- अनुच्छेदे केन्द्रीभूतः विचारः भवेत्।
- वाक्येषु तारतम्यता भवेत्।
- अनुच्छेदस्य अन्ते काचित् सूक्तिः भवेत्।
- अनुच्छेदस्य मुख्यबिन्दुम् अधिकृत्य शीर्षकं लिख्यते।



11.5 योग्यताविस्तारः

(क) विशेषण विशेष्य– अन्वितिः।

यल्लिङ्गं यद्वचनं या च विभक्तिः विशेष्यस्य।

तल्लिङ्गं तद्वचनं सा च विभक्तिः विशेषणस्य।।

विशेषणस्य लिङ्गं वचनं विभक्तिः च विशेष्यानुसारं भवति यथा

(i) खेलते बालकाय, खेलद्भ्याम् बालकाभ्याम्।

(ii) खेलत्यै बालिकायै, खेलतीभ्याम् बालिकाभ्याम्।

(iii) गच्छत् यानम्, गच्छती याने।

(ख) लिङ्गानुशासनम्

केचन शब्दाः पुंल्लिङ्गे, भवन्ति यथा

(i) पाकः, त्यागः, भोगः,करः, हस्तः, विस्मयः इत्यादयः।

(ii) यज्ञः, विघ्नः, प्रश्नः इत्यादयः।

(iii) आधिः, व्याधिः, विधिः, जलधिः इत्यादयः।

(iv) विष्णुः, गुरुः, इक्षुः, भानुः, साधुः, मनुः, ऋतुः इत्यादयः।

(v) भ्रातृ, पितृ, देवृ, दातृ इत्यादयः।

(vi) स्तबकः, पाषाणः, फेनः, दीपः, वृक्षः, समयः, इत्यादयः।

(vii) अमरः, विबुधः, सुरः, आदित्यः, गीर्वाणः।

(viii) मनुष्यः, मनुजः, मानवः, नरः, दैत्यः, दानवः।

(ix) भूधरः, अद्रिः, पर्वतः, गिरिः, अचलः।

(x) अब्धिः, समुद्रः, सागरः, जलधिः, अर्णवः, रत्नाकरः इत्यादयः।

(घ) स्त्रीलिङ्गे

(i) अवनिः, भूमिः, ग्लानिः, गतिः, मतिः, स्मृतिः, लक्ष्मीः,

(ii) ऊनविंशतितः (19) प्रारभ्य नवनवतिपर्यन्तं सर्वे संख्यावाचकाः शब्दाः स्त्रीलिङ्गे एकवचने प्रयुज्यन्ते– विंशतिः बालिकाः (20 लड़कियाँ)

(iii) लघुता, महत्ता, गुरुता, मृदुता इत्यादयः

(iv) भूमिः, लता, नदी,वनिता इत्यादीनां पर्यायाः यथा

(क) भूमिः, अचला, वसुधा, वसुन्धरा, पृथ्वी, अवनिः

(ख) लता, वल्ली, वल्लरी, वीरुद्,

(ग) नदी, सरित्, तरंगिणी, तरिणी, आपगा,

(घ) वनिता, योषित्, योषा, नारी, महिला, वामा

(v) रुचिः, वीचिः, छविः, रात्रिः, कृषिः, ओषधिः,
अंगुलिः, आपद्, विपद्, शरत्, परिषद्,

(vi) तारा, ज्योत्स्ना, शलाका, नौः, धारा

नित्यं स्त्रीलिङ्गे बहुवचने

अप्, सुमनस्, समा, सिकता, वर्षा, अप्सरस् एते शब्दाः नित्यं स्त्रीलिंगे बहुवचने प्रयुज्यन्ते।

(ङ) नपुंसकलिंङ्गे

(i) गमनम्, भवनम्, तरणम्, स्मरणम्, गीतम्

(ii) गुरुत्वम्, महत्त्वम्, सख्यम्, काष्र्यम्, धावल्यम्

(iii) कर्मन्, चर्मन्, वर्त्मन्, यशस्, पयस्, मनस्, तपस्

(iv) पत्रम्, छत्रम्, मित्रम्

(v) शतात् आरभ्य सर्वे संख्यावाचकाः शब्दाः– शतम्, सहस्रम्, लक्षम्, अयुतम्, नियुतम्।

(vi) फलानि– आम्राणि, आमलकानि,

(vii) जलवाचिनः– वारि, सलिलम्, पयस्, उदकम्, तोयम्, नीरम्, अम्बु

(viii) अङ्गानां नामानि– मुखम्, वदनम्, आननम्, नयनम्, चक्षुः, वक्त्रम्,

(ix) वनम् धनम्, द्रव्यम्, वित्तम्, हिरण्यम्, स्वर्णम्,

(x) कुसुमम्, पुष्पम्, प्रसूनम्

(xi) वियत् जगत्, नवनीतम्, अनृतम्, अमृतम्,
वित्तम्, रजतम्, पीठम्, अङ्गम्, बीजम्, धान्यम्, अपत्यम्, मूल्यम्

- केचन शब्दाः पुल्लिङ्गे, स्त्रीलिङ्गे उभयोः एव प्रयुज्यन्ते यथा मणिः, मसिः, मरीचिः सिन्धुः, रज्जुः,
- केचन शब्दाः पुल्लिङ्गे, नपुंसकलिङ्गे च भवन्ति– घृत, शृंग, उद्यम, कवच, औषध, दण्ड, खण्ड, द्वीप, विमान, इत्यादयः



11.7 पाठान्तप्रश्नाः

1. अधोलिखितानां शब्दानां वर्णविश्लेषणं कुर्वन्तु

   (i) समाहर्तुम् = ——————————

   (ii) प्रवृत्तः = ——————————

   (iii) क्रीडाक्षेत्रे = ——————————

   (iv) दुर्व्यवहारः = ——————————

   (v) यादृशम् = ——————————

2. सुबन्तानि तिङन्तानि अव्ययपदानि च पृथक् कृत्वा लिखन्तु

   किन्तु, धर्मगुरुभिः, राष्ट्रम्, संजायते, सन्ति, राजानः, प्रजापतिः, इति, अपि, काले, गुरुः, शास्त्राणि, न, अशान्तिः, अहो, भवति, उत्पादयन्ति,

3. अधोलिखितानि पदानि मेलयित्वा वाक्यानि रचयन्तु

   (i) राष्ट्रे च समाजे च, दुष्टैः भवति अशान्तिः।

   (ii) दुष्टानां, कृते, जनानाम्, अपि, नास्ति, भयम्, यमस्य।

   (iii) प्रधानमन्त्री, अस्माकं, निपुणः, अतीव।

   (iv) शिक्षिका, मम, पाठयति, व्याकरणं, विद्यालये।

   (v) बहूनि, सन्ति, उद्याने, पुष्पाणि, भ्रमराः गु×जन्ति, येषाम्, उपरि।

4. अधोलिखितान् विषयान् अधिकृत्य अनुच्छेदानां रूपरेखां रचयन्तु

   मम विद्यालयः, मम शिक्षिका, वर्षर्तुः

5. अधोलिखितरूपरेखायाः कः विषयः?

   जलम् एव जीवनम्, जलस्य स्रोतांसि–निर्झराः, नद्यः, कूपाः, तडागाः। उपयोगः–पानार्थम्, कृषिकृते, तद्विना जीवनमेव असम्भवम्। संरक्षणम् आवश्यकम्।

6. अधोलिखितानि दश वाक्यानि अनुच्छेदक्रमे न सन्ति तानि क्रमेण लिखित्वा अनुच्छेदं रचयन्तु।

   (क) दिसम्बरमासे समुद्रे महान् भूकम्पः जातः।

   (ख) यथा–यथा तरंगाः अग्रे गच्छन्ति तथा तथा तेषां वेगः वर्धते स्म।

   (ग) सर्वे जनाः मुक्तहस्तेन इदानीं सहायतां कुर्वन्ति।

   (घ) आश्चर्यम् मृतेषु कश्चिदपि पशुः न आसीत्।

   (ङ) पूर्वदिने रविवासरः आसीत्।

   (च) केचन प्रातः भ्रमणाय तत्र गताः आसन्।

   (छ) समुद्रतरङ्गैः संहारताण्डवम् आरब्धम्।

(ज) लक्षाधिकाः मानवाः समुद्रेण नीताः।

(झ) दक्षिणप्रदेशानां तीरेषु तरंगाणाम् आक्रमणम् अभवत्।

(ट) तीरवासिनः जनाः आनन्देन सुप्ताः आसन्।

7. उपर्युक्त–अनुच्छेदस्य कृते समुचितं शीर्षकं लिखन्तु।

8. उपर्युक्त–अनुच्छेदस्य कृते समुचितां सूक्तिं चित्वा योजयन्तु

(i) श्वः कार्यम् अद्य कुर्वीत। (अग्नि पु. 159.8)

(ii) व्ययाधिकं न कुर्वीत। (अग्नि पु. 65.5)

(iii) विवेकं हन्ति अहंकारः। (नारद पु 1. 7.30)

(iv) दया न जायते यस्य स रक्षः (राक्षसः) इति मे मतिः। (स्कन्दपुराणम् 7 338.20)

(v) अर्थवान् इह यो लोके परस्यार्थं प्रयच्छति। (शिवपुराणम् 1 95.17)

9. चित्रं दृष्ट्वा अनुच्छदं लिखत।

11.8 उत्तराणि

पाठगतप्रश्ना

11.1 1. वर्णाः – य्, स्, क्, ज्, अ, उ,

प्रातिपदिकानि – (शब्दाः)– नदी, भ्रातृ, तद्..., गो, यत्, किम्,

धातवः – वद्, गच्छ्, घ्रा, भू, नम्, लिख्

सुबन्तानि – बालिके, यः, सवितुः, सूर्याय, सः, गौः

तिङन्तानि – पठत, वद, रोचते, गच्छ, जिघ्रति, नम

अव्ययानि – च, अद्य, ह्यः, बहिः, परश्वः, श्वः

11.2 1. असम्बद्धवाक्यानि

(i) सः चिन्तयति अहं सर्वेभ्यः दीनः इति।

(ii) सः सर्वदा सर्वेषां सेवां कर्तुं तत्परः भवति।

2. अहंकारः विनाशकः

3. ज्ञानविघ्नः अहंकारः



4. (i) हन्ति मानः महद् यशः (महाभारतम्)

(ii) त्यक्त्वा अभिमानं पुरुषो जानाति परमेश्वरम् (शिवपुराणम्)

11.3 1.क) परिश्रमेण सुखप्राप्तिः, अलसाः कष्टम् अनुभवन्ति, महापुरुषाः– रामः, कृष्णः, सर्वे परिश्रमशीलाः, सुप्तस्य सिंहस्य मुखे भोजनं न गच्छति। उद्यमविषयकसूक्तयः।

1.ख) स्वयं लिखत।

2. भारतम् अस्माकं जन्मभूमिः। अस्य उत्तरदिशायां हिमालयपर्वतः विराजते। तिसृषु दिशासु सागराः अस्य पदप्रक्षालनं कुर्वन्ति। अनेका नद्यः अत्र जनानां तृषां शाम्यन्ति। मध्ये विन्ध्याचलः विराजते। अस्य पुरातना दिव्या महती संस्कृतिः। अस्मिन् देशे महान्तः ऋषयः, कवयः अभवन्। वेदाः, उपनिषदः, पुराणानि, काव्यानि शोभन्ते। अस्य देशस्य वीरांगनाः देशभक्ताः स्वतन्त्रतायुद्धे भागं गृहीत्वा देशं स्वतन्त्रम् अकारयन्। अस्माकं देशः महान् अस्ति।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

3. स्वयं लिखत।

11.4 1. (ii) अ + र् + थ् + अः

(iii) च् + अ + क् + र् + अ + म्

(iv) प् + र् + अ + क् + आ + श् + अः

(v) व + इ + श् + र् + आ + म् + अः

(vi) ब् + र् + अ + ह् + म् + अ + व् + इ + द् + य् + आ

(vii) च् + इ + ह् + न् + अ + म्

(viii) क् + इ + ञ् + च् + इ + त्

(ix) उ + द् + ध् + आ + र् + अः

(x) श् + ऋ + ङ् + ख् + अ + ल् + आ

2. (i) गच्छन्ति (ii) पठ्यते (iii) बालिकया (iv) बालिकाभ्याम् (v) फलम्

11.7 पाठान्तप्रश्नाः

1. (i) स् अ म् आ ह् अ र्, त्, उ, म्

(ii) प् र् अ व् ऋ त् त् अः

(iii) क् र् ई ड् आ, क् ष् ए त् र् ए

(iv) द् उ र् व् य् अ व् अ ह् आ र अः

(v) य् आ द् ऋ श् म्

2.

सुबन्तानि	तिङन्तानि	अव्ययपदानि
धर्मगुरुभिः	संजायते	किन्तु
राष्ट्रम्	सन्ति	

राजानः	भवति	न
प्रजापतिः	उत्पादयन्ति	इति
काले		अपि
गुरुः		अहो
शास्त्राणि		
अशान्तिः		

3. (i) राष्ट्रे समाजे च दुष्टैः अशान्तिः भवति।
   (ii) दुष्टानां जनानां कृते यमस्य भयम् अपि नास्ति।
   (iii) अस्माकं प्रधानमन्त्री अतीव निपुणः।
   (iv) मम शिक्षिका विद्यालये व्याकरणं पाठयति।
   (v) उद्याने बहूनि पुष्पाणि सन्ति येषाम् उपरि भ्रमराः गुंजन्ति।
4. (i) विद्यालयः, भवनम्, प्राङ्गणम्, वाटिका, क्रीडाक्षेत्रम्, अध्यापकवर्गः, कक्षाः, छात्रसंख्याः, प्रयोगशालाः विशिष्टाः, गतिविधयः।
   (ii) शिक्षिका, विषयः, व्यक्तित्वम्, छात्रैः सह व्यवहारः, विशिष्टानि संस्मरणानि।
   (iii) षड् ऋतवः, ग्रीष्मर्तुः, वर्षर्तुः, मासाः, प्राकृतिकं वर्णनम्, स्वकीयाः अनुभवाः।
5. जलस्य उपयोगित्वम्/आपः सर्वस्य भेषजम्/जलस्य संरक्षणं किमर्थम्?
6. (क) दिसम्बरमासे समुद्रे महान् भूकम्पः जातः।
   (झ) दक्षिणप्रदेशानां तीरेषु तरंगाणाम् आक्रमणम् अभवत्।
   (ख) यथा यथा तरंगाः अग्रे गच्छन्ति, तथा तथा तेषां वेगः वर्धते स्म।
   (ङ) पूर्वदिने रविवारः आसीत्।
   (ट) तीरवासिनः जनाः आनन्देन सुप्ताः आसन्।
   (च) केचन प्रातः भ्रमणाय तत्र गताः आसन्।
   (छ) समुद्रतरंगैः संहारताण्डवम् आरब्धम्।
   (ज) लक्षाधिकाः मानवाः समुद्रेण नीताः।
   (घ) आश्चर्यं मृतेषु कश्चिदपि पशुः न आसीत्।
   (ग) सर्वे जनाः मुक्तहस्तेन सहायतां कुर्वन्ति।
7. समुद्रतरङ्गाणाम् आक्रमणम्, समुद्रे भूकम्पः, तरङ्गाणां वेगः
8. दया न जायते यस्य सः रक्षः इति स्मृतः।
9. स्यं चित्रं दृष्ट्वा लिखत।

309sk12

12
संवादलेखनम्

चिन्तयत, वयं भाषायाः प्रयोगं कदा कुर्मः? नूनं यदा वयं किमपि वक्तुम् इच्छामः। वचनार्थम् अन्यस्य जनस्य आवश्यकता भवति अपि च सन्दर्भस्य अपि अपेक्षा जायते। यद्यपि वयं चिन्तने अपि भाषायाः प्रयोगं कुर्मः परन्तु संवादे तु अन्यः जनः अपेक्षितः भवति। वयं येन सह वार्तालापं कुर्मः तस्य आवश्यकतानुसारं परिस्थित्यनुसारं च भाषायां परिवर्तनं भवति। यदि अस्माकं गृहे कश्चित् महात्मा आगच्छति तदा अस्माकं व्यवहारः विनम्रः भवति। विराज्यताम्, आसनं स्वीकुरुत इत्यादि। परन्तु यदि कश्चिद् भिक्षुकः आगच्छति वयं किमपि द्वारे दत्त्वा गृहे प्रविशामः। केचन तु भिक्षुकं दृष्ट्वा अपशब्दान् अपि वदन्ति। अतः सन्दर्भानुसारं भाषायां परिवर्तनं भवति। अस्मिन् पाठे वयं संस्कृतभाषायां समुचितसंवादलेखनस्य अभ्यासं करिष्यामः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- संवादलेखनस्य कृते अपेक्षिततत्त्वानां परिचयं प्राप्स्यति;
- संवादे एकपक्षं पठित्वा द्वितीयं पक्षं पूरयितुं समर्थः भविष्यति;
- चित्रं दृष्ट्वा कल्पनया संवादलेखनं कर्तुं शक्ष्यति;
- संवादलेखने व्याकरणदृष्ट्या शुद्धभाषाप्रयोगं कर्तुं शक्तः भविष्यति;
- विभिन्नप्रदत्तसन्दर्भेषु संवादान् लेखितुं शक्तः भविष्यति।

क्रियाकलापः

अधोलिखितं चित्रं पश्यतु। अत्र एकः फलविक्रेता फलानि विक्रीणाति।

12.1

भवान् फलानि क्रेतुं फलविक्रेतुः आपणं गच्छति। नूनं तत्र कश्चित् संवादः भविष्यति एव। अधोलिखिते संवादे वाक्यद्वयं समीचीनं नास्ति। तत् चित्वा तस्य समक्षम् असमीचीनम् (×) इति चिह्नेन प्रदर्शयत।

संवादः असमीचीनम्

1. अयि भोः! एककिलोमितम् आम्राणि ददातु।
2. जम्बुफलानि कथं दीयन्ते?
3. आलुकानि तु समीचीनानि न सन्ति।
4. द्वे नारिकेलफले अपि ददातु।
5. प्रतिनारिकेलफलं पंचदशरूप्यकाणि ददातु भवान्।
6. सर्वमाहत्य कतिरूप्यकाणि ददामि?
7. केवलं सप्ततिः रूप्यकाणि ददातु।
8. एतानि शतं रूप्यकाणि स्वीकरोतु।
9. अवशिष्टां राशिं च प्रत्यर्पयतु।
10. किमपि अन्यत् फलं स्वीकरोतु।
11. फलापणे विविधानि फलानि सन्ति।

पठितानि एतानि वाक्यानि, किं ज्ञायते किं वाक्यद्वयम् असमीचीनम् अस्ति। शोभनम्। तृतीयं वाक्यम् असमीचीनम् यतः फलविक्रेतुः आपणे प्रायः आलुकानि न भवन्ति। अपि च एकादशं वाक्यम् अपि संवादार्थम् उपयुक्तम् नास्ति। कथम्? वयम् अत्र वर्णनं न कुर्मः, अतः परिस्थित्यनुसारम् एतत् वाक्यम् असमीचीनम् एव।

तर्हि, पश्यामः तावत् संवादलेखने केषांचित् तत्त्वानाम् अवधानम् विशेषतया अपेक्षितम्।



12.1 प्रथमः अंशः

संवादार्थम् अपेक्षितानि आवश्यकतत्त्वानि

(i) सन्दर्भः

(ii) पात्राणि

(iii) विषयवस्तु

(iv) परिवेशः/वातावरणम्

(v) पात्रानुसारं भाषासङ्गतिः

(vi) उपयुक्तसूक्तीनां/पद्यानां/उद्धरणानां ज्ञानम्

(i) सन्दर्भः

भवन्तः जानन्ति एवं संवादार्थं सन्दर्भः महत्त्वपूर्णः वर्तते यथा रुग्णस्य चिकित्सकस्य मध्ये, आपणे ग्राहकस्य विक्रेतुः मध्ये, पत्रालये, चिकित्सालये, किशोरावस्थाम् अधिकृत्य छात्रयोः मध्ये इत्यादयः बहवः सन्दर्भाः भवितुं शक्नुवन्ति। सन्दर्भानुसारम् एव भाषायाः प्रयोगे वाक्यचयनं पदचयनं च करणीयम्।

(ii) पात्राणि

ननु संवादः तु द्वयोः पात्रयोः मध्ये एव प्रवृत्तः भविष्यति। अतः छात्रैः/छात्राभिः सह शिक्षिकायाः अपि वार्तालापः भवितुं शक्नोति, अथवा त्रिषु जनेषु अपि कामपि समस्याम् अधिकृत्य संवादः भवितुं शक्नोति। गुरु–शिष्ययोर्मध्ये, पिता–पुत्रयोः मध्ये, भ्राता–भगिन्योः मध्ये अपि अथवा अपिरिचितेषु, मार्गेऽपि केनापि सह संवादः भवितुं शक्नोति। पात्रानुसारं भाषायाः प्रयोगः अपेक्षितः।

(iii) विषय–वस्तु

पात्राणां संवादस्य विषयः कः इत्यापि विचारणीयः। केचन विषयाः एवं भवितुं शक्नुवन्ति– व्यायामस्य लाभाः, प्रातः भ्रमणस्य लाभः, अतिथेः सम्मानम्, परीक्षा, ऐतिहासिकयात्रा, शाकाहारः, गङ्गायाः प्रदूषणम् इत्यादयः।

(iv) संवादः कस्मिन् वातावरणे प्रचलति इत्यपि आवश्यकम्। युद्धे श्रीकृष्ण–अर्जुनयोः संवादः, अथवा प्रातः काले समुद्रतटे अथवा उद्याने अथवा गिरिशिखरे विवाहसमारोहे, विद्यालय–कक्ष्यायाम् प्रवृत्तेषु संवादेषु भिन्नता भविष्यत्येव।

(v) भाषावैविध्यम्–संवादे भाषा पात्रानुसारं परिवर्तते। संस्कृतनाटकेषु स्त्रीजनाः अथवा अशिक्षिताः प्राकृतभाषायाः प्रयोगमेव कुर्वन्ति। संवादे प्रयुक्तया भाषया शब्दावल्या च पात्रस्य चारित्रिकं वैशिष्ट्यं सिद्धं भवति।

(vi) सुभाषितानां / सूक्तीनां / पद्यानां प्रयोगः

संवादे यदा पात्राणि स्वाभिप्रायं सिद्धं कर्तुं किमपि सुभाषितं श्लोकं पद्यं वा उदाहरणस्वरूपेण उच्चारयन्ति तदा तस्य पात्रस्य वाक्कौशलं वैदुष्यं स्मृतिः च स्पष्टीभवति।

(क) इदानीं वयम् उदाहरणरूपेण एकं संवादं पठामः।

सारिका — देविके! पश्य, मम नूतनं परिधानमपि लघु जातम्।

देविका — आम्, सारिके! मया सह अपि एषा समस्या वर्तते। षण्मासान्तरे एव मम वस्त्राणि लघूनि जायन्ते।

लतिका — पश्यत, पश्यत! मम तु पादरक्षेऽपि लघुनी जाते।

(आचार्या प्रविशति, छात्राः उत्तिष्ठन्ति)

सर्वाः छात्राः — आचार्ये! वयं नमामः।

आचार्या — चिरं जीवत। उपविशत। कस्मिन् विषये चिन्ता वर्तते?

छात्रा — आम् आचार्ये! अस्माकं परिधानं शीघ्रं लघुतरं जायते। चिन्तयामि कथम् एतत्?

आचार्या — किशोरावस्थायाम् एषा स्वाभाविकी एव प्रक्रिया। बालकानां शरीरेषु रोमाणि जायन्ते। शरीरं वर्धते। शरीराङ्गेषु परिवर्तनं जायते। स्वभावः परिवर्तते। नूतनाः अभिलाषाः भवन्ति। अतः चिन्ता न कार्या।

चित्र 12.2

पश्यन्तु अत्र कः सन्दर्भः? किशोरावस्थायां शरीरे भवितव्यानि परिवर्तनानि।

कति पात्राणि? तिस्रः छात्राः।

किं विषयवस्तु? यत् विषयम् अधिकृत्य (शरीरपरिवर्तनं, स्वरूपम् आदि) लिख्यते।

किं वातावरणम्? कक्षायाः

किं भाषावैविध्यम्? छात्राणां व्यवहारः उत्तिष्ठन्ति, प्रणमन्ति, सम्बोधनानां प्रयोगः।

(ख) एकम् अन्यत् उदाहरणं पश्यामः

युवकः अयि सुमुखि! किमर्थं पदातिः गच्छसि? मया सह 'बाइकयानस्य उपरि उपविश। त्वां यथेष्टं नेष्यामि।

स्मिता अरे! त्वम् पूर्वं स्वहस्तम् अपसारय। माम् प्रति ईदृशी सहानुभूतिः कथम्? न जानामि त्वाम्।

युवकः स्मिते! त्वम् अतीव सुन्दरी असि। हृदयेन त्वां वा×छामि। त्वदर्थे अहं किमपि कर्तुं शक्नोमि।

स्मिता एषः तव मनोविकारः। तव विवेकः गतः। कयापि बालिकया सह किम् उचितः एषः व्यवहारः?

(तदैव कश्चन युवकः सोमेशः आगच्छति)

चित्र 12.3

सोमेशः का वार्ता विद्यते? अनेन किं कृतम्?

स्मिता एषः प्रतिदिनं माम् प्रति किमपि – किमपि कथयति। अद्यापि ....

सोमेशः अरे! दुष्ट! त्वं कथं न लज्जसे? किं तव भगिनी नास्ति? तव मातापितरौ धन्यौ ईदृशेण पुत्रेण।

युवकः न, न, न .... अहं तु किमपि न कथयामि। अहं तु केवलम् एतस्याः साहाय्यं करोमि।

सोमेशः असत्यम्! पुलिसजनम् आह्वयामि। (चलदूरवाणीं कर्णे ददाति।)

युवकः अ अ अ क्षमस्व माम् क्षमस्व। पुनः कदापि एतां प्रति दृष्टिपातमपि न करिष्यामि।

सोमेशः स्मिते! त्वम् अपि ईदृशं दुष्टं प्रति दृढ़तया अधिक्षिपतु। मनोबलेन तस्य दुराग्रहं निराकरोतु। त्वम् अद्य सबला असि। 'कण्टकं कण्टकेनैव' इति सिद्धन्तः पालनीयः।

स्मिता सत्यम्, प्रतिरोद्धुं यतिष्ये। धन्यवादः तव। अरे! प्रेमरोगिन्। अभद्रम् आचरणं त्यज। अध्ययने परिश्रमे च तत्परः भव। अलम् कदाचारेण शिष्टः भव। **यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः** इति। गम्यताम्

युवकः धन्यवादः। भवत्या मम ज्ञाननेत्रे उन्मीलिते।

अत्र उपर्युक्त–संवादे भवद्भिः अन्यः एकः सन्दर्भः दृष्टः? आम्, सत्यम् अपरिचितयुवकेन महिलां प्रति अभद्रव्यवहारः।

अत्र भाषावैविध्यमपि दृश्यते। अमर्यादितव्यवहारात् परं स युवकः स्तब्धः भयभीतः च भवति। तदा स व्याकुलतया 'अ अ न न' इति वदति।

पाठगतप्रश्नाः 12.1

1. संवादे अधोलिखिततत्त्वेषु किं तत्त्वं न परिगण्यते? तत् रेखाङ्कितं करोतु।
   भाषावैविध्यम्, स्वाभाविकता, पात्राणि, विस्तृतवर्णनानि, सन्दर्भः, अनुच्छेदाः, वातावरणम्
2. संवादद्वये प्रयुक्तानि पंच सम्बोधनपदानि चित्वा लिखत।
3. उपर्युक्तसंवादद्वये पात्रैः सह चारित्रिकं वैशिष्ट्यं मेलयत।

'अ'	'ब'
(क) सारिका	(i) उच्छृंखलः मर्यादाहीनः
(ख) आचार्या	(ii) उत्तरदायित्वनिर्वाहे जागरूकः
(ग) स्मिता	(iii) किं कर्तव्यविमूढता
(घ) युवकः	(iv) विदुषी, मनोविज्ञानविशेषज्ञा
(ङ) सोमेशः	(v) शारीरिकवृद्धिम् अधिकृत्य चिन्ताकुला

12.2 द्वितीयः अंशः

(1) संवादे वाक्यानां सन्दर्भं ज्ञात्वा एकपक्षस्य कृते रिक्तस्थानपूर्तिः।

अस्माभिः दृष्टं यत् संवादवाक्यानि परस्परसम्बद्धानि भवन्ति। अधोलिखितसंवादयोः एकः संवादः दिनेश–उमेशयोः मित्रयोः मध्ये अस्ति द्वितीयः– रुग्णस्य चिकित्सक्य च मध्ये प्रवर्तते। अत्र एकपक्षः प्रदत्तः। वयं द्वितीयं पक्षं पूरयितुं प्रयत्नं करिष्यामः।

क्रियाकलापः

भवतः नाम दिनेशः। भवतः जन्मोत्सवः अस्ति। भवतः मित्रम् उमेशः। एतं कार्यक्रमम् उपलक्ष्य संवादं पूरयत।

दिनेशः अद्य मम जन्मोत्सवः अस्ति। त्वया अवश्यमेव आगन्तव्यम्।

उमेशः *कुत्र कदा च* जन्मोत्सवः भविष्यति?



दिनेशः गृहे एव सायं सप्तवादने।

उमेशः *किं लतिका अपि आगमिष्यति ?*

दिनेशः आम्, लतिका अपि आगमिष्यति।

उमेशः किम् *केककर्तनम् अपि भविष्यति ?*

दिनेशः केककर्तनम् न, हवनं कीर्तनं च भविष्यति। पश्चात् प्रीतिभोजः।

उमेशः शोभनम्।

दिनेशः जन्मदिने अहं किमपि *उपहारं न स्वीकरिष्यामि*।

उमेशः अरे! भवान् उपहारं न स्वीकरिष्यति। केवलं शुभकामनाः एव। प्रशंसनीयः विचारः।

इदानीम् अधोलिखितसंवाद पठत–

रुग्ण–वैद्ययोः मध्ये संवादः

रुग्णः वैद्यमहोदय! महती उदरवेदना अस्ति। हा! किं करोमि? शीघ्रम् औषधं ददातु।

वैद्यः (i) .....

रुग्णः ह्यः रात्रौ आरब्धा।

वैद्यः (ii) .....

रुग्णः प्रातःकाले मम मित्रं किमपि पेयं दत्तवान्। तत् पीत्वा एव उदरे भयंकरज्वालाः उत्पन्नाः।

वैद्यः (iii) हुं! ज्ञातम् .....

रुग्णः एवम् किल? किं तत् मादकं द्रव्यमासीत्? इतः परं तस्य मित्रस्य संगतिमेव त्यक्ष्यामि।

वैद्यः (iv) .....

रुग्णः आम्! इतः परं सात्त्विकपदार्थान् एव स्वीकरिष्यामि। सत्यमेव– ''संसर्गजा दोषगुणाः भवन्ति।''

वैद्यः (v) .....

रुग्णः प्रतिदिनं गुलिकाद्वयं भोजनान्ते सेवनीयम् किम्? आम्, गृह्णामि।

पाठगतप्रश्नाः 12.2

भवतां सम्भावितानि उत्तराणि अधः मंजूषायां लिखितानि परन्तु तत्र क्रमः नास्ति। समुचितं वाक्यं चित्वा संवादं पूरयत।

(क) त्वया किमपि मादकं द्रव्यं पीतं स्यात्।

(ख) औषधं ददामि। भोजनान्ते उष्णजलेन गुलिकाद्वयं सेवस्व।

(ग) कदा आरब्धा वेदना?

(घ) रात्रौ किं किं भक्षितम्?

(ङ) इदानीं केवलं सात्त्विकम् आहारम् एव स्वीकुरु। ''रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः।'' इति गीतायाम् उक्तम्।

12.3 तृतीयः अंशः

चित्रं दृष्ट्वा संवादः

भवद्भिः दृष्टं यत् संवादे सन्दर्भस्य आवश्यकता भवति। एषः सन्दर्भः चित्ररूपेण अपि भवितुं शक्नोति। किमपि चित्रं वयं समाचारपत्रेषु पश्यामः। तत् दृष्ट्वा च आश्चर्यचकिताः भूत्वा वार्तालापं कुर्मः। एतस्मिन् परिवारे भ्राता भगिनी च अधः प्रदत्तं चित्रं दृष्ट्वा परस्परं वार्तालापं कुरुतः।



12.4

ऋषभः ऋषिके! पश्य पश्य समाचारपत्रे एतत् चित्रम्।

ऋषिकाः किं किम् अस्ति तत्र?

ऋषभः पश्य, सर्वे जानन्ति अस्माकं जीवने वृक्षाणां महत्त्वम् तथापि भवनानां निर्माणार्थं सर्वे वृक्षाः पातिताः।

ऋषिकाः अहो सत्यम्, अत्याहितम्। अयं तु महाविनाशः एव। सर्वे वृक्षाः कथं नृशंसतया पातिताः।

ऋषभः आम्! एवं प्रतीयते यत् सर्वा भूमिः शवैः पूरिता।



ऋषिकाः सत्यम्। यदि वयम् पर्यावरणस्य विनाशं करिष्यामः तर्हि अस्माकं जीवनमेव दुष्करं भविष्यति।

ऋषभः आम्! मया पठितम्– वृक्षा सत्पुरुषाः इव सर्वं जनेभ्यः प्रयच्छन्ति, छाया च, फलानि च, काष्ठं च। अपि च पक्षिणां तु आश्रयः एव वृक्षेषु भवति।

ऋषिकाः आम्। अस्मिन् चित्रे एकोऽपि खगः नैव दृश्यते।

ऋषभः न जाने कदा मानवः प्रकृतेः संरक्षणं स्वं परमकर्तव्यम् इति ज्ञास्यति। मया तु श्रुतं विषवृक्षोऽपि न छेद्यः।

एवमेव भवन्तः समाचारपत्रेभ्यः चित्राणि संगृह्य वार्तालापं लेखितुं शक्नुवन्ति।

क्रियाकलापः

अधोलिखितसंवादे एकपक्षं पूरयत

प्रकाशः अम्ब! मम विद्यालये छात्राः भ्रमणाय गच्छन्ति।

माता (i) .....

प्रकाशः अधिकं धनं नापेक्षितम्। एकस्य कृते 150 रूप्यकाणि।

माता (ii) .....

प्रकाशः प्रथमं विद्यालयतः पक्षिधामं गमिष्यामः। ततः अल्पाहारं कृत्वा अक्षरधामं गमिष्यामः।

माता (iii) .....

प्रकाशः मम कक्षयायाः सर्वे एव छात्राः गमिष्यन्ति।

माता (iv) .....

प्रकाशः श्वः एव सर्वे धनं दास्यन्ति।

माता (v) .....

प्रकाशः धन्यवादः। भवत्या पंचाशत् रूप्यकाणि अधिकानि एव दत्तानि।

अत्र मातापक्षस्य संवादवाक्यानि अक्रमेण दत्तानि सन्ति। तानि भवान् क्रमेण लिखतु। विचारयतु यत् भवता लिखितः क्रमः कथम् उचितः अस्ति?

(क) कदा धनं दातव्यम्?

(ख) स्वीकरोतु। एतत् द्विशतम्।

(ग) कियत् धनम् अपेक्षितम्?

(घ) कति छात्राः गमिष्यन्ति?

(ङ) कुत्र कुत्र गमिष्यथ?

पाठगत प्रश्नाः 12.3

1. अधोलिखितं चित्रं दृष्ट्वा द्वयोः मित्रयोः 'रवि–केशवयोः' संभावितं वार्तालापं प×च–षड् वाक्येषु लिखत। मंजूषायां सहायकपदानि दत्तानि



चित्र 12.5

रविः .....

केशवः .....

मंजूषा

आकाशः, मेघाः, वृक्षाः, सरोवरः, उभयतः, नीरवता, शान्तिः, जले प्रतिबिम्ब, पृष्ठे भवनम्, वृक्षे पुष्पाणि।

12.4 चतुर्थः अंशः

संवादे शुद्धभाषाप्रयोगः

अस्माभिः केचन संवादाः पठिताः, लेखनस्य अभ्यासः च कृतः परन्तु भाषाम् अधिकृत्य केचन बिन्दवः ध्यातव्याः एव।

- संवादे प्रत्येकं कथनं परस्परं सम्बद्धं, तर्कपूर्णं च भवेत्।
- भाषा शुद्धा भवेत्, क्रियापदानि कर्तृपदानुसाराणि भवेयुः।
- विशेषणेषु सा एव विभक्तिः भवेत् या विशेष्येण सह प्रयुज्यते यथा रम्यम् उद्यानम्, रम्या वाटिका, रम्यः सरोवरः इत्यादयः।
- भाषा पात्रानुसारं भवेत्।



क्रियाकलापः

अधोलिखितसंवादे काश्चन भाषागताः अशुद्धयः रेखाङ्किताः सन्ति। तासां स्थाने शुद्धभाषाप्रयोगः करणीयः।

माता पुत्र! भवान् सर्वदा एव (i) क्रीडसि, कथम् उत्तीर्णं (ii) भविष्यसि?

पुत्रः (iii) अम्बा! किमर्थम् एवं (iv) वदति? अहं सर्वदा एव न (v) क्रीडति? सायं क्रीडामि, रात्रौ पठामि।

माता दर्शय गतमासस्य परीक्षाफलम्। अहं पश्यामि तव प्रगतिः पठने (vi) कीदृशः अस्ति।

पुत्रः आम्! इदानीम् एव दर्शयिष्यामि। (आनीय) पश्यतु अहम् एव प्रथमस्थानं (vii) प्राप्तवती।

माता भवतु पुत्र! इतः परं मम चिन्ता (viii) अपगतः।

अधुना बोधामः

इदानीं पश्यामः अत्र शुद्धपदानि कानि भविष्यन्ति?

(i) क्रीडसि, क्रीडति भवान् इति शब्दस्य योगे प्रथमपुरुषस्य क्रिया प्रयुज्यते। एवमेव

(ii) भविष्यति न तु भविष्यसि।

(iii) अम्बा, अम्ब सम्बोधने 'अम्ब' शब्दस्य प्रयोगः भवति।

(iv) वदति शुद्धं भवेत् यदि कर्तृपदं 'भवती' अस्ति।

(v) क्रीडति, क्रीडामि यतः कर्तृपदं अस्ति 'अहम्'।

(vi) कीदृशः न, कीदृशी, प्रगतिपदस्य विशेषणम्।

(vii) प्राप्तवती, प्राप्तवान् यतः पुत्रः 'कर्ता' पुल्लिंगे अस्ति।

(viii) अपगतः न अपगता यतः चिन्तापदं स्त्रीलिंगे अस्ति।

पाठगतप्रश्नाः 12.4

अधोलिखितसंवादे रेखांकितपदानां स्थाने शुद्धपदानि लिखत।

पुत्रः तात! अद्य प्रदर्शिनीं द्रष्टुं किं नगरं प्रति गच्छाम?

पिता प्रदर्शिनी कुत्र आयोजितः (i)?

पुत्रः 'प्रगतिमैदान' इति स्थाने खलु प्रदर्शिनी अस्ति।

पिताः शोभनम्। अहं सायंकाले शीघ्रम्, आगमिष्यति (ii) ततः गमिष्यामः।

मंजुला (iii) पिता! अहं तु नूतना (iv) परिधानं क्रेष्यामि।

माता आम्। अहमपि नवीनं (v) शाटिकां क्रेष्यामि।

पिता (vi) पुत्रः! किं प्रदर्शिनी परिधानानाम् अस्ति।

पुत्रः नहि नहि पितः! सा तु पुस्तकानाम् अस्ति। वयं नूतनं (vii) ज्ञानवर्धकानि पुस्तकानि क्रेष्यन्ति (viii)।

12.5 किम अधिगतम्

- भाषा मूलतः संवादरूपेण विकसति।
- संवादे पात्राणि भवन्ति।
- संवादः सन्दर्भानुसारं भवति।
- संवादे भाषा पात्राणां योग्यतानुसारं भवति।
- संवादे शुद्धभाषायाः प्रयोगः आवश्यकः।
- संवादे कथितानां वाक्यानां सहायतया पात्राणां चरित्रचित्रणं भवन्ति।

12.6 योग्यताविस्तारः

संवादः विचाराणाम् अभिव्यक्त्यै, भाव–प्रकाशनाय, तर्क–वितर्काभ्यां ज्ञानवर्धनाय प्रमुखः सहजः माध्यमः अस्ति। महाकाव्येषु, लोककथासु लोकजीवने, प्रत्येकं क्षेत्रे विविधं संवादं पश्यामः। अत्र लोककथाधृतम् ज्ञानवर्धकम् एव संवादम् बोधन्तु।

(मणिबल्लभः मणिपुरनगरस्य शासकः आसीत्। सः धार्मिकः नीतिमान् बुद्धिमान् चासीत् परन्तु सः महान् गर्विष्ठः। एकदा सः पार्वतीपुरं नामकं ग्रामं गतः। तत्र कश्चन मतिमान् मेषपालः मिलितः। तेन सह ज्ञानवर्धकः रोचकः च एवं संवादः जातः)

मणिवल्लभः भोः मेषपाल! जगति सर्वस्मात् कान्तियुक्तं किम्?

मेषपालः राजन्! सूर्यस्य प्रकाशः एव सर्वस्मात् कान्तियुक्तम्।

मणिवल्लभः श्रेष्ठं जलं किम्?

मेषपालः जलेषु श्रेष्ठं तु गङ्गाजलम् एव।

मणिवल्लभः सर्वेषु पुष्पेषु उत्तमं किम्?



मेषपालः कमलपुष्पम्

मणिवल्लभः कस्य निद्रा समीचीना?

मेषपालः श्रान्तस्य मनुष्यस्य निद्रा समीचीना।

राजा बाढम्। अरे! त्वं तु उच्चैः हससि? परिहासस्य किं कारणम्?

मेषपालः राजन्! मया उक्तानि सर्वाणि उत्तराणि असमीचीनानि एव।

राजा तर्हि समीचीनानि उत्तराणि वदतु।

मेषपालः हे राजन्! शृणोतु, वस्तुतः जगति नेत्रयोः कान्तिः एव सर्वस्मात् उत्तमा। तत् जलं श्रेष्ठं यत् शुष्कप्रदेशे प्राप्यते। कार्पासस्य पुष्पमेव सर्वस्मात् उत्तमम्। नीरोगस्य मनुष्यस्य निद्रा एव समीचीना।

राजा अरे! भवान् तु मत्तः अपि बुद्धिमान्। धन्यवादः।

12.7 पाठान्तप्रश्नाः

1. अधोलिखितविषयकं संवादं लिखत (दशवाक्येषु एव)

   माता–पुत्रीमध्ये बालिकानां कृते निरादरस्य भावनाम् अधिकृत्य संवादः।

2. भ्रातुः भगिन्याः मध्ये ग्रीष्मावकाशे पर्वतीयप्रदेशं प्रति गन्तुम् तत्परताम् अधिकृत्य संवादः।

3. समाचारपत्रे बसदुर्घटनायाः चित्रमाधृत्य प्रभा–विभा सख्योः मध्ये जातः संवादः।

3. संवादस्य प्रमुखतत्त्वानि कानि इति स्पष्टयत।

4. भवतः मित्रं अशोकः धूम्रपानं करोति। भवान् शिवेशः, तस्य धूम्रपानं दूरीकर्तुं मित्रेण सह कीदृशं संवादं करिष्यति? इति लिखत।

12.8 उत्तराणि

पाठगतप्रश्नाः

12.1 1. विस्तृतवर्णनानि, अनुच्छेदाः

2. देविके, सारिके, आचार्ये, भ्रातः, भगिनि

3. क + (v), ख + (iv), ग + (iii), घ + (i), ङ + (ii)

12.2 (i) ग, (ii), घ, (iii), क, (iv), ङ, (v), ख

12.3 1. कल्पनया मंजूषापदसहायतया संवादलेखनम् कुरुत

12.4 1. (i) आयोजिता
(ii) आगमिष्यामि
(iii) पितः
(iv) नूतनं
(v) नवीनाम्
(vi) पुत्र
(vii) नूतनानि
(viii) क्रेष्यामः

12.7 पाठान्तप्रश्नाः

स्वकल्पनया संवादलेखनम्

309sk13

13

करुणापरा हि साधवः

बच्चो! आपने भगवान बुद्ध का नाम सुना ही होगा। 'जातकमाला' में इन्हीं भगवान बुद्ध के पूर्वजन्मों के आख्यान संगृहीत हैं जिनमें उनका नाम सर्वत्र 'बोधिसत्त्व' प्रसिद्ध है। प्रस्तुत पाठ में बताया गया है कि महात्मा लोगों का ऐश्वर्य व अधिकार सम्पन्नता तथा विपन्नता में भी उनकी जीवों के प्रति अनुकम्पा को शिथिल नहीं करते। एक बार बोधिसत्त्व संयम, करुणा, परोपकारादि गुणों से सम्पन्न देवताओं के राजा इन्द्र हुए। उन्होंने विपत्ति में भी अपने स्वयं के जीवन की रक्षा की अपेक्षा 'गरुड़' पक्षी के बच्चों की रक्षा को अधिक महत्त्व दिया। महापुरुषों का हृदय करुणा से परिपूर्ण होता है। अतः हमें भी सभी जीवों पर करुणा करनी चाहिये।

उद्देश्यानि

इमं पाठं पठित्वा भवान्/भवती

- पाठस्य कथायाः सारं लेखितुं समर्थः भविष्यति;
- कथावाक्यानि घटनाक्रमेण पुनर्व्यवस्थापयिष्यति;
- शक्रस्य चरित्रचित्रणं करिष्यति;
- जीवने करुणा-संयम-परोपकारादि-भावानां महत्त्वं लेखिष्यति;
- तत्पुरुषसमासस्य पदानां विग्रहं कर्तुं शक्ष्यति;
- यावत्-तावत् अव्यय-युग्मस्य वाक्ये प्रयोगं करिष्यति;
- उपपदविभक्तीनां प्रयोगं करिष्यति।

टिप्पणी

क्रियाकलापः 13.1

चित्र 13.1

चित्र 13.2

चित्रं दृष्ट्वा अधः प्रदत्तशब्दानां सहायतया कथापूर्तिः कर्तव्या।

(1) एकदा राजकुमारः सिद्धार्थः खगानां .....पश्यन्.....आसीत्।

(2) तदैव बाणेन ..... एकः हंसः अपतत्।

(3) राजकुमारः हंसम् उत्थाप्य ..... निष्कासितवान्।

(4) तस्य भ्राता देवदत्तः आगत्य राजकुमारम् अवदत् भो मम भक्ष्यं हंसं .....।

(5) रक्षकः भक्षकात् श्रेयान् इति उक्त्वा राजकुमारः तस्मै हंसं न .....।

विद्धः, अयच्छत्, नीडानि, देहि, शरम्, उपविष्टः

एवमेव सः सिद्धार्थः अन्यस्मिन् जन्मनि अपि कं कं परोपकारं करोति इति पठामः।

13.1 इदानीं मूलपाठं पठामः

प्रथमः एकांशः

एकदा बोधिसत्त्वः स्वपुण्यप्रभावात् दानसंयमकरुणादिभिः गुणैरलङ्कृतः देवानामधिपः शक्रः अभवत्। तस्य प्रासादे राजलक्ष्मीः शशिनः प्रभेव अधिकम् अराजत। नानासुखभोगसमन्विताऽपि सा लक्ष्मीः तस्य हृदयं दर्पमलिनं नाकरोत्।

शब्दार्थ

अधिपः = स्वामी, प्रासादे = महल में, अराजत = सुशोभित हुई, समन्विता = युक्त, दर्पमलिनं = घमंड के मैल से युक्त,

टिप्पणी

तस्य शक्रस्य सर्वलोकेषु व्याप्तां कीर्तिम् अत्यद्भुतां लक्ष्मीं च असहमानाः दैत्यगणाः ईर्ष्यालवः जाताः। ते द्विरद-रथ-तुरग-पदातियुक्तेन महता सैन्यबलेन एनम् आक्रान्तवन्तः। तदा शान्तिप्रियोऽपि स शक्रः प्रजारक्षणाय युद्धाय तत्परोऽभवत्।,

अथ स महासत्त्वः विविधायुधैः सुसज्जितः सध्वजं हैमरथम् अभिरुह्य महता हस्त्यश्व-रथ-पदाति बलेन परिवृतः असुरसैन्यम् अभ्यगच्छत्। तत्र च समुद्रतीरान्ते एव रणः प्रारब्धः। प्रवृत्ते रणे पटहानां भटानां च प्रतिध्वनितैः शब्दैः नभस्तलं स्फुटितमिव जातम्।

द्वितीयः एकांशः

एवं हि परस्परं युध्यमानेषु सत्सु असुराणां विषदग्धेभ्यः शस्त्रेभ्यः भीता सुरेन्द्रवाहिनी पलायनम् अकरोत्। एकलः बोधिसत्त्वात्मकः सुरेन्द्रः एव रथेन असुराणां बलम् अवरुध्य समरेऽतिष्ठत् ततः सारथिः मातलिः 'अपसरणम् एव इतः उचितम्' इति मत्वा देवेन्द्रस्य स्यन्दनं न्यवर्तयत्।

अथ यावत् शक्रः अग्रे सरति तावत् स समुत्पततः रथस्य अग्रे आगतानि शाल्मलीवृक्षे गरुडनीडानि पश्यति। दृष्ट्वैव स करुणापरः मातलिम् उवाच 'अजातपक्ष-पक्षिशावकैः युक्ताः एते खगालयाः रथवेगेन ते यथा अधः न पतेयुः' तथा मे रथं वाहय। मातलिरुवाच-साधो! दैत्याः समभियान्ति। शक्रः उवाच-ततः किम्? ''परिरक्ष सम्यग् गरुडनीडानि'' इति। मातलिः पुनरुवाच- हे स्वामिन्! अस्य रथस्य निवर्तनात् केवलं पक्षिणां शिवं भवेत्। राक्षसवाहिनी तु अस्मान् प्रति अभिधावत्येव। अतः इदानीं तु पक्षिरक्षणापेक्षया आत्मरक्षणम् एव श्रेयस्करम्।

तृतीयः एकांशः

अथ देवेन्द्रः शक्रः करुणाम् आपन्नः सन् उवाच-दैत्यराजेन सह मृत्युरेव वरं परं भयदीनमुखानि एतानि सत्त्वानि रथवेगेन संचूर्ण्य मलिनयशसः मे जीवितं धिक्! तदा मातलिः तथा, इत्युक्त्वा तुरगसहस्रयुक्तं रथं निवर्तितवान्।

ततोऽसुराः पुरायान्तं तस्य देवेन्द्रस्य रथं विलोक्य तत्पराक्रमस्य अतिशयसंभावनया भयाकुलाः प्रणतिं गताः। अनन्तरं सहर्षलज्जैः देवैः सत्क्रियमाणः जयश्रिया अलङ्कृतः शक्रः स्वपुरम् अगच्छत्। तस्मादुच्यते-

पापं समाचरति वीतघृणो जघन्यः
प्राप्यापदं सघृण एव तु मध्यबुद्धिः
प्राणात्ययेऽपि तु न साधुजनः स्ववृत्तिं
वेलां समुद्र इव लङ्घयितुं समर्थः।।

द्विरद = हाथी, तुरगः = घोड़ा, पदातिः = पैदल, अभ्यगच्छत् = सामने आ गया, सध्वजं = ध्वज से युक्त, हैमम् = सोने से बने हुए, अभिरुह्य = चढ़कर, बलेन = सेना से, परिवृतः = घिरे हुए, रणः = युद्ध, प्रारब्धः = प्रारम्भ हुआ, पटहानां = नगाड़ों के, भटानां = योद्धाओं के, स्फुटितमिव = फट सा गया, सत्त्वानि = जीव, प्रणतिं गताः = आत्म समर्पण कर दिया, वीतघृणः = निर्दयी, जघन्यः = नीच, सघृणः = दयालु, प्राणात्ययेऽपि = प्राण चले जाने पर भी, वेलां = तट, करुणापरः = दयालु, शक्रः = इन्द्र

अवरुध्य = रोककर, समरे = युद्ध में, अपसरणम् = भागना, स्यन्दनं = रथ को, न्यवर्तयत् = लौटा दिया, यावत् = ज्योंही, सरति = जाता है, तावत् = त्योंही, समुत्पततः = उड़ते हुए, नीडानि = घोंसले, मातलिः = इन्द्र का सारथि, शावकैः = बच्चों से, वाहय = चलाओ, समभियान्ति = सामने आ रहे हैं, शिवं = कल्याण, आपन्नः = प्राप्त, सत्सु = होने पर, विषदग्धेभ्यः = विष में बुझे हुए, सुरेन्द्रवाहिनी = देवसेना, पलायनम् = भागना, एकल = अकेले

टिप्पणी

बोधप्रश्नाः

1. **मूलपाठं पठित्वा रिक्तस्थानपूर्तिं कुरुत।**

   (क) तस्य प्रासादे राजलक्ष्मीः ..... अधिकम् अराजत।

   (ख) तदा शान्तिप्रियोऽपि स शक्रः ..... युद्धाय तत्परोऽभवत्।

   (ग) अतः इदानीं तु पक्षिरक्षणापेक्षया ..... एव श्रेयस्करम्।

   (घ) पापं समाचरति ..... जघन्यः

2. **'अ' स्तम्भस्य वाक्यांशैः सह 'ब' स्तम्भस्य वाक्यांशानां मेलनं कुरुत।**

'अ'	'ब'
(क) तस्य शक्रस्य अत्यद्भुतां लक्ष्मीं च असहमानाः	(i) पक्षिणां शिवं भवेत्।
(ख) अस्य रथस्य निवर्तनात् केवलं	(ii) शक्रः स्वपुरम् अगच्छत्।
(ग) सहर्षलज्जैः देवैः सत्क्रियमाणः	(iii) दैत्यगणाः ईर्ष्यालवः जाताः।
(घ) यावत् शक्रः अग्रे सरति	(iv) मे जीवनं धिक्।
(ङ) मलिनयशसः	(v) तावत् शाल्मलीवृक्षे गरुडनीडानि पश्यति।

13.2 अधुना पाठम् अवगच्छामः

13.2.1 प्रथमः एकांशः

एकदा बोधिसत्त्वः ..... स्फुटितमिव जातम्।

व्याख्या

(1) **बोधिसत्त्वः**

'बोधि' का अर्थ है- ज्ञान प्राप्ति की साधना में प्रवृत्त। 'सत्त्व' का अर्थ है 'जीव' अर्थात् बुद्धत्व (ज्ञान) की प्राप्ति से पूर्व जीव जब ज्ञानसाधना में संलग्न रहता है तब उसे बोधि सत्त्व कहा जाता है। यह शब्द विशेष रूप से महात्मा बुद्ध के लिए प्रयुक्त होता है।

टिप्पणी

(2) **दर्पमलिनम्**-

'दर्प' का अर्थ है 'घमण्ड'। सत्ता अधिकार और धन आदि की उपलब्धि के कारण स्वयं को दूसरे मनुष्यों से श्रेष्ठ मानना यह बहुत बड़ा दोष है। शक्र के महल में सभी प्रकार के सुख साधन वाली राजलक्ष्मी विराजमान थी फिर भी इस ऐश्वर्य से शक्र का हृदय कभी भी घमण्ड से मलिन नहीं हुआ।

(3) **शान्तिप्रियोऽपि**

देवेन्द्र सत्ता सम्पन्न एवं वीर होने पर भी शान्तिप्रिय थे। अर्थात् शान्तिपूर्वक राज्य का संचालन करते थे। किन्तु जब दैत्यगणों ने उनके राज्य पर आक्रमण कर दिया तो उन्होंने भी प्रजाजनों की रक्षा हेतु एक बहुत बड़ी सेना के साथ दैत्यों से युद्ध करने के लिए प्रस्थान किया। इस प्रकार उन्होंने अपने इस व्यवहार से सिद्ध किया कि प्रजाजनों की रक्षा के लिए युद्ध करना राजा का प्रथम कर्त्तव्य है।

व्याकरणबिन्दवः

सन्धिविच्छेदः-

अत्यद्भुताम्	=	अति + अद्भुताम्	(यण्)
अभ्यगच्छत्	=	अभि + अगच्छत्	(यण्)
गुणैरलङ्कृतः	=	गुणैः + अलङ्कृतः	(रुत्व)
शान्तिप्रियोऽपि	=	शान्तिप्रियः + अपि	(उत्व, गुण पूर्वरूप)
प्रभेव	=	प्रभा + इव	(गुण)
नाकरोत्	=	न + अकरोत्	(दीर्घ)

समस्तपदानां विग्रहः

राजलक्ष्मीः	=	राज्ञः लक्ष्मीः	षष्ठीतत्पुरुषः
दर्पमलिनम्	=	दर्पात् मलिनम्	पञ्चमीतत्पुरुषः
शान्तिप्रियः	=	शान्तिः प्रिया यस्य सः	बहुव्रीहिः
प्रजारक्षणाय	=	प्रजानां रक्षणाय	षष्ठीतत्पुरुषः
महासत्त्वः	=	महान् चासौ सत्त्वः	कर्मधारयः
समुद्रतीरान्ते	=	समुद्रतीरस्य अन्ते	षष्ठीतत्पुरुषः

पाठगतप्रश्नाः 13.1

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत।**

(क) बोधिसत्त्वः कीदृशैः गुणैः विभूषितः शक्रः अभवत्?

.....

टिप्पणी

(ख) शक्रस्य कीर्तिः कुत्र व्याप्ता अभवत्?

.....

(ग) शान्तिप्रियः शक्रः किमर्थं युद्धाय तत्परः अभवत्?

.....

(घ) देवासुरयोः मध्ये कुत्र युद्धम् अभवत्?

.....

2. अधोलिखितकथनेषु शुद्धं कथनं (√) इति चिह्नेन अशुद्धं च (×) इति चिह्नेन अङ्कितं कुरुत।

(क) एकदा बोधिसत्त्वः देवानामधिपः शक्रः अभवत्। .....

(ख) शक्रस्य राजलक्ष्मीः तस्य हृदयं दर्पमलिनम् अकरोत्। .....

(ग) परिरक्ष सम्यग् गरुडनीडानि इति शक्रः कथयति। .....

(घ) प्राणानां संकटे तु साधुजनः स्ववृत्तिं त्यजति। .....

3. उचितपदेन वाक्यपूर्तिं कुरुत-

धिक्, अलङ्कृतः, प्रारब्धः, अवरुध्य

(1) पुरा दान-दया-सत्यादिगुणैः ..... युधिष्ठिरः नरपतिः अभवत्।

(2) एकदा कुरुक्षेत्रे कौरव-पाण्डवयोः मध्ये महान् रणः .....।

(3) एकलः अभिमन्युः कौरवबलम् ..... समरे अतिष्ठत्।

(4) .....कौरवान्, यत् सर्वे मिलित्वा अभिमन्युम् प्राहरन्।

13.2.2 द्वितीय एकांशः

एवं हि परस्परं ..... एव श्रेयस्करम्।

व्याख्या

अपसरणम् एव इतः उचितम्–

यहाँ से दूर चला जाना ही उचित है। समुद्र तट पर जब शक्र और दैत्यों की सेना परस्पर युद्ध कर रहे थे तभी असुरों ने विष से बुझे शस्त्रों से देवसेना पर भयंकर प्रहार किया। इन विषैले शस्त्रों के भय से देवसेना भाग खड़ी हुई। युद्धस्थल पर केवल शक्र ही डटे हुए थे।

टिप्पणी

तब सारथि मातलि ने सोचा कि इस विषम परिस्थिति में यहाँ से भागना ही सर्वथा उचित है अर्थात् महाराज की प्राणरक्षा अत्यावश्यक है।

गरुडनीडानि

मातलि सारथि युद्धस्थल से जब रथ को वापस लेकर चला तब शक्र को उड़ते हुए रथ के मार्ग में सेमल के पेड़ पर लटकते हुए गरुड़ पक्षी के घोंसले दिखाई दिये जो रथ के वेग से गिरकर नष्ट हो सकते थे। गरुड़ को पक्षियों का राजा कहा गया है। इसका सिर, पंख, पंजे तथा चोंच गीध के समान होते हैं। इसका मुख श्वेत, पंख लाल तथा शरीर की कान्ति स्वर्णसमान होती है। गरुड़ को विष्णु का वाहन भी कहा गया है।

केवलं पक्षिणां शिवं भवेत्

युद्ध के मैदान से वापस जाते हुए जब रथमार्ग में आये गरुड़ पक्षी के घोंसलों को देखा तो दयावश शक्र ने सारथि मातलि से इन्हें बचाने के लिए कहा। सारथि ने कहा, हे स्वामी! दैत्य हमारा पीछा करते हुए आ रहे हैं एवं यदि रथ वापस लौटाते हैं तो इससे केवल पक्षियों की ही रक्षा होगी किन्तु हम दैत्यों के हमले का शिकार हो जाएंगे अर्थात आप राजा हैं और इस समय पक्षियों की रक्षा की अपेक्षा आपकी रक्षा करना अत्यन्त आवश्यक है।''

व्याकरणबिन्दवः

(क) सन्धिविच्छेदः

सुरेन्द्रः	=	सुर + इन्द्रः
दृष्ट्वैव	=	दृष्ट्वा + एव
खगालयाः	=	खग + आलयाः
मातलिरुवाच	=	मातलिः + उवाच
अभिधावत्येव	=	अभि + धावति + एव

(ख) समस्तपदानां विग्रहः समासनाम च

सुरेन्द्रवाहिनी	=	सुरेन्द्रस्य वाहिनी	(ष.तत्पुरुषः)
गरुडनीडानि	=	गरुडस्य नीडानि	('')
खगालयाः	=	खगानाम् आलयाः	('')
आत्मरक्षणम्	=	आत्मनः रक्षणम्	('')

(ग) प्रकृतिप्रत्ययविभागः

अवरुध्य	=	अव + √रुध् + ल्यप्
दृष्ट्वा	=	√दृश् + क्त्वा
मत्वा	=	√मन् + क्त्वा
युक्ताः	=	√युज् + क्त + पुं. प्रथमा बहुवचनम्

टिप्पणी

पाठगतप्रश्नाः 13.2

1. प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत।

(क) विषदग्धेभ्यः शस्त्रेभ्यः भीता कस्य सेना पलायिता?

.....

(ख) 'अपसरणम् एव इतः उचितम् इति कः अकथयत्?

.....

(ग) खगालयाः कीदृशैः पक्षिशावकैः युक्ताः?

.....

(घ) परिरक्ष सम्यक् गरुडनीडानि इति कः कम् प्रति कथयति?

.....

2. उदाहरणम् अनुसृत्य उचित-अव्ययपदेन रिक्तस्थानपूर्तिं कुरुत।

यावत्, तथा, इतः, तत्र, तदा

उदाहरणम् यावत् मेघः गर्जति तावत् मयूरः नृत्यति।

(क) .....परीक्षा भवति तावत् अन्तः कोऽपि न प्रविशति।

(ख) यथा देशः .....वेषः।

(ग) ..... प्रभा गमिष्यति ततः उषा आगमिष्यति।

(घ) यदा दैत्यसेना आक्राम्यति ..... शक्रः अपि योद्धुम् उद्यतः भवति।

3. कोष्ठकाद् चित्वा उचितपदेन रिक्तस्थानपूर्तिं कुरुत।

(क) ..... भीता देवसेना पलायिता। (दैत्यैः/दैत्येभ्यः)

(ख) .....अग्रे मार्गे खगालयाः आसन् (रथात्/रथस्य)

(ग) ..... नीडानि न पतेयुः (वृक्षस्य/वृक्षात्)

(घ) दैत्यसेना .....प्रति धावति। (देवसेनाम्/देवसेनानाम्)

टिप्पणी

13.2.3 तृतीयः एकांशः

अथ देवेन्द्र ..... तस्मादुच्यते ..... पापं ..... समर्थः।

1. मलिनयशसः मे जीवितं धिक्!

इसका अर्थ है 'यश मलिन हो जाने पर मेरे जीवन को धिक्कार है।' दयालु शक्र अपने सारथि मातलि से कहता है कि यदि भय और दीनता से युक्त ये बेचारे गरुड़ के बच्चे रथवेग से मारे जाते हैं तो मुझ देवेन्द्र का यश मलिन हो जायेगा और मलिन यश वाले जीवन को धिक्कार है। अतः मुझे इस समय अपनी रक्षा की अपेक्षा घोंसलों में स्थित अजातपंख वाले गरुड़ के बच्चों की रक्षा अधिक प्रिय है।

2. तत्पराक्रमस्य अतिशयसंभावनया भयाकुलाः प्रणतिं गताः

जब शक्र का रथ गरुड़ के बच्चों को बचाने की दृष्टि से पुनः वापस मुड़ा तो शक्र का पीछा करते हुए दैत्यों ने सोचा कि 'अवश्य ही शक्र विशेष शक्ति सम्पन्न होकर हमसे लड़ने के लिए वापस आ रहा है'। उन्होंने भयभीत हो अपने आप शक्र के समक्ष आत्मसमर्पण कर दिया। इस प्रकार दयाभाववश गरुड़ के बच्चों की रक्षा के कारण जिस आत्मबल के साथ शक्र वापस लौटे तो वह सैन्यदल के बिना भी दैत्यों के द्वारा मनोवैज्ञानिक प्रभाव के कारण महान् पराक्रमी माने गए।

3. सहर्षलज्जैः देवैः सत्क्रियमाणः

हर्ष के साथ और लज्जा भाव से युक्त देवताओं के द्वारा सत्कार किये जाते हुए शक्र दैत्यों के समर्पण के पश्चात् विजयश्री के साथ जब वापस आये तो देवताओं ने हर्ष एवं लज्जा से युक्त होकर शक्र का सम्मान किया। इसका भाव है कि जहाँ एक ओर दैत्यों पर विजय की प्रसन्नता थी वहीं उन्हें लज्जा इस बात की थी कि वे युद्ध में शक्र को अकेला छोड़कर असुरों के शस्त्रों से भयभीत हो भाग आये थे फिर भी देवेन्द्र अकेले ही असुरों को जीतकर आए।

4. पापं समाचरति .....लङ्घयितुं समर्थः

अन्वयः

वीतघृणः जघन्यः पापम् समाचरति सघृणः मध्यबुद्धिः तु आपदम् प्राप्य एव सघृणः (भवति), साधुजनः तु समुद्रः वेलाम् इव प्राणात्यये अपि स्ववृत्तिं लङ्घयितुं न समर्थः (भवति)।

भावार्थः नीच व्यक्ति निर्दय होकर सदा पाप कर्म करता है, दयालु मध्यबुद्धि वाला तो आपत्ति में पड़कर पाप करता है किन्तु सज्जन लोग तो प्राणों का संकट होने पर भी अपने दयालु स्वभाव को नहीं छोड़ते जिस प्रकार समुद्र अपने तट का उल्लंघन कभी नहीं करता।

ध्यान दें यहाँ 'घृणा' शब्द का अर्थ है दया, वीतघृणः का अर्थ है दया से रहित।

टिप्पणी

व्याकरणबिन्दवः

सन्धिविच्छेदः

मृत्युरेव	=	मृत्युः	+ एव
इत्युक्त्वा	=	इति	+ उक्त्वा
पुनरायान्तम्	=	पुनः	+ आयान्तम्
तस्मादुच्यते	=	तस्मात्	+ उच्यते
प्राप्यापदम्	=	प्राप्य	+ आपदम्
प्राणात्ययेऽपि	=	प्राणात्यये	+ अपि

समस्तपदानां विग्रहः

दैत्यराजेन	= दैत्यानां राजा दैत्यराजः	(षष्ठीतत्पुरुषः)
भयदीनमुखानि	= भयात् दीनानि मुखानि येषां तानि	(बहुव्रीहिः)
मलिनयशसः	= मलिनं यशः यस्य तस्य	(बहुव्रीहिः)
वीतघृणः	= वीता घृणा यस्य सः	(बहुव्रीहिः)
सघृणः	= घृणया सह विद्यमानः	(बहुव्रीहिः)

पद-परिचयः

संचूर्ण्य	= सम् + चूर्ण + ल्यप्	
उक्त्वा	= वच् + क्त्वा	
विलोक्य	= वि + लोक् + ल्यप्	

पाठगतप्रश्नाः 13.3

1. **अनन्तरं सहर्षलज्जैः देवैः सत्क्रियमाणः जयश्रिया अलङ्कृतः शक्रः स्वपुरम् अगच्छत्।**

   (क) देवैः सत्क्रियमाणः कः स्वपुरम् अगच्छत्?

   .....

टिप्पणी

(ख) अत्र 'देवैः' पदस्य किं विशेषणपदम् प्रयुक्तम्?

.....

(ग) 'जयश्रिया अलङ्कृतः' इति कस्य विशेषणम्?

.....

2. **'भयदीनमुखानि अमूनि सत्त्वानि रथवेगेन संचूर्ण्य मलिनयशसः मे जीवितं धिक्!**

(क) भयदीनमुखानि कानि आसन्? .....

(ख) अत्र 'मे' पदं कस्मै प्रयुक्तम्? .....

(ग) 'धिक्' योगे अत्र का विभक्तिः प्रयुक्ता? .....

किमधिगतम्

1. बोधिसत्त्वः एकस्मिन् जन्मनि दान-दया संयमशीलः शक्रः अभवत्।
2. शक्रः ऐश्वर्यसम्पन्नः, महावीरः दर्परहितः करुणापरः सर्वसत्त्वानुकम्पी च आसीत्।
3. करुणा-संयम-परोपकारादिभावैः विभूषितः नरः जीवने यशः मानं च भजते।
4. साधवः प्राणसंकटेऽपि स्वाभाविकीं दयालुतां परोपकारितां च न त्यजन्ति।
5. तत्पुरुषसमासस्य विग्रहे उत्तरपदं प्रधानं भवति।
6. यावत्-तावत् यथा-तथा इतः-ततः अव्ययुग्मानां प्रयोगः एकस्मिन् एव वाक्ये भवति।
7. 'क्त्वा' पूर्वकालिकक्रियासूचकः कृत् प्रत्ययः भवति।
8. यदि धातोः पूर्वम् उपसर्गः भवेत् तदा क्त्वा स्थाने ल्यप् भवति।
9. प्रति, धिक् सह, भयार्थकयोगे द्वितीया, तृतीया पञ्चमी च प्रयुज्यते।

योग्यताविस्तारः

सन्दर्भग्रन्थ-लेखकपरिचयः

प्रस्तुत पाठ का आधार 'जातकमाला' की एक कथा 'शक्रजातकम्' है। 'जातकमाला' के लेखक आर्यशूर हैं। इनका रचनाकाल 400 ई. है।

टिप्पणी

भावविस्तारः

महात्मा बुद्ध के पूर्वजन्मों की कहानियाँ पालिभाषा में 500 से अधिक जातकों में संगृहीत हैं। आर्यशूर ने कुछ महत्त्वपूर्ण जातकों को संस्कृत भाषा में जातकमाला में संगृहीत किया है। विभिन्न जन्मों में बुद्ध ने किस प्रकार जीवों पर दया की इसका विवरण इनमें प्रस्तुत किया गया है। उन जन्मों में वे बोधिसत्त्व के नाम से प्रसिद्ध हुए। इन कथाओं का उद्देश्य मानव में जीवनमूल्यों की स्थापना करना है। इनमें सत्य, दया, दान, दम, परोपकार, उदारता, समता आदि गुणों के द्वारा मानव जीवन की उपयोगिता सिद्ध की गई है। महात्मा बुद्ध अपने अनेक जन्मों में बोधिसत्त्व देवराज इन्द्र, राजा, व्यापारी, सेठ, नाविक, हाथी, शशक, मृग, पक्षी आदि बने किन्तु उनकी प्रवृत्ति परोपकार में रही। उन्होंने प्रत्येक जन्म में सत्य, त्याग, दम का आदर्श प्रस्तुत किया है।

भाषाविस्तारः

(क) उपपद-विभक्तयः

विभक्ति दो प्रकार की होती है 1. कारक विभक्ति 2. उपपद विभक्ति। कारक को सूचित करने वाली विभक्ति को कारक विभक्ति कहते हैं तथा जो पद विशेष अर्थात् प्रति, विना, सह, नमः आदि पदों के योग से जो विभक्ति होती है उसे उपपद विभक्ति कहते हैं। जैसे- रामः कलमेन लिखति (राम कलम से लिखता है में 'कलमेन' में करण कारक के अर्थ में तृतीया विभक्ति है। अतः यह कारक विभक्ति है। जब कि 'रामः पुत्रेण सह गच्छति' (राम पुत्र के साथ जाता है) वाक्य में 'पुत्रेण' में तृतीया 'सह' पद के योग के कारण है अतः यह उपपद विभक्ति है।

पदानि	**द्वितीयाविभक्तिः**
(क) (पदों के योग में)	उदाहरणानि
उभयतः (दोनों ओर)	राजमार्गम् उभयतः वृक्षाः सन्ति।
परितः (चारों ओर)	ग्रामं परितः क्षेत्राणि सन्ति।
धिक् (धिक्कार)	अशिक्षितम् धिक्।
प्रति (ओर)	माता पुत्रं प्रति वदति।
(ख) धातुओं के योग में	
याच् (माँगना)	निर्धनः धनिकम् धनं याचते।
प्रच्छ् (पूछना)	छात्रः गुरुं प्रश्नं पृच्छति।

टिप्पणी

	अधि + शी	अधिशेते (सोता है)
	अधि + स्था	अधितिष्ठति (बैठता है) रविः पर्यङ्कम् अधिशेते (रवि पलंग पर सोता है)
	अधि + आस्	अध्यास्ते, नृपः सिंहासनम् अधितिष्ठति/अध्यास्ते। (राजा सिंहासन पर बैठता है)

तृतीया विभक्तिः

	पदानि	उदाहरणानि
(1)	सार्धम्/साकम्/सह (साथ)	त्वम् मित्रेण सार्धम्/साकम्/सह क्रीडसि।
(2)	अलम् (बस)	अलम् श्रमेण।
(3)	तुल्यः/सदृशः	दानेन तुल्यः/सदृशः निधिः नास्ति।
(4)	अङ्गविकारार्थकपदयोगे (खञ्जः, अन्धः, काणः)	पादेन खञ्जः। नेत्राभ्याम् अन्धः। नेत्रेण काणः

चतुर्थीविभक्तिः

(1)	नमः (नमस्कार)	गुरवे नमः। मातृभूम्यै नमः।
(2)	स्वस्ति (कल्याण)	नृपाय स्वस्ति।

धातुयोगे

(1)	रुच् (अच्छा लगना)	दिनेशाय रोचते फलाहारः।
(2)	क्रुध् (गुस्सा करना)	त्वम् दुष्टाय क्रुध्यसि।

पञ्चमी विभक्तिः

(1)	बहिः (बाहर)	ग्रामात् बहिः उद्यानम् अस्ति।
(2)	अनन्तरम् (बाद)	उद्यानात् अनन्तरं पाठशाला अस्ति।
(3)	'तुलना' अर्थे	अशोकः श्यामात् पटुतरः।
(4)	'भय' अर्थे	बालः सिंहात् बिभेति।

षष्ठीः विभक्तिः/सप्तमीविभक्तिः

(1) निर्धारण-अर्थे (अनेक में से एक का निश्चय करना)

टिप्पणी

(2) युधिष्ठिरः पाण्डवानाम्/पाण्डवेषु ज्येष्ठः आसीत्।

(3) नदीनाम्/नदीषु वा गंगा श्रेष्ठा।

सप्तमी विभक्तिः

(1) 'स्निह्' धातुयोगे (प्यार करना)	माता पुत्रे स्निह्यति।
(2) 'विश्वस्' धातुयोगे (विश्वास करना)	अहम् त्वयि विश्वसिमि।

(ख) तत्पुरुषसमासः

दो या दो से अधिक पदों का तत्पुरुष समास होता है। समास के पूर्व पद में प्रथमा द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी व सप्तमी विभक्तियाँ रहती हैं तथा उत्तर पद में कोई भी विभक्ति रह सकती है। समास करने पर दोनों विभक्तियों का लोप हो जाता है। इस समास में उत्तर पद के अर्थ की प्रधानता होती है। जैसे राज्ञः पुत्रः राजपुत्रः। इसमें 'पुत्र' अर्थ प्रधान है। अन्य उदाहरण इस प्रकार हैं- द्वितीया-रामम् आश्रितः = रामाश्रितः,। शरणम् आपन्नः = शरणापन्नः। तृतीया- सुखेन युक्तः = सुखयुक्तः, विद्यया हीनः=विद्याहीनः, ज्ञानेन शून्यः=ज्ञानशून्यः। चतुर्थी-पाठाय शाला=पाठशाला, धनाय लोभः=धनलोभः। पञ्चमी-चौरात् भयम्=चौरभयम्, वृक्षात् पतितः=वृक्षपतितः, पापात् मुक्तः=पापमुक्तः। षष्ठी-राज्ञः पुरुषः राजपुरुषः सुखस्य भोगः= सुखभोगः, सप्तमी-युद्धे निपुणः=युद्धनिपुणः, जले मग्नः=जलमग्नः, कार्ये दक्षः= कार्यदक्षः।

(ग) धातुरूपाणि

'कृ' (करना)

लट् लकारः (वर्तमानकालः) 'परस्मैपदम्'

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	करोति	कुरुतः	कुर्वन्ति
मध्यमः पुरुषः	करोषि	कुरुथः	कुरुथ
उत्तमः पुरुषः	करोमि	कुर्वः	कुर्मः

लङ् लकारः (भूतकालः)

प्रथमः पुरुषः	अकरोत्	अकुरुताम्	अकुर्वन्
मध्यमः पुरुषः	अकरोः	अकुरुतम्	अकुरुत

टिप्पणी

उत्तमः पुरुषः	अकरवम्	अकुर्व	अकुर्म

लोट् लकारः (आज्ञार्थे)

प्रथमः पुरुषः	करोतु	कुरुताम्	कुर्वन्तु
मध्यमः पुरुषः	कुरु	कुरुतम्	कुरुत
उत्तमः पुरुषः	करवाणि	करवाव	करवाम

लृट् लकारः (भविष्यत्कालः)

प्रथमः पुरुषः	करिष्यति	करिष्यतः	करिष्यन्ति
मध्यमः पुरुषः	करिष्यसि	करिष्यथः	करिष्यथ
उत्तमः पुरुषः	करिष्यामि	करिष्यावः	करिष्यामः

विधिलिङ् (इच्छा, निमंत्रण, अनुरोध)

प्रथमः पुरुषः	कुर्यात्	कुर्याताम्	कुर्युः
मध्यमः पुरुषः	कुर्याः	कुर्यातम्	कुर्यात
उत्तमः पुरुषः	कुर्याम्	कुर्याव	कुर्याम

पाठान्तप्रश्नाः

1. **अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत।**

(क) कः देवानामधिपः शक्रः अभवत्?

.....

(ख) दैत्यानां कीदृशं सैन्यबलम् आसीत्?

.....

(ग) शक्रः कीदृशं रथम् अभिरुह्य योद्धुं गतवान्?

.....

(घ) खगालयाः कैः युक्ताः आसन्?

.....

टिप्पणी

(ङ) साधुजनः प्राणात्ययेऽपि कां न त्यजति?

.....

2. एतानि वाक्यानि घटनाक्रमेण पुनः लिखत

(क) तस्य लक्ष्मीं दृष्ट्वा दैत्यगणाः ईर्ष्यालवः जाताः।

.....

(ख) एकदा बोधिसत्त्वः देवानामधिपः शक्रः अभवत्।

.....

(ग) परस्परं युद्धे जाते शक्रः एव विजयी अभवत्।

.....

(घ) समुद्रतीरान्ते देवासुरयोः मध्ये रणः प्रारब्धः।

.....

3. शक्रस्य चरित्रं पञ्चवाक्येषु संस्कृतभाषायां लिखत।

1. .....

2. .....

3. .....

4. .....

5. .....

4. (क) विग्रह-पदैः समस्तपदानि रचयत

1. राज्ञः लक्ष्मीः .....
2. गरुडानां नीडानि .....
3. करुणाम् आपन्नः .....
4. आत्मनः रक्षणम् .....
5. पक्षिणां रक्षणम् .....

टिप्पणी

(ख) निर्दिष्टधातु-प्रत्यय-योगेन वाक्यपूर्तिं कुरुत।

(1) अशोकः प्रातः (भ्रम् + क्त्वा) ..... पठति।

(2) लता समाचारं (श्रु + क्त्वा) ..... खादति।

(3) विभा गुरुम् (प्र + नम् + ल्यप्) ..... तिष्ठति।

(4) त्वम् मम समीपे (उप + विश् + ल्यप्) ..... पठ।

5. उचितशब्दरूपस्य प्रयोगं कुरुत।

यथा-शिक्षकः (छात्र) छात्रम् प्रति वदति।

(क) त्वम् (अस्मद्) ..... प्रति किं वदसि?

(ख) (कृपण) ..... धिक्! यः न ददाति न भुङ्क्ते।

(ग) सैनिकः (सैनिक).....सह गच्छति।

(घ) (दुष्ट) ..... भीतः सज्जनः गृहं त्यजति।

उत्तराणि

बोधप्रश्नाः

1. (क) शशिनः प्रभेव (ख) प्रजारक्षणाय (ग) आत्मरक्षणम् (घ) वीतघृणः

2. (क) + (iii), (ख) + (i), (ग) + (ii), (घ) + (v), (ङ) + (iv)

पाठगतप्रश्नाः 13.1

1. (क) दानसंयमकरुणादिभिः (ख) सर्वलोकेषु (ग) प्रजारक्षणाय (घ) समुद्रतीरान्ते

2. क. √ ख. X ग. √ घ. X

3. (i) अलङ्कृतः, (ii) प्रारब्धः, (iii) अवरुध्य, (iv) धिक्

पाठगतप्रश्नाः 13.2

1. क. शक्रस्य, ख. मातलिः, ग. अजातपक्षैः, घ. शक्रः मातलिम् प्रति,

2. क. यावत्, ख. तथा, ग. इतः, घ. तदा,

3. क. दैत्येभ्यः, ख. रथस्य, ग. वृक्षात्, घ. देवसेनाम्

टिप्पणी

पाठगतप्रश्नाः 13.3

1. क. शक्रः, ख. सहर्षलज्जैः, ग. शक्रस्य

2. क. सत्त्वानि, (गरुडस्य शावकाः), ख. शक्राय, ग. द्वितीया

पाठान्तप्रश्नाः

1. क. बोधिसत्त्वः, ख. द्विरद-रथ-तुरग-पदातियुक्तम् ग. हैमम् घ. अजातपक्ष-पक्षिशावकैः ङ. स्ववृत्तिम्

2. ख,क,घ,ग

3. (i) शक्रः देवानाम् अधिपः आसीत्।

   (ii) स ऐश्वर्यसम्पन्नः आसीत्।

   (iii) सः दानशीलः संयमी च आसीत्।

   (iv) सः महावीरः आसीत्।

   (v) तस्य हृदयं करुणामयम् आसीत्। एवमेव कानि अपि पञ्च वाक्यानि।

4. क-(1) राजलक्ष्मीः, (2) गरुडनीडानि, (3) करुणापन्नः, (4) आत्मरक्षणम्, (5) पक्षिरक्षणम्,

   ख- (i) भ्रमित्वा, (ii)श्रुत्वा, (iii) प्रणम्य, (iv) उपविश्य,

5. क. अस्मान्, ख. कृपणं, ग. सैनिकैः, घ. दुष्टेभ्यः

309sk14

14

अमृतस्य पन्थाः

भवन्तः जानन्ति एव यत् जिज्ञासा मानवस्य सहजा प्रवृत्तिः। वयं किमपि वस्तु विषयं व्यक्तिं वा दृष्ट्वा तं प्रति जिज्ञासां कुर्मः। अद्यत्वे तु यथा यथा बालकाः बालिकाः च वयसा वृद्धिं प्राप्नुवन्ति तथा तथा स्वपर्यावरणस्य विषये तेषां तासां च जागरूकता प्रवर्धते। अतः विविधान् प्रश्नान् पृच्छन्ति। एतेषां प्रश्नानाम् उत्तराणि ज्येष्ठाः श्रेष्ठाः च जनाः स्वबुद्ध्यनुसारं वदन्ति। अस्माकं पूर्वजैः ऋषिभिः एतादृशानां बहूनां प्रश्नानाम् उत्तराणि उक्तानि। तानि अस्माकं समृद्धे साहित्ये उपलभ्यन्ते। वेदाः उपनिषदः च संस्कृतवाङ्मयस्य मूर्धन्याः ग्रंथाः। तत्र जिज्ञासानां शमनपूर्वकं समुचितरूपेण जीवनयापनस्य मार्गः प्रदर्शितः। सः मार्गः एव अमृतस्य पन्थाः अस्ति। अस्मिन् पाठे वयम् अमृतस्य मार्गस्य सम्बन्धे पठामः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- पाठगतानां मन्त्राणां शुद्धं सस्वरम् उच्चारणं कर्तुं क्षमः भविष्यति;
- तेषां मन्त्राणां संदर्भं लेखितुं शक्तः भविष्यति;
- तेषां मन्त्राणां भावं वक्तुं लेखितुं च शक्ष्यति;
- सूर्यस्य, समुद्रस्य, पृथिव्याः गोः च महत्त्वं लेखितुं समर्थः भविष्यति;
- पारिवारिकव्यवहारस्य स्वरूपं वर्णयितुं क्षमः भविष्यति;
- मन्त्रेषु निहितजीवनमूल्यानि अधिकृत्य सूक्तीनां चयनं कर्तुं शक्ष्यति;
- उपमेयैः सह उपमानानां मेलनं करिष्यति;
- ईयसुन्, इष्ठन् प्रत्ययोः प्रयोगं कर्तुं शक्ष्यति;
- ज्योतिष्, आत्मन्, राजन्, पति, मनस्, चन्द्रमस् शब्दरूपाणां चयनं करिष्यति;

टिप्पणी

क्रियाकलापः



चित्रं दृष्ट्वा अधोलिखितप्रश्नानाम् उत्तरं ददतु

1. वेदानां विषयः ..... अस्ति।
2. वेदाः कति सन्ति .....त्रयः चत्वारः वा?
3. वेदानां नामानि लिखत ....
4. ..... ऋग्वेदस्य उपनिषद्।
5. प्रश्नोपनिषद् ..... वेदस्य उपनिषद्।
6. वेदेषु उपनिषत्सु प्रतिपादितानां केषाञ्चित् प×चजीवनमूल्यानां नामानि लिखन्तु।
   ....
   ....

14.1 मूलपाठः

अमृतस्य पन्थाः

इदानीं वेदेभ्यः उपनिषद्भ्यः च सङ्कलितान् मन्त्रान् पठामः।

किंस्वित्सूर्यसमं ज्योतिः, किं समुद्रसमं सरः।
किंस्वित्पृथिव्यै वर्षीयान्, कस्य मात्रा न विद्यते।।1।।

ब्रह्म सूर्यसमं ज्योतिर्द्यौः समुद्रसमं सरः।
इन्द्रः पृथिव्यै वर्षीयान् गोस्तु मात्रा न विद्यते।।2।।

स नः पवस्व शं गवे, शं जनाय शमर्वते।
शं राजन्नोषधीभ्यः।।3।।

विश्वरूपं हरिणं जातवेदसं, परायणं ज्योतिरेकं तपन्तम्।
सहस्ररश्मिः शतधा वर्तमानः, प्राणः प्रजानामुदयत्येष सूर्यः।।4।।

आत्मानं रथिनं विद्धि शरीरं रथमेव तु
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।।5।।

तिलेषु तैलं दधनीव सर्पिरापः स्रोतःस्वरणीषु चाग्निः।
एवमात्माऽत्मनि गृह्यतेऽसौ सत्येनैनं तपसा योऽनुपश्यति।।6।।

अनुव्रतः पितुः पुत्रः मात्रा भवतु संमनाः
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्।।7।।

मा भ्राता भ्रातरं द्विक्षन्
मा स्वसारमुत स्वसा।
सम्यंचः सव्रता भूत्वा
वाचं वदत भद्रया।।8।।

शब्दार्थाः
किंस्वित् = किं स्वित् = क्या
सूर्यसमं = सूर्य के समान
सरः = तडागः, तालाब
वर्षीयः = अधिक वर्ष वाला, अधिक आयु का, मात्रा = समानता, उपमा
ब्रह्म = परमशक्ति रूप ईश्वर
द्यौः = द्यु लोक, गोः = गाय
जातवेदसम् = जिससे विज्ञान उत्पन्न होते हैं ऐसे सूर्य को
सहस्ररश्मिः = हजार किरणों वाला
शतधा = सैकड़ों प्रकार से
होता = आह्वान करने वाला, बुलाने वाला, पवस्व = शुद्ध हो
शं = कल्याण, शान्ति
अर्वते = घोड़े के लिए
आत्मानम् = आत्मा को
रथिनम् = रथ का स्वामी
विद्धि = जानो
सारथिम् = रथ चलाने वाले को
प्रग्रहम् = घोड़े की लगाम
दधनीव = दधनि + इव = जैसे दही में, सर्पिरापः = सर्पिः + आपः, सर्पिः = घी, आपः = जल
स्रोतःस्वरणीषु = स्त्रोतःसु + अरणीषु
स्त्रोतःसु = स्रोतों में, उद्गम स्थलों में, अनुव्रतः = अनुकूल काम करने वाला, मात्रा = माता से, के साथ
संमनाः = अच्छे मन वाला
जाया = पत्नी
मधुमतीं = मीठी वाणी को
शान्तिवाम् = शान्ति से युक्त
द्विक्षन् मा = द्विक्षत् + मा
द्विक्षत् = द्वेष करे
मा = मत, नहीं
सम्यंचः = समान व्रत वाले, समान कर्म वाले
भद्रया = उचित रीति से

14.2 बोधप्रश्नाः

1. मूलपाठं दृष्ट्वा रिक्तस्थानं पूरयन्तु
   (क) किं ..... ज्योतिः।
   (ख) गोस्तु ..... न विद्यते।

टिप्पणी

(ग) आत्मानं ..... विद्धि।

(घ) .....पितुः पुत्रः।

(ङ) वाचं वदतु .....।

2. 'अ' स्तम्भे लिखितानां प्रश्नानां 'ब' स्तम्भे लिखितैः उत्तरैः सहरेखया मेलनं कुर्वन्तु

'अ' प्रश्नाः	'ब' उत्तराणि
(क) किं समुद्रसमं सरः?	(i) आपः स्रोतःसु भवन्ति।
(ख) मनः कीदृशम् विद्धि?	(ii) भद्रया वाचं वदत।
(ग) आपः कुत्र भवन्ति?	(iii) द्यौः समुद्रसमं सरः।
(घ) जाया पत्ये कीदृशीं वाचं वदतु?	(iv) मनः प्रग्रहमेव विद्धि।
(ङ) कया वाचं वदत?	(v) जाया पत्ये मधुमतीं वाचं वदतु।

14.3 अधुना अवगच्छामः

प्रथमः अंशः

मन्त्रः—1

किंस्वित्सूर्यसमं ज्योतिः,
किं समुद्रसमं सरः।
किंस्वित्पृथिव्यै वर्षीयान्,
कस्य मात्रा न विद्यते।।1।।

पदच्छेदः किम् स्वित् सूर्यसमम् ज्योतिः, किम् समुद्रसमम् सरः।
किम् स्वित् पृथिव्यै वर्षीयान्, कस्य मात्रा न विद्यते।।

अन्वयः सूर्यसमं ज्योतिः किंस्वित्? समुद्रसमं सरः किम्? पृथिव्यै वर्षीयः किंस्वित्? कस्य मात्रा न विद्यते?

व्याख्या

अत्र यजुर्वेदस्य प्रथममन्त्रे ऋषिः सृष्टिसम्बन्धे चतुरः प्रश्नान् पृच्छति—

अत्र कः प्रथमः प्रश्नः? किंस्विद् ज्योतिः (अस्ति)? केन समम्? सूर्यसमम् अर्थात् सर्वज्योतिषु सूर्यस्य ज्योतिः श्रेष्ठम्। किं सूर्यस्य ज्योतिषा सदृशम् अपि अन्यत् किमपि ज्योतिः?

द्वितीयः प्रश्नः कः? किं सरः अस्ति? केन समम्? समुद्रसमम् अर्थात् समुद्रेण सदृशः जलाशयः।

तृतीयः प्रश्नः कः? किंस्विद् वर्षीयः अस्ति? कस्यै वर्षीयान्? पृथिव्यै वर्षीयान् अर्थात् पृथिव्याः पूर्वं कः रचितः।

चतुर्थः प्रश्नः कः? कस्य मात्रा न विद्यते? कस्य तुलना न विद्यते।

किंस्वित् सूर्यसमं ज्योतिः– संसारे बहूनि ज्योतींषि भवन्ति, यथा दीपज्योतिः, अग्निज्योतिः, चन्द्रज्योतिः। एतेषु ज्योतिषु सूर्यज्योतिः प्रमुखं मन्यते। अत्र प्रश्नः भवति यत् सूर्यसमं ज्योतिः किम् अस्ति?

किं समुद्रसमं सरः– सरांसि अनेकविधानि भवन्ति। ग्रामे सरः यत्र जनाः स्नान्ति, जलं स्वगृहम् आनयन्ति, वने सरः भवति यत्र पशवः पक्षिणः च जलं पिबन्ति, नगरे सरः भवति यतः सर्वकारः यन्त्रद्वारा जलं नागरिकाणां गृहेषु प्रापयति। सरः = तडागः = पल्वलः। ऋषिः मनुते यत् समुद्रः अपि महत् सरः। अत्र प्रश्नः भवति यत् समुद्रसमं सरः किम् अस्ति?

किंस्वित् पृथिव्यै वर्षीयान्– पृथिवी अनेकेभ्यः वर्षेभ्यः पूर्वं रचिता। अतः पृथिवी वृद्धा। पृथिव्याः अपेक्षया वृद्धतरः कः? पृथिव्याः पूर्वं कः रचितः आसीत् अयम् अस्ति अत्र प्रश्नः? पृथिव्यै वर्षीयान् किंस्वित्?

कस्य मात्रा न विद्यते– संसारे प्रायः सर्वेषां वस्तूनां मानं विद्यते घनीभूतवस्तूनां तोलनं कृत्वा मानं ज्ञायते। तरलानां द्रव्याणां पात्रेण मानं क्रियते। वस्त्रादिकस्य अपि मानं ज्ञायते। अत्र प्रश्नः अस्ति–कस्य मानं न अस्ति? कस्य तुल्यता, तुलनीयता न भवति?

यहां वैदिक ऋषि चार प्रश्न पूछता है–

1. सूर्य के समान ज्योति कौन सी है?
2. समुद्र के समान लम्बा चौड़ा तालाब कौन सा है?
3. पृथिवी से अधिक पुराना कौन है?
4. किस की तुलना किसी दूसरी वस्तु से नहीं की जा सकती?

मन्त्रः–2

ब्रह्म सूर्यसमं ज्योति–
द्यौःसमुद्रसमं सरः।
इन्द्रः पृथिव्यै वर्षीयान्
गोस्तु मात्रा न विद्यते।।2।।

पदच्छेदः ब्रह्म सूर्यसमम् ज्योतिः द्यौः समुद्रसमम् सरः।
इन्द्रः पृथिव्यै वर्षीयान् गोः तु मात्रा न विद्यते।।

अन्वयः सूर्यसमं ज्योतिः ब्रह्म (अस्ति) समुद्रसमं सरः द्यौः (अस्ति)। पृथिव्यै वर्षीयान् इन्द्रः (अस्ति) गोः तु मात्रा न विद्यते।

व्याख्या

अस्मिन् मंत्रे पूर्वप्रश्नानां चत्वारि उत्तराणि अत्र प्रदत्तानि सन्ति। स्वयमपि विचारयन्तु यदि किमपि अन्यत् अपि उत्तरम् चेत्तर्हि लिखन्तु।

सूर्येण समं ज्योतिः किंस्वित्? सूर्येण समं ज्योतिः ब्रह्म (अस्ति)।

समुद्रसमं सरः किंस्वित्? द्यौः समुद्रसमम् सरः (अस्ति)।

पृथिव्यै वर्षीयान् कः? इन्द्रः पृथिव्यै वर्षीयान्।

कस्याः मात्रा न अस्ति? गोः तु मात्रा न अस्ति।

टिप्पणी

ब्रह्म सूर्यसमं ज्योतिः– यथा सूर्यज्योतिः अधिकं तेजोमयं भवति तथा एव ब्रह्म अपि अधिकं तेजोमयं भवति। ब्रह्म परमशक्तिमान् परमात्मा अस्ति। तस्य तेजः प्रबलं भवति।

द्यौः समुद्रसमं सरः– द्युलोकः तथा विस्तृतः गम्भीरः च वर्तते यथा समुद्रः विस्तृतः गम्भीरः च भवति। पृथिव्याः अधः पाताललोकः, पृथिव्याः उपरि अन्तरिक्षम् अन्तरिक्षस्य उपरि द्युलोकः। द्युलोकः अति विस्तृतः भवति।

इन्द्रः पृथिव्यै वर्षीयान्– वर्षीयान्–अनयोः वृद्धयोः मध्ये अतिशयेन अयं वृद्धः इति वर्षीयान्। वृद्धस्य वर्ष इति आदेशः। इन्द्रः देवानां राजा। इन्द्रः वृष्टेः (वर्षायाः) कर्ता। इन्द्रः पृथिव्याः पूर्वं रचितः। अतः इन्द्रः पृथिव्याः वृद्धतरः अस्ति।

गोस्तु मात्रा न विद्यते– गोः तु मात्रा न विद्यते। गोः तुलना केन अपि कर्तुं न शक्यते। गौः भारतीयसंस्कृतौ पूज्या अस्ति। गौः मात्रा सदृशी भवति। असौ नीरुजं दुग्धं ददाति। तस्या पुत्राः बलीवर्दाः कृषिकर्म कुर्वन्ति। अतः गौः अतुलनीया भवति।

(प्रथम मन्त्र में पूछे गए प्रश्नों का उत्तर द्वितीय मन्त्र में दिया गया है। प्रथम मन्त्र में चार प्रश्न पूछे गए थे उन चारों का उत्तर इस दूसरे मन्त्र में दिया गया है–

1. सूर्य के समान प्रकाशवान तेजोमय ब्रह्म है। ब्रह्म सर्वशक्तिमान परमपिता परमात्मा को कहते हैं।
2. समुद्र के समान लम्बा, चौड़ा और गहरा द्युलोक है। पृथिवी, पृथिवी के नीचे पाताल लोक, पृथिवी के ऊपर अन्तरिक्ष है और अन्तरिक्ष से ऊपर द्युलोक।
3. पृथिवी से पहले इन्द्र की सृष्टि हुई थी। इसलिए इन्द्र पृथिवी से बड़ी आयु वाला है। इन्द्र पृथिवी से भी पुराना है।
4. गौ की बराबरी किसी से नहीं की जा सकती। गौ अतुलनीय है। गौ हमारे लिए पूज्य है।

मन्त्रः–3

पदच्छेदः सः नः पवस्व शम् गवे, शम् जनाय शम् अर्वते।
शम् राजन् नः ओषधिभ्यः।।

स नः पवस्व शं गवे, शं जनाय शमर्वते।
शं राजन्नोषधीभ्यः।।3।।

अन्वयः राजन् स (त्वं) नः गवे शं (कुरु), (नः) जनाय शं (कुरु), (नः) अर्वते शं (कुरु) ओषधीभ्यः शं (कुरु), पवस्व।

व्याख्या

सामवेदस्य अस्मिन् तृतीये मंत्रे ऋषिः सोमं किं प्रार्थयति इति बोधामः।

राजन् सः त्वं किं कुरु? 1. नः गवे शम् (कुरु)। 2. जनाय शम् (कुरु)। 3. (नः) अर्वते शम् (कुरु)। 4. (नः) ओषधीभ्यः शम् कुरु। 5.पवस्व।

अयं मन्त्रः सामवेदस्य अस्ति। सोमः ओषधिमयः रसः भवति। सः देवतावत् प्रार्थितः।

स नः पवस्व शं गवे– नः = अस्माकं गवे = पशवे।

अत्र एकवचनं जात्यर्थे प्रयुक्तः। अतः गोभ्यः = पशुभ्यः, अयम् अर्थः ग्रहीतव्यः। शं भवतु = कल्याणं, सुखं शान्तिः भवतु। हे सोम! त्वं स्वयं पवस्व पुनीतः पवित्रः भव।

शं जनाय – शं = कल्याणं, मंगलं, शान्तिः, (भवतु) जनाय = अस्माकं बन्धवे। अत्रापि जात्यर्थे एकवचनं प्रयुक्तम्। जनेभ्यः = बन्धुभ्यः अयमर्थः ग्रहीतव्यः।

शम् अर्वते – अर्वते, अश्वाय। अस्माकं अश्वेभ्यः कल्याणं भवतु पवस्व – हे सोम त्वं वस्त्रादिद्वारा विशुद्धः भव।

तीसरे मन्त्र में ऋषि सोम से प्रार्थना करता है कि हे सोम! तुम हमारे पशुओं का कल्याण करो, हमारे बन्धु बान्धवों का कल्याण करो और हमारी औषधियों को कल्याणकारी बनाओ। हे सोम तुम स्वयं वस्त्र आदि में छाने जा कर शुद्ध हो जिससे तुम्हें पीकर लोग स्वस्थ हों।

व्याकरणबिन्दवः

किंस्वित् = किम् + स्वित् (अव्ययः)
सूर्यसमम् = सूर्येण समम् (तृतीयातत्पुरुषसमासः)
समुद्रसमम् = समुद्रेण समम् (तृतीयातत्पुरुषसमासः)
वर्षीयान् = वृद्ध + इयसुन् (प्रत्ययः) वृद्धस्य 'वर्ष' इत्यादेशः
राजन्नोषधीभ्यः = राजन् + ओषधीभ्यः (व्यंजनसन्धिः) स्वरपरे सति 'न्' वर्णस्य द्वित्वं भवति।

पर्यायवाचिनः

समुद्रः – सागरः, उदधिः, वारिधिः, नीरनिधिः, जलधिः।

सूर्यः– दिवाकरः, दिनमणिः, सहस्ररश्मिः, सहस्रकरः, सहस्रकिरणः, सहस्रदीधितिः, सहस्रमरीचिः, सहस्रधाम, सहस्रपाद, सहस्रांशुः, सहस्रार्चिः, तिग्मदीधितिः।

पाठगतप्रश्नाः 14.1

1. दत्तानाम् उत्तराणां प्रश्नान् लिखन्तु

(क) गोः मात्रा न विद्यते। .....

(ख) समुद्रसमं सरः द्यौः अस्ति। .....

(ग) इन्द्रः पृथिव्यै वर्षीयान्। .....

(घ) सूर्यसमं ज्योतिः ब्रह्म अस्ति। .....

टिप्पणी

2. उत्तराणि संस्कृतेन लिखत

(क) ब्रह्मविदः सूर्यं कीदृशं ज्ञातवन्तः? .....

(ख) अर्वते इति शब्दस्य कः अर्थः? .....

(ग) सोमः कस्मै कस्मै कल्याणं करोति? .....

(घ) पृथिव्यै वर्षीयान् कः? .....

(ङ) अस्माकम् इति कस्य पदस्य अर्थः? .....

3. ईयसुन्, इष्ठन् प्रत्यययोः प्रयोगं कृत्वा रिक्तस्थाने लिखत

प्रकृतिः (आदेश)	ईयसुन्	इष्ठन्
(क) प्रियः (प्र)	.....	प्रेष्ठः
(ख) प्रशस्यः (श्र)	श्रेयान्	.....
(ग) वरः	.....	वरिष्ठः
(घ) अन्तिकम् (नेद्)	नेदीयान्	.....
(ङ) अल्पः (कन्)	कनीयान्	.....

द्वितीयः अंशः

मन्त्रः—4

विश्वरूपं हरिणं जातवेदसं,
परायणं ज्योतिरेकं तपन्तम्।
सहस्ररश्मिः शतधा वर्तमानः,
प्राणः प्रजानामुदयत्येष सूर्यः।।4।।

प्रश्नोपनिषदः अस्मिन् मंत्रे सूर्यस्य स्वरूपं बोधामः।

पदच्छेदः विश्वरूपम् हरिणम् जातवेदसम्, परायणम् ज्योतिः एकम् तपन्तम्। सहस्ररश्मिः शतधा वर्तमानः, प्राणः प्रजानाम् उदयति एषः सूर्यः।।

अन्वयः विश्वरूपम्, हरिणम्, जातवेदसम्, परायणम्, ज्योतिः,एवम्, तपन्तम् (सूर्यं ब्रह्मविदः विद्वांसः ज्ञातवन्तः)। (स) सहस्ररश्मिः शतधा वर्तमानः प्रजानाम् प्राणः सूर्यः उदयति एव।

खण्डान्वयः

ब्रह्मविदः विद्वांसः किं ज्ञातवन्तः? सूर्यं ज्ञातवन्तः। कीदृशं सूर्यम्? विश्वरूपम्। पुनः कीदृशम्? हरिणम्। पुनः कीदृशम्? जातवेदसम्। पुनः कीदृशम्? ज्योतिः। पुनः कीदृशम्? एकम्। पुनः कीदृशम्? तपन्तम्। कः उदयति? सूर्यः उदयति एव। कीदृशः सूर्यः उदयति? सहस्ररश्मिः, शतधा वर्तमानः, प्राणः। केषां प्राणः? प्रजानां प्राणः।

व्याख्या

अत्र भवद्भिः सूर्यस्य स्वरूपविषये पठितम्। भवन्तः अपि स्वमत्या काश्चन् चतस्रः विशेषताः लिखन्तु।

टिप्पणी

पिप्पलादस्य ऋषेः शिष्याः तम् अनेकान् प्रश्नान् अपृच्छन्। तत्र कात्यायनः सृष्टेः विषये अपृच्छत्। तस्य प्रश्नस्य उत्तरं कथयन् पिप्पलादः ऋषिः सूर्यस्य उत्पत्तिविषये स्वरूपविषये च अवदत्।

विश्वरूपम्– सर्वरूपम्। विश्वेषां जनानां रूपं सूर्यः। सर्वान् जनान् स्वप्रकाशेन दर्शयति, तेभ्यः रूपं ददाति। अन्धकारे कस्य अपि रूपं दृष्टं न भवति। प्रकाशे एवं रूपं दृष्टिगोचरं भवति। अतः सूर्यः सर्वेषां रूपम् अस्ति।

हरिणम्– हरति इति हरिणः। सूर्यः सर्वम् अन्धकारं हरति, रोगान् हरति, जलं वाष्परूपेण हरति येन वर्षाः वर्षन्ति। अतः सूर्यः हरिणः तं हरिणम्।

जातवेदसम्– जातानि वेत्ति इति जातवेदः तं जातवेदसम्। सर्वान् उत्पन्नान् सूर्यः जानाति। अथवा जातानि वेदांसि विज्ञानानि यस्मात् स जातवेदः। सूर्य एवं सर्वेषां विज्ञानानां कारणम् अतः असौ जातवेदः तं जातवेदसम्।

परायणम्– पर + अयनम्। परेषाम् अयनम् आश्रयभूतम् सूर्यम्।

ज्योतिः – ज्योतिस्वरूपम्, तेजोमयम्।

एकम्– एकाकिनम्, एकलं, सूर्यः एकाकी एव आकाशे भ्रमति। स कस्य अपि साहाय्यं न अपेक्षते।

तपन्तम्– तापं कुर्वन्तम्। सूर्यः महान् अग्निगोलकः, तस्य तापः एव ऊर्जायाः स्रोतः। सूर्यः सृष्टेः महान् स्तम्भः। सूर्यः चेत् न स्यात् सृष्टिः नश्येत्।

एतादृशं सूर्यं ब्रह्मविदः विज्ञातवन्तः।

सहस्ररश्मिः– सहस्रं रश्मयः यस्य सः, अनेककिरणवान् सूर्यः।

शतधा वर्तमानः– अनेकैः प्रकारैः विद्यमानः। सर्वेषु प्राणिषु, वृक्षेषु, वस्तुषु च सूर्यस्य उष्मा विद्यते। अतः सूर्यः तेषां रूपेण विद्यमानः भवति।

प्रजानां प्राणः– सूर्यः यदि न स्यात् तदा जनाः म्रियेरन्। अत एव उक्तम् – प्रजानां प्राणभूतः जीवनस्य आधारः, जीवनस्य रक्षकः।

मन्त्रः–5

अस्मिन् मंत्रे वयम् रथस्वरूपं शरीरं बोधामः।

आत्मानं रथिनं विद्धि शरीरं रथमेव तु
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।।5।।

पदच्छेदः आत्मानम् रथिनम् विद्धि शरीरम् रथम् एव तु।
बुद्धिम् तु सारथिम् विद्धि मनः प्रग्रहम् एव च।।

टिप्पणी

अन्वयः आत्मानम् रथिनम् विद्धि, शरीरम् तु रथम् एव च बुद्धिम् तु सारथिम् विद्धि, मनः च प्रग्रहम् एव (विद्धि)।

व्याख्याः

ऋषिः जिज्ञासां शाम्यति–

आत्मानं किं विद्धि? आत्मानं रथिनम्, शरीरं तु रथम् एव, बुद्धिं तु सारथिं, मनः च प्रग्रहम् एव जानीहि।

आत्मानं रथिनं ..... इति मन्त्रः कठोपनिषदः वर्तते।

आत्मानं रथिनं विद्धि, शरीरं रथम् एव तु– यथा रथः भवति तथा शरीरं जानीहि। शरीरं रथसदृशः। रथस्य स्वामी रथी कथ्यते। शरीरस्य स्वामी आत्मा अस्ति।

बुद्धिं तु सारथिं विद्धि– रथस्य चालकः सारथिः कथ्यते। सारथिः कुशलः भवति चेत् रथं सम्यक् चालयति, अकुशलः भवति चेत् रथं सम्यक् न चालयति। रथस्य चालकः सारथिः, शरीरस्य चालिका बुद्धिः। बुद्धिः निर्णयं करोति शरीरं कथं चालयितव्यम्।

मनः प्रग्रहमेव च– रथस्य कर्षणम् अश्वाः कुर्वन्ति एवम् इन्द्रियाणि शरीरम् इतः ततः आकर्षन्ति। अश्वानां प्रग्रहाः तान् नियन्त्रयन्ति। एवम् एव मनः शरीरस्य प्रग्रहः। मनः इन्द्रियाणि। तद्द्वारा शरीरं सन्मार्गे स्थापयति। आत्मा मनसः नियन्त्रणेन शरीरं सम्यक् चालयति।

मन्त्रः–6

तिलेषु तैलं दधनीव सर्पिरापः
स्रोतःस्वरणीषु चाग्निः।
एवमात्माऽत्मनि गृह्यतेऽसौ
सत्येनैनंतपसा योऽनुपश्यति।।6।।

अस्मिन् मन्त्रे वयं आत्मनः ज्ञानं कथं भवेत् इति बोधामः।

पदच्छेदः तिलेषु तैलम् दधनि इव सर्पिः आपः स्रोतःसु अरणीषु च अग्निः
एवम् आत्मा आत्मनि गृह्यते असौ सत्येन एनम् तपसा यः अनुपश्यति।।

अन्वयः यः असौ सत्येन तपसा एनम् (आत्मानम्) अनुपश्यति तेन आत्मनि आत्मा (तथा) गृह्यते (यथा) तिलेषु तैलम् (गृह्यते) दधनि सर्पिः (गृह्यते) स्रोतःसु आपः (गृह्यते) अरणीषु च अग्निः गृह्यते।

व्याख्या

यः कम् अनुपश्यति? आत्मा एवम् (आत्मानम्) अनुपश्यति।

एनम् कथम् अनुपश्यति? सत्येन तपसा। तेन आत्मा आत्मनि गृह्यते।

कथं गृह्यते? यथा– 1. तिलेषु तैलं भवति। 2. दधनि सर्पिः इव। 3. स्रोतःसु आपः इव। 4. अरणीषु अग्निः इव।

अयं मन्त्रः श्वेताश्वतरोपनिषदः गृहीतः।

तिलेषु तैलं ..... चाग्निः। यथा तिलेषु तैलं भवति, बहिः न दृश्यते, यथा दधनि सर्पिः– घृतम् अन्तर्निहितं भवति, यथा आपः–जलं स्रोतःसु– उत्सेषु विद्यमानं भवति, यथा अरणीषु अग्निः – यज्ञसमये अग्नेः उत्पादनाय काष्ठविशेषस्य उपयोगः क्रियते तस्य काष्ठस्य नाम अरणी इति भवति। यज्ञारम्भे द्वयोः अरण्योः घर्षणेन अग्निः उत्पद्यते। असौ अग्निः अरण्योः एव भवति बहिस्तः न दृश्यते। परम् एतेषां तैल–घृत–जलानां प्रापणे अरणीभ्यः अग्नेः उत्पादने जनेन श्रमः करणीयः भवति।

एवमात्मानि ..... योऽनुपश्यति।

यथा तिलादिषु तैलादिकं प्राप्तुं श्रमः कर्तव्यः भवति तथा एव असौ आत्मा आत्मनि एव गृह्यते–प्राप्यते। केन गृह्यते? यः एनम् आत्मानं सत्येन तपसा च अनुपश्यति यः जनः सदा सत्यं वदति तपसा–परिश्रमेण च व्यवहरति स एव आत्मनि आत्मानं जानाति।

सूर्य ही सारे विश्व का रूप है। सूर्य ही सबका आश्रय है। यह शरीर एक रथ के समान है। रथ रूपी शरीर का स्वामी आत्मा है। बुद्धि सारथी है। इन्द्रियां रथ को खींचने वाले घोड़े हैं। मन लगाम है। इस प्रकार मन के नियन्त्रण से शरीर भली भांति चल पाता है। जो व्यक्ति इस आत्मा को सत्य और तप से देखते हैं वे ही आत्मा को जान सकते हैं।

व्याकरणबिन्दवः

पदपरिचयः

आत्मानम्	– आत्मन्,	द्वितीया	एकवचनम्
रथिनम्	– रथः अस्य अस्ति इति रथिन्,	द्वितीया	एकवचनम्
दधनि	– दधि,	सप्तमी,	एकवचनम्
स्रोतःसु	– स्रोतस्,	सप्तमी,	बहुवचनम्
आत्मनि	– आत्मन्	सप्तमी	एकवचनम्
तपसा	– तपस्,	तृतीया,	एकवचनम्

क्रियापदपरिचयः

विद्धि	– विद्,	लोट्,	मध्यमपुरुषः	एकवचनम्
गृह्यते	– ग्रह् कर्मवाच्य	लट्,	प्रथमपुरुषः,	एकवचनम्
अनुपश्यति	– अनु + दृश् (पश्य्)	लट्,	प्रथमपुरुषः,	एकवचनम्

प्रत्ययः

रथिन् – रथ + इनि (तद्धितप्रत्ययः)

सन्धयः

दधनीव	– दधनि + इव	(दीर्घसन्धिः)
सर्पिरापः	– सर्पिः + आपः	(विसर्गसन्धिः)
स्त्रोतःस्वरणीषु	– स्रोतःसु + अरणीषु	(यण्सन्धिः)

आत्माऽऽत्मनि – आत्मा + आत्मनि (दीर्घसन्धिः)
सत्येनैनम् – सत्येन + एनम् (वृद्धिसन्धिः)
योऽनुपश्यति – यः + अनुपश्यति (विसर्गसन्धिः)

पाठगतप्रश्नाः 14.2

1. उभयोः स्तम्भयोः दत्तानाम् उपमेय–उपमानानाम् उचितं मेलनं कुर्वन्तु

क स्तम्भः	**ख स्तम्भः**
(क) शरीरम्	(i) बुद्धिः
(ख) प्रग्रहम्	(ii) आत्मा
(ग) सारथिः	(iii) रथः
(घ) रथी	(iv) मनः

2. उचितपदं चित्वा रिक्तस्थानं पूरयन्तु
   अग्निः, सर्पिः, तैलम्, आत्मनि, स्रोतःसु
   (क) तिलेषु .....
   (ख) ..... आत्मा
   (ग) अरणीषु .....
   (घ) ..... आपः
   (ङ) दधनि .....
3. संस्कृतभाषया उत्तरं लिखन्तु
   (क) शरीररूपिणः रथस्य प्रग्रहः किम्?
   (ख) आत्मनि आत्मा केन गृह्यते?
   (ग) अरणीषु अग्निः कथम् उत्पाद्यते?
   (घ) तिलेषु किं भवति?
   (ङ) नरः सत्येन कं पश्यति?

तृतीयः अंशः

मन्त्रः– 7

अथर्ववेदस्य मन्त्रेऽस्मिन् परिवारे स्नेहवृत्तेः विकासाय प्रार्थना क्रियते।

पदच्छेदः– अनुव्रतः पितुः पुत्रः मात्रा भवतु संमनाः।
जाया पत्ये मधुमतीम् वाचम् वदतु शान्तिवाम्।।

अनुव्रतः पितुः पुत्रः
मात्रा भवतु संमनाः
जाया पत्ये मधुमतीं
वाचं वदतु शान्तिवाम्।।7।।

अन्वयः पुत्रः पितुः अनुव्रतः भवतु, मात्रा संमनाः भवतु। जाया पत्ये मधुमतीं शान्तिवाम् वाचम् वदतु।

व्याख्या–

पुत्रः किं भवतु? पितुः अनुव्रतः भवतु। अन्यत् किं भवतु? माता संमनाः

जाया कीदृशीम् वाचम् वदतु? मधुमतीम्। पुनः कीदृशीम्? शान्तिवाम्। कस्मै? पत्ये।

अयं मन्त्रः अथर्ववेदस्य अस्ति।

अनुव्रतः पितुः पुत्रः – पुत्रः पितुः अनुव्रतः– अनुकूलः स्यात्, पितुः वचनं पालयेत्, पितुः आज्ञाकारी स्यात्।

मात्रा भवतु संमनाः– मात्रा समानमनस्कः भवतु। यथा माता चिन्तयति तथा करोतु। पुत्रः मातुः इच्छायाः अवहेलनां न कुर्यात्।

जाया पत्ये .....शान्तिवाम्

जाया–पत्नी, पत्ये –भर्त्रे, मधुमतीं–मधुरां, शान्तिवाम्–शान्तियुक्तां, शीतलां वाचं वाणीं वदतु।

अत्र परिवारे चत्वारः जनाः वर्णिताः–पिता, माता, पुत्रः, पुत्रस्य पत्नी। वेदमन्त्रः आदिशति यत् पुत्रः पितुः अनुकूलः स्यात्, पितरम् अनुचरेत्, पुत्रः मातुः इच्छायाः आदरं कुर्यात् सा यथा वा×छति तथा कुर्यात्। पत्नीपत्योः मध्ये कलहः मा भवतु अतः वेदमन्त्रः आदिशति यत् पत्नी पत्ये मधुरां शान्तिमयीं च वाणीं वदतु।

मन्त्रः– 8

मा भ्राता भ्रातरं द्विक्षन्
मा स्वसारमुत स्वसा।
सम्यंचः सव्रता भूत्वा
वाचं वदत भद्रया।।8।।

अस्मिन मन्त्रे पारिवारिकसौमनस्यं कीदृशं कामयते इति बोधामः।

पदच्छेदः मा भ्राता भ्रातरम् द्विक्षन्, मा स्वसारम् उत स्वसा।
सम्यंचः सव्रता भूत्वा, वाचम् वदत भद्रया।।

अन्वयः भ्राता भ्रातरम् मा द्विक्षत्, उत् स्वसा स्वसारम् मा (द्विक्षत्) सम्यंचः सव्रताः भूत्वा भद्रया वाचम् वदत।।

व्याख्या

भ्राता कं न द्विष्यात्? भ्रातरम्।

स्वसा कां न द्विष्यात्? स्वसारम्।

यूयं कि वदत? वाचं, भद्रया। कथं? सम्यंचः सव्रता भूत्वा

मा भ्राता भ्रातरं द्विक्षत्– भ्राता भ्रातरं प्रति द्वेषं न कुर्यात्। सहोदरं प्रति द्रोहं न करोतु। उभौ प्रेमपूर्वकं वसताम्। मा स्वसारमुतस्वसा–स्वसा–भगिनी स्वसारं– भगिनीं प्रति द्वेषं न कुर्यात्। स्वसा अन्यां स्वसारं प्रति द्रोहं न कुर्यात्। उभे प्रेम्णा निवसताम्।

टिप्पणी

सम्यंचः सव्रता ..... वदत भद्रया।।

सम्यंचः– समानगतिकाः, समानमतधारिणः, समानविचारवन्तः,

सव्रतः– समानकर्माणः, समानकार्यवन्तः भूत्वा भद्रया– हितपूर्णरीत्या कल्याणमय्या पद्धत्या, मधुरेण वाचं वाणीं वदत। वेदमन्त्रः आदिशति यत् यूयं सर्वे जनाः समानगतिकाः समानमतवन्तः समानकर्मकराः परस्परं मधुरया वाण्या–भाषया–गिरा व्यवहारं कुरुत। यूयं प्रेमपूर्वकं वसत।

(अथर्ववेद के ये दो मन्त्र परिवार में सुखपूर्वक शान्ति से रहने का मार्ग बताते हैं। पुत्र पिता का आज्ञाकारी हो और माँ की इच्छाओं के अनुसार व्यवहार करे। पत्नी पति से मधुर वाणी में शान्तिपूर्वक बोले।)

भाई अपने दूसरे भाई से द्वेष न करे, न ही बहन अपनी बहन से द्वेष भाव रखे। सभी लोग एक मत वाले होकर अपने अपने कर्म में लगें तथा परस्पर हितकारी वचन बोलें। इस प्रकार व्यवहार करने से न परिवार में ही झगड़ा या असन्तोष होगा और न ही समाज में।

व्याकरणबिन्दवः

अनुव्रतः – अनुगतं व्रतं येन सः बहुव्रीहिसमासः
पितुः – पितृ, पंचमी, एकवचनम्
मात्रा – मातृ, तृतीया, एकवचनम्
पत्ये – पति, चतुर्थी एकवचनम्
वाचम् – वाच्, द्वितीया एकवचनम्
भ्रातरम् – भ्रातृ, द्वितीया एकवचनम्
स्वसारम् – स्वसृ द्वितीया एकवचनम्

शब्दरूपाणि

	ज्योतिष् (नपुंसकलिंगम्)			सरस् नपुंसकलिंगम्		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्र० वि०:	ज्योतिः	ज्योतिषी	ज्योतींषि	सरः	सरसी	सरांसि
द्वि० वि०:	ज्योतिः	ज्योतिषी	ज्योतींषि	सरः	सरसी	सरांसि
तृ० वि०:	ज्यातिषा	ज्योतिर्भ्याम्	ज्योतिर्भिः	सरसा	सरोभ्याम्	सरोभिः
च० वि०:	ज्योतिषे	ज्योतिर्भ्याम्	ज्येतिर्भ्यः	सरसे	सरोभ्याम्	सरोभ्यः
पं० वि०:	ज्योतिषः	ज्योतिर्भ्याम्	ज्योतिर्भ्यः	सरसः	सरोभ्याम्	सरोभ्यः
ष० वि०:	ज्योतिषः	ज्योतिषोः	ज्योतिषाम्	सरसः	सरसोः	सरसाम्
स० वि०:	ज्योतिषि	ज्योतिषोः	ज्योतिष्षु	सरसि	सरसोः	सरस्सु
सम्बोधनम्	हे ज्योतिः	हे ज्योतिषी	हे ज्योतींषि	हे सरः	हे सरसी	हे सरांसि

	आत्मन् (पुल्लिंग)			पितृ		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्र0 वि0:	आत्मा	आत्मानौ	आत्मानः	पिता	पितरौ	पितरः
द्वि0 वि0:	आत्मानम्	आत्मानौ	आत्मनः	पितरम्	पितरौ	पितॄन्
तृ0 वि0:	आत्मना	आत्मभ्याम्	आत्मभिः	पित्रा	पितृभ्याम्	पितृभिः
च0 वि0:	आत्मने	आत्मभ्याम्	आत्मभ्यः	पित्रे	पितृभ्याम्	पितृभ्यः
पं0 वि0:	आत्मनः	आत्मभ्याम्	आत्मभ्यः	पितुः	पितृभ्याम्	पितृभ्यः
ष0 वि0:	आत्मनः	आत्मनोः	आत्मनाम्	पितुः	पित्रोः	पितॄणाम्
स0 वि0:	आत्मनि	आत्मनोः	आत्मसु	पितरि	पित्रोः	पितृषु
सम्बोधनम्	हे आत्मन्	हे आत्मानौ	हे आत्मानः	हे पितः	हे पितरौ	हे पितरः

भ्रातृ,जामातृ देवृ शब्दानां रूपाणि पितृवत् भवन्ति

मातृ

	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
प्रथमाविभक्तिः	माता	मातरौ	मातरः
द्वितीयाविभक्तिः	मातरम्	मातरौ	मातॄः

अन्यासु विभक्तिषु रूपाणि पितृवत् भवन्ति। दुहितृ (पुत्री) शब्दस्य रूपाणि मातृवत् भवन्ति।

दातृ

	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
प्रथमा वि.	दाता	दातारौ	दातारः
द्वितीया वि.	दातारम्	दातारौ	दातॄन्

अन्यासु विभक्तिषु रूपाणि पितृवत् भवन्ति।

	राजन् (पुंल्लिङ्गम्)			पति (पुंल्लिङ्गम्)		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्र0 वि0:	राजा	राजानौ	राजानः	पतिः	पती	पतयः
द्वि0 वि0:	राजानम्	राजानौ	राजानः	पतिम्	पती	पतीन्
तृ0 वि0:	राज्ञा	राजभ्याम्	राजभिः	पत्या	पतिभ्याम्	पतिभिः
च0 वि0:	राज्ञे	राजभ्याम्	राजभ्यः	पत्ये	पतिभ्याम्	पतिभिः
पं0 वि0:	राज्ञः	राजभ्याम्	राजभ्यः	पत्ये	पतिभ्याम्	पतिभ्यः
ष0 वि0:	राज्ञः	राज्ञोः	राज्ञाम्	पत्युः	पत्योः	पतीनाम्
स0 वि0:	राज्ञि/राजनि	राज्ञोः	राजसु	पत्यौ	पत्योः	पतिषु
सम्बोधनम्	हे राजन्!	हे राजानौ!	हे राजानः।	हे पते!	हे पती!	हे पतयः!

	मनस् (नपुं. लिङ्गम्)			चन्द्रमस् (पुंल्लिङ्गम्)		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्र० वि०:	मनः	मनसी	मनांसि	चन्द्रमाः	चन्द्रमसौ	चन्द्रमसः
द्वि० वि०:	मनः	मनसी	मनांसि	चन्द्रमसम्	चन्द्रमसौ	चन्द्रमसः
तृ० वि०:	मनसा	मनोभ्याम्	मनोभिः	चन्द्रमसा	चन्द्रमोभ्याम्	चन्द्रमोभिः
च० वि०:	मनसे	मनोभ्याम्	मनोभ्यः	चन्द्रमसे	चन्द्रमोभ्याम्	चन्द्रमोभ्यः
पं० वि०:	मनसः	मनोभ्याम्	मनोभ्यः	चन्द्रमसः	चन्द्रमोभ्याम्	चन्द्रमोभ्यः
ष० वि०:	मनसः	मनसोः	मनसाम्	चन्द्रमसः	चन्द्रमसोः	चन्द्रमसाम्
स० वि०:	मनसि	मनसोः	मनःसु / मनस्सु	चन्द्रमसि	चन्द्रमसोः	चन्द्रमः सु / चन्द्रमस्सु
सम्बोधनम्	मनः	मनसी	मनांसि	हे चन्द्रमः!	हे चन्द्रमसौ!	हे चन्द्रमसः!

पाठगतप्रश्नाः 14.3

1. उचितपदचयनेन रिक्तस्थानपूर्तिः विधेया
   पुत्रः, पत्ये, संमना, शान्तिवाम्, वाचं
   (क) पुत्रः मात्रा ..... भवतु।
   (ख) जाया पत्ये .....वाचं वदतु।
   (ग) .....पितुः अनुव्रतः भवतु।
   (घ) भद्रया ..... वदत।
   (ङ) जाया ..... मधुमतीं वाचं वदतु।

2. चतुर्भ्यः स्तम्भेभ्यः पदानि चित्वा दश वाक्यानि लिखन्तु

भ्राता	स्वसारम्	मा	द्विष्यात्
स्वसा	भ्रातरम्		
पुत्रः	पितुः	अनुव्रतः	
सम्यंचः	मातुः		
सव्रताः	पित्रा	संमनाः	भवतु
	मात्रा		
	भूत्वा	वाचं	वदत

3. परिवारे सौमनस्यार्थं पुत्रः, जाया, भ्राता स्वसा च किं कुर्युः इति विषये षड् वाक्यानि लिखन्तु–
   (क) .....
   (ख) .....

(ग) .....

(घ) .....

(ङ) .....

(च) .....

14.4 किम् अधिगतम्

- ब्रह्म, द्यौः, इन्द्र, गौः, सृष्टौ विशिष्टाः सन्ति।
- सोमः मनुष्याणां कल्याणं करोति।
- शरीरं रथम् अस्ति आत्मा तस्य स्वामी रथी अस्ति।
- आत्मा आत्मनि एव वर्तते बहिः न विद्यते।
- श्रोत्रादीनाम् इन्द्रियाणां चेतनत्वम् आत्मनः एव भवति।
- अस्माभिः परिवारे परस्परं प्रेमभावनया स्थातव्यम्।
- द्वयोः मध्ये तुलनायाम् ईयसुन् प्रत्ययः, एकस्य बहुभिः तुलनायां इष्ठन् प्रत्ययः प्रयुज्यते।
- 'विद्' धातोः रूपाणि आत्मनेपदे भवन्ति।

14.5 योग्यताविस्तारः

संस्कृतस्य वाङ्मयम् अति समृद्धम् अस्ति। वेदाः चत्वारः सन्ति– ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः च। वेदांगानि षट् सन्ति– शिक्षा, व्याकरणम्, छन्दः, कल्पः, निरुक्तं ज्योतिषं च। प्रमुखाः एकादश उपनिषदः सन्ति–ईश–केन–कठ–प्रश्न–मुण्डक–मांडूक्य–ऐतरेय–तैत्तिरीय–छान्दोग्य, बृहदारण्यक–श्वेताश्वतराः। रामायणं महाभारतं च महाकाव्ये स्तः।

मन्त्राणां सन्दर्भाः

- यजुर्वेदे चत्वारिंशत् अध्यायाः सन्ति। प्रस्तुतपाठे प्रथमौ द्वौ मन्त्रौ यजुर्वेदस्य स्तः 1. (यजुर्वेदः अध्यायः–3 मन्त्रः 47), 2. (यजुर्वेदः अध्यायः–23 मन्त्रः 48)।
- तृतीयः मन्त्रः सामवेदस्य अस्तिः। सामवेदे मन्त्राणां गायनं भवति। अतः ऋग्वेदस्य अनेके मन्त्राः सामवेदे अपि सन्ति। उत्तरार्चिकम् अध्याय 9 खण्ड 1 मन्त्रः 1।

- चतुर्थः, पंचमः, षष्ठः, एते मन्त्राः उपनिषद्भ्यः गृहीताः।

  1. प्रश्नोपनिषद् 1.8

  2. कठोपनिषद् 1.3.3

  3. श्वेताश्वतरोपनिषद् 1. 15

- उपनिषत्सु आत्मनः परमात्मनः विषये चिन्तनं वर्तते। एते ग्रंथाः वेदान्तदर्शनस्य आधारभूताः सन्ति।

- पाठस्य सप्तमः अष्टमः च मन्त्रौ अथर्ववेदस्य स्तः। यत्र परिवारस्य सुखरीतिः उक्ता।

  अथर्ववेदः 3.30.4

  अथर्ववेदः 3.30.3

अथर्ववेदे ब्रह्मज्ञानस्य लौकिकव्यवहारस्य च अनेके विषयाः वर्णिताः सन्ति।

भावविस्तारः

वेद विश्व के सर्वप्रथम ग्रंथ हैं। इनमें मनुष्य के चिन्तन और जिज्ञासा के अभिलेख हैं। सूर्य, समुद्र पृथिवी की विशेषताओं को देखकर मनुष्य के मन में जिज्ञासा होना स्वाभाविक है। जिज्ञासा के भौतिक प्रश्नों के आध्यात्मिक उत्तर पाकर मनुष्य सृष्टि के स्वरूप और उसके रहस्यों को समझ सकता है। ब्रह्म, द्युलोक और इन्द्र के स्वरूप को समझने के लिए पाठ में दिए गए मन्त्र अति महत्त्वपूर्ण हैं। गौ का महत्त्व इसमें अच्छी तरह बताया गया है कि गौ के गुणों की कोई बराबरी नहीं हैं। अग्नि, सोम, और सूर्य मनुष्यों के कल्याण के लिए हैं। मनुष्य इन से शक्ति और प्रेरणा पाकर कल्याण मार्ग पर अग्रसर होता है।

उपनिषदों में उच्चस्तरीय आध्यात्मिक चिन्तन किया गया है। मनुष्य के अस्तित्व के वास्तविक रूप को समझने में उपनिषद् ग्रंथ बहुत सहायक होते हैं। शरीर केवल रथ के समान है जिसका सारथि आत्मा है। आत्मा ही वस्तुतः स्वामी है। बुद्धि इस रथ को चलाने वाली है वह सारथि के समान है। मन लगाम है। अतः शरीर रूपी रथ को यदि नियन्त्रण में रखना है तो मन को काबू में रखना आवश्यक है। मन को सन्मार्ग पर लगाना चाहिए। जिस प्रकार तिलों में तेल होता है और दही में घी होता है वैसे ही मनुष्य की आत्मा उसके अन्दर होती है। जैसे तिलों से तेल और दही से घी निकालने में परिश्रम करना पड़ता है वैसे ही आत्मा को पहचानने के लिए भी सत्य और तप का आचरण करना पड़ता है।

परिवार की सफलता के लिए यह बहुत आवश्यक है पुत्र, पुत्रियां, माता–पिता एक दूसरे से मधुर व्यवहार करें। भाई बहनों में परस्पर प्रगाढ़ प्रेम हो तथा वे एक दूसरे के प्रति द्वेष न करें। कोई किसी के विरुद्ध आचरण न करे तथा परस्पर मधुर वाणी से व्यवहार करे। परिवार में यदि शान्ति और सुख है तो समाज एवं राष्ट्र में शान्ति होगी और इससे समृद्धि आयेगी। शान्ति और सन्तोष ही सबसे बड़ी समृद्धि हैं।

भाषाविस्तारः

व्यंजनसन्धिः

'पतन्ति परपीडकाः' इति पाठे भवद्भिः व्यंजनसन्धिविषये पठितम्। इदानीम् अत्र व्यंजनसन्धेः विसर्गसन्धेः च उदाहरणानि दीयन्ते।

सत् + जनः = सज्जनः
तत् + लीनः = तल्लीनः
वाक् + ईशः = वागीशः
कृष्णम् + वन्दे = कृष्णं वन्दे
वाक् + मयम् = वाङ्मयम्
तस्मिन् + एव = तस्मिन्नेव

विसर्ग–सन्धिः

विसर्गात् परे स्वरे व्यंजने वा सति तयोः मेलनेन विसर्गे यत् परिवर्तनं भवति असौ विसर्गसन्धिः भवति।

गुरोः + आज्ञा = गुरोराज्ञा
यशः + कायः = यशस्कायः
बालः + गच्छति = बालो गच्छति
सः + पठति = स पठति
रामः + तिष्ठति = रामस्तिष्ठति
कः + अयम् = कोऽयम्
देवाः + वन्दनीयाः = देवा वन्दनीयाः

14.6 पाठान्तप्रश्नाः

1. क स्तम्भस्य ख स्तम्भेन सह मेलनं कुर्वन्तु

'क' स्तम्भः	'ख' स्तम्भः
(क) आत्मानं	(i) गोः
(ख) सूर्यसमं ज्योतिः	(ii) सर्पिः
(ग) मात्रा न विद्यते	(iii) पितुः अनुव्रतः
(घ) दधनि	(iv) रथिनं विद्धि
(ङ) पुत्रः	(v) ब्रह्म

2. समासविग्रहं कुर्वन्तु

(i) सूर्यसमम् .....
(ii) समुद्रसमम् .....

(iii) सहस्ररश्मिः .....

(iv) अनुव्रतः .....

(v) संमनाः .....

3. संस्कृतेन उत्तराणि लिखन्तु

(क) पृथिव्यै वर्षीयान् कः?

(ख) ब्रह्मविदः कं ज्ञातवन्तः?

(ग) सोमः कस्मै कस्मै कल्याणं करोतु?

(घ) पारिवारिकाः जनाः किं भूत्वा भद्रां वाचं वदन्तु?

(ङ) आत्मनि आत्मानं को जानाति?

4. सूर्यस्य स्वरूपं पञ्चवाक्येषु वर्णयन्तु।

5. 'शरीरं रथमस्ति' इति विषये वाक्यचतुष्टयं लिखन्तु।

6. अधोलिखितानां पदानां परिचयं लिखन्तु

	प्रातिपदिकम्	विभक्तिः	वचनम्
(i) राजभिः	.....	.....	.....
(ii) राजसु	.....	.....	.....
(iii) पत्ये	.....	.....	.....
(iv) पतीनाम्	.....	.....	.....
(v) मनसि	.....	.....	.....
(vi) मनोभ्यः	.....	.....	.....
(vii) चन्द्रमसौ	.....	.....	.....
(viii) चन्द्रमसः	.....	.....	.....
(ix) आत्मानौ	.....	.....	.....
(x) आत्मनोः	.....	.....	.....
(xi) पित्रा	.....	.....	.....
(xii) पितृभ्याम्	.....	.....	.....

14.7 उत्तराणि

14.2 बोधप्रश्नाः

1. क. सूर्यसमं, ख. मात्रा, ग. रथिनं, घ. अनुव्रतः, ङ. भद्रया

2. क–(iii), ख–(iv), ग–(i), घ–(v), ङ–(ii),

पाठगतप्रश्नाः

14.1 1. (क) कस्य मात्रा न विद्यते?

(ख) किंस्वित् समुद्रसमं सरः?

(ग) किंस्वित् पृथिव्यै वर्षीयान्?

(घ) किंस्वित् सूर्यसमं ज्योतिः?

2. (क) ब्रहविदः सूर्यं विश्वरूपं, हरिणं, जातवेदसं परायणं ज्योतिः एकं तपन्तम् ज्ञातवन्तः।

(ख) 'अर्वते' शब्दस्य अर्थः 'अश्वाय' इति

(ग) सोमः गवे, अश्वाय, ओषधिम्यः च कल्याणं करोति।

(घ) पृथिव्यै वर्षीयान् इन्द्रः अस्ति।

(ङ) नः इति पदस्य अर्थः 'अस्माकम्' अस्ति।

3. (क) प्रेयान् (ख) श्रेष्ठः (ग) वरीयान् (घ) नेदिष्ठः (ङ) कनिष्ठः

14.2 1. (क) iii, (ख) iv, (ग) i, (घ) ii

2. क. तैलम् ,ख. आत्मनि, ग. अग्निः, घ स्रोतःसु, ङ सर्पिः,

3. (क) शरीररूपिणः रथस्य प्रग्रहः मनः अस्ति।

(ख) आत्मनि आत्मा सत्येन तपसा च गृह्यते।

(ग) अरणिषु अग्निः घर्षणेन उत्पाद्यते।

(घ) तिलेषु तैलम् भवति।

(ङ) नरः सत्येन आत्मानं पश्चति।

14.3 1. (क) संमना (ख) शान्तिवाम् (ग) पुत्रः (घ) वाचं (ड.) पत्ये

2. (1) भ्राता स्वसारं मा द्विष्यात्। (2) भ्राता भ्रातरं मा द्विष्यात्।

(3) स्वसा स्वसारं मा द्विष्यात्। (4) स्वसा भ्रातरं मा द्विष्यात्।

(5) पुत्रः पितुः अनुव्रतः भवतु। (6) पुत्रः मातुः अनुव्रतः भवतु।

(7) पुत्रः पित्रा संमनाः भवेत्। (8) पुत्रः मात्रा संमनाः भवेत्।

(9) सम्यंचः भूत्वा वाचं वदत। (10) सव्रता भूत्वा वाचं वदत।

3. (क) पुत्रः पितुः अनुव्रतः भवतु। (ख) पुत्रः मात्रा संमनाः भवेत्।

(ग) भ्राता भ्रातरं मा द्विष्यात्। (घ) स्वसा स्वसारं मा द्विष्यात्।

(ङ) सम्यंचः सव्रताः भूत्वा भद्रया वाचं वदन्तु।

(च) जाया पत्ये मधुमतीं वाचं वदेत्।

14.6 पाठान्तप्रश्नाः

1. (क) iv, (ख) v, (ग) i, (घ) ii, (ङ) iii

2. (i) सूर्येण समम्, (ii) समुद्रेण समम्, (iii) सहस्रं रश्मयः यस्य सः, (iv) अनुगतं व्रतं यस्य सः, (v) संगतं मनः यस्य सः।

3. (क) पृथिव्यै इन्द्रः वर्षीयान् अस्ति।

   (ख) ब्रह्मविदः सूर्यं ज्ञातवन्तः।

   (ग) सोमः गोभ्यः अश्वेभ्यः ओषधिभ्यः कल्याणं करोतु।

   (घ) पारिवारिकजनाः सम्यंचः सव्रताः भूत्वा भद्रां वाचं वदन्तु।

   (ङ) यः सत्येन तपसा व्यवहरति सः आत्मनि आत्मानं जानाति।

4. यथेच्छं सूर्यविषये पञ्चवाक्यानि रचयन्तु।

5. पञ्चममंत्रानुसारं वाक्यचतुष्टयं रचयन्तु।

6. (i) राजन् – तृतीया विभक्तिः, बहुवचनम्

   (ii) राजन् – स. वि., ब.व.

   (iii) पति – च. वि., ए. व.

   (iv) पति – ष. वि., ब. व.

   (v) मनस् – स. वि, ए. व.

   (vi) मनस् – च./पं. वि., ब. व.

   (vii) चन्द्रमस् – प्र./द्वि. वि., द्वि. व.

   (viii) चन्द्रमस् – पं./ष. वि., ए. व.

   (ix) आत्मन् – प्र. वि., द्वि. व.

   (x) आत्मन् – पं. ष. वि. द्वि0 व.

   (xi) पितृ – तृ. वि. ए. व.

   (xii) पितृ – तृ. च. पं. वि. बहुवचनम्

309sk15

15

हिमालयो नाम नगाधिराजः

भवन्तः जानन्ति एव यत् 'हिमालयः' भारतस्य महान् पर्वतः अस्ति। एषः न केवलं हिमस्य आलयः अपितु ओषधीनाम् आलयः, रत्नानाम् आकरः अपि। प्राकृतिकसौन्दर्येण पूर्णः अयम्। एषः सर्वोच्च शिखरः अतः अयं पर्वतराजः कथ्यते। 'पावनगङ्गायाः उद्गमस्थलम् अपि अस्ति। अतः पवित्रः अस्य प्रदेशः। पाठेऽस्मिन् महाकविकालिदासकृतं हिमालयस्य मनोहरं प्राकृतिकं सौन्दर्यवर्णनं पठामः वयम्।

उद्देश्यानि

इमं पाठं पठित्वा भवान्–

- हिमालयस्य वर्णनं लेखितुं शक्तः भविष्यति;
- पाठे प्रयुक्तानाम् उपमानां चयनं कर्तुं शक्ष्यति;
- पाठस्य श्लोकानाम् अन्वयं पदच्छेदं च करिष्यति;
- पाठात् सूक्तीनां चयनं करिष्यति;
- पाठे प्रयुक्तकृदन्तपदेषु क्त–तुमुन्–ल्यप् प्रत्ययानाम् उल्लेखं करिष्यति;
- बहुव्रीहिसमस्तपदानां च विग्रहं लेखिष्यति;
- गच्छत्, धनवत्, इन्दु, मधु शब्दानां रूपाणि लेखिष्यति।

क्रियाकलापः

समक्षं भारतस्य मानचित्रं दृष्ट्वा अधः प्रदत्ततालिकायां त्रयाणां तीर्थस्थानानां त्रयाणां नगराणां तिसृणां नदीनां च नामानि लिखन्तु।



15.1

त्रीणि तीर्थस्थानानि	
त्रीणि नगराणि	
तिस्रः नद्यः	

15.1 मूलपाठः

हिमालयो नाम नगाधिराजः

इदानीम् इमं पाठम् ध्यानेन सस्वरं पठामः।

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः।।1।।

अनन्तरत्नप्रभवस्य यस्य
हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते
निज्जतीन्दोः किरणेष्विवाङ्कः।।2।।

आमेखलं सञ्चरतां घनानां
छायामधः सानुगतां निषेव्य।
उद्वेजिता वृष्टिभिराश्रयन्ते
शृङ्गाणि यस्यातपवन्ति सिद्धाः।।3।।

कपोलकण्डूः करिभिर्विनेतुं
विघट्टितानां सरलद्रुमाणाम्।
यत्र स्रुतक्षीरतया प्रसूतः
सानूनि गन्धः सुरभीकरोति।।4।।

भागीरथीनिर्झरशीकराणां
वोढा मुहुः कम्पितदेवदारुः।
यद्वायुरन्विष्टमृगैः किरातै–
रासेव्यते भिन्नशिखण्डिबर्हैः।।5।।

दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम्।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैः शिरसां सतीव।।6।।

शब्दार्थाः
आमेखलं = पर्वतों के मध्य भाग तक
सञ्चरतां = घूमते हुए
अधः = नीचे की
सानुगतां = चोटियों तक
निषेव्य = सेवन कर
उद्वेजिताः = तंग आकर
सिद्धाः = तपस्वी गण
आतपवन्ति = धूपवाली
शृंगाणि = चोटियों का
आश्रयन्ते = सहारा लेते हैं/आश्रय
कपोलकण्डूः = कनपटी की खाज को
विनेतुं = मिटाने के लिए
विघट्टितानां = रगड़े हुए
सरलद्रुमाणाम् = देवदारू के वृक्षों के
स्रुतक्षीरतया = दूध बहते रहने से
प्रसूतः = उत्पन्न
सानूनि = चोटियों को
सुरभीकरोति = सुगन्धित करता है
दिवाकरात् = सूर्य से
लीनं = छिपे हुए
दिवाभीतम् = दिन से डरे हुए (उल्लू)
क्षुद्रे = नीच के
प्रपन्ने = प्राप्त होने पर
उच्चैः शिरसां = ऊँचे लोगों के
सतीव = सज्जनों की तरह
भागीरथी = गंगा
शीकराणां = बूँदें
वोढा = धारण करने वाली
मुहुः = बार बार
अन्विष्टमृगैः = हिरनों को ढूंढने वाले
किरातैः = किरातों के द्वारा
भिन्न = बिखरे हुए
शिखण्डिबर्हैः = मोर के पंखों से

15.2 बोधप्रश्नाः

1. अत्र मूलपाठम् आधृत्य प्रश्नानाम् उत्तराणि युक्तम् (✓) अयुक्तम् (×) इति चिह्नेन निर्दिशन्तु–

   (क) हिमालयः नागानाम्/नगानाम् राजा अस्ति।

   (ख) हिमेन हिमालयस्य सौन्दर्यं नश्यति/वर्धते।

   (ग) हिमालयस्य शृंगाणि आतपवन्ति/तमोयुक्तानि सन्ति।

   (घ) पुष्पाणां गन्धः/सरलवृक्षणां दुग्धस्य गन्धः सानूनि सुरभीकरोति।

   (ङ) हिमालये दिवाभीतः उलूकः/अन्धकारः गुहासु निवसति।

2. पाठं पठित्वा रिक्तस्थानपूर्तिः क्रियताम्

   (क) स्थितः ..... इव मानदण्डः।

   (ख) ..... न सौभाग्यविलोपि जातम्।

   (ग) शृङ्गाणि यस्य ..... सिद्धाः।

   (घ) सानूनि गन्धः ..... ।

   (ङ) दिवाकराद् ..... यो गुहासु।

3. अत्र स्तम्भद्वये मेलनं क्रियताम्–

(अ)	(ब)
(क) अस्त्युत्तरस्यां दिशि देवतात्मा	(i) छायामधः सानुगतां निषेव्य
(ख) एको हि दोषो गुणसन्निपाते	(ii) ममत्वमुच्चैः शिरसां सतीव
(ग) आमेखलं सञ्चरतां घनानां	(iii) हिमालयो नाम नगाधिराजः
(घ) क्षुद्रेऽपि नूनं शरणं प्रपन्ने	(iv) निमज्जतीन्दोः किरणेष्विवाङ्कः

15.3 अधुना अवगच्छामः

प्रथमः अंशः

श्लोकः 1

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः।।1।।

पदच्छेदः अस्ति उत्तरस्याम् दिशि देवतात्मा, हिमालयः नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्याः इव मानदण्डः।

अन्वयः उत्तरस्यां दिशि देवतात्मा हिमालयः नाम नगाधिराजः अस्ति। (सः) पूर्वापरौ तोयनिधी वगाह्य पृथिव्याः मानदण्डः इव स्थितः (अस्ति)

भवद्भिः हिमालयस्य विषये किमपि पूर्वं पठितम् श्रुतमेव। कालिदासकवेः विषये अपि किमपि ज्ञातमेव। अस्मिन् श्लोके हिमालयः कीदृशः पर्वतः अस्ति? कुत्र च वर्तते इति बोधं कुर्मः।

व्याख्या

हिमालयः भारतस्य महान् पर्वतः अस्ति। एषः भारतस्य उत्तरस्यां दिशि स्थितः अस्ति। अयं हिमालयः देवतात्मा अपि कथ्यते। यतः तत्र देवानां तापसानां च निवासः अस्ति। सः नगानाम् (पर्वतानाम्) अधिराजः अस्ति। भारते अनेके पर्वताः विन्ध्यसह्याद्रयः वर्तन्ते परं हिमालयः सर्वश्रेष्ठः पवित्रः चास्ति। हिमालयः पूर्व–पश्चिमसमुद्रयोः मध्ये प्रविष्टः अस्ति। अर्थात् पूर्वस्यां दिशि बंगालखाड़ीसमुद्रः पश्चिमदिशि च अरबसागरः अस्ति।

हिमालयः कस्याः मानदण्डः इव? पृथिव्याः अर्थात् हिमालयः भूमेः परिमाणस्य ज्ञापकः। यथा जले दण्डं निवेश्य तेन जलस्य गाम्भीर्यं ज्ञायते तथैव हिमालयस्य उच्चतां ज्ञात्वा पृथिव्याः गाम्भीर्यं मीयते इति।

भावार्थः

हिमालयः भारतस्य उत्तदिशायां स्थितः। एषः हिमेन आवृतः सदा, अतः हिमालयः। पर्वतेषु उन्नततमः, अतः सः पर्वतराजः। तत्र देवानां तापसानां च निवासः, अतः सः देवतात्मा। हिमालयस्य पूर्वदिशि 'बंगाल की खाड़ी' इति नाम समुद्रः पश्चिमदिशि च अरबसागरः इति। एषः तयोः मध्ये एव स्थितः। एवं हि 'अरुणाचलप्रदेशात् कश्मीरप्रदेशपर्यन्तं हिमालयः पृथिव्याः परिणामरूपः दण्ड इव स्थितः अस्ति।

हिमालय भारत की उत्तर दिशा में स्थित है। इसकी चोटियां सबसे ऊँची है अतः इसे पर्वतों का राजा कहते है। अनेक देवों व तपस्वियों की तपोभूमि होने के कारण हिमालय देवस्वरूप भी है। यह पूर्वदिशा में बंगाल की खाड़ी समुद्र में तथा पश्चिम अरब सागर में प्रवेश किया हुआ स्थित है। अतः यह पृथ्वी के परिमाण को बताता है। अर्थात् नापने का डंडा/फुटा आदि के समान है।

व्याकरणबिन्दवः

सन्धिच्छेदः

अस्त्युत्तरस्याम् = अस्ति + उत्तरस्याम् (इ → य् – यण् सन्धिः)

देवातात्मा = देवता + आत्मा (आ + आ = 'आ' दीर्घ सन्धिः)

हिमालयो नाम = हिमालयः + नाम (विसर्गः स्थाने 'उ'– ओ गुणः, विसर्गसन्धिः)

पदपरिचयः

वगाह्य = (अव)–व + गाह् + ल्यप्

स्थितः = स्था + क्त पुं. प्रथमा एकवचनम्

टिप्पणी

विग्रहः

नगाधिराजः	= नगानाम् अधिराजः	(षष्ठी तत्पुरुषः)
हिमालयः	= हिमस्य आलयः	(षष्ठीतत्पुरुषः)
पूर्वापरौ	= पूर्वः च परः च	(द्वन्द्वः)
तोयनिधिः	= तोयस्य निधिः	(षष्ठीतत्पुरुषः)
मानदण्डः	= मानस्य दण्डः	(षष्ठीतत्पुरुषः)

श्लोकः 2

पदच्छेदः अनन्तरत्न प्रभवस्य यस्य हिमम् न सौभाग्यविलोपि जातम्।
एकः हि दोषः गुणसन्निपाते निमज्जति इन्दोः किरणेषु इव अङ्कः॥

अनन्तरत्नप्रभवस्य यस्य
हिमं न सौभाग्यविलोपि जातम्।
एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोः किरणेष्विवाङ्कः।।2।।

अन्वयः यस्य अनन्तरत्नप्रभवस्य हिमं सौभाग्यविलोपि न जातम्। हि गुणसन्निपाते एको दोषः इन्दोः किरणेषु अङ्कः इव निमज्जति।

अस्मिन् पद्ये वयं बोधामः यत् बहुगुणेषु सत्सु एकः दोषः कथं न गण्यते?

व्याख्या

अनन्तरत्नानां प्रभवः (उत्पत्तिकर्ता) हिमालयः अस्ति। अर्थात् हिमालये अनेकानि रत्नानि अपि प्राप्यन्ते। रत्नानि तु दीप्तानि बहुमूल्यानि भवन्ति। हिमालयस्य अदभुतं सौन्दर्यं नष्टुं न पारयति किम्? हिमम्! वस्तुतः हिमस्य आधिक्यं दोषः एव यतः तत्र जीवनं सुखदं न भवति। परं तत्र रत्नोत्पत्ति–औषधि–आदयः नैके गुणाः सन्ति। अतः एकः दोषः नैव गण्यः। कलङ्कः= चन्द्रे दृश्यमानः कृष्णवर्णः चिह्नः।

किं चन्द्रस्य कलङ्कः तस्य प्रकाशं बाधते? नैव। अर्थात् चन्द्रे विद्यमानः कलङ्कः सन् अपि चन्द्रः पूर्णशक्त्या भासते।

अल्पदोषः निमज्जति कुत्र? गुणसमूहे। यत्र गुणानाम् आधिक्यं भवति, तदा स्वल्पः दोषः दृश्यते नैव। अत्र हिमालये एकः दोषः उक्तः केवलं हिमम् इति।

हिमदोषस्य उपमानम् अत्र किमुक्तम्? चन्द्रस्य कलङ्कः।

भावार्थः

हिमालये अनेकानि रत्नानि भवन्ति। अतः तस्य महिमा हिममात्रदोषेण नष्टुं न शक्यते। यथा चन्द्रे स्थितः कलङ्कः दोषः चन्द्रस्य प्रकाशं क्षीणं कर्तुं न शक्यते। अस्य भावः अस्ति ''गुणानां समूहे स्वल्पः दोषः निष्प्रभावी भवति।'' अतः हिमालयस्य सौन्दर्यम् तु अद्भुतमेव।

अनन्त रत्नों की खान हिमालय की शोभा को बर्फ किसी प्रकार से भी कम नहीं कर सकी क्योंकि गुणों के समूह में एक दोष ऐसे छिप जाता है जैसे चन्द्रमा का कलङ्क उसकी किरणों में। अतः हिमालय का सौन्दर्य अद्भुत है।

व्याकरणबिन्दवः

सन्धिच्छेदः

एको हि	= एकः	+ हि	(विसर्गसन्धिः)
निमज्जतीन्दोः	= निमज्जति	+ इन्दोः	(दीर्घसन्धिः)
किरणेष्विवाङ्कः	= किरणेषु	+ इव + अङ्कः	(यण्सन्धिः)

पदपरिचयः

सन्निपातः	= सम् + नि + पत् + घञ्,	पु. प्रथमा एकवचनम्
जातम्	= जन् + क्त,	नपु. प्रथमा एकवचनम्
निमज्जति	= नि + मज्ज्	लट् प्र. पु. एकवचनम्

विग्रहः

अनन्तरत्नप्रभवस्य – न अन्तः = अनन्तः, अनन्तानि रत्नानि	(कर्मधारयः)
अनन्तरत्नानां प्रभवः तस्य	(षष्ठीतत्पुरुषः)
सौभाग्यविलोपि – सौभाग्यं विलुम्पति यत् तत्	(उपपद तत्पुरुषः)
गुणसन्निपाते – गुणानां सन्निपातः तस्मिन्	(षष्ठीतत्पुरुषः)

पाठगतप्रश्नाः 15.1

1. प्रश्नानाम् उत्तराणि लिखन्तु

   (क) हिमालयः कस्यां दिशायां स्थितोऽस्ति?

   (ख) हिमालयः किमिव स्थितः?

   (ग) अनन्तानां रत्नानां प्रभवः कोऽस्ति?

   (घ) हिमालयस्य सौन्दर्यं केन न नष्टं जातम्?

   (ङ) एकः दोषः कुत्र निमज्जितः भवति?

2. विशेषण–विशेष्यमेलनं क्रियताम्

(क) देवतात्मा	(i) हिमालयस्य
(ख) पूर्वापरौ	(ii) हिमम्
(ग) अनन्तरत्नप्रभवस्य	(iii) हिमालयः
(घ) सौभाग्यविलोपि	(iv) तोयनिधी

3. उचितपदेन वाक्यपूर्तिः क्रियताम्–

(क) हिमालयः ..... समुद्रौ प्रविश्य स्थितः। (पूर्वोत्तरौ / प्राच्यपश्चिमौ)

(ख) हिमालयः ..... मानदण्डः। (समुद्रस्य / पृथिव्याः)

(ग) ..... दोषः गुणसन्निपाते न दृश्यते। (स्वल्पः / अनल्पः)

द्वितीयः अंशः

अधुना वयं द्वितीयम् अंशं पठामः।

आमरवेलं सञ्चरतां धनानां
छायामधः सानुगतां निषेव्य।
उद्वेजिता वृष्टिभिराश्रयन्ते
शृङ्गाणि यस्यातपवन्ति सिद्धाः।।3।।

श्लोकः 3

पदच्छेदः आमेखलम् सञ्चरताम् घनानाम्, छायाम् अधः सानुगताम् निषेव्य।
उत् वेजिता, बृष्टिभिः आश्रयन्ते, शृङ्गाणि यस्य आतपवन्ति सिद्धाः।।

अन्वयः आमेखलम् सञ्चरताम् घनानाम् अधः सानुगताम् छायाम् निषेव्य वृष्टिभिः उद्वेजिताः सिद्धाः यस्य आतपवन्ति शृङ्गाणि निषेवन्ते।



15.2

अस्मिन् पद्ये हिमालये तपसि रतानाम् जनानाम् विषये बोधामः।

व्याख्या

हिमालये घनाः हिमालयस्य मध्यभागे सञ्चरन्ति तत्र वर्षणं तु प्रायः भवत्येव। वृष्टिभिः तत्र उद्वेजिताः के भवन्ति? सिद्धाः तापसजनाः। ते तत्र गृहस्थजीवनात् दूरं प्रकृति–सान्निध्ये तपः कुर्वन्ति।

सिद्धाः घनानां छायां सेवन्ते कुत्र? शिखराणाम् अधः। हिमालयस्य शिखराणि अति उन्नतानि भवन्ति। अतः मेघानां स्थितिः उच्चशिखरेषु न भवति।

सिद्धाः / तापसाः शैत्यम् अनुभूय किं कुर्वन्ति? सिद्धाः शैत्यम् अनुभूय आतपयुक्तानि शृङ्गाणि सेवन्ते यतः तत्र शिखरेषु सूर्यस्य प्रकाशः भवति, तत्र घनाः न गच्छन्ति। अणिमादिसिद्धाः देवयोनिविशेषाश्च 'सिद्धाः' इति कथ्यन्ते। ते हिमालये तपोबलेन स्वेच्छानुसारं विचरन्ति।

भावार्थः

हिमालये तपः साधनारताः तपस्विनः सन्ति। ते कदाचित् तापम् अनुभूय शिखराणाम् अधः गच्छन्ति, सञ्चरतां च मेघानां छायां सेवन्ते। कदाचित् वर्षाजन्यं शैत्यम् अनुभूय

शिखरेषु (उपरिभागे) आतपं सेवन्ते। अर्थात् हिमालये उपरि तापः भवति नीचैः मध्यभागे वा वर्षाकारणात् शैत्यम् भवति। परं तपस्विनः तु स्वेच्छया उपरि, मध्यम् अधः वा गच्छन्ति। तेषां लक्ष्यं तु एकं तपः एव।

जो तपस्वीगण हिमालय पर्वत के मध्यभाग में घूमते हुए बादलों की छाया का चोटियों के नीचे सेवन करते हैं, ऐसे तापसगण निरन्तर वर्षा से परेशान होकर अर्थात् ठंड का अनुभव करके पुनः धूप युक्त चोटियों पर चले जाते हैं अर्थात् तपस्वी लोग इच्छानुसार तपः साधना के लिए सहज रूप से हिमालय के ऊपरी भाग में, मध्यभाग में या नीचे चले जाते हैं। उनकी तपस्या निर्बाध चलती रहती है।

व्याकरणबिन्दवः

सन्धिच्छेदः

वृष्टिभिराश्रयन्ते	= वृष्टिभिः	+ आश्रयन्ते	(विसर्ग स्थाने 'र्')
यस्यातपवन्ति	= यस्य	+ आतपवन्ति	(दीर्घसन्धिः अ + आ = आ)
सञ्चरताम्	= सम्	+ चरताम्	(अनुस्वारः 'म्' स्थाने – परसवर्ण – ञ्)

पदपरिचयः

सञ्चरताम्	– सम् + चर्	+ शतृ =	संचरत् ष. ब. व.
निषेव्य	– नि + सेव्	+ ल्यप्	(क्त्वा स्थाने ल्यप्, यतः धातोः पूर्वम् उपसर्गः)
आतपवन्ति	– आतप	+ मतुप् =	आतपवत्, नपुं. प्र. ब. व.
उद्वेजिताः	– उत् + विज्	+ क्त	(विशे.) प्र. ब. व.

विग्रहः

आमेखलम् – आमेखलाभ्यः इति। (अव्ययीभावः 'आङ्' अव्ययम्)

कपोलकण्डूः करिभिर्विनेतुं
विघट्टितानां सरलद्रुमाणाम्।
यत्र स्रुतक्षीरतया प्रसूतः
सानूनि गन्धः सुरभीकरोति।।4।।

श्लोकः 4

पदच्छेदः कपोलकण्डूः करिभिः विनेतुम् विघट्टितानाम् सरलद्रुमाणाम्।
यत्र स्रुतक्षीरतया प्रसूतः सानूनि गन्धः सुरभीकरोति।।

अन्वयः यत्र करिभिः कपोलकण्डूः विनेतुम् विघट्टितानाम् सरलद्रुमाणाम् स्रुतक्षीरतया प्रसूतः गन्धः सानूनि सुरभीकरोति।

हिमालये हस्तिनः स्वकपोलं देवदारूवृक्षेषु कथं घर्षयन्ति इति अत्र बोधामः।

यदा गजानाम् कपोलयोः कण्डूः (खुजली) भवति तदा गजाः कपोलयोः कण्डूः दूरीकर्तुं देवदारूवृक्षेषु घर्षणं कुर्वन्ति। सरलद्रुमाः हिमालये भवन्ति। सरलवृक्षाः लम्बमानाः भवन्ति।

तत्र केभ्यः दुग्धं स्रुतं भवति? देवदारुवृक्षेभ्यः, कस्मात् च कारणात्? देवदारुवृक्षेषु गजानां गण्डस्थलघर्षणकारणात् यतः घर्षणात् तेभ्यः दुग्धं निस्सरति।

गन्धः कस्य भवति? देवदारुवृक्षेभ्यः स्रुतदुग्धस्य। तादृशः गन्धः सर्वाणि शिखराणि सुरभीकरोति। अत्र कालिदासेन हिमालये भ्रमतां गजानां देवदारुवृक्षाणां च स्वाभाविकं चित्रणं कृतम् अस्ति। अद्भुतं प्राकृतिकं सौन्दर्यम्।



15.3

भावार्थः

हिमालये देवदारूवृक्षाः गजाः च पर्याप्ताः सन्ति। गजाः कपोलस्थं कण्डूः दूरीकरणाय तत्र देवदारुवृक्षेषु घर्षणं कुर्वन्ति। ततः वृक्षेभ्यः दुग्धं स्रुतं भवति। तस्य दुग्धस्य गंधः सर्वत्र व्याप्तः भवति। अतः तत्र सुगन्धमयं वातावरणं भवति।

हिमालय में बड़े बड़े देवदारु के वृक्ष हैं, हाथी भी बहुत हैं। हाथी अपनी कपोलस्थ खुजली को दूर करने के लिए अपने गण्डस्थल को देवदारु के पेड़ों पर रगड़ते हैं। जिससे उन वृक्षों से दूध निकलता है। वह दूध सुगन्धित होने से सारी चोटियों को सुगन्ध से भर देता है।

व्याकरणबिन्दवः

सन्धिच्छेदः

करिभिर्विनेतुं = करिभिः + विनेतुम् (विसर्गसन्धिः – विसर्गस्थाने – र्)

पद–परिचयः

विनेतुम् = वि + नी + तुमुन् (तुमुन् = तुम्) अव्ययपदम्

प्रसूतः = प्र + सूञ् + क्त पु. प्र. वि. ए., विशेषणम्

विग्रहः

कपोलकण्डूः = कपोलयोः कण्डूः (षष्ठीतत्पुरुषः)

स्रुतक्षीरतया = स्रुतं क्षीरम् स्रुतक्षीरम् तस्य भावः तया (कर्मधारयः)

पाठगतप्रश्नाः 15.2

1. अधोलिखितप्रश्नानाम् उत्तराणि लिखन्तु
   (क) हिमालये घनाः कुत्र सञ्चरन्ति?
   (ख) हिमालये वृष्टिभिः उद्वेजिताः के भवन्ति?
   (ग) करिणः कपोलकण्डूः विनेतुं किं कुर्वन्ति?

(घ) स्रुतक्षीरतया प्रसूतः गन्धः कानि सुरभीकरोति?

2. पर्यायपदमेलनं क्रियताम्

(क) घनानाम्	(i) शिखराणि
(ख) निषेव्य	(ii) नीचैः
(ग) शृङ्गाणि	(iii) मेघानाम्
(घ) वृष्टिभिः	(iv) उत्पन्नः
(ङ) अधः	(v) गजैः
(च) करिभिः	(vi) सेवित्वा
(छ) प्रसूतः	(vii) वर्षाभिः

3. प्रदत्तपदैः वाक्यपूर्तिः क्रियताम्

आतपयुक्तानि, सुगन्धितं, सरलवृक्षेषु घर्षणेन, घनाः

(क) हिमालयस्य मध्यभागे ..... सञ्चरन्ति।

(ख) वर्षाजन्य शैत्यकारणात् सिद्धाः ..... शिखराणि आश्रयन्ते।

(ग) हिमालये करिणः स्वमस्तकस्य कण्डूः ..... अपनयन्ति।

(घ) सरलद्रुमेभ्यः निःसृतं दुग्धं ..... भवति।

4. उपसर्गयुक्तानि पदानि चिन्वन्तु

आमेखलम्, सञ्चरताम्, सानुगताम्, आश्रयन्ते, आतपवन्ति, उद्वेजिता

तृतीयः अंशः

इदानीं तृतीयम् अंशं पठामः।

भागीरथी निर्झरशीकराणां
वोढा मुहुः कम्पितदेवदारुः।
यद्वायुरन्विष्टमृगैः किरातै–
रासेव्यते भिन्नशिखण्डिबर्हैः।।5।।

श्लोकः– 5

पदच्छेदः भागीरथीनिर्झरशीकराणाम् वोढा मुहुः कम्पितदेवदारुः।
यत् वायुः अनु+ इष्टमृगैः किरातैः आसेव्यते भिन्नशिखण्डिबर्हैः।।

अन्वयः अन्विष्टमृगैः किरातैः भागीरथीनिर्झरशीकराणाम् वोढा मुहुः कम्पितदेवदारुः भिन्नशिखण्डिबर्हैः यद् वायुः आसेव्यते।

'हिमालयस्य आन्तरिकं दृश्यं कियत् रमणीयम्' इति अस्मिन् श्लोके बोधामः।

व्याख्या

भवन्तः जानन्ति एव यत् हिमालये का प्रमुखा नदी वहति? आम् सत्यम्, भागीरथी (गङ्गा); यस्याः जलम् अमृतम् शीतलं निर्मलं च भवति। हिमालये नाना वृक्षाः सन्ति किन्तु

15.4

हिमालये प्रमुखाः वृक्षाः सन्ति देवदारुवृक्षाः। एते विशालाः सरलाः च भवन्ति।

तत्र कीदृशः वायुः वहति? शीतलः, वस्तुतः तत्र मन्दः शीतलः सुगन्धः च वायुः वहति।

वायुः शीतलः कथं भवति? यतः वायुः गङ्गाधारायाः जलबिन्दुभिः युक्तः भवति। तत्र तीव्राः वायवः चलन्ति। तत्र वायुना प्रकम्पिताः देवदारुवृक्षाः दृश्यन्ते।

प्रकम्पितैः वृक्षैः वायुः कीदृशः भवति? सुगन्धितः। यतः वायुः तद्वृक्षाणां गन्धैः युक्तः भवति। तत्र किराताः मृगान् अन्वेषणाय तत्पराः दृश्यन्ते। ते आखेटार्थं मृगान् अन्वेषयन्ति। तत्र मयूरस्य पक्षान् वायुः विकिरोति। कीदृशः वायुः? मन्दः।

विशेष–: हिमालये गङ्गायाः उद्गमस्थलं गंगोत्री गोमुखम् च अस्ति।

भावार्थः

हिमालये मृगान्वेषणे तत्पराः किराताः त्रिविधं वायुं सेवन्ते – शीतलं सुगन्धितं मन्दं च। गङ्गाधारायाः जलबिन्दुभिः युक्तः वायुः शीतलः वहति। प्रकम्पितदेवदारुयुक्तः वायुः सुगन्धितः वहति। मयूराणां पक्षान् विकीर्णयन् वायुः मन्दः वहति।

हिमालय में हिरनों की खोज में निकले किरात (भील) वहाँ तीन प्रकार की वायु का सेवन करते हैं। वहाँ गङ्गा के पवित्र जल की बूंदों से युक्त शीतल वायु बहती है, देवदारुवृक्षों को हिलाने वाली वायु सुगन्धित होती है तथा मोर के पंखों को बिखेरने वाली वायु मन्द होती है।

व्याकरणबिन्दवः

सन्धिच्छेदः

यद्वायुरन्विष्टमृगैः = यत् + वायुः + अन्विष्टमृगैः ('त' वर्णस्थाने तृतीयाक्षरं 'द्' भवति जश्त्व–सन्धिः। विसर्गस्थाने (:) 'र्' भवति, परे स्वरः 'अ' अस्ति)

किरातैरासेव्यते = किरातैः + आसेव्यते (विसर्गस्थाने 'र्' परे स्वरः 'आ' अस्ति) विसर्गसन्धिः

पदपरिचयः

मुहुः = अव्ययपदम्

कम्पितः = √कम्प् + क्त,	पुं. प्र. वि. ए. (विशेषणम्)
अन्विष्टः = अनु + इष् + क्त	पुं. प्र. वि. ए. (विशेषणम्)
वोढा = √वह् + तृच् वोढृ शब्दः	पुं. प्र. वि. ए. (कर्तृ शब्दवत् अस्य रूपाणि भवन्ति–कर्ता कर्तारौ कर्तारः)

विग्रहः

भागीरथीनिर्झरशीकराणाम् – भागीरथ्याः निर्झराः = भागीरथीनिर्झराः तेषां शीकराः तेषाम् (ष. त.)

कम्पितदेवदारुः – कम्पितः देवदारुः, कर्मधारयः (विशेषणविशेष्ये)

अन्विष्टमृगैः – अन्विष्टाः मृगाः, कर्मधारयः (विशेषणविशेष्ये)

भिन्नशिखण्डिबर्हः – (शिखण्डिनां बर्हाणि) ष.त., भिन्नानि शिखण्डिबर्हाणि येन सः, अन्यपदार्थप्रधानः बहुव्रीहिः।

श्लोकः 6

दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम्।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैः शिरसां सतीव।।6।।

पदच्छेदः दिवाकरात् रक्षति यः गुहासु लीनम् दिवाभीतम् इव अन्धकारम्।
क्षुद्रे अपि नूनम् शरणम् प्रपन्ने ममत्वम् उच्चैः शिरसाम् सति इव।।

अन्वयः यः दिवाभीतम् इव गुहासु लीनम् अन्धकारम् दिवाकरात् रक्षति उच्चैः शिरसां शरणं प्रपन्ने क्षुद्रे अपि सति इव ममत्वम् नूनम् (अस्ति)

वयम् अस्मिन् पद्ये 'शरणागतस्य क्षुद्रस्यापि महद्भिः सम्मानम्' इति भावं बोधामः।

व्याख्या

भवन्तः जानन्ति एव यत् दिवाभीतः उलूकः भवति। परम् अपरः अपि एकः दिवाभीतः भवति जानन्ति किम्? आम् अन्धकारः। तत्र हिमालयः अन्धकारं सूर्यात् रक्षति।

अन्धकारः कुत्र लीनः भवति? हिमालयस्य गुहासु।

शरणागतं के रक्षन्ति? महान्तः पुरुषाः।

अपि ते शरणागतानां क्षुद्रपुरुषाणाम् अपि रक्षां कुर्वन्ति?– अवश्यमेव।

अत्र क्षुद्रः कः महान् च कः? जानन्ति किम्–आम्, सत्यम्, दिवाभीतः उलूकः इव अन्धकारः अपि क्षुद्रः अस्ति हिमालयः च महान् कथितः। यतः सः अन्धकारिणम् अन्धकारम् अपि स्व गुहासु शरणं ददाति। अतः महापुरुषाः नीचजने शरणागते सति तम् प्रति अपि सम्मानं कुर्वन्ति एव। तदेव उक्तम्–क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीव।

भावार्थः

हिमालयः शरणागतवत्सलः महापुरुष इव अस्ति। यथा उलूकः दिवाभीतः भवति तथैव अन्धकारः। सः स्वगुहासु लीनम् अन्धकारं सूर्यात् रक्षति यथा महापुरुषः शरणागतं नीचजनम् अपि रक्षति एव।

हिमालय शरण में आये हुए की पूरी तरह रक्षा करता है। वह दिन से डरे हुए उल्लू के समान अपनी गुफाओं में छिपे अन्धकार की सूरज से उसी प्रकार रक्षा करता है जैसे महापुरुष शरण में आये हुए नीच व्यक्ति की रक्षा करता है।

व्याकरणबिन्दवः

सन्धिविच्छेदः

दिवाकराद्रक्षति = दिवकरात् + रक्षति (जश्त्वसन्धिः – प्रथमाक्षरस्य तृतीयवर्णः) (त् – द्)

दिवाभीतमिवान्धकारम् = दिवाभीतम् + इव + अन्धकारम् (संयोगः, दीर्घसन्धिः)

क्षुद्रेऽपि = क्षुद्रे + अपि (पूर्वरूप सन्धिः)

सतीव = सति + इव (दीर्घसन्धिः)

पदपरिचयः

लीनम् = ली + क्त वि. (द्वि. वि. ए.) (विशेषणम्)

भीतम् = भी + क्त वि. (द्वि. वि. ए.) (विशेषणम्)

प्रपन्ने = प्र + पद् + क्त (सप्तमी ए. व.)

ममत्वम् = मम + त्व (तद्धित प्रत्ययः⟶ भाववाचकः, नपुं. प्र0 वि0 ए0)

विग्रहः

उच्चैः शिरसाम् – उच्चैः शिरः येषाम् तेषाम् (बहुव्रीहिः)

दिवाभीतम् – दिवा भीतः तम् (तत्पुरुषः)

भाषाप्रयोगः

(क) **क्त–प्रत्ययः** धातोः भवति। क्तान्तपदं क्रियापदं विशेषणपदं च भवति। यथा कृ + क्त = 1. तेन श्रमः कृतः (क्रि.) 2. कृतः श्रमः बालः (वि.)

(1) सकर्मकधातुभिः सह 'क्त' प्रत्ययः कर्मणि भवति तदा वाक्ये कर्तरि तृतीया कर्मणि च प्रथमा विभक्तिः भवति। कर्मपदे यत् लिङ्गं वचनं च भवति तदेव क्तान्त शब्देऽपि। यथा–

बालेन लेखः लिखितः।

त्वया बाला दृष्टा।

मया पुस्तकम् पठितम्।

(2) अकर्मकधातुभिः योगे तु 'क्त' कर्तरि भावे च भवति। कर्तरिप्रयोगे तु कर्तृपदानुसारं प्रथमा विभक्तिः भवति। यथा–

मोहनः गतः (पु.)

बालिका गता (स्त्री.)

भावे तु कर्तरि तृतीया, क्तान्तशब्दः तु नपुंसकलिङ्गे प्रथमा एकवचने च भवति। यथा– गोपालेन गतम्।

(3) विशेषणरूपेऽपि प्रयोगः

यथा – स्थितः हिमालयः।

पृथूपदिष्टाम् धरित्रीम्।

प्रसूतः गन्धः।

कम्पितः देवदारुः।

गुहासु लीनम् अन्धकारम्।

(ख) तुमुन्प्रत्ययः– निमित्तार्थकं क्रियारूपं निष्पादनाय धातोः परे तुमुन् (तुम्) प्रत्ययः भवति। तुमुन्प्रत्ययुक्तं पदम् 'अव्ययम्' भवति। यथा–

सः नाटकं द्रष्टुं गच्छति।

करिणः कण्डूः विनेतुम् मस्तकं घर्षयन्ति।

(ग) 'ल्यप्' प्रत्ययः– एतेन पूर्वकालिकक्रिया निष्पन्ना भवति। यदि धातोः पूर्वं कश्चन उपसर्गः भवति तदा 'क्त्वा' स्थाने 'ल्यप्' (य) भवति। यथा–

किराताः छायां (नि + सेव् + ल्यप्) = निषेव्य गच्छन्ति।

हिमालयः पूर्वापरौ समुद्रौ (अव + गाह् + ल्यप्) = अवगाह्य स्थितः।

शब्दरूपाणि

	इन्दु (उकारान्तपुल्लिङ्गः)			**मधु (उकारान्तनपुंसकलिङ्गः)**		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्र० वि०	इन्दुः	इन्दू	इन्दवः	मधु	मधुनी	मधूनि
द्वि० वि०	इन्दुम्	इन्दू	इन्दून्	मधु	मधुनी	मधूनि
तृ० वि०	इन्दुना	इन्दुभ्याम्	इन्दुभिः	मधुना	मधुभ्याम्	मधुभिः
च० वि०	इन्दवे	इन्दुभ्याम्	इन्दुभ्यः	मधुने	मधुभ्याम्	मधुभ्यः
पं० वि०	इन्दोः	इन्दुभ्याम्	इन्दुभ्यः	मधुनः	मधुभ्याम्	मधुभ्यः
ष० वि०	इन्दोः	इन्द्वोः	इन्दूनाम्	मधुनः	मधुनोः	मधूनाम्
स० वि०	इन्दौ	इन्द्वोः	इन्दुषु	मधुनि	मधुनोः	मधुषु
सम्बोधनम्	हे इन्दो!	हे इन्दू!	हे इन्दवः!	हे मधु!	हे मधुनी!	हे मधूनि!

	गच्छत् (शतृप्रत्ययान्तः) (पुल्लिङ्गः) जाता हुआ			धनवत् शब्द (मतुप् प्रत्ययान्तः) धनवाला		
	एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र0 वि0	गच्छन्	गच्छन्तौ	गच्छन्तः	धनवान्	धनवन्तौ	धनवन्तः
द्वि0 वि0	गच्छन्तम्	गच्छन्तौ	गच्छतः	धनवन्तम्	धनवन्तौ	धनवतः
तृ0 वि0	गच्छता	गच्छद्भ्याम्	गच्छद्भिः	धनवता	धनवद्भ्याम्	धनवद्भिः
च0 वि0	गच्छते	गच्छद्भ्याम्	गच्छद्भ्यः	धनवते	धनवद्भ्याम्	धनवद्भ्यः
पं0 वि0	गच्छतः	गच्छद्भ्याम्	गच्छद्भ्यः	धनवतः	धनवद्भ्याम्	धनवद्भ्यः
ष0 वि0	गच्छतः	गच्छतोः	गच्छताम्	धनवतः	धनवतोः	धनवताम्
स0 वि0	गच्छति	गच्छतोः	गच्छत्सु	धनवति	धनवतोः	धनवत्सु
सम्बोधनम्	हे गच्छन्	हे गच्छन्तौ	हे गच्छन्तः	हे धनवन्	हे धनवन्तौ	हे धनवन्तः

धातुरूपाणि नश् = नश्यति, अनश्यत्, नश्यतु, नङ्क्ष्यति, नश्येत्।
त्रस् = त्रस्यति, अत्रस्यत्, त्रस्यतु, त्रसिष्यति, त्रस्येत्।
(लट्, लङ्, लोट्, लृट्, विधिलिङ् लकारेषु, प्र.पु. एकवचने)

पाठगतप्रश्नाः 15.3

1. प्रश्नानाम् उत्तराणि ददतु
   (क) भागीरथीनिर्झरशीकराणां वोढा कः अस्ति?
   (ख) किराताः हिमालये कान् अन्वेषणाय भ्रमन्ति?
   (ग) हिमालयः अन्धकारं कस्मात् रक्षति?
   (घ) शरणागतं क्षुद्रं प्रति अपि केषां ममत्वं भवति?
2. पर्यायपदमेलनं कुर्वन्तु–

'क' स्तम्भः	'ख' स्तम्भः
(क) सज्जनः	(i) दिवाकरः
(ख) मयूरः	(ii) दिवा
(ग) गङ्गा	(iii) सत्
(घ) सूर्यः	(iv) शिखण्डी
(ङ) दिनम्	(v) वायुः
(च) पवनः	(vi) भागीरथी

3. एतेषु किं पदं क्तप्रत्ययान्तं नास्ति?
   भीतम्, लीनम्, कम्पितः, किरातः, भिन्नः।

4. 'क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीव' इति सूक्तेः प्रदत्तं भावार्थं मञ्जूषायाः पदैः पूरयन्तु–

भावार्थः महापुरुषाः नीचजने अपि शरणागते सति ..... इव तं प्रति ..... कुर्वन्ति। यथा हिमालयः स्वगुहासु ..... अन्धकारं ..... रक्षति एव।

स्नेहं, सज्जने, सूर्यात्, लीनम्

15.4 किम् अधिगतम्

- हिमालयः पर्वतराजः अस्ति। एषः भारतस्य उत्तरदिशायां स्थितः। अस्य उन्नतानि शिखराणि हिमपूरितानि सन्ति। एष पृथिव्याः परिमाणरूपः।
- हिमालयादेव गङ्गा निर्गच्छति।
- हिमालयस्य प्राकृतिकं सौन्दर्यम् अद्भुतमेव।
- स्वल्पः दोषः गुणसमूहे विलीयते।
- महापुरुषाः शरणागतं क्षुद्रमपि रक्षन्ति।
- 'क्त' कृत्प्रत्ययः। 'क्त' प्रत्ययायुक्तं पदं भूतकालिकक्रिया रूपं विशेषणरूपं च भवति। 'तुमुन्' प्रत्ययान्तं पदम् अव्ययपदं भवति।
- 'ल्यप्' प्रत्ययः पूर्वकालिकक्रियार्थे उपसर्गयुक्तेन धातुना सह प्रयुज्यते।
- अन्यपदप्रधानः बहुव्रीहिः भवति।
- गच्छत्, धनवत्, इन्दु, मधु युग्मशब्दरूपेषु भेदः भवति।

15.5 योग्यताविस्तारः

कविपरिचयः

कालिदासः 'कविकुलगुरुः' इति प्रसिद्धः। अनेन रचिताः सप्त ग्रन्थाः सन्ति। यथा 'रघुवंशम्', 'कुमारसंम्भवम्' इति महाकाव्यद्वयम्, 'ऋतुसंहारः', 'मेघदूतम्' इति खण्डकाव्यद्वयम्, 'मालविकाग्निमित्रम्', 'विक्रमोर्वशीयम्', 'अभिज्ञानशाकुन्तलम्' इति त्रीणि नाटकानि च।

देशः

कालिदासस्य देश–कालयोः विषये विदुषां नैकं मतं विद्यते। परं महाकविना मेघदूते 'उज्जयिनी' श्री विशाला वा इति विशेषरूपेण वर्णिता। अतः 'कालिदासः उज्जयिनी निवासी' आसीत् इति विदुषां मतं वर्तते।

टिप्पणी

कालः

प्रायः मन्यते यत् कालिदासः 'उज्जयिनीनरेशस्य शकारेः विक्रमादित्यस्य नवरत्नेषु श्रेष्ठः आसीत्। विक्रमसंवत्–प्रवर्तकस्य विक्रमादित्यस्य राज्याभिषेककालः ईसातः पूर्वम् 57 वर्षाणि मन्यते। अतः कालिदासस्य कालः ई0पू0 प्रथमशताब्दी इति निश्चितः भवति।

कृतिपरिचयः

'कुमारसम्भवम्'– प्रस्तुतः पाठः अस्मादेव महाकाव्याद् उद्धृतः। अस्मिन् महाकाव्ये 17 सर्गाः सन्ति। तत्र पार्वतीविवाहः, कुमारजन्म, तारकासुरवधः च मुख्यकथाः, अन्यास्तु प्रासङ्गिककथाः सन्ति। कविना उदात्तप्रेम्णः उदाहरणं तु 'मदनदहन' इति माध्यमेन प्रस्तुतम् अस्ति।

रघुवंशम्

अस्मिन् महाकाव्ये 19 सर्गाः सन्ति। दिलीपतः अग्निवर्णपर्यन्तं राज्ञां वर्णनं विद्यते। इयम् उत्कृष्टा काव्यरचना कालिदासस्य।

ऋतुसंहारम्

इयं कालिदासस्य प्रथमा कृतिः। अत्र षण्णाम् ऋतूनां सरलं सरसं मनोरमं च वर्णनं विद्यते। षट् सर्गाः सन्ति।

मेघदूतम्

प्राकृतिकसौन्दर्येण मानसिकभावोद्गाराणां सुन्दरी अभिव्यक्तिः। शापवशात् विरहाकुलस्य यक्षस्य स्वप्रियां प्रति प्रेषितः भावपूर्णः सन्देशः अस्ति।

मालविकाग्निमित्रम्

नाटकेऽस्मिन् विदिशायाः नृपस्य अग्निमित्रस्य विदर्भस्य च राजकुमार्याः मालविकायाः प्रणयकथा अस्ति। नाटके पंच अंकाः सन्ति।

विक्रमोर्वशीयम्

अस्मिन् नाटके राज्ञः पुरुरवसः 'उर्वशी' अप्सरायाः च प्रेमकथानकम् अस्ति। नाटके पंच अंकाः सन्ति।

अभिज्ञानशाकुन्तलम्

अस्मिन् नाटके राज्ञः दुष्यन्तस्य शकुन्तलायाः च प्रणयकथायाः मनोहारि चित्रणम् अस्ति। नाटके सप्त अंकाः सन्ति। 'काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला' इति प्रसिद्धम्।

हिमालयः

ब्रह्माण्डपुराणे– कैलासो हिमवांश्चैव दक्षिणे वर्षपर्वतौ।
पूर्वपश्चिमगावेतावर्णवान्तरूपस्थितौ।।

शिवपुराणे– अस्त्युत्तरस्यां दिशि वै गिरीशो हिमवान्महान्।
पर्वतो हि मुनिश्रेष्ठ महातेजास्समृद्धिभाक्।।
पूर्वापरौ तोयनिधी सुविगाह्य स्थितो हि यः।
नानारत्नकरो रम्यो मानदण्ड इव क्षितेः।।

वामनपुराणे– धन्योऽयं पर्वतश्रेष्ठः श्लाध्यः पूज्यश्च देवतैः।

अथर्ववेदे– ''गिरयसो पर्वता हिमवन्तोख्यं ते पृथ्वि स्योनमस्तु। (21.1.11)

(ख) भाषिकयोग्यता विस्तारः

'क्त'

धातुः	'क्त' योगेन निष्पन्नः मूलशब्दः	पुल्लिङ्गे	स्त्रीलिङ्गे	नपुंसकलिङ्गे
गम्	गत	गतः	गता	गतम्
लिख्	लिखित	लिखितः	लिखिता	लिखितम्
दृश्	दृष्ट	दृष्टः	दृष्टा	दृष्टम्
कृ	कृत	कृतः	कृता	कृतम्
प्रच्छ्	पृष्ट	पृष्टः	पृष्टा	पृष्टम्
श्रु	श्रुत	श्रुतः	श्रुता	श्रुतम्
नी	नीत	नीतः	नीता	नीतम्

उपसर्गः + धातुः + ल्यप्

आ + गम् + ल्यप् = आगम्य (आकर)
वि + लिख् + ल्यप् = विलिख्य (लिखकर)
उप + विश् + ल्यप् = उपविश्य (बैठकर)
वि + जि + ल्यप् = विजित्य (जीतकर)
प्र + दा + ल्यप् = प्रदाय (देकर)
नि + सेव् + ल्यप् = निषेव्य (सेवा करके)
प्र + नम् + ल्यप् = प्रणम्य (प्रणाम करके)
वि + चिन्त् + ल्यप् = विचिन्त्य (सोचकर)
वि + लोक् + ल्यप् = विलोक्य (देखकर)

बहुव्रीहिसमासः समस्तपदैः भिन्नस्य अर्थस्य बोधः भवति। समस्तपदम् अन्यपदस्य विशेषणं भवति। एवम्भूतः बहुव्रीहिः समासः। यथा–

पीतानि अम्बराणि यस्य सः इति विग्रहे सति 'पीताम्बरः भवति।

इदं पदम् अन्यपदस्य विष्णोः विशेषणम् अस्ति।

भेदाः– प्रमुखाः त्रयो भेदाः सन्ति।

(क) समानाधिकरणः बहुव्रीहिः– समस्यमानं प्रत्येकं पदं समानविभक्तिकं (प्रथमाविभक्तियुक्तं) भवति। यत् शब्दे तु द्वितीयातः सप्तमीविभक्तिपर्यन्ताः विभक्तयः भवन्ति।

यथा– प्राप्तम् उदकं येन सः = प्राप्तोदकः (ग्रामः)

पीतानि अम्बराणि यस्य सः = पीताम्बरः

निर्गतं धनं यस्मात् सः = निर्धनः

कम्पितः देवदारु : येन सः = कम्पितदेवदारुः

(ख) व्याधिकरण बहुव्रीहिः यस्मिन् समासे प्रत्येकं पदं भिन्नविभक्तिकं भवति, स व्यधिकरणः बहुव्रीहिः भवति। यथा

चक्रं पाणौ यस्य सः = चक्रपाणिः

चन्द्रः शेखरे यस्य सः = चन्द्रशेखरः

चन्द्र इव मुखं यस्याः साः = चन्द्रमुखी

(ग) तुल्ययोगः बहुव्रीहिः 'सह' पदस्य तृतीयान्तपदेन समासः भवति। यथा–

पुत्रेण सह विद्यमानः = सपुत्रः आगतः पिता।

परिवारेण सह = सपरिवारः आगतः एषः।

पत्न्या सह = सपत्नीकः गच्छति सः।

15.6 पाठान्तप्रश्नाः

1. प्रश्नानाम् उत्तराणि ददतु
   (क) नगाधिराजः कः कथ्यते?
   (ख) हिमालयः कस्याः मानदण्डः इव स्थितः?
   (ग) हिमालयः कयोः समुद्रयोः मध्ये प्रविष्टः अस्ति?
   (घ) गुणसमूहे कीदृशः दोषः निमज्जति?
   (ङ) वृष्टिभिः उद्वेजिताः सिद्धाः कुत्र आश्रयन्ते?
   (च) करिणः किमर्थम् देवदारूवृक्षेषु घर्षणं कुर्वन्ति?
   (छ) हिमालये मृगान्वेषणे तत्पराः किराताः कीदृशं वायुं सेवन्ते?
   (ज) अन्धकारस्य तुलना केन सह कृता?
2. मञ्जूषायां प्रदत्तपदैः वाक्यपूर्तिः क्रियताम्

सुरभीकरोति, मध्यभागे, रत्नानि, पृथिव्याः, गङ्गा

(क) हिमालयः ..... परिमाणं ज्ञातुं मानदण्डः इव।
(ख) हिमालये अनेकानि ..... उपलभ्यन्ते।
(ग) सरलद्रुमेभ्यः निःसृतं दुग्धं शिखराणि .....।
(घ) हिमालये ..... नदी प्रवहति।
(ङ) मेघाः हिमालयस्य ..... सञ्चरन्ति।

3. अधः प्रदत्तसूक्तिद्वयस्य भावार्थं चतुर्/पञ्च वाक्येषु लिखन्तु
(क) एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोः किरणेष्विवाङ्कः।
(ख) क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैः शिरसां सतीव।

4. विशेषण–विशेष्यमेलनं क्रियताम्

'क'	'ख'
(क) देवात्मा	(i) शृङ्गाणि
(ख) पूर्वापरौ	(ii) हिमालयः
(ग) आतपवन्ति	(iii) तोयनिधी
(घ) विघट्टितानां	(iv) किरातैः
(ङ) अन्विष्टमृगैः	(v) सरलद्रुमाणाम्

5. सन्धिः क्रियताम्
(क) नग + अधिराजः = ...
(ख) अस्ति + उत्तरस्याम् = ...
(ग) देवता + आत्मा = ...
(घ) वृष्टिभिः + आश्रयन्ते = ...
(ङ) क्षुद्रे + अपि = ...

6. अधः प्रकृति–प्रत्ययययोगेन रूपं प्रदर्शयन्तु
(क) स्था + क्त (पु.) .....
(ख) जन् + क्त (नपु.) .....
(ग) प्र + सू + क्त (पु.) .....
(घ) ली + क्त (नपु.) .....
(ङ) अव + गाह् + ल्यप् .....
(च) नि + सेव् + ल्यप् .....
(छ) वि + नी + तुमुन् .....

7. विग्रहं समस्तपदं च दर्शयन्तु
(क) नगाधिराजः .....

(ख) गुणसन्निपाते .....

(ग) कपोलयोः कण्डूः .....

(घ) कम्पितः देवदारुः येन सः .....

(ङ) अन्विष्टाः मृगाः यैः तैः .....

8. अधोलिखितेषु पदेषु विभक्तिं (प्रथमा/द्वितीया) निर्दिशन्तु

(क) देवतात्मा .....

(ख) अन्धकारम् .....

(ग) छायाम् .....

(घ) गन्धः .....

(ङ) शृङ्गाणि .....

(च) हिमम् .....

9. अर्थमेलनं कुर्वन्तु

क	ख
(क) सानूनि	(i) चन्द्रस्य
(ख) सौभाग्यम्	(ii) मयूरः
(ग) इन्दोः	(iii) समुद्रौ
(घ) शिखण्डी	(iv) पर्वतः
(ङ) नगः	(v) शिखराणि
(च) तोयनिधी	(vi) सौन्दर्यम्

10. उचितधातुरूपैः रिक्तस्थानानि पूरयन्तु

(क) शुद्धपर्यावरणं विना जीवनं ..... (नङ्क्ष्यति/नङ्क्ष्यसि)

(ख) दुष्टाः ..... (नश्येत्/नश्येयुः)

(ग) क्रोधात् बुद्धिः ..... (नश्यामि/नश्यति)

(घ) अहम् सर्पात् ..... (त्रस्यामि/त्रस्यति)

(ङ) त्वं पापात् ..... (त्रस्यतु/त्रस्य)

15.7 उत्तराणि

15.3 बोधप्रश्नाः

1. (क) नगानाम् (ख) वर्धते (ग) आतपवन्ति
   (घ) सरलवृक्षाणां दुग्धस्य गन्धः (ङ) अन्धकारः
2. (क) पृथिव्या (ख) हिमं (ग) आतपवन्ति
   (घ) सुरभीकरोति (ङ) रक्षति

3. (क)→(iii), (ख)→(iv), (ग)→(i), (घ)→(ii)

पाठगतप्रश्नाः

15.1 1. (क) उत्तरस्यां, (ख) मानदण्डः, (ग) हिमालयः, (घ) हिमेन, (ङ) गुणसन्निपाते

2. (क) हिमालयः, (ख) तोयनिधी, (ग) हिमालयस्य, (घ) हिमम्

3. (क) प्राच्य–पश्चिमौ, (ख) पृथिव्याः (ग) स्वल्पः

15.2 1. (क) आमेखलं / मध्यभागे, (ख) सिद्धाः / तापसजनाः,
(ग) देवदारूवृक्षेषु घर्षणं, (घ) शिखराणि

2. (क)→(iii), (ख)→(vi), (ग)→(i), (घ)→(vii), (ङ)→(ii), (च)→(v), (छ)→(iv)

3. (i) घनाः (ii) आतपयुक्तानि (iii) सरलवृक्षेषु घर्षणेन (iv) सुगन्धितं

4. आमेखलम्, सञ्चरतां, आश्रयन्ते, उद्वेलिताः

15.3 1. (क) वायुः (ख) मृगान् (ग) दिवाकरात् (घ) महापुरुषाणाम्

2. (क)→(iii), (ख)→(iv), (ग)→(vi), (घ)→(i), (ङ)→(ii), (च)→(v)

3. किरातः

3. क्रमशः→ सज्जने, स्नेहं, लीनम्, सूर्यात्

15.6 पाठान्तप्रश्नाः

1. (क) हिमालयः, (ख) पृथिव्याः, (ग) पूर्व–पश्चिमसमुद्रयोःमध्ये, (घ) स्वल्पः दोषः, (ङ) आतपयुक्तानि शिखराणि, (च) कपोलकण्डूः विनेतुं, (छ) शीतलं, सुगन्धितं, मन्दं च, (ज) उलूकेन सह / नीचजनेन सह

2. (क) पृथिव्याः (ख) रत्नानि (ग) सुरभीकरोति (घ) गङ्गा (ङ) मध्यभागे

3. (क) स्वल्पः दोषः गुणानां समूहे न दृश्यते। यथा चन्द्रस्य कलङ्कः दोषः अस्ति, परं सः तस्य किरणेषु एव लीनः भवति। तस्य प्रकाशं न बाधते। अतः गुणाधिक्ये एकः दोषः न गण्यः।

(ख) महापुरुषाः शरणागतवत्सलाः भवन्ति। ते शरणागतं रक्षन्ति। नीचं जनं अपि रक्षन्ति। ते सज्जनम् इव नीचं प्रति स्नेहं कुर्वन्ति।

4. (क)→(ii), (ख)→(iii), (ग)→(i), (घ)→(v), (ङ)→(iv)

5. (क) नगाधिराजः, (ख) अस्त्युत्तरस्याम्, (ग) देवतात्मा,
(घ) वृष्टिभिराश्रयन्ते, (ङ) क्षुद्रेऽपि

6. (क) स्थितः (ख) जातम् (ग) प्रसूतः (घ) लीनम्
(ङ) वगाह्य (च) निषेव्य (छ) विनेतुम्

7. (क) नगानाम् अधिराजः (ख) गुणानां सन्निपाते (ग) कपोलकण्डूः
(घ) कम्पितदेवदारूः (ङ) अन्विष्टमृगैः

8. (क) प्रथमा (ख) द्वितीया (ग) द्वितीया (घ) प्रथमा
(ङ) प्रथमा / द्वितीया (च) प्रथमा / द्वितीया

9. (क)→(v), (ख)→(vi), (ग)→(i), (घ)→(ii), (ङ)→(iv), (च)→(iii)

10. (क) नङ्क्ष्यति (ख) नश्येयुः (ग) नश्यति
(घ) त्रस्यामि (ङ) त्रस्य

309sk16

16

मानो हि महतां धनम्

किं भवद्भिः महाभारतस्य नाम श्रुतम्? तस्मिन् ग्रन्थे न केवलं कौरव–पाण्डवानाम् एव युद्धं वर्णितम् अपितु असंख्याः कथाः तत्र दत्ताः, याभ्यः अमूल्याः शिक्षाः प्राप्यन्ते। लोभः समस्तानां व्याधीनां मूलम्। अस्यां पद्यमय्यां कथायाम् कथम् एकः शृगालः दुष्टानां कथनेन विमूढराज्ञा सिंहेन पूर्वम् अपमानितः पश्चात् च यद्यपि सम्मानितः तथापि सचिवपदं त्यक्त्वा वनं प्रविशति। नूनं मानो हि महतां धनम्। अस्मिन् पाठे वयं एतस्य विषये पठिष्यामः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- व्याघ्रगोमायुकथां स्वशब्दैः वर्णयितुं समर्थः भविष्यति;
- महाभारतस्य सामान्यं परिचयं पञ्चवाक्येषु लेखितुं शक्तः भविष्यति;
- शृगालस्य व्याघ्रस्य चारित्रिकवैशिष्ट्यं विशदीकरिष्यति;
- शृगालस्य पदत्यागकारणानि विवेचयितुं क्षमः भविष्यति;
- कर्मवाच्यवाक्यानि कर्तृवाच्ये परिवर्तयिष्यति;
- द्वन्द्वबहुव्रीहिसमस्तपदानां विग्रहं प्रदर्शयितुं सक्षमः भविष्यति;
- 'सर्व' सर्वनामशब्दस्य त्रिषु लिङ्गेषु रूपाणि लेखिष्यति;
- पाठे प्रयुक्तानां सूक्तीनां चयनं करिष्यति।

क्रियाकलापः

अधः "क" स्तम्भे केषाञ्चित् स्वाभिमानयुक्तानां जनानां चित्राणि दत्तानि। "ख" स्तम्भे च तैः कृतानां बलिदानानां कर्मणां वर्णनम्। उपयुक्तनामभिः सह सम्बद्धवर्णनं योजयन्तु

"क" स्तम्भः	"ख" स्तम्भः
16.1	(1) स्वतन्त्रताप्राप्तेः अनन्तरं पदग्रहणात् विरक्तिः।
16.2	(2) बमविस्फोटकारणात् प्राणदण्डः।
16.3	(3) स्वंतन्त्रताकृते आंग्लैः सह युद्धम्।
16.4	(4) 'केसरी' पत्रमाध्यनेन आंग्लविरोधात् कारावासः।
16.5	(5) आई सी एस उपाधेः प्रत्यावर्तनम्।
16.6	(6) विषदातारं प्रति क्षमा।

स्वाभिमानिनः जनाः सुखानि त्यजन्ति, पदं त्यजन्ति परन्तु अपमानं न सहन्ते। मानो हि महतां धनम्।

16.1 मूलपाठः

मानो हि महतां धनम्

सम्प्रति मूलपाठं ध्यानेन पठामः

पुरिकायां पुरि पुरा श्रीमत्यां पौरिको नृपः ।
परहिंसारतिः क्रूरो बभूव पुरुषाधमः ।।1।।

स त्वायुषि परिक्षीणे जगामानीप्सितां गतिम्।
गोमायुत्वं च सम्प्राप्तो दूषितः पूर्वकर्मणा।।2।।

संस्मृत्य पूर्वभूतिं च निर्वेदं परमं गतः।
न भक्षयति मांसानि परैरुपहृतान्यपि।।3।।

अहिंस्रः सर्वभूतेषु सत्यवाक् सुदृढव्रतः।
स चकार यथाकालमाहारं पतितैः फलैः।।4।।

तं शुचिं पण्डितं मत्वा शार्दूलः ख्यातविक्रमः ।
कृत्वाऽत्मसदृशीं पूजां साचिव्येऽवरयत् स्वयम्।।5।।

तं तथा सुकृतं दृष्ट्वा पूज्यमानं स्वकर्मसु।
प्राद्विषन् कृतसंघाताः पूर्वभृत्याः मुहुर्मुहुः।।6।।

अन्यथा ह्युषिताः पूर्वं परद्रव्याभिहारिणः।
अशक्ता किंचिदादातुं द्रव्यं गोमायुयन्त्रिताः।।7।।

ईप्सितं तु मृगेन्द्रस्य मांसं यत् यत्र संस्कृतम्।
अपनीय स्वयं तद्धि तैर्न्यस्तं तस्य वेश्मनि।।8।।

मृगराजेन चाज्ञप्तं दृश्यतां चोर इत्युत।
कृतकैश्चापि तन्मांसं मृगेन्द्रायोपवर्णितम्।।9।।

सचिवेनापनीतं ते विदुषा प्राज्ञमानिना।
सरोषस्त्वथ शार्दूलः श्रुत्वा गोमायुचापलम्।।10।।

आज्ञापयामास तदा गोमायुर्वध्यतामिति।
शार्दूलस्य वचः श्रुत्वा शार्दूलजननी ततः।।11।

मृगराजं हितैर्वाक्यैः सम्बोधयितुमागमत्।
पुत्र, नैतत् त्वया ग्राह्यं कपटारम्भसंयुतम्।।12।।

शब्दार्थाः
श्रीमत्यां = वैभवशालिनी (में)
पुरिकायां पुरि = 'पुरिका' नामक नगरी में
पौरिकः = राजा का नाम, बभूव = हुआ।
आयुषि परिक्षीणे = आयु समाप्त होने पर,
अनीप्सितां = न चाही गई,
जगाम = प्राप्त हुआ।
गोमायुत्वं = शृगाल की योनि को
पूर्वभूतिं = पूर्वजन्म के वैभव को,
परमं निर्वेदं = परम वैराग्य को
परैः = दूसरों के द्वारा
उपहृतानि = मेरे किये गये
सर्वभूतेषु = सभी प्राणियों पर
अहिंस्रः = हिंसा न करने वाला,
यथाकालम् = समयानुसार,
चकार = करता था, ख्यातविक्रमः = प्रसिद्ध पराक्रम वाला, शार्दूलः = बाघ
आत्मसदृशीं = अपने पद के अनुरूप
साचिव्ये = मन्त्री पद पर
सुकृतं = श्रेष्ठ कर्म करने वाले को
कृतसंघाताः = मिले हुए
परद्रव्याभिहारिणः = दूसरों के धन को चुराने वाले, अन्यथा उचित और ढंग से रहने वाले
ईप्सितं = मनपसन्द, अपनीय = ले जाकर
वेश्मनि = घर में, न्यस्तम्= रख दिया गया
कृतकैः = दूषित कार्य करने वालों के द्वारा
उपवर्णितः = कहा गया
अपनीतं = चुराया गया है
प्राज्ञमानिना = बुद्धिमान के द्वारा
सरोषः = क्रोध से भरे हुए (बाघ ने)
वध्यताम् = मार दिया जाय
सम्बोधयितुम् = समझाने के लिये
आगमत् = आई
कपटारम्भसंयुतम् = कपट–पूर्ण षडयन्त्र से युक्त, ग्राह्यं = स्वीकार करना चाहिये।

टिप्पणी

दूषितं परदोषैर्हि गृह्णीते योऽन्यथा शुचिम्।
स्वयं सन्दूषितामात्यः क्षिप्रमेव विनश्यति।।13।।

तस्मादप्यरिसंघाताद् गोमायोः कश्चिदागतः।
धर्मात्मा तेन चाख्यातं यथैतत् कपटं कृतम्।।14।

ततो विज्ञातचरितः सत्कृत्य स विमोक्षितः।
परिष्वक्तश्च सस्नेहं मृगेन्द्रेण पुनः पुनः।।15।।

तं स गोमायुरालोक्य स्नेहादागतसम्भ्रमम्।
उवाच प्रणतो वाक्यं बाष्पगद्गदया गिरा।।16।।

दुःखेन श्लिष्यते भिन्नं श्लिष्टं दुःखेन भिद्यते।
भिन्ना श्लिष्टा तु या मैत्री न सा स्नेहेन वर्तते।।17।।

कश्चिदेव हिते भर्तुर्दृश्यते न परात्मनोः।
कार्यापेक्षाः हि वर्तन्ते भावस्निग्धाः सुदुर्लभाः।।18।।

एवंविधं सान्त्वमुक्त्वा धर्मकामार्थहेतुमत्।
प्रसादयित्वा राजानं गोमायुर्वनमभ्यगात्।।19।

परदोषैः = दूसरों के दोषों से
दूषित, परन्तु अन्यथा शुचिम् = वास्तव में पवित्र को, सन्दूषितामात्याः= दुष्ट अमात्यों वाला (राजा), क्षिप्रम् = शीघ्र
गोमायोः = शृगाल के, अरिसंघातात् = दुश्मनों के गिरोह से,, आख्यातम्= बता दिया गया, विज्ञातचरितः = सच्चरित्रता को जान लेने वाले, विमोक्षितः = छोड़ दिया गया, परिष्वक्तः = आलिंगित किया गया, स्नेहगतसम्भ्रमम् = स्नेह से व्याकुल चित्त वाले (बाघ को), प्रणतः = झुके हुए
बाष्प=आंसुओं से गदगद वाणी से
उवाच = कहा, भिन्नं = टूटा हुआ दिल
श्लिष्यते = जुड़ता है, श्लिष्टं = जुडा हुआ, भिद्यते = टूटता है
भिन्ना श्लिष्टा = पग पग पर जुड़ने और टूटने वाली मित्रता, स्नेहेन = स्नेह से
परिपूर्ण, भर्तुः = स्वामी के, हिते = हित में, दृश्यते = दिखाई देता है,
न परात्मनोः = अपने और पराये हित में नहीं, कार्यापेक्षाः = स्वार्थी, मतलबी
भावस्निग्धाः = शुद्ध भाव वाले स्नेही
सान्त्वं = सान्त्वनायुक्त
धर्मकामार्थहेतुकम् = धर्म अर्थ काम और युक्तियों से युक्त, हितकर
प्रसादयित्वा = प्रसन्न करके
वनम् = वन को
अभ्यगात् = चला गया।

16.2 बोधप्रश्नाः

1. विशेषणैः सह विशेष्यपदानि योजयन्तु

"क" स्तम्भ	"ख" स्तम्भ
(क) पतितैः	(1) वाक्यैः
(ख) हितैः	(2) पूजाम्
(ग) श्रीमत्यां	(3) सचिवेन
(घ) आत्मसदृशीम्	(4) फलैः
(ङ) कृतसंघाताः	(5) पुरि
(च) प्राज्ञमानिना	(6) पूर्वभृत्याः

2. श्लोकांशान् योजयन्तु

"क"	"ख"
(क) परहिंसारति : क्रूरः	(1) दृश्यतां चोर इत्युत।
(ख) कृत्वात्मसदृशीं पूजाम्	(2) श्लिष्टं दुःखेन भिद्यते।

(ग) मृगराजेन चाज्ञप्तम् (3) साचिव्येऽवरयत् स्वयम्।

(घ) आज्ञापयामास तदा (4) बभूव पुरुषाधमः।

(ङ) दुःखेन श्लिष्यते भिन्नं (5) गोमायुर्वनमभ्यगात्।

(च) प्रसादयित्वा राजानम् (6) गोमायुर्वध्यताम् इति।

3. निम्नलिखितेषु विकल्पेषु शुद्धं विकल्पम् (✓) इति चिह्नेन चिह्नीकुर्वन्तु

(क) पौरिकः नृपः (पुरिकायाम्/मथुरायाम्) अवसत्।

(ख) शृगालः केवलं (मांसम्/पतितानि फलानि) भक्षयति स्म।

(ग) शार्दूलः शृगालाय (सचिवपदम्/सेवकपदम्) अयच्छत्।

(घ) दुष्टैः कर्मचारिभिः मृगेन्द्रस्य (धनम्/ईप्सितम् अन्नम्)।

(ङ) शृगालः सचिवपदं त्यक्त्वा (नगरं/वनं) प्रति अचलत्।

16.3 अधुना अवगच्छामः

प्रथमः अंशः

पुरिकायां पुरि पुरा श्रीमत्यां पौरिको नृपः।
परहिंसारतिः क्रूरो बभूव पुरुषाधमः।।1।।

श्लोकः 1

सम्प्रति वयं अत्र प्रथमं श्लोकं पठामः बोधामः च।

पदच्छेदः पुरिकायाम् पुरि पुरा श्रीमत्याम् पौरिकः नृपः।
परहिंसारतिः क्रूरः बभूव पुरुषाधमः।।

अन्वयः पुरा श्रीमत्याम् पुरिकायाम् पुरि परहिंसारतिः क्रूरः पुरुषाधमः पौरिकः नृपः बभूव।

व्याख्या

नृपः कः अभवत्? एकः पौरिकः नाम नृपः अभवत्।

सः कुत्र अभवत् ? 'पुरिकायां पुरि'–पुरिका इति नगर्याम्।

श्रीमत्यां = शोभायुक्तायाम् अर्थात् सा नगरी शोभायुक्ता आसीत्।

परहिंसारतिः = परेषां हिंसायां रतिः यस्य सः अर्थात् हिंसकः।

क्रूरः = अत्याचारी, निर्दयः

पुरुषाधमः = पुरुषेषु अधमः, अत्यन्तनीचः

भावार्थः

प्राचीनकाले एका शोभायुक्ता 'पुरिका' नाम नगरी आसीत्। तस्यां नगर्यां एकः राजा आसीत्। तस्य नाम पौरिकः आसीत्। सः राजा अतीव क्रूरः = निर्दयः। परेषां हिंसायाम् रतः पुरुषेषु अधमः इव आसीत्।

टिप्पणी

'पुरिका' नामक नगरी में प्राचीन काल में एक पौरिक नाम का अत्यन्त क्रूर निर्दयी हिंसक प्रकृति वाला राजा हुआ।

व्याकरणबिन्दवः

		मूलशब्दाः
सप्तम्यन्तपदानि	श्रीमत्यां	(श्रीमती)
	पुरिकायां	(पुरिका)
	पुरि	(पूर्)
प्रथमान्तपदानि	नृपः	(नृप)
	परहिंसारतिः	(परहिंसारति)
	क्रूरः	(क्रूर)
	पुरुषाधमः	(पुरुषाधम)

सप्तम्यन्तपदानि 'पुरिका' इति नगर्याः विशेषणानि। प्रथमान्तपदानि नृपस्य विशेषणानि।

(विशेषणस्य लिङ्ग वचनं विभक्तिश्च विशेष्यवत् भवन्ति।)

श्लोकः 2

स त्वायुषि परिक्षीणे
जगाम अनीप्सितां गतिम्।
गोमायुत्वं च सम्प्राप्तो
दूषितः पूर्वकर्मणा।।2।।

पदच्छेदः सः तु आयुषि परिक्षीणे जगाम अनीप्सिताम् गतिम्।
गोमायुत्वम् च सम्प्राप्तः दूषितः पूर्वकर्मणा।।

अन्वयः सः तु परिक्षीणे आयुषि अनीप्सिताम् गतिम् जगाम। पूर्वकर्मणा दूषितः गोमायुत्वम् च संप्राप्तः।

व्याख्या

आयुषि परिक्षीणे = मृत्युंगते सति

पौरिकः अग्रिमे जन्मनि कः अभवत्? सः राजा अनीप्सितां अवांछितां गतिं प्राप्तवान्।

सः राजा अग्रिमे जन्मनि कां योनिं प्राप्तवान्? गोमायुत्वम् = शृगालस्य योनिम्। यतः सः राजा पूर्वजन्मनः कर्मणः दूषितः आसीत्। अर्थात् पौरिकः यदा राजा आसीत् तदा सः हिंसाकर्मणि रतः आसीत्।

भावार्थः

राजा पूर्वजन्मनि हिंसां कृतवान्, प्राणिनां वधम् अकरोत्। नीचकार्याणि अकरोत् अतः सः राजा पूर्वकर्मप्रभावेन अन्यस्मिन् जन्मनि शृगालः अभवत्।

पूर्वजन्म के कर्मों का फल सभी को भोगना पड़ता है। पौरिक राजा भी अपने बुरे कर्मों के कारण दूसरे जन्म में शृगाल बन गया जो पशु हिंसा करके अपना पेट पालता है।

व्याकरणबिन्दवः

आयुषि परिक्षीणे	भावे सप्तमी, यदा आयुः समाप्ता।
अनीप्सितां	न ईप्सितां– अवांछितां, (नञ् तत्पुरुष)
दूषित	दुष् + णिच् + क्त + – दुष्टः –दूषितः (प्रेरणार्थकक्रिया)
गोमायुत्वं	गोमायु+त्व– गोमायोः भावः (जन्म)

श्लोकः 3

संस्मृत्य पूर्वभूतिं च
निर्वेदं परमं गतः।
न भक्षयति मांसानि,
परैरुपहृतान्यपि।।3।।

पदच्छेदः संस्मृत्य पूर्वभूतिम् च निर्वेदम् परमम् गतः।
न भक्षयति मांसानि परैः उपहृतान्यपि।।

अन्वयः पूर्वभूतिम् च संस्मृत्य परमम् निर्वेदम् गतः (सः) परैः उपहृतानि अपि मांसानि न भक्षयति।

व्याख्या

सः गोमायुः इह जन्मनि परमं निर्वेदं वैराग्यं प्राप्तवान्।

सः पूर्वभूतिं संस्मृत्य पूर्वजन्मकर्माणि स्मृत्वा वैराग्यं गतः।

सः गोमायुः पूर्वजन्म स्मृत्वा अस्मिन् जन्मनि मांसानि न भक्षयति। परैः उपहृतानि, अन्यैः आनीतानि अपि च।

भावार्थः

सः शृगालः पूर्वजन्म स्मृत्वा वैराग्यं प्राप्तवान्। सः अन्यैः आनीतानि मांसानि अपि न भक्षयति।

वह राजा अगले जन्म में गीदड़ बन गया परन्तु उसे पूर्वजन्म के अपने अत्याचार और हिंसा के कार्य याद रहे और परिणामस्वरूप उसने स्वयं हिंसा करना तो दूर, औरों द्वारा भेंट किये गये मांस को भी खाना स्वीकार नहीं किया।

व्याकरणबिन्दवः

पूर्वभूतिं	= (पूर्वजन्म को) द्वितीया एकवचनम्
संस्मृत्य	= सम् स्मृ ल्यप् = स्मृत्वा

परमं निर्वेदं–परमं वैराग्यम्

परैः	= अन्यैः (तृतीया बहुवचनम्)
उपहृतानि	= उप + हृ + क्त नपुं. द्वितीया बहुवचनम्
परमं निर्वेदम्	= परमं विशेषणम्,निर्वेदम् = वैराग्यम्
उपहृतानि मांसानि	= उपहृतानि विशेषणम्, मांसानि–विशेष्यम्

श्लोकः 4

पदच्छेदः अहिंस्रः सर्वभूतेषुसत्यवाक् सुदृढ़व्रतः।
सः चकार यथाकालम् आहारम् पतितैः फलैः।।

अहिंस्रः सर्वभूतेषु
सत्यवाक् सुदृढव्रतः।
स चकार यथाकालमाहारं
पतितैः फलैः।।4।।

अन्वयः सर्वभूतेषु अहिंस्रः सत्यवाक् सुदृढ़व्रतः सः यथाकालम् पतितैः फलैः आहारम् चकार।

गोमायोः जीवनचर्या कीदृशी जाता? इति अत्र बोधामः।

व्याख्या

अहिंस्रः यः हिंसां न करोति सः। सत्यवाक् = सत्या वाक् यस्य सः सत्यवादी।

सः गोमायुः पतितैः फलैः आहारम् चकार = अकरोत्। अर्थात् यानि फलानि उचितकाले एव पतन्ति।

भावार्थः

सः गोमायुः कमपि न अमारयत्। सर्वदा सत्यम् अवदत्, तस्य व्रतं सुदृढमासीत्। यः समयानुसारं स्वयं पतितैः फलैः एव भोजनम् अकरोत्।

वह शृगाल पूर्व जन्म के पापों को याद करके अब प्राणियों पर हिंसा नहीं करता था, सत्य बोलता था, पक्के इरादे वाला था, और समयानुसार स्वयं गिरे हुए फलों से ही अपना भोजन करता था।

व्याकरणबिन्दवः

अहिंस्रः	= न हिंस्रः	नञ् तत्पुरुषः
सत्यवाक्	= सत्या वाक् यस्य सः = सत्यवाक् =	(बहुव्रीहिः)
सुदृढव्रतः	= सुदृढं व्रतं यस्य सः = सुदृढव्रतः =	(बहुव्रीहिः)
यथाकालम्	= कालम् अनतिक्रम्य समयानुसारम् =	(अव्ययीभावः)
पतितैः फलैः	= पतितैः (विशेषणम्) फलैः–(विशेष्यम्)	(कर्मधारयः)

टिप्पणी

श्लोकः 5

पदच्छेदः तम् शुचिम् पण्डितम् मत्वा शार्दूलः ख्यातविक्रमः।
कृत्वा आत्मसदृशीम् पूजाम् साचिव्ये अवरयत् स्वयम्।।

अन्वयः ख्यातविक्रमः शार्दूलः तम् शुचिम् पण्डितम् मत्वा आत्मसदृशीम् पूजाम् कृत्वा स्वयम् साचिव्ये अवरयत्।

शार्दूलेन गोमायुः कथं सम्मानितः इति वयम् अत्र पठामः।

व्याख्या

शार्दूलः ख्यातविक्रमः = यस्य विक्रमः पराक्रमः प्रसिद्धः सः एवम्भूतः आसीत्।

शार्दूलः गोमायुं किं मत्वा अवरयत्? (1) शुचिं=पवित्रम् (2) पण्डितं= विद्वांसम् च। शार्दूलः शृगालं सचिवस्य पदे अवरयत्। सः तस्य वरणे आत्मसदृशीं पूजां कृतवान्।

भावार्थः

वीरः व्याघ्रः शृगालं पवित्रं विद्वांसं मत्वा तस्य नृपतुल्यपूजादिकं कृत्वा = सम्मानादिकं कृत्वा तं सचिवपदाय अवरयत्।

बहुत ही वीर व्याघ्र ने शृगाल को पवित्र और विद्वान समझकर उसका अपने पद के योग्य पूजा, सम्मान करके सचिव पद के लिये स्वयं ही चुन लिया।

तं शुचिं पण्डितं मत्वा
शार्दूलः रव्यातविक्रमः।
कृत्वात्मसदृशीं पूजां
साचिव्येऽवरयत् स्वयम्।।5।।

व्याकरणबिन्दवः

ख्यातविक्रमः	ख्यातः विक्रमः यस्य सः (बहुव्रीहिः)
मत्वा	मन् + क्त्वा = विचारयित्वा
कृत्वा	कृ + क्त्वा = सम्पादयित्वा
आत्मसदृशीं	विशेषणं, पूजां = विशेष्यम्
साचिव्ये + अवरयत्	पूर्वरूपसन्धिः अ – ऽ (अवग्रहः)
अवरयत्	वृ + णिच् लङ् प्रथमपुरुषे एकवचनम्

श्लोकः 6

पदच्छेदः तम् तथा सुकृतम् मत्वा पूज्यमानम् स्वकर्मसु।
प्राद्विषन् कृतसंघाताः पूर्वभृत्याः मुहुः मुहुः।।

अन्वयः तम् तथा सुकृतम् स्वकर्मसु मुहुः मुहुः पूज्यमानम् मत्वा कृतसंघाताः पूर्वभृत्याः प्राद्विषन्।

अस्मिन् पद्ये व्याघ्रस्य पूर्वसेवकाः शृगालं प्रति कथं द्वेषं कृतवन्तः इति अत्र बोधामः।

तं तथा सुकृतं मत्वा
पूज्यमानं स्वकर्मसु।
प्राद्विषन् कृतसंघाताः
पूर्वभृत्याः मुहुर्मुहुः।।6।।

व्याख्या

शृगालं प्रति पूर्वभृत्याः ये व्याघ्रस्य पूर्वसेवकाः आसन् ते, कृतसंघाताः कृतः संघातः (मैत्री) यैः ते, पूर्वसेवकाः मुहुर्मुहुः प्राद्विषन् = पूर्वसेवकाः पुनः पुनः द्वेषम् अकुर्वन्। पूर्वसेवकाः गोमायुं सुकृतं मत्वा प्राद्विषन्। ते पूर्वसेवकाः गोमायुं स्वकर्मसु पूज्यमानं मत्वा प्राद्विषन्।

भावार्थः

मित्रताम् उपगताः व्याघ्रस्य पूर्वं सेवकाः शृगालं शुभकर्मयुक्तं स्वकार्यदक्षतार्थं वारम्वारं वन्द्यमानं दृष्ट्वा द्वेषम् अकुर्वन्।

व्याघ्र ने शृगाल को मन्त्री बना लिया। वह अपने कर्मों से पूजा जाने लगा। व्याघ्र के पुराने मन्त्रिगण मिलकर बारबार उस गीदड़ की पूजा होते हुए देखकर उससे द्वेष करने लगे।

व्याकरणबिन्दवः

कृतसंघाताः	कृतः संघातः यैः ते (बहुव्रीहिः)
मुहुः मुहुः	पुनः पुनः (अव्ययम्)
सुकृतं	सुष्ठ कृतं कर्म यस्य तं सुकृतम् (बहुव्रीहिः)
पूज्यमानम्	पूज् + कर्मवाच्य+शानच्+द्वितीया एकवचनम्
प्राद्विषन्	प्र + द्विष् + लङ् + प्रथम पु. बहुवचनम्

पाठगतप्रश्नाः 16.1

1. एकपदेन उत्तरत
   (क) शृगालं किं स्मृत्वा वैराग्यं प्राप्तवान्?
   (ख) पुरिका नगरी कीदृशी आसीत्?
   (ग) पौरिकः कीदृशैः कर्मभिः शृगालयोनिम् प्राप्तवान्?
   (घ) कः गोमायुं सचिवपदे नियुक्तम् अकरोत्?
   (ङ) किं व्रतं शृगालः पालयन् फलानि एव भक्षयति स्म?
   (च) कीदृशाः पूर्वभृत्याः तस्मै द्वेषम् अकुर्वन्?
2. उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयन्तु
   (क) श्रीमत्यां पुरिकायां ..... नृपः आसीत्।

(i) अशोकः (ii) विक्रमादित्यः

(iii) पौरिकः (iv) भोजः

(ख) पूर्वकर्मप्रभावेन अन्यस्मिन् जन्मनि सः ..... अभवत्

(i) सर्पः (ii) शृगालः

(iii) कर्कटः (iv) चटकः

(ग) पूर्वजन्मनः कर्माणि स्मृत्वा सः केवलं ..... भोजनम् अकरोत्

(i) अन्यैः आनीतानि मांसानि (ii) स्वयं पतितैः फलैः

(iii) अन्येषां पशूनां वधं कृत्वा (iv) वृक्षेभ्यः फलानि त्रोटयित्वा।

(घ) शुभकर्मयुक्तं शृगालं दृष्ट्वा ..... द्वेषम् अकुर्वन्

(i) पूर्वे सेवकाः (ii) प्रजाजनाः

(iii) व्याघ्रस्य बांधवाः (iv) सैनिकाः

3 (क) पौरिकस्य दुर्गुणद्वयं लिखत।

(ख) शृगालस्य गुणद्वयं लिखत।

(ग) शार्दूलस्य विशेषणं लिखत।

4. श्लोकेभ्यः प×च अव्ययपदानि चित्वा लिखत।

द्वितीयः अंशः

सम्प्रति, द्वितीयम् अंशं पठामः जानीमः च यत् कथं पूर्वकर्मचारिणां कथनेन राजा अनुशासनप्रियं मन्त्रिणं हन्तुम् आदिशति किन्तु तस्य माता ईदृशम् आदेशं न दातुम् उपदिशति।

श्लोकः 7

अन्यथा ह्युषिताः
पूर्वं परद्रव्याभिहारिणः।
अशक्ताः किंचिदादातुं
द्रव्यं गोमायुयन्त्रिताः।।7।।

पदच्छेदः अन्यथा हि उषिताः पूर्वम् परद्रव्याभिहारिणः।
अशक्ताः किंचित् आदातुम् द्रव्यम् गोमायुयन्त्रिताः।।

अन्वयः पूर्वम् अन्यथा हि उषिताः परद्रव्याभिहारिणः गोमायुयन्त्रिताः किंचित् द्रव्यम् आदातुम् अशक्ताः।

भवन्तः जानन्ति एव यत् भ्रष्टमन्त्रिणः शासने कर्मचारिणः राज्यधनहर्तारः भवन्ति।

व्याख्या

पूर्वभृत्याः परद्रव्याभिहारिणः – परेषां द्रव्याणि हरन्ति स्म। पूर्वभृत्याः गोमायुना यन्त्रिताः आसन्।

पूर्वभृत्याः किं कर्तुम् अशक्ताः? पूर्वभृत्याः किंचिदपि द्रव्यम् आदातुं –ग्रहीतुम् अशक्ताः– असमर्थाः जाताः। अर्थात् गोमायुः निष्ठावान् विद्वान् मंत्री आसीत्। अतः कर्मकराः तस्य अनुशासने किमपि लोभकरं चौर्यकर्म कर्तुं न शक्नुवन्ति स्म।

भावार्थः

व्याघ्रस्य पूर्वकर्मचारिणः पूर्वं भ्रष्टतया जीवन–यापनं कुर्वन्ति स्म, अन्येषां द्रव्याणि हरन्ति स्म परम् इदानीं शृगालस्य अनुशासनात् ते तथा कर्तुम् असमर्थाः अभवन्। ते किंचिदपि चोरयितुम् अशक्ताः जाताः। अतः ते शृगालाय अद्विषन्। ते सर्वे मिलित्वा तं दूरीकर्तुम् उपायान् चिन्तितवन्तः।

बाघ के पूर्वकर्मचारी पहले भ्रष्ट ढंग से मनमानी चोरियां करते पर शृगाल के अनुशासन के कारण उनकी बेईमानी बन्द हो गई और अब वे कुछ भी द्रव्य चुराने में असमर्थ हो गये।

व्याकरणबिन्दवः

हि	निश्चयपूर्वकम्, निस्सन्देहम्
उषिताः	वस् + क्त, पुं0 प्रथमा बहुवचनम्
परद्रव्यम्	परेषां द्रव्यम्, षष्ठी तत्पुरुषः
परद्रव्याभिहारिणः	परेषां द्रव्यस्य अभिहारिणः, षष्ठीतत्पु0
गोमायुयन्त्रिताः	गोमायुना यन्त्रिताः, तृतीयातत्पु0
आदातुम्	आ + दा + तुमुन्
अशक्ताः	न शक्ताः नञ् तत्पु0
शक्ताः	शक् + क्त पु0 प्रथमाबहुवचनम्

श्लोकः 8

पदच्छेदः ईप्सितम् तु मृगेन्द्रस्य मांसम् यत् यत्र संस्कृतम्।
अपनीय स्वयम् तत् हि तैः न्यस्तम् तस्य वेश्मनि।।

ईप्सितं तु मृगेन्द्रस्य
मांसं यत् यत्र संस्कृतम्।
अपनीय स्वयं तद्धि
तैर्न्यस्तं तस्य वेश्मनि।।8।।

अन्वयः यत् मृगेन्द्रस्य तु ईप्सितम् संस्कृतम् यत् मासंम् तत् हि तैः स्वयम् अपनीय तस्य वेश्मनि न्यस्तम्।

व्याख्या

तैः इति सर्वनामपदं प्रयुक्तम्।

पूर्वकर्मचारिभिः संस्कृतम्, पाकम्, मांसम्, भोजनार्थम् अपनीतम् यत् च सिंहस्य वांछितम् आसीत्।

किं जानाति भवान् तत् मांसं तैः कुत्र न्यस्तम्? आम्, तैः तत् मांसम् अपनीय तस्य शृगालस्य वेश्मनि = गृहे स्थापितम्। येन क्रुद्धः व्याघ्रः शृगालं चौरं मत्वा हन्यात्।

भावार्थः

ते पूर्वकर्मचारिणः दुष्टाः आसन्। सिंहस्य कृते तस्य अभिप्रेतं सिद्धं मासं यत्र स्थापितम् आसीत् ततः नीत्वा तैः दुष्टैः शृगालस्य गृहे न्यस्तम्। तेषाम् अभिप्रायः आसीत् यत् सिंहः क्रुद्धः भूत्वा शृगालं चौरं मत्वा तं मारयिष्यति।

वे पूर्वकर्मचारी दुष्ट थे। उन्होंने शेर के प्रिय आहार सिद्ध मांस को चुरा कर गीदड़ के घर में रख दिया जिससे गीदड़ चोर समझा जाए। आज भी प्रायः इस तरह के दुष्ट कार्य प्रतिदिन किये जाते हैं।

व्याकरणबिन्दवः

ईप्सितम्	आप् + सन् + क्त नपुं. प्र. एकवचनम्
मृगेन्द्रस्य	मृगानां पशूनाम् इन्द्रः राजा तस्य (षष्ठी तत्पु0)
तत्+हि	तद्धि, त् – द्, ह– ध्
तैः + न्यस्तम्	तैर्न्यस्तम्, (:) → र्
न्यस्तम्	नि + अस् + क्त नपु. प्रथमा एकवचनम्
अपनीय	अप + नी + ल्यप् = नीत्वा
वेश्मनि	वेश्मन् सप्तमी एकवचनम्

श्लोकः 9

मृगराजेन चाज्ञप्तं
दृश्यतां चोर इत्युत।
कृतकैश्चापि तन्मांसं
मृगेन्द्रायोपवर्णितम्।।9।।

पदच्छेदः मृगराजेन च आज्ञप्तम् दृश्यताम् चोरः इति उत।
कृतकैः च अपि तत् मांसम् मृगेन्द्राय उपवर्णितम्।।

अन्वयः दृश्यताम् उत चोरः इति मृगराजेन आज्ञप्तम्। कृतकैः च अपि मृगेन्द्राय तत् मांसम् उपवर्णितम्।

व्याख्या

मृगराजेन आज्ञप्तम् चोरः दृश्यताम् इति। कृतकैः = धूर्तैः मृगेन्द्राय तस्य मांसस्य विषये निवेदितम्। भवद्भिः अत्र किं ज्ञातम्? आम्, राज्ञा धूर्तानां चाटुकारिता न ज्ञाता।

कर्तृवाच्ये	**कर्मवाच्ये**
मृगराजः आज्ञापितवान्	मृगराजेन आज्ञप्तम्।
(यूयं) चौरं पश्यत	चौरः दृश्यताम्।
कृतकाः उपवर्णितवन्तः।	कृतकैः उपवर्णितम्।

टिप्पणी

भावार्थः

सिंहः आदिशत्– चौरं पश्यत। ते धूर्ताः सिंहाय मांसविषये न्यवेदयन्। किम् निवेदितवन्तः इति अग्रिमे पद्ये दत्तम्।

शेर ने आज्ञा दी कि चोर का पता लगाओ। उन धूर्तों ने शेर को मांसविषयक सारी बातें बताईं। क्या बताया इसके विषय में अगले पद्य में पढेंगे।

व्याकरणबिन्दवः

मृगराजेन	मृगाणां राजा मृगराजः तेन, षष्ठीतत्पुरुषः।
आज्ञप्तम्	आ +ज्ञा + क्त पुं. प्रथमा एकवचनम्
दृश्यताम्	दृश् कर्मवाच्ये यक् लोट् प्रथमा एकवचनम्
उपवर्णितम्	उप + वर्ण + क्त पुं. प्रथमा एकवचनम्

श्लोकः 10

पदच्छेदः सचिवेन अपनीतम् ते विदुषा प्राज्ञमानिना।
सरोषः तु अथ शार्दूलः श्रुत्वा गोमायुचापलम्।।

सचिवेनापनीतं ते
विदुषा प्राज्ञमानिना।
सरोषस्त्वथ शार्दूलः
श्रुत्वा गोमायुचापलम्।10।।

अन्वयः अथ, ते विदुषा प्राज्ञमानिना सचिवेन अपनीतम् गोमायुचापलम् तु श्रुत्वा शार्दूलः सरोषः (अभवत्)

व्याख्या

ते दुष्टाः सिंहम् अवदन्– तन्मांसं ते विदुषा प्राज्ञमानिना अपहृतम्। एतत् श्रुत्वा सरोषः, शार्दूलः कुपितः अभवत्। सिंहः तु शृगालस्य मनसः चपलतां विज्ञाय क्रुद्धः अभवत्।

किं वस्तुतः शृगालः दोषी आसीत्? नैव! दुष्टैः अनृतम् उक्त्वा मिथ्यारोपः कृतः।

वस्तुतः शृगालः व्याघ्रस्य विद्वान् बुद्धिमान् च सचिवः अभवत्। परं दुष्टैः भृत्यैः द्वेषभावेन राजा एवम् कथितः येन मृगेन्द्रः तं चौरं ज्ञात्वा खिन्नः जातः।

भावार्थः

ते दुष्टाः व्याघ्रम् अवदन्– तन्मांसं तव विदुषा बुद्धिमता सचिवेन शृगालेन अपहृतम्। सः शृगालः वस्तुतः चौरः यं त्वं विद्वान् बुद्धिमान् इव मन्यसे। व्याघ्रः एतच्छ्रुत्वा कुपितः अभवत्।

दुष्टों ने व्याघ्र को कहा कि तुम्हारा भोजन तुम्हारे विद्वान और बुद्धिमान मन्त्री द्वारा चुराया गया है। शृगाल की इस धृष्टता को सहन न करते हुए व्याघ्र कुपित हो गया।

व्याकरणबिन्दवः

सचिवेन + अपनीतम्	सचिवेनापनीतम् दीर्घसन्धिः
अपनीतम्	अप+नी+ क्त नपुं प्रथमा एकवचनम्
विदुषा	विद्वस् तृतीया एकवचनम्
प्राज्ञमानिना	प्राज्ञमानिन् तृतीया एकवचनम्
सरोषः + तु + अथ	सरोषस्त्वथ, : – स्, उ. → व् (यण् सन्धिः)

श्लोकः 11–12

आज्ञापयामास तदा
गोमायुर्वध्यतामिति।
शार्दूलस्य वचः
शार्दूलजननी ततः।।11।।
मृगराजं हितैर्वाक्यैः
सम्बोधयितुमागमत्।
पुत्र! नैतत् त्वया ग्राह्यं
कपटारम्भसंयुतम्।।12।।

पदच्छेदः आज्ञापयामास तदा गोमायुः वध्यताम् इति।
शार्दूलस्य वचः श्रुत्वा शार्दूलजननी ततः।।
मृगराजम् हितैः वाक्यैः सम्बोधयितुम् आगमत्।
पुत्र! न एतत् त्वया ग्राह्यम् कपटारम्भसंयुतम्।।

अन्वयः तदा (सरोषः शार्दूलः) 'गोमायुः वध्यताम्' इति आज्ञापयामास। ततः शार्दूलस्य वचः श्रुत्वा शार्दूलजननी मृगराजम् हितैः वाक्यैः सम्बोधयितुम् आगमत्। पुत्र! कपटारम्भसंयुतम् एतत् त्वया न ग्राह्यम्।

व्याख्या

शार्दूलजननी = शार्दूलस्य जननी। क्रुद्धः व्याघ्रः शार्दूलः शृगालस्य चपलतां श्रुत्वा क्रुद्धः अभवत् आज्ञाप्तवान् च 'शृगालः वध्यताम्'। शादूर्लस्य वचः 'शृगालः वध्यताम्' इति श्रुत्वा शार्दूलस्य माता शीघ्रमेव तत्र बोधयितुम् आगमत्। सा हितकरैः वाक्यैः तं सम्बोधयति– पुत्र! त्वया एतत् कपटारम्भसंयुतं न ग्राह्यम्। यतः तत्सर्वं षड्यन्त्रेण युक्तम्।

भावार्थः

व्याघ्रस्य माता शृगालस्य मृत्युदण्डविषये श्रुत्वा व्याघ्रं सम्बोधयितुम् आगच्छत्। सा अवदत्–पुत्र त्वम् एतस्मिन् कपटपूर्वकेण षड्यन्त्रेण युक्तम् एतत् तथ्यं मा विश्वसिहि। अत्र तु किमपि कपटम् अस्ति।

व्याघ्र की माता ने शृगाल का मृत्युदण्ड सुनकर उसको हितकर वचनों से समझाया कि पुत्र इसमें किसी ने कोई कपट पूर्ण षड्यन्त्र किया है अतः इस बात को यथावत् मत स्वीकार करो।

व्याकरणबिन्दवः

वचः	वचस् द्वितीया एकवचनम्
हितैः+वाक्यैः	हितैर्वाक्यैः (:) → र
सम्बोधयितुम्	सम् बुध् णिच् तुमुन्

न + एतत्	नैतत्, वृद्धिसन्धिः
ग्राह्यम्	ग्रह् + ण्यत् नपुं0 प्रथमा एकवचनम्
कपटारम्भः	कपटस्य आरम्भः, षष्ठीतत्पुरुषः
कपटारम्भेन संयुतम्	कपटस्य आरम्भः तेन संयुतम्

द्वितीयांशसारः

ते कर्मचारिणः भ्रष्टाः आसन्। इदानीं शृगालस्य अनुशासने ते चौर्यकर्म कर्तुमशक्ताः एकम् उपायं चिन्तितवन्तः। व्याघ्रस्य कृते सिद्धं मांसं हृत्वा शृगालस्य निवासस्थाने अस्थापयन्। ते व्याघ्रं सूचितवन्तः यत् तन्मांसं शृगालेन हृतम्। तत् ज्ञात्वा व्याघ्रः आदिशत् शृगालः हन्यताम् इति। एतत् ज्ञात्वा व्याघ्रस्य माता अवदत् पुत्र! त्वया सुष्ठु न कृतम्। एतत् कपटपूर्णम् आचरणं प्रतीयते।

वे कर्मचारी दुष्ट थे। शृगाल के नियन्त्रण के कारण अब वे चोरी आदि न कर पाते थे। अतः उन्होंने एक दिन व्याघ्र के लिए तैयार मांस को चुरा कर शृगाल के घर में छुपा दिया और व्याघ्र को कह दिया कि तुम्हारे सविच शृगाल ने यह मांस चुराया है। व्याघ्र ने गुस्से में आकर शृगाल को मार डालने की आज्ञा दे दी। तभी उसकी माता ने उस व्याघ्र को समझाया कि इसमें कोई चाल है। अतः ऐसा आदेश मत दो।

पाठगतप्रश्नाः 16.2

1. एकपदेन उत्तरं ददतु
   (क) पूर्वकर्मचारिणः केन यन्त्रिताः आसन्?
   (ख) पूर्वकर्मचारिभिः किमपनीतम्?
   (ग) शार्दूलः दुष्कृतां वार्तां श्रुत्वा कीदृशः अभवत्?
   (घ) शार्दूलः कस्य वधस्य आज्ञां दत्तवान् ?
   (ङ) शार्दूलमाता शार्दूलं कीदृशैः वाक्यैः समबोधयत्?
2. अधोलिखितपदानां योजनेन समस्तपदानि रचयन्तु
   (क) गोमायुना यन्त्रिताः
   (ख) मृगानां राजा तेन
   (ग) रोषेण सह विद्यमानः
   (घ) गोमायोः चापलम्
   (ङ) शार्दूलस्य जननी
   (च) कपटारम्भेन संयुतम्

3. कर्तृवाच्यान्तानि कर्मवाच्ये परिवर्त्य लिखन्तु

(क) मृगराजः आज्ञप्तवान्।

(ख) चौरं पश्यत।

(ग) कृतकाः मृगेन्द्राय उपवर्णितवन्तः

तृतीयः अंशः

श्लोकः 13

दूषितं परदोषैर्हि गृह्णीते
योऽन्यथा शुचिम्।
स्वयं सन्दूषितामात्यः
क्षिप्रमेव विनश्यति।।13।।

पदच्छेदः दूषितम् परदोषैः हि गृह्णीते यः अन्यथा शुचिम्।
स्वयम् सन्दूषितामात्यः क्षिप्रम् एव विनश्यति।।

अन्वयः यः परदोषैः हि दूषितम् अन्यथा शुचिम् (दण्डयति) (सः) सन्दूषितामात्यः स्वयं क्षिप्रम् एव विनश्यति।

अस्मिन् अंशे वयं पठामः यत् राज्ञः दूषितैः सचिवैः किं जायते? शृगालः च कथं मुक्तः भवति। सुदृढ़ा मैत्री च विरला दृश्यते इति।

शार्दूलस्य माता शार्दूलं सम्बोधयति। पुत्र! जानासि किम्? कः राजा विनश्यति? ''यस्य अमात्याः सन्दूषिताः, सः राजा विनश्यति। यतः ईदृशाः मन्त्रिणः राजहितपरायणाः न भवन्ति।'' सन्दूषितामात्यः राजा तु परदौषैः हि दूषितं पवित्रं जनं गृह्णाति। अत्र पश्यतु सः जनः शृगालः पवित्रः अस्ति। सः परेषां दोषैः दूषितः भवति। अतः एवम्भूतः राजा शीघ्रमेव (क्षिप्रम् एव) विनश्यति। यतः निर्दोषाय दण्डप्रदानम् राज्ञः महान् अपराधः।

भावार्थः

यस्य स्वयं राज्ञः अमात्याः दूषिताः सन्ति, यः वस्तुतः पवित्रं जनं केवलं परेषां दोषैः मिथ्या कलङ्कितं दण्डयति, तस्य राज्ञः शीघ्रम् एव विनाशः भवति। अतः निर्दोषः कदापि न दण्डनीयः।

जिस राजा के मन्त्री दूषित होते हैं और राजा को बहका कर पवित्र निर्दोष व्यक्ति पर दोषारोपण कर देते हैं और जो राजा उस निर्दोष व्यक्ति को दण्ड देता है, वह शीघ्र ही नष्ट हो जाता है। इसलिए राजा निर्दोष को कभी भी दण्ड न दे।

व्याकरणबिन्दवः

परदोषैः + हि	परेषां दोषैः	षष्ठी तत्पु.
यः + अन्यथा	योऽन्यथा	: – उ, अ = उ = ओ, अ = ऽ
सन्दूषितामात्यः	सन्दूषिताः अमात्याः यस्य सः	बहुब्रीहिः

टिप्पणी

क्षिप्रम्	शीघ्रम्	अव्ययपदम्
एव	एव	अव्ययपदम्
विनश्यति	वि + नश् + लट् प्र.पु. एकवचनम्	

श्लोकः 14

पदच्छेदः तस्मात् अपि अरिसंधातात् गोमायोः कः चित् आगतः।
धर्मात्मा तेन च आख्यातम् यथा एतत् कपटम् कृतम्।।

तस्मादप्यरिसंघातात्
गोमायोः कश्चिदागतः।
धर्मात्मा तेन चाख्यातं
यथैतत् कपटं कृतम्।।14।।

अन्वयः गोमायोः तस्मात् अपि अरिसंघातात् कश्चित् धर्मात्मा आगतः तेन च आख्यातम् यथा एतत् कपटम् कृतम्।

व्याख्या

तदैव तस्मात् गोमायोः अरिसंघातात्, तस्य शृगालस्य शत्रुसमूहात् कश्चिद् धर्मात्मा पशुः आगतः। किं भवान् जानाति तदा धर्मात्मा पशुः राजानं किं वदति? आम् तेन धर्मात्मापशुना आख्यातम् यथा एतत् कपटं कृतम् इति। सः धर्मात्मा यत् किमपि कपटं कृतम् आसीत् तत् सर्वं कथितवान्।

एतेन किं ज्ञायते? यत् राज्ये दुष्टाः भवन्तु नाम परं राजसभायां एकेनापि धर्मात्मना अनर्थात् रक्षा भवत्येव।

भावार्थः

तस्मात् शृगालस्य शत्रुसमूहात् कश्चित् धर्मात्मा सिंहाय तत्सर्वं कपटं निवेदितवान्, यथा तैः दुष्टैः स्वयं चोरयित्वा निर्दोषशृगालस्य गृहे मांसं स्थापितम्।

उस सचिव शृगाल के शत्रुसमूह में से किसी धर्मात्मा सियार ने आकर शेर को सब कुछ कपट पूर्ण षड्यन्त्र के विषय में बता दिया कि किस प्रकार उन दुष्टों ने स्वयं मांस चुराकर उस निर्दोष शृगाल के घर में रखवा दिया था।

व्याकरणबिन्दवः

सन्धिविच्छेदः

तस्मात् + अपि + अरिसंघातात्	तस्मादपि + अरिसंघातात् तस्मादप्यरिसंघातात्; त → द, इ → य
कः + चित्	कश्चित्; (:) → श्
कश्चित् + आगतः	कश्चिदागत; त् → द् (जश्त्व सन्धिः)

च + आख्यातम्	चाख्यातम्; अ + आ = आ दीर्घसन्धिः
यथा + एतत्	यथैतत्, आ + ए = ऐ वृद्धिः

वाच्यपरिवर्तनम्

कर्मवाच्यम्	**कर्तृवाच्यम्**
तेन आख्यातम्	सः आख्यातवान्
यथा एतत् कपटं कृतम्	यथा (ते) एतत् कपटं कृतवन्तः

श्लोकः 15

ततो विज्ञातचरितः
सत्कृत्य स विमोक्षितः
परिष्वक्तश्च सस्नेहं
मृगेन्द्रेण पुनः पुनः ।।15।।

पदच्छेदः ततः विज्ञातचरितः सत्कृत्य सः विमोक्षितः।
परिष्वक्तः च सस्नेहम् मृगेन्द्रेण पुनः पुनः।।

अन्वयः ततः मृगेन्द्रेण विज्ञातचरितः सः सत्कृत्य विमोक्षितः पुनः पुनः सस्नेहम् परिष्वक्तः च।

व्याख्या

विज्ञातचरितः विज्ञातं चरितं यस्य सः अर्थात् यदा राजा शृगालस्य शुद्धं चरित्रं ज्ञातवान् तदा तेन शृगालः मुक्तः कृतः।

केन सः पुनः पुनः परिष्वक्तः? ततः मृगेन्द्रेण सः पुनः पुनः सस्नेहं परिष्वक्तः = आलिंगितः। एतेन ज्ञायते यत् राजा विवेकशीलः न्यायप्रियः स्वयमेव स्यात् तस्य कर्मचारिणः अपि निष्ठावन्तः स्युः।

भावार्थः

यथा व्याघ्रः शृगालस्य निर्दुष्टं चरित्रम् अजानात् तदा तेन सः अपराधात् मुक्तः कृतः, स्नेहपूर्वकं पुनः पुनः वारम्वारं तम् आलिंगितवान्। राज्ञः एषः व्यवहारः न्यायप्रियः विवेकशीलः च।

तब विज्ञातचरित वाला वह सियार सत्कार करके अपराध से मुक्त कर दिया गया और व्याघ्र ने बार बार स्नेहपूर्वक उसका आलिंगन किया। राजा का यह व्यवहार न्यायप्रिय और विवेकसम्मत था।

व्याकरणबिन्दवः

सन्धिच्छेदाः

ततः+ विज्ञातचरितः	ततो विज्ञातचरितः; (:) → उ, अ + उ = ओ
परिष्वक्ताः + च	परिष्वक्ताश्च; (:) → श्

टिप्पणी

विग्रहाः

विज्ञातं चरितं यस्य सः	विज्ञातचरितः।	(बहुव्रीहिः)
स्नेहेन सहितम्	सस्नेहम्	(अव्ययीभावः)
मृगाणाम् इन्द्रः तेन	मृगेन्द्रेण	(ष. त.)
पुनः पुनः	अव्ययम्	

कृदन्तप्रत्ययाः

सत् कृत्य	सत्कृत्य = सत्कारं कृत्वा, सत् कृ + ल्यप्
विमोक्षितः	वि + मोक्ष् + क्त पुं–प्रथमा एकवचनम्
परिष्वक्तः	परि + ष्वज् + क्त पुं प्रथमा एकवचनम्

श्लोकः 16

पदच्छेदः तम् सः गोमायुः आलोक्य सस्नेहात् आगतसम्भ्रमम्।
उवाच प्रणतः वाक्यम् वाष्पगद्गदया गिरा।।

तं स गोमायुरालोक्य
स्नेहादागतसम्भ्रमम्।
उवाच प्रणतो वाक्यं
बाष्पगद्गदया गिरा।।16।।

अन्वयः सः गोमायुः सस्नेहात् आगतसम्भ्रमम् तम् आलोक्य प्रणतः वाष्पगद्गदया गिरा वाक्यम् उवाच।

व्याख्या

गोमायुः तं (व्याघ्रम्) आलोक्य स्नेहात् आगतसम्भ्रमम् अर्थात् स्नेहेन अत्यधिकं व्याकुलम् आगतं व्याघ्रं दृष्ट्वा, प्रणतः शृगालः, प्रकृष्टेन नतः = अर्थात् प्रणामं कृत्वा, बाष्पगद्गदया गिरा उवाच। अर्थात् राज्ञः न्यायप्रियव्यवहारेण शृगालः मुक्तः सन् कृतज्ञतया भावविह्वलः जातः। तस्य कण्ठः अवरुद्धः भवति। नेत्राभ्याम् अश्रुपातः भवति। ततः काठिन्येन प्रणम्य राजानं शनैः वदति।

भावार्थः

सः शृगालः अपश्यत् यत् व्याघ्रः अतिस्नेहात् व्याकुलः अस्ति, अतः सः अपि प्रणामं कृत्वा अश्रुपूर्णवाण्या तम् अवदत्।

शृगाल ने देखा कि व्याघ्र स्नेह से अत्यधिक व्याकुल है। अतः पहले व्याघ्र को उसने प्रणाम किया और आंसुओं से भीगी वाणी में उसको कहने लगा।

व्याकरणबिन्दवः

संधिच्छेदाः

गोमायुः + आलोक्य	गोमायुरालोक्य; (:) → र्
स्नेहात् + आगतसम्भ्रमम्	स्नेहादागतसम्भ्रमम्; त् – द्
प्रणतः + वाक्यम्	प्रणतो वाक्यं, (:) → उ, अ + उ = ओ, म् (ं)

दुःखेन शिलष्यते भिन्नं,
शिलष्टं दुःखेन भिद्यते।
भिक्षा शिलष्टा तु या मैत्री,
न सा स्नेहेन वर्तते।।17।।

विग्रहाः

आगतः सम्भ्रमः यस्मिन् तम्	आगतसम्भ्रमम्	(बहुव्रीहिः)
बाष्पेण गद्गदया	बाष्पगद्गदया	(तृतीया तत्पु.)

शब्दरूपाणि

गिरा	गिर् तृतीया एकवचनम्

श्लोकः 17

पदच्छेदः दुःखेन शिलष्यते भिन्नम् शिलष्टम् दुःखेन भिद्यते।
भिन्ना शिलष्टा तु या मैत्री, न सा स्नेहेन वर्तते।।

अन्वयः भिन्नम् दुःखेन शिलष्यते, शिलष्टम् दुःखेन भिद्यते (वः) या मैत्री भिन्ना शिलष्टा सा तु स्नेहेन न वर्तते।

अस्मिन् पद्ये कीदृशी मैत्री दृढ़ा भवति? इति पठामः।

व्याख्या

शिलष्यते = संयुक्ता भवति।

कीदृशी मैत्री दुःखेन शिलष्यते? भिन्नं सख्यम्। (यदा मित्रे भिन्ने पृथक् भवतः, तदा तयोः मध्ये पुनः मैत्री कष्टेन एव भवति।)

पुनः दुःखेन किं भिद्यते? शिलष्टं सख्यम् = घनिष्ठा मैत्री। अर्थात् ययोः मित्रयोः घनिष्ठा दृढा मैत्री भवति सा काठिन्येन एव भिद्यते, पृथग् भवति।

कीदृशी मैत्री स्नेहेन न वर्तते? या क्षणे शिलष्टा क्षणे च भिन्ना। या मैत्री एकस्मिन् क्षणे भिन्ना भवति, अन्यस्मिन् क्षणे शिलष्टा भवति। तस्मिन् सख्यभावे स्नेहः न वर्तते।

भावार्थः

दृढ़ा मैत्री चिरस्थायिनी भवति, क्षणे क्षणे भिन्ना/संयुक्ता च न भवति। तत्र परस्परं विश्वासः भवति।या च मैत्री क्षणे क्षणे संयुक्ता असंयुक्ता च जायते, तस्याम् मैत्र्यां स्नेहस्य अभावः वर्तते।

मित्रता की आधारशिला है परस्पर विश्वास और स्नेह। वह एक बार स्थापित हो जाय तो टूटती नहीं और टूट जाय तो जुड़ती नहीं। जो मैत्री क्षण में टूटती और जुड़ती रहे, उसमें स्नेह नहीं होता।

व्याकरणबिन्दवः

भिन्नम्	भिद् + क्त नपुं0 प्रथमा एकवचनम्
शिलष्टम्	शिलष् +क्त नपुं0 प्रथमा एकवचनम्

भिन्ना / श्लिष्टा	स्त्रीलिंगे, प्रथमा एकवचनम्
श्लिष्यते	श्लिष् कर्मवाच्य, लट् प्रथमपुरुषे एकवचनम्
भिद्यते	भिद् कर्मवाच्य, लट् प्रथमपुरुषे एकवचनम्

श्लोकः 18

पदच्छेदः कः चित् एव हिते भर्तुः दृश्यते न परात्मनोः।
कार्यापेक्षाः हि वर्तन्ते भावस्निग्धाः सुदुर्लभाः।।

कश्चिदेव हिते भर्तुर्दृश्यते
न परात्मनोः।
कार्यापेक्षाः हि वर्तन्ते
भावस्निग्धाः सुदुर्लभाः।।18।।

अन्वयः कश्चित् एव भर्तुः (एव) हिते दृश्यते परात्मनोः न। कार्यापेक्षाः हि (बहवः) वर्तन्ते, भावस्निग्धाः (तु) सुदुर्लभाः।

अस्मिन् पद्ये ज्ञापितं यत् ''शुद्धहृदयाः जनाः स्वामिहितकराः दुर्लभाः एव भवन्ति।

व्याख्या

कः भर्तुः हिते दृश्यते? कश्चिद् एव भर्तुः हिते दृश्यते। कश्चिद् (एकः) कस्य हिते न दृश्यते। न परस्य हिते न च आत्मनः हिते। अर्थात् एषः नरः विरलः एव यः स्वकीय हितं न पश्यति, न च परस्य हितं पश्यति अपितु भर्तुः (स्वामिनः) एव हितं पश्यति।

किं भवन्तः जानान्ति जगति– 1. प्रायः जनाः कीदृशाः वर्तन्ते? कार्यापेक्षाः। 2. कीदृशाः जनाः सुदुर्लभाः भावस्निग्धाः अर्थात् शुद्धभावेन स्वामिहितकारकाः जनाः दुर्लभाः एव मिलन्ति।

भावार्थः

प्रायशः जनाः आत्मनः हितं पश्यन्ति, अथवा अन्यस्य हितं पश्यन्ति परन्तु सर्वं विस्मृत्य स्वामिनः हितम् एव ये पश्यन्ति तादृशाः जनाः विरलाः एव सन्ति। अधिकांशतः जनाः स्वार्थपरकाः भवन्ति। शुद्धभावेन स्वामिहितकारकाः तु दुर्लभा एव।

प्रायः मनुष्य अपना या अन्य का स्वार्थ ही देखते हैं और मतलबी होते हैं। शुद्ध हृदयवाले, सच्ची पवित्र मित्रता वाले मुश्किल से ही मिलते हैं।

व्याकरणबिन्दवः

भर्तुः	भर्तृ षष्ठी एकवचनम्
परात्मनोः	परस्य च आत्मनः च (द्वन्द्वसमासः)
कार्यापेक्षाः	कार्यम् अपेक्षितं यैः ते कार्यापेक्षाः
भावस्निग्धाः	भावेन स्निग्धाः, भावेन स्नेहयुक्ताः (सप्तमीतत्पुरुषः)
सुदुर्लभाः	दुःखेन लभ्यते इति दुर्लभः (उपपद तत्पु.) सम्यक् दुर्लभः इति सुदुर्लभः (उपपद)

टिप्पणी

एवंविधं सान्त्वमुक्त्वा
धर्मकामार्थहेतुमत्।
प्रसादयित्वा राजानम्
गोमायुर्वनमभ्यगात् ।।19।।

श्लोकः 19

पदच्छेदः एवम् विधम् सान्त्वम् उक्त्वा धर्मकामार्थहेतुमत्।
प्रसादयित्वा राजानम् गोमायुः वनम् अभ्यगात्।।

अन्वयः धर्मकामार्थहेतुमत् एवम् विधम् सान्त्वम् उक्त्वा राजानम् प्रसादयित्वा गोमायुः वनम् अभ्यगात्।

अस्मिन पद्ये वयं गोमायुः कथं वनं गतः? इति बोधामः।

व्याख्या

राजानं प्रसादयित्वा, प्रसन्नं कृत्वा वनं गतवान्।

राजानं किम् उक्त्वा वनं गतः? गोमायुः राजानं सान्त्वम् धर्मकामार्थहेतुमत् उक्तवान्। अर्थात् धर्म–काम– अर्थपूर्ण शान्तिवचनानि उक्त्वा (उपदिश्य) सचिवपदं च त्यक्त्वा वनं प्रति गतवान्। महान्तः पुरुषाः लाभं त्यक्त्वा वनं गच्छन्ति।

भावार्थः

शृगालः व्याघ्रं धर्म–काम–अर्थपूर्णानि शान्तियुक्तानि वचनानि उक्त्वा, प्रसन्नं च कृत्वा; सचिवपदं त्यक्त्वा वैराग्यंप्राप्तः वनम् अगच्छत्।

गीदड़ व्याघ्र को इस प्रकार अनेक शान्तिपूर्ण धर्म–अर्थ–काम युक्त वचन कहकर, प्रसन्न करके सचिव पद को त्याग कर वन में चला गया क्योंकि मान ही महापुरुषों का धन है।

व्याकरणबिन्दवः

उक्त्वा	ब्रू – क्च् + क्त्वा, कथयित्वा
प्रसादयित्वा	प्र + सद् + णिच् + क्त्वा, प्रसन्नं कृत्वा
राजानम्	राजन् शब्दः द्वितीया एकवचनम्
धर्मकामार्थहेतुमत्	धर्मः च कामः च अर्थः च धर्मकामार्थः (द्वन्द्वः)
	धर्मकामार्थस्य हेतुः = (ष. त.) धर्मकामार्थहेतुः अस्ति अस्य
	धर्मकामार्थहेतुमत् (मतुप् प्रत्ययः)
एवंविधं	अव्ययम्

'सर्व'– सर्वनाम शब्दस्य त्रिषु लिङ्गेषु रूपाणि

सर्व (पुल्लिङ्गम्)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सर्वः	सर्वौ	सर्वे
द्वितीया	सर्वम्	सर्वौ	सर्वान्
तृतीया	सर्वेण	सर्वाभ्याम्	सर्वैः
चतुर्थी	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः
पञ्चमी	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
षष्ठी	सर्वस्य	सर्वयोः	सर्वेषाम्
सप्तमी	सर्वस्मिन्	सर्वयोः	सर्वेषु

सर्व (स्त्रीलिङ्गम्)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सर्वा	सर्वे	सर्वाः
द्वितीया	सर्वाम्	सर्वे	सर्वाः
तृतीया	सर्वया	सर्वाभ्याम्	सर्वाभिः
चतुर्थी	सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः
पञ्चमी	सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः
षष्ठी	सर्वस्याः	सर्वयोः	सर्वासाम्
सप्तमी	सर्वस्याम्	सर्वयोः	सर्वासु

सर्व (नपुंसकलिङ्गम्)

प्रथमा	सर्वम्	सर्वे	सर्वाणि
द्वितीया	सर्वम्	सर्वे	सर्वाणि

पाठगतप्रश्नाः 16.3

1. (क) व्याघ्रं का सम्बोधयति?
   (ख) कः कपटस्य रहस्यं विवृतम् अकरोत्?
   (ग) सत्यं ज्ञात्वा व्याघ्रः किम् अकरोत्?
   (घ) कीदृशी मैत्री स्नेहयुक्ता न भवति?
   (ङ) कीदृशाः जनाः सुदुर्लभाः?

2. निम्नलिखितेषु क्रियापदानि योजयन्तु

(क) कश्चिद् धर्मात्मा व्याघ्रं सर्वम् .....।

(ख) व्याघ्रः अतीव सम्भ्रान्तः भूत्वा शृगालं .....।

(ग) शृगालः व्याघ्रं वाष्पगद्गदया वाण्या .....।

(घ) विरलः एव स्वामिनः हिते कार्यपरः .....।

(ङ) प्रायशः जनाः कार्यापेक्षाः .....।

3. विशेष्यैः सह विशेषणानि योजयन्तु

'क' स्तम्भः	'ख' स्तम्भः
(क) धर्मात्मा	1. मैत्री
(ख) एवंविधम्	2. गिरा
(ग) भिन्ना	3. गोमायुः
(घ) विज्ञातचरितः	4. नृपः
(ङ) बाष्पगद्गदया	5. सान्त्वम्
(च) सन्दूषितामात्यः	6. वचनम्
(छ) सान्त्वम्	7. मृगेन्द्रः

सारांशः

तदा एकः धर्मात्मा कर्मचारी शत्रुदलात् आगत्य व्याघ्राय वस्तुस्थितिं निवेदितवान्। सत्यं ज्ञात्वा व्याघ्रः शृगालस्य सम्मानम् अकरोत् परन्तु शृगालः अवदत् या मैत्री क्षणे क्षणे भिन्ना श्लिष्टा वा भवति सा मैत्री स्थायिनी नास्ति। अतः राजानं धर्मपूर्वकानि वचनानि कथयित्वा शृगालः सचिवपदं त्यक्त्वा वनमगच्छत्। नूनं महापुरुषाणां कृते सम्मानः एव धनं भवति।

तभी शत्रुदल के ही एक धर्मात्मा कर्मचारी ने आकर व्याघ्र को सब कुछ सच–सच बता दिया। यह जानकर व्याघ्र शृगाल के पास गया। उसका सम्मान करते हुए उसे गले से लगाया परन्तु शृगाल ने कहा– जो मित्रता एक क्षण में जुड़ जाय और दूसरे ही क्षण में अलग हो जाय वह सच्ची मित्रता नहीं हो सकती। इस प्रकार धर्मपूर्वक व्याघ्र को समझा बुझा कर शृगाल सचिव पद को छोड़ कर वन को चला गया। सच है, महापुरुषों के लिए स्वाभिमान ही धन है।

16.4 किम् अधिगतम्

- महाभारतम् ज्ञानस्य कोषः।
- जनाः स्वार्थवशीभूताः कपटं कुर्वन्ति परन्तु अस्माभिः तेषां वशे न भवितव्यम्।
- भावशुद्धाः जनाः सुदुर्लभाः भवन्ति।

- कर्मवाच्ये वाक्यानि यदा कर्तृवाच्ये परिवर्त्यन्ते तदा कर्म प्रथमान्तम्, कर्ता तृतीयान्तं, कर्त्रा सह क्रियायाः सम्बन्धः भवति।
- स्वरसन्धिः पूर्वपदस्य अन्तिमेन स्वरेण परपदस्य प्रथमस्वरवर्णेन मिलित्वा संभवति।
- द्वन्द्वसमासे द्वयोः अनेकेषां च पदानां समाहारेण योजनं भवति।
- बहव्रीहिसमासे अन्यपदं प्रधानं भवति।
- 'सर्व' सर्वनाम शब्दस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति।

16.5 योग्यताविस्तारः

(क) ग्रन्थपरिचयः

महाभारतं पञ्चमः वेदः मन्यते। अस्य रचयिता अस्ति महर्षिकृष्णद्वैपायनव्यासमहाभागः। अस्मिन् ग्रन्थे एतादृशः कोऽपि विषयः न अस्ति यः अत्र न वर्णितः। स्वयमेव कथयति महर्षिः व्यासः–

धर्मे अर्थे च कामे च मोक्षे च भरतर्षभ।

यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचित्।।

अतएव् महत्त्वात् भारवत्त्वाच्च महाभारतम् उच्यते। अस्मिन् ग्रन्थे शतसहस्रसंख्याकाः श्लोकाः सन्ति। अत्र अष्टादश पर्वाणि सन्ति। प्रस्तुतः पाठः महाभारतस्य शान्तिपर्वणः एकादशाधिकशततमात् अध्यायात् सङ्कलितः।

(ख) (i) समानार्थकसूक्तयः

(i) आमिषं चैव नो हीष्टमामिषस्य विवर्जनम् (महाभारतम् शा.प. 7.10)

(ii) त्यागवांश्च पुनः पापं नालं कर्तुम् इति श्रुतिः (महा. अनु. पं. 7.38)

(iii) कर्मेव हि कर्तव्यं नास्ति सिद्धिरकर्मणः। (महा. अ. प. 10.26)

(iv) उद्यमो मित्रवद् ग्राह्यः प्रमादं शत्रुवत् त्यजेत्। (बुद्धचरितम् 26.73)

(v) हिंसा भार्या त्वधर्मस्य। (अग्नि. पु. 20.18)

(ii) क्तान्तविशेषणपदानि विशेष्याणि च

अपहृतानि	मांसानि
पतितैः	फलैः
हितैः	वाक्यैः
विज्ञातम्	चरितम्
प्रणतः	शृगालः
भिन्ना	मैत्री

(iii) क्तान्तक्रियापदानि **(कर्तृवाच्ये क्त प्रयोगः)**

सः गोमायुत्वं सम्प्राप्तः।	प्र + आप् + क्त
निर्वेदं परमं गतः।	गम् + क्त
गोमायोः अरिसंघातात् कश्चिद् आगतः।	आ + गम् + क्त
	कर्मवाच्ये क्त प्रयोगः
तेन आख्यातम्	आ ख्या क्त
तैः एतत् कपटं कृतम्	कृ + क्त

(iv) धातुः	**क्तान्तपदम्**	**ल्यबन्तपदम्**	**तुमुनन्तपदम्**
आ + रुह्	आरूढः (चढ़ा हुआ)	आरुह्य (चढ़ कर)	आरोढुम् (चढ़ने के लिए)
उप + दिश्	उपदिष्टः (उपदेश दिया गया)	उपदिश्य (उपदेश देकर)	उपदेष्टुम् (उपदेश देने के लिए)
प्र + विश्	प्रविष्टः (प्रेवश किया हुआ)	प्रविश्य (प्रवेश करके)	प्रवेष्टुम् (प्रवेश करने के लिए)
आ + नी	आनीतः (लाया गया)	आनीय (लाकर)	आनेतुम् (लाने क लिए)
वि + लिख्	विलिखितः (लिखा गया)	विलिख्य (लिखकर)	विलेखितुम् (लिखने के लिये)
आ + गम्	आगतः (आया हुआ)	आगम्य / आगत्य (आकर)	आगन्तुम् (आने के लिए)
प्र + दा	प्रदत्तः (दिया गया)	प्रदाय (देकर)	प्रदातुम् (देने के लिए)

16.6 पाठान्तप्रश्नाः

1. अधोलिखितवाक्यानि घटनाक्रमानुसारं लेखनीयानि

(क) एकः मृगराजः व्याघ्रः तं व्रतिनं दृष्ट्वा सचिवपदे नियुक्तवान्

(ख) तस्मिन् जन्मनि सः पूर्वजन्मकृतां हिंसां स्मरति स्म।

(ग) एकः पौरिकः नाम नृपः क्रूरः च आसीत्।

(घ) अतः स हिंसां परित्यज्य स्वयं पतितैः फलैः जीवनयापनं करोति स्म।

(ङ) राज्ञा व्याघ्रेण तं चौरं मत्वा तस्य वधाय आज्ञा दत्ता।

(च) राज्ञा मोचितः शृगालः सचिवपदं त्यक्त्वा वनम् अगच्छत्।

(छ) सः अन्यस्मिन् जन्मनि शृगालः अभवत्।

(ज) कश्चिद् धर्मात्मा शृगालः व्याघ्राय सत्यं निवेदितवान्।

(झ) धूर्तैः पूर्वभृत्यैः व्याघ्रस्य भोजनार्थं मांसं चोरयित्वा शृगालस्य गृहे स्थापितम्।

2. अधोलिखितवाक्यांशाः कस्य चारित्रिकं वैशिष्ट्यं प्रकटयन्ति?

(क) पश्चात्तापेन हिंसावृत्तिम् त्यजति।	व्याघ्रस्य / शृगालस्य
(ख) अतीव बुद्धिमान्।	व्याघ्रस्य / शृगालस्य
(ग) अमात्यानां नियुक्तिकृते विवेकशीलः।	व्याघ्रस्य / शृगालस्य
(घ) सहसा आवेशेन निर्णयं करोति।	व्याघ्रस्य / शृगालस्य
(ङ) पदस्य लोभः नास्ति।	शृगालस्य / व्याघ्रस्य
(च) उत्तमप्रशासकः आसीत्।	शृगालः / व्याघ्रः
(छ) पूर्वकर्मणा दूषितः।	शृगालः / व्याघ्रः

3. अधोलिखितकर्तृवाच्यान्तवाक्यानां समक्षं कर्मवाच्यान्तं रूपम् लिखत–

(क) मृगराजः आज्ञप्तवान्।

(ख) चौरं पश्यत।

(ग) त्वम् कपटपूर्णवचनानि न गृह्णीयाः।

(घ) नृपः व्याघ्रः शृगालं मोक्षितवान्।

(ङ) सः धर्मात्मा आख्यातवान्।

4. पूर्णवाक्येन उत्तरं ददतु

(क) पूर्वभृत्याः किमर्थं शृगालाय प्राद्विषन्?

(ख) शृगालः किमर्थं वैराग्यं प्राप्तवान्?

(ग) पौरिकः नृपः किमर्थं शृगालयोनिं प्राप्तवान्?

(घ) व्याघ्रः शृगालं किमर्थं सचिवपदे नियुक्तम् अकरोत्?

(ङ) दुष्टैः शृगालैः किं कृतम्?

(च) संसारे कीदृशाः जनाः विरलाः भवन्ति?

(छ) शार्दूलः अविवेकी आसीत् इति कथं सिध्यति?

5. समस्तपदनिर्माणं कृत्वा लिखन्तु

(क) रोषेण सह विद्यमानः = ...

(ख) शार्दूलस्य जननी = ...

(ग) परेषां हिंसा = ...

(घ) सर्वेषु भूतेषु = ...

(ङ) सत्या वाक् यस्य सः = ...

(च) गोमायुना यन्त्रिताः = ...

(छ) पुरुषेषु अधमः = ...

(ज) कालम् अपि अनतिक्रम्य = ...

6. अधोलिखितवाक्येषु अव्ययपदानि योजयन्तु

(क) पुरिकायां पुरि ..... पौरिकः नृपः अभवत्।

(ख) पूर्वभृत्याः परद्रव्याणि हरन्तः ..... अशक्ताः अभवन्?

(ग) व्याघ्रः गोमायुचापलं श्रुत्वा ..... गोमायोः वधाय आदिशत्।

(घ) यः ..... शुचिं परदोषैः दूषितं गृह्णाति, सः शीघ्रम् एव नश्यति।

(ङ) सः धर्मात्मा व्याघ्रम् उक्तवान् ..... दुष्टैः कपटं कृतम्।

(च) दूषितामात्यः राजा ..... एव विनश्यति।

16.7 उत्तराणि

16.3 बोधप्रश्नाः

1. क + 4, ख + 1, ग + 5, घ + 2, ङ + 6, च + 3
2. क + 4, ख + 3, ग + 1, घ + 6, ङ + 2, च + 5
3. क. पुरिकायाम्, ख. पतितानि, ग. सचिवपदम्, घ. ईप्सितम् अन्नम्, ङ नगरं

पाठगतप्रश्नाः

16.1 1. (क) पूर्वभूतिम्, (ख) श्रीमती, (ग) दुष्कर्मभिः, (घ) व्याघ्रः, (ङ) सुदृढं व्रतम्, (च) किंचिदादातुम् अशक्याः।

2. (क) iii (ख) ii (ग) ii (घ) i

3. (क) परहिंसारतः, क्रूरः,(ख) शुचिः, पण्डितः, (ग) ख्यातविक्रमः, (घ) पुरा, च, अपि, यथाकालम्, मत्वा

16.2 1. (क) शृगालेन, (ख) मांसम्, (ग) सरोषः, (घ) शृगालस्य, (ङ) हितैः

2. (क) गोमायुयन्त्रिताः (ख) मृगराजेन (ग) सरोषः (घ) गोमायुचापलम् (ङ) शार्दूलजननी (च) कपटारम्भसंयुतम्

3. (क) मृगराजेन आज्ञप्तम् (ख) चौरः दृश्यताम् (ग) कृतकैः मृगेन्द्राय उपवर्णितम्

16.3 1. (क) व्याघ्रस्य माता (ख) शत्रुसमूहात् कोऽपि धर्मात्मा शृगालः
(ग) व्याघ्रः शृगालं सत्कृत्य विमोक्षितवान् (घ) भिन्ना (ङ) भावस्निग्धा

2. (क) आख्यातवान् (ख) परिष्वक्तवान् (ग) अवदत् (घ) भवति (ङ) भवन्ति

3. (क) + 3, (ख) + 6 (ग) + 1, (घ) + 7, (ङ) + 2, (च) + 4, (छ) + 5

16.6 पाठान्तप्रश्नाः

1. (ग), (छ), (ख), (घ), (क), (झ), (ङ), (ज), (च)

2. (क) शृगालस्य (ख) शृगालस्य (ग) व्याघ्रस्य (घ) व्याघ्रस्य
(ङ) शृगालस्य (च) शृगालः (छ) शृगालः

3. (क) मृगराजेन आज्ञप्तम् (ख) चौरः दृश्यताम् (ग) त्वया कपटपूर्णवचनानि न ग्रहीतव्यानि (घ) नृपेण व्याघ्रेण शृगालः मोक्षितः (ङ) तेन धर्मात्मना आख्यातम्।

4. (क) पूर्वभृत्याः शृगालं स्वकर्मसु पूज्यमानं दृष्ट्वा प्राद्विषन्।

(ख) पूर्वजन्मनः कर्माणि स्मृत्वा शृगालः वैराग्यं प्राप्तवान्।

(ग) पौरिकः नृपः परहिंसारतिः क्रूरः च अभवत्।

(घ) शुचिं पण्डितं मत्वा शार्दूलः तम् सचिवपदे अवरयत्।

(ङ) दुष्टैः शृगालैः सिंहस्य सिद्धं मांसं चोरयित्वा शृगालस्य गृहे न्यस्तम्।

(च) हितैः जनाः विरलाः भवन्ति।

(छ) शार्दूलः अविचार्य एव शृगालस्य वधम् आदिष्टवान्।

5. (क) सरोषः (ख) शार्दूलजननी (ग) परहिंसा (घ) सर्वभूतेषु
(ङ) सत्यवाक् (च) गोमायुयन्त्रिताः (छ) पुरुषाधमः (ज) यथाकालम्

6. (क) पुरा (ख) हि (ग) तु (घ) अन्यथा
(ङ) यथा (च) क्षिप्रमेव

309sk17

17

कल्पनाकीर्तिः विजयते

धन्या हि अस्माकं भारतभूमिः या महद्भिः विभूतिभिः अलङ्कृता। अस्यां धरण्याम् अनेके विद्वांसः, वैज्ञानिकाः चिन्तकाः, कलामर्मज्ञाः, ज्योतिर्विदः जन्म लब्धवन्तः देशं च गौरवान्वितं कृतवन्तः। प्राचीनकाले एव आर्यभट्टः वराहमिहिरादयः वैज्ञानिकाः अन्तरिक्षविषये अमूल्यान् सिद्धान्तान् आविष्कृतवन्तः। अद्यत्वे तु उपग्रहयानादीनां साहाय्येन विविधानि शोधकार्याणि प्रचलन्ति। अस्माकं कल्पनाचावला अपि अन्तरिक्षशोधकार्येषु संलग्ना स्वजीवनं व्यतीतवती। अन्ते च अन्तरिक्षयाने दुर्घटनायां स्वप्राणान् त्यक्तवती। वयम् अत्र तस्याः साहसपूर्णकार्याणां विषये पठामः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- कल्पनाचावलामहाभागायाः परिचयं लेखितुं शक्ष्यति;
- अन्तरिक्षयात्रायाः तस्याः उपलब्धीः ज्ञातुं समर्थः भविष्यति;
- क्त–क्तवतुप्रत्ययान्तपदानां रूपाणि ज्ञात्वा वाक्यप्रयोगं कर्तुं शक्तः भविष्यति;
- कर्तृपदैः सह क्रियापदानि योजयितुं सक्षमः भविष्यति;
- सह–अधि–प्रति–नमः इत्यादीनां योगे उपपदविभक्तीनां प्रयोगं करिष्यति;
- 'इदम्' अदस्, विद्वस् शब्दानां रूपाणि लेखिष्यति।
- पाठे प्रयुक्तानां सूक्तीनां चयनं करिष्यति।

क्रियाकलापः

चित्रगतानां नारीणां नामानि तासां विशिष्टतायाः क्षेत्राणि च लिखत।

17.1

.....

.....

17.2

.....

.....

17.3

.....

.....

17.4

.....

.....

17.1 मूलपाठः

कल्पनाकीर्तिः विजयते

अधुना मूलपाठं ध्यानेन पठामः

वैभवः – भगिनि! पश्य चन्द्रतारकैः सुशोभितम् आकाश–मण्डलं कियत् राजते।

विभा – भ्रातः। न केवलमिदम्। आकाशमण्डले तु विविधानि ग्रहनक्षत्राणि सन्ति। अस्माकं पृथ्वी अपि तेषु एव अन्यतमा वर्तते। यदि अन्यस्मात् ग्रहात् अवलोक्यते तर्हि एषा अपि अन्यानि तारकाणि इव देदीप्यमाना प्रतीयते।

शब्दार्थाः
कियत् = कितना
राजते = सुशोभित होता है।
अन्यतमा = विशिष्ट
अवलोक्यते = देखा जाता है
तर्हि = तो
देदीप्यमाना = चमकती हुई
प्रतीयते = प्रतीत होती है

17.5

वर्णितवन्तः = वर्णन किया है
अधिकृत्य = विषय में
वर्धते = बढ़ रही है
मे = मेरी
तदनन्तरं = उसके बाद
अभियान्त्रिकी = इन्जीनियरिंग
संजातः = सम्पन्न हुआ,
लब्धवती =प्राप्त किया

वैभवः – अये! त्वया कथं ज्ञायते?

विभा – भ्रातः! किं न जानासि यत् अनेके वैज्ञानिकाः अन्तरिक्षात् पृथिव्याः सौन्दर्यं वर्णितवन्तः।

वैभवः – किम् अस्माकं देशात् कोऽपि अन्तरिक्षं न गतवान्।

विभा – अरे! मा एवं वद। 1984 तमे वर्षे राकेशशर्मा इति नामकः अन्तरिक्षयात्री सोवियतसंघस्य 'सोयुजसोल्यत' नाम्नि अन्तरिक्षयाने चन्द्रयात्रादलस्य सदस्यः आसीत्।

वैभवः – किम् काचित् महिला तत्र न गतवती?

विभा – किं कथ्यते? कल्पनाचावला नाम्नी महिला तु द्विवारम् अन्तरिक्षयात्रां कृतवती।

वैभवः – सत्यम्, सा अन्तरिक्षयात्रां कृतवती। अग्रजे! अन्तरिक्षयात्रिणीं कल्पनाम् अधिकृत्य तु वर्धते मे जिज्ञासा।

(ततः प्रविशति आचार्यः)

उभौ – (उत्थाय) आचार्यः आगतः। गुरुवर्याय नमः।

आचार्यः – चिरं जीवतम्। वैभव! कस्य विषये वर्धते जिज्ञासा?

उभौ – आचार्य! आवाम् अन्तरिक्षयात्रिणीं कल्पनाम् अधिकृत्य ज्ञातुम् इच्छावः।

आचार्यः – साधु!साधु! अत्युत्तमा भवतोः जिज्ञासा। अद्य तु तस्याः जन्मदिवसः एव। 1961 तमे वर्षे जुलाईमासस्य प्रथमे दिवसे एषा जन्म लब्धवती। हरियाणाराज्यस्य करनालनगरस्य कल्पनाचावला भारतीयनारीणां गौरवभूता अस्ति। तस्याः मातुः नाम संयोगिता

आसीत्। पिता बनारसीदासः भारतविभाजनात् अनन्तरं सपरिवारः करनालनगरं सम्प्राप्तः।

17.6

षोडशतिथौ = 16वीं तिथि को
आरब्धा = प्रारम्भ की
सम्यक् पृष्टम् = ठीक पूछा
अन्वेषणकार्यार्थम् = खोज के कार्य के लिए
सनाथितम् = साथ
यथानिर्दिष्टम् = निर्देशानुसार

विभा – धन्यौ एव तस्याः मातापितरौ। आचार्य! तया शिक्षा कुत्र प्राप्ता?

आचार्यः – करनाले एव टैगोरबालनिकेतनविद्यालये इयं प्रारम्भिकीशिक्षां प्राप्तवती। अस्याः वैमानिक्यां विशिष्टा रुचिः आसीत्। अतः सा पंजाब–अभियान्त्रिकीमहाविद्यालयात् वैमानिकीविषये स्नातकोपाधिम् अधिगतवती। तदनन्तरम् एषा विदुषी कालारोडो इति विश्वविद्यालये एरोस्पेस–अभियान्त्रिक्यां शोधकार्यस्य उपाधिं प्राप्तवती।

वैभवः – श्रीमन्! सा 'नासा' इति केन्द्रे कदा प्रवेशं लब्धवती?

आचार्यः – वस्तुतः ''कर्मैव हि कर्तव्यं नास्ति सिद्धिरकर्मणः।'' अतः 1988 तमे वर्षे सा 'नासा' (नेशनल एरोनॉटिक्स एण्ड स्पेस एडमिनिस्ट्रेशन) केन्द्रे द्रवगतिकी इति क्षेत्रे कार्यं प्रारभत। 1994 तमे वर्षे तत्रैव 'नासा' केन्द्रे विशेषज्ञरूपेण तस्याः नियुक्तिः जाता। 1995 तमे वर्षे कठिनतरं परीक्षानन्तरं 'नासा' अन्तरिक्षकेन्द्रे अन्तरिक्षयात्रायै अस्याः चयनं जातम्।

वैभवः – गुरुवर! तया कदा अन्तरिक्षयात्रायाः गौरवं लब्धम्?

आचार्यः – 1997 तमे वर्षे नवम्बरमासस्य विंशतितिथौ एषा अन्तरिक्षयात्रां विधाय भारतस्य द्वितीय–अन्तरिक्षयात्री इति गौरवम् अधिगतवती। कथ्यते हि दुर्लभान्यपि कार्याणि सिध्यन्ति प्रोद्यमेन हि।

विभा – किं सा पुनः अन्तरिक्षं गता?

आचार्यः – आम्, कोलम्बियाशटलयानेन 2003 तमे वर्षे जनवरी मासस्य षोडशतिथौ तया यात्रा पुनः आरब्धा।

वैभवः – आचार्य! किम् एतत् यानं किमपि विशिष्टम् आसीत्?

आचार्यः – वत्स! सम्यक् पृष्टम्। एतत् यानं तु अन्वेषणकार्यार्थं विविधैः यन्त्रैः सुसज्जितं, सप्तयात्रिभिः सनाथितम्

आसीत्। यथानिर्दिष्टं यानमिदं धवले स्वच्छे आकाशे ध्वनिवेगादपि अष्टादशगुणितवेगेन पृथ्वीतलात् अतिदूरम् उड्डीयमानम् आसीत् ततः ...

विभा – महोदय! ततः किम् अभवत्?

आचार्यः – किं कथयामि? एतत् यानं षोडशदिनानि कैंसररोगम् अधिकृत्य अपि च अन्येषु विषयेषु महत्त्वपूर्णसामग्री– संचयनं कृतवत्। दौर्भाग्येण फरवरीमासस्य प्रथमे दिवसे समस्तकार्यं समाप्य यानमिदं पृथिवीं प्रति अवतरणात् केवलं दशनिमेषपूर्वम् एव भस्मीभूतं जातम्। कल्पना चावला अपि तेन यानेन सह आकाशीया संजाता। नूनं कालाधीनमिदं जगत्।

वैभवः – अहो! अतीव दारुणा इयं दुर्घटना।

विभा – किं तस्यै सम्मानं दातुम् अस्माकं देशेन किञ्चित् कृतम्?

आचार्यः – आम्, तां प्रति श्रद्धाप्रसूनानि समर्पयता अस्माकं प्रधानमन्त्रिणा भारतीयअन्तरिक्ष– अनुसंधानकेन्द्रस्य (**इसरो**) अग्रिमोपग्रहस्य नाम 'कल्पना प्रथमः' इति उद्घोषितम्।

विभा वैभवः च– धन्या इयं भारतीया नारी।

महूर्तमपि जीवेत् नरः शुक्लेन कर्मणा।
न कल्पमतिकृष्णेन लोकद्वयविरोधिना।।

अष्टादशगुणितवेगेन = अठारह गुणा वेग से
उड्डीयमानम् = उड़ रहा था,
दौर्भाग्येन = दुर्भाग्य से
समाप्य = समाप्त करके
अवतारणात् = उतरने से
दशनिमेषपूर्वम् = दस क्षण पूर्व
भस्मीभूतम् = जल गया
आकाशीया = आकाश में रहने वाली
संजाता = हो गई
दारुणा = मन को दहलाने वाली
श्रद्धाप्रसूनानि = श्रद्धा के फूल
प्रदर्शयितुम् = प्रदर्शित करने के लिए
शुक्लेन कर्मणा = शुभ कर्म द्वारा
कल्पमपि = बहुत अधिक समय तक

17.2 बोधप्रश्नाः

1. पाठं पठित्वा रिक्तस्थानानि पूरयत

(क) ..... इति नामकः भारतीयः सोवियतसंघस्य चन्द्रयात्रादलस्य सदस्यः आसीत्।

(ख) यदि अन्यस्मात् ग्रहात् अवलोक्यते तर्हि पृथ्वी अपि अन्यानि तारकाणि इव ... . प्रतीयते।

(ग) कल्पना चावला तु ..... अन्तरिक्षयात्रां कृतवती।

(घ) कल्पनाचावला ..... जुलाईमासस्य प्रथमदिवसे जन्म लब्धवती।

(ङ) अस्याः ..... विशिष्टा रुचिः आसीत्।

(च) ..... राज्यस्य कल्पना चावला भारतीयनारीणां गौरवभूता।

2. पाठात् चित्वा अधोलिखितानां विशेष्यपदानां विशेषणपदानि लिखत

(क) ..... ग्रहनक्षत्राणि।

(ख) ..... आकाशे।

(ग) ..... विषयेषु।

(घ) ..... कर्मणा।

(ङ) ..... दुर्घटना।

(च) ..... दिवसे।

3. 'अ' स्तम्भस्य वाक्यांशैः 'ब' स्तम्भस्य वाक्यांशानां मेलनं कुरुत

'अ'	'ब'
(क) चन्द्रतारकैः सुशोभितम्	(i) सिध्यति प्रोद्यमेन हि।
(ख) एषा विदुषी 'कालारोडा' इति विश्वविद्यालये	(ii) सप्तयात्रिभिः सनाथितम् आसीत्।
(ग) दुर्लभान्यपि कार्याणि।	(iii) आकाशमण्डलं कियत् राजते।
(घ) एतत् यानं तु विविधैः यन्त्रैः सुसज्जितं	(iv) नरः शुक्लेन कर्मणा
(ङ) मुहूर्तमपि जीवेत्	(v) एरोस्पेस–अभियान्त्रिक्यां शोधकार्यस्य उपाधिं प्राप्तवती।

17.3 अधुना अवगच्छामः

प्रथमः अंशः

वैभवः— भगिनि ..... जिज्ञासा।

इदानीं प्रथमम् अंशं पुनः पठामः कानिचित् वैज्ञानिकरहस्यानि च जानीमः।

भवद्भिःअवश्यमेव दृष्टं भवेत् यत् रात्रौ चन्द्रतारकैः सुशोभितम् आकाशमण्डलं कथं राजते। किं जानन्ति भवन्तः यत् ग्रहनक्षत्रेषु अन्यतमा अस्माकं पृथ्वी अपि यदि अन्तरिक्षात् अवलोक्यते तर्हि सा अपि तारकैः इव देदीप्यमाना दृश्यते। वैज्ञानिकाः ग्रहनक्षत्राणां रहस्यानि ज्ञातुं प्रायः अन्तरिक्षयात्रां कुर्वन्ति। अस्माकं देशात् सर्वप्रथमं राकेशशर्मा तत्र अगच्छत्। तदनन्तरं कल्पनाचावला द्विवारं तत्र गतवती।

सारः

अनेके अन्तरिक्षगामिनः वैज्ञानिकाः अन्तरिक्षस्य यात्रां कृतवन्तः। अस्माकं देशात् सर्वप्रथमं राकेशशर्मा अन्तरिक्षं गतः। ततश्च कल्पनाचावला नाम्नी महिला द्विवारम् अन्तरिक्षयात्रां कृतवती।

टिप्पणी

अनेक अन्तरिक्षगामी वैज्ञानिकों ने अन्तरिक्ष की यात्रा की। हमारे देश से सर्वप्रथम राकेश शर्मा ने अन्तरिक्ष की उड़ान भरी। तत्पश्चात् कल्पना चावला नाम की महिला ने दो बार अन्तरिक्ष की यात्रा की।

व्याकरणबिन्दवः

संज्ञापदानि

अन्तरिक्षगामिनः = अन्तरिक्षगामिन् प्रथमा बहुवचनम्

चन्द्रतारकैः = चन्द्रः च तारकाणि च चन्द्रतारकाणि तैः

पृथिव्याः = पृथिवी, षष्ठी एकवचनम्

क्रियापदानि

अवलोक्यते = अव √लुक् कर्मवाच्ये प्रथमपुरुषः एकवचनम्

राजते = √राज् आत्मनेपदी लट्लकारः प्रथमपुरुषः एकवचनम्

वर्तते = √वृत् आत्मनेपदी लट्लकारः प्रथमपुरुषः एकवचनम्

प्रतीयते = प्रति √इ कर्मवाच्ये यङ् प्रथमपुरुषः एकवचनम्

वर्धते = √वृध् (आत्मनेपदी) लट् प्रथमपुरुषः एकवचनम्

सन्ति = √अस् लट् प्रथमपुरुषः एकवचनम्

आसीत् = √अस् लङ् प्रथमपुरुषः एकवचनम्

जानासि = √जन् लट् मध्यमपुरुषः एकवचनम्

कृदन्तप्रत्ययाः

ज्ञातम् = ज्ञा क्त नपु. प्रथमा एकवचनम्

प्राप्नुवन्तः = प्र आप् + क्तवतु पु. प्रथमा बहुवचनम्

वर्णितवन्तः = वर्ण् क्तवतु, पु. प्रथमा बहुवचनम्

गतवान् = गम् क्तवतु, पुल्लिंगम्, प्रथमा एकवचनम्

गतवती = गम् क्तवतु, स्त्रीलिंगम् प्रथमा एकवचनम्

कृतवती = कृ क्तवतु, स्त्रीलिंगम् प्रथमा एकवचनम्

देदीप्यमाना = दीप् कर्म. शानच् स्त्रीलिंगम् एकवचनम्

पाठगतप्रश्नाः 17.1

1. एकपदेन उत्तरत
   (क) विविधानि नक्षत्राणि कुत्र सन्ति?
   (ख) ग्रहनक्षत्रेषु का अन्यतमा वर्तते?
   (ग) कैः सुशोभितम् आकाशमण्डलं राजते?
   (घ) वैज्ञानिकाः अन्तरिक्षात् कस्याः सौन्दर्यं वर्णितवन्तः?
   (ङ) कल्पना चावला कस्मात् महाविद्यालयात् वैमानिकीविषये स्नातकोपाधिम् अधिगतवती।
   (च) का भारतीयमहिला अन्तरिक्षं गता?
2. कर्तृपदं चिनुत
   (क) चन्द्रतारकैः आकाशमण्डलं राजते।
   (ख) त्वम् कथं जानासि?
   (ग) अन्तरिक्षात् वैज्ञानिकाः पृथिव्याः सौन्दर्यं वर्णितवन्तः
   (घ) राकेशशर्मा 1984 तमे वर्षे चन्द्रयात्रादलस्य सदस्यः आसीत्।
   (ङ) आकाशमण्डले ग्रहनक्षत्राणि सन्ति।
   (च) अस्माकं पृथिवी तेषु अन्यतमा वर्तते।
3. निर्दिष्टधातुभिः सह क्त प्रत्ययप्रयोगेन वाक्यपूर्तिं कुरुत
   (क) अस्माकं देशात् सर्वप्रथमं राकेश शर्मा अन्तरिक्षं ——— (गम् + क्त)
   (ख) तैः पृथिव्याः सौन्दर्यं ——— (वर्ण् + क्त)
   (ग) कल्पनाचावलामहाभागया द्विवारम् अन्तरिक्षयात्रा ——— (कृ+क्त)
   (घ) तस्याः चयनम् अन्तरिक्षयात्रायै —— (जन् + क्त)
   (ङ) अनेके वैज्ञानिकाः अन्तरिक्षं ——— (प्र+आप्+क्त)

द्वितीयः अंशः

इदानीं कल्पनायाः अध्ययनविषये बोधामः।

ततः प्रविशति ..... चयनं जातम्।

हरियाणाराज्यस्य भारतीयनारीणां गौरवभूता कल्पनाचावला 1961 तमे वर्षे जुलाई मासस्य प्रथमे दिवसे जन्म लब्धवती। करनालनगरे टैगोरबालनिकेतनविद्यालये तया प्रारम्भिकी शिक्षा प्राप्ता। वैमानिकीविषये स्नातकोपाधिम् अधिगतवती। 'एरोस्पेस–अभियान्त्रिकी' इति विषये तया शोधकार्यं कृतम्। तदनन्तरं सा 'नासा' इति केन्द्रे प्रवेशं लब्धवती। तत्र

'द्रवगतिकी' इति क्षेत्रे विशेषज्ञरूपेण कार्यं कृतवती। 1995 तमे वर्षे अन्तरिक्षयात्रायै तस्याः चयनं जातम्।

सारः

भारतीयनारीणां गौरवभूता कल्पनाचावला हरियाणाराज्यस्य करनालनगरे 1961 तमे वर्षे जुलाईमासस्य प्रथमे दिवसे मातुः संयोगितायाः पितुः च बनारसीदासस्य गृहे जन्म लब्धवती। सा टैगोरबालनिकतने प्रारम्भिकशिक्षां प्राप्य पंजाबविश्वविद्यालयात् स्नातकोपाधिं प्राप्य 'कालारोडो' विश्वविद्यालये शोधकार्यं कृतवती। तदनन्तरं 'नासा' इति केन्द्रे तस्याः चयनम् अन्तरिक्षयात्रायै जातम्।

भारतीयनारियों की गौरवभूता कल्पनाचावला का जन्म हरियाणा के करनाल नगर में पहली जुलाई 1961 को माता संयोगिता और पिता बनारसीदास के घर हुआ। टैगोर बालनिकेतन में शिक्षा प्राप्त करके पंजाबविश्वविद्यालय से स्नातक होकर कालारोडो विश्वविद्यालय में शोधकार्य किया। इसके बाद 'नासा' केन्द्र में अन्तरिक्ष यात्रा के लिए इनका चयन हो गया।

व्याकरणबिन्दवः

सन्धिच्छेदाः

नास्ति = न + अस्ति = अ + अ = आ दीर्घ सन्धिः

परीक्षानन्तरम् = परीक्षा + अनन्तरम् = आ + अ = आ दीर्घसन्धिः

स्नातकोपाधिकम् = स्नातक + उपाधिम् = अ + उ = ओ गुण सन्धिः

तत्रैव = तत्र + एव = अ + ए = ऐ वृद्धिसन्धिः

कर्मैव = कर्म + एव = अ + ए = ऐ वृद्धिसन्धिः

अत्युत्तमा = अति + उत्तमा = इ + स्वरः (उ) = 'इ' इत्यस्य 'य्' भवति। यण्सन्धिः

सिद्धिरकर्मणः = सिद्धिः+अकर्मणः = : + अ = र विसर्ग सन्धिः

पदपरिचयः

नारीणाम् = नारी षष्ठी बहुवचनम्

भवतः = भवत् (पु.) षष्ठी एकवचनम्

अस्याः = इदम् स्त्रीलिंगम्, षष्ठी एकवचनम्

क्रियापदानि

इच्छसि = इष्, लट्, मध्यमपुरुषः, एकवचनम्

प्रारभत = प्र रभ्, (आत्मनेपदम्) लङ्, प्रथमपुरुषः, एकवचनम्

अकरोत् = कृ लङ् प्रथमपुरुषः, एकवचनम्

कृदन्तप्रत्ययान्तशब्दाः

सम्प्राप्तः	=	सम् प्र आप् क्त पुल्लिंगम्,	प्रथमा एकवचनम्
प्राप्ता	=	प्र आप् क्त स्त्रीलिंगम्,	प्रथमा एकवचनम्
जातम्	=	जन् क्त पुल्लिंगम्,	प्रथमा एकवचनम्
लब्धवती	=	लभ् क्तवतु स्त्रीलिंगम्,	प्रथमा एकवचनम्
प्राप्तवती	=	प्र आप् क्तवतु स्त्रीलिंगम्,	प्रथमा एकवचनम्
अधिगतवती	=	अधि गम् क्तवतु स्त्रीलिंगम्,	प्रथमा एकवचनम्

उपपदविभक्तयः

'अधि' योगे द्वितीया यथा **कल्पनाम्** अधिकृत्य वर्धते मे जिज्ञासा।
विज्ञानम् अधिकृत्य अहम् ज्ञातुम् इच्छामि।

'प्रति' योगे द्वितीया — सः **नगरं** प्रति गच्छति
मातरं प्रति अहं श्रद्धाकुसुमानि अर्पयामि।

'सह' योगे तृतीया — पुत्री **मात्रा** सह गता।
सीता **रामेण** सह वनम् अगच्छत्।

'नमः' योगे चतुर्थी — **गुरवे / गुरुवर्याय** नमः
मातृ–पितृभ्यां नमः

प्रथमान्तपदानि	**सम्बोधनपदानि**
गुरुवरः	गुरुवर!
आचार्यः	आचार्य!
श्रीमान्	श्रीमन्!
महोदयः	महोदय!
भगिनी	भगिनि!
भ्राता	भ्रातः!

पाठगतप्रश्नाः 17.2

1. रेखांङ्कितम् आधृत्य प्रश्ननिमाणं कुरुत
   (क) कल्पनाचावला हरियाणराज्यस्य करनालनगरे जन्म लब्धवती
   (ख) तस्याः वैमानिक्यां विशिष्टा रुचिः आसीत्।
   (ग) सा 'कालारोडो' विश्वविद्यालयात् शोधकार्यस्य उपाधिं लब्धवती?

(घ) सा भारतीयनारीणां कीर्तिः जाता।

(ङ) 'नासा' केन्द्रे तस्याः नियुक्तिः जाता।

2. उदाहरणम् अनुसृत्य पुल्लिङ्गरूपस्थाने स्त्रीलिङ्गरूपं लिखत

पुल्लिङ्गम्	**स्त्रीलिङ्गम्**
यथा सः अन्तरिक्षं गतवान्	सा अन्तरिक्षं गतवती।
(क) सः दिल्लीनगरे जन्म लब्धवान्।	——————————।
(ख) सः विदेशे शिक्षां प्राप्तवान्।	——————————।
(ग) सः नगरे स्नातकोपाधिम् अधिगतवान्।	——————————।
(घ) सः शोध कार्यम् अपि कृतवान्।	——————————।
(ङ) सः तत्र आगतवान्।	——————————।
(च) सः फलं याचितवान्।	——————————।

3. सम्बोधनपदं प्रथमान्तपदं वा लिखत

प्रथमान्तपदम्	**सम्बोधनपदम्**
(क) ————	हे भ्रातः
(ख) गुरुवरः	————
(ग) ————	————
(घ) अग्रजा	————
(ङ) ————	श्रीमन्
(च) महोदयः	————

तृतीयः अंशः

इदानीं तृतीयम् अंशम् बोधामः।

वैभवः— गुरुवरः ..... विरोधिना।।

वयम् अवगच्छामः यत् सर्वप्रथमं कल्पनाचावला 1997 तमे वर्षे अन्तरिक्षं गता। 2003 तमे वर्षे सा पुनः तत्र गतवती। जनवरी मासस्य षोडषतिथौ ध्वनिवेगादपि अष्टादशगुणितवेगेन उड्डीयमानेन कोलम्बियाशटलयानेन सा सप्तसदस्यैः सह षोडशदिनानि यात्राम् अकरोत्। याने कैंसररोगम् अधिकृत्य सङ्कलिता सामग्री आसीत्। फरवरीमासस्य द्वितीये दिवसे पृथिवीं प्रति अवतरणात् केवलं दशनिमेषपूर्वं यानं दुर्घटनाग्रस्तं जातम्। सर्वेषां वैज्ञानिकानां मृत्युः अभवत्। वस्तुतः इदं जगत् कालस्य अधीनम्। तस्यै सम्मानं दातुम् अस्माकं प्रधानमन्त्रिणा भारतीयअन्तरिक्ष–अनुसन्धानकेन्द्रस्य (इसरो) अग्रिमोपग्रहस्य नाम 'कल्पना प्रथमः'' इति उद्घोषितम्।

पाठस्य अन्ते प्रदत्तं श्लोकं पुनः पठामः सम्यक् अवगच्छामः च–

महूर्तमपि जीवेत् नरः शुक्लेन कर्मणा।
न कल्पमतिकृष्णेन लोकद्वयविरोधिना।।

पदच्छेदः मुहूर्तम् अपि जीवेत् नरः शुक्लेन कर्मणा।
न कल्पम् अतिकृष्णेन लोकद्वयविरोधिना।।

अन्वयः नरः शुक्लेन कर्मणा मुहूर्तम् अपि जीवेत्। लोकद्वयविरोधिना अतिकृष्णेन (कर्मणा) कल्पम् अपि न (जीवेत्)।

व्याख्या– शुभ्रकर्मणा–शुभकर्मणा जीवितं मुहूर्त्तमपि = क्षणमपि = स्वल्पम् अपि जीवनं सार्थकम्, परम् इहलोके परलोके च विरोधिना अशुभकर्मणा कल्पपर्यन्तं दीर्घजीवनमपि निरर्थकम् भवति। अतः मानवेन सदा महत्कर्मपरायणेन भवितव्यम्। मृत्युः कदा आगमिष्यति इति न कोऽपि जानाति। अत एव उच्यते–

''गृहीत इव केशेषु मृत्युना धर्ममाचरेत्।''

कल्पनायाः स्वल्पमपि जीवनं तस्याः महत्कर्मभिः धन्यं जातम्। सा प×चत्वं गतापि यशः शरीरेण अद्यापि जीवति। उक्तमपि–

''कीर्तिर्यस्य स जीवति।''

सारः

कल्पनायाः अभिलाषा उद्यमेन दृढनिश्चयेन च पूर्णा जाता। सा द्विवारम् अन्तरिक्षं गता किन्तु द्वितीयायां यात्रायां तस्याः यानं दुर्घटनाग्रस्तं जातम्। यानस्य सदस्याः कैंसररोगस्य विषये अन्येषु च विषयेषु सामग्रीसंचयनं कृतवन्तः। सर्वे सदस्याः पंचत्वं गताः। अस्माकं प्रधानमन्त्री 'इसरो' केन्द्रस्य अग्रिमोपग्रहस्य नाम 'कल्पनाचावला प्रथमः' इति उद्घोषितवान्। शुक्लेन कर्मणा जीवतः नरस्य इहलोकः परलोकः च धन्यौ। दुष्कर्मणा दीर्घायुषा किम्?

परिश्रम और दृढ़निश्चय से कल्पना चावला की अभिलाषा पूर्ण हुई। उसने दो बार अन्तरिक्ष की उड़ान भरी किन्तु दूसरी उड़ान के समय विमान दुर्घटना ग्रस्त हो गया। यान के सदस्यों ने कैंसर रोग और अन्य विषयों पर महत्वपूर्ण सामग्री एकत्रित की थी। दुर्घटना में सभी सदस्यों की मृत्यु हो गई। हमारे प्रधानमन्त्री ने उन्हें सम्मान देने के लिए 'इसरो' केन्द्र के अग्रिम उपग्रह का नाम 'कल्पनाचावला प्रथम' रखने की घोषणा की। शुभकर्म करने वालों के इह लोक और परलोक दोनों धन्य हैं भले ही उनके जीवन की अवधि छोटी हो।

व्याकरणबिन्दवः

सन्धिच्छेदाः

अन्वेषणकार्यार्थम् = अन्वेषणकार्य + अर्थम् = अ + अ = आ (दीर्घसन्धिः)

कालाधीनम् = काल + अधीनम् = अ + अ = आ (दीर्घसन्धिः)

अग्रिमोपग्रहस्य = अग्रिम + उपग्रहस्य = अ + उ = ओ (गुणसन्धिः)

दुर्लभान्यपि = दुर्लभानि + अपि = 'इ' इत्यस्य स्थाने 'य्', स्वरे (अकारे) परे। (यण्सन्धिः)

समस्तपदानि	**विग्रहः**	**समासस्य नाम**
अन्तरिक्षयात्रायाः	अन्तरिक्षस्य यात्रायाः	षष्ठीतत्पुरुषः
दुर्लभकार्याणि	दुर्लभानि कार्याणि	कर्मधारयः
यथानिर्दिष्टम्	निर्दिष्टम् अनतिक्रम्य	अव्ययीभावः
प्रथमदिवसे	प्रथमे दिवसे	कर्मधारयः
अग्रिमोपग्रहस्य	अग्रिमस्य उपग्रहस्य	कर्मधारयः

संज्ञापदानि

विंशतितिथौ = विंशतितिथि, सप्तमी एकवचनम्

प्रोद्यमेन = प्र + उद्यम, तृतीया एकवचनम्

सप्तयात्रिभिः = (सप्त) यात्रिन्, तृतीया बहुवचनम्

कृदन्तप्रत्ययाः

लब्धम्	√लभ् क्त नपु. प्रथमा एकवचनम्
प्रारब्धा	प्र √रभ् क्त स्त्रीलिंगम् प्रथमा एकवचनम्
उद्घोषितम्	उत् √घुष् क्त नपु. प्रथमा एकवचनम्
जातम्	√जन् क्त नपु. प्रथमा एकवचनम्
कृतम्	√कृ क्त नपु. प्रथमा एकवचनम्
सुसज्जितम्	सु + √सज्ज् क्त नपु. प्रथमा एकवचनम्
निर्दिष्टम्	निः √दिश् क्त नपु. प्रथमा एकवचनम्
समाप्य	सम् √आप् ल्यप्
विधाय	वि √धा ल्यप्
प्रदर्शयितुम्	प्र √दृश् णिच् तुमुन्
समर्पयिता	सम् √अर्प् णिच्, शतृ, तृतीया एकवचनम्

शब्दरूपाणि

'इदम्' सर्वनामशब्दः

	(पुल्लिङ्गः)			स्त्रीलिङ्गः		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्र. वि.	अयम्	इमौ	इमे	इयम्	इमे	इमाः
द्वि. वि.	इमम्	इमौ	इमान्	इमाम्	इमे	इमाः
तृ. वि.	अनेन	आभ्याम्	एभिः	अनया	आभ्याम्	एभिः
च. वि.	अस्मै	आभ्याम्	एभ्यः	अस्यै	आभ्याम्	आभ्यः
पं. वि.	अस्मात्	आभ्याम्	एभ्यः	अस्याः	आभ्याम्	आभ्यः
ष. वि.	अस्य	अनयोः	एषाम्	अस्याः	अनयोः	असाम्
स. वि.	अस्मिन्	अनयोः	एषु	अस्याम्	अनयोः	आसु

इदम् (नपुंसकलिङ्गः)

	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
प्रथमाविभक्तिः	इदम्	इमे	इमानि
द्वितीयाविभक्तिः	इदम्	इमे	इमानि

शेषः तु पुल्लिंगवत्

इदम्, अदस्, एतद्, तद् सर्वनाम्नां शुद्धप्रयोगार्थम् अधोलिखिता कारिका स्मरणीया–

इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम्।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्।

अर्थात् – सन्निकृष्टार्थे (समीपार्थे) – 'इदम्' प्रयुज्यते।
– समीपतरार्थे – 'एतद्' प्रयुज्यते
– विप्रकृष्टार्थे (दूरार्थे) – 'अदस्' प्रयुज्यते।
– परोक्षे– 'तद्' प्रयुज्यते।

'अदस्' सर्वनामशब्दः

	(पुल्लिंङ्गः)			स्त्रीलिङ्गः		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्र. वि.	असौ	अमू	अमी	असौ	अमू	अमूः
द्वि.वि.	अमुम्	अमू	अमून्	अमुम्	अमू	अमूः
तृ. वि.	अमुना	अमूभ्याम	अमीभिः	अमुया	अमूभ्याम्	अमूभिः
च. वि.	अमुष्मै	अमूभ्याम्	अमीभ्यः	अमुष्यै	अमूभ्याम्	अमूभ्यः
पं. वि.	अमुष्मात्	अमूभ्याम्	अमीभ्यः	अमुष्याः	अमूभ्याम्	अमूभ्यः
ष. वि.	अमुष्य	अमुयोः	अमीषाम्	अमुष्याः	अमुयोः	अमूषाम्
स. वि.	अमुस्मिन्	अमुयोः	अमीषु	अमुष्याम्	अमुयोः	अमूषु

नपुंसकलिङ्गः

प्र. वि., द्वि. वि. – अदः अमू अमूनि

शेषः पुल्लिवत्।

'विद्वस् शब्दः' (पुल्लिङ्गः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमाविभक्तिः	विद्वान्	विद्वांसौ	विद्वांसः
द्वितीयाविभक्तिः	विद्वांसम्	विद्वांसौ	विदुषः
तृतीयाविभक्तिः	विदुषा	विद्वद्म्याम्	विद्वद्भिः
चतुर्थीविभक्तिः	विदुषे	विद्वद्म्याम्	विद्वद्भ्यः
पंचमीविभक्तिः	विदुषः	विद्वद्म्याम्	विद्वद्भ्यः
षष्ठीविभक्तिः	विदुषः	विदुषोः	विदुषाम्
सप्तमीविभक्तिः	विदुषि	विदुषोः	विद्वत्सु
सम्बोधनम्	हे विद्वन्!	हे विद्वांसौ!	हे विद्वांसः!

पाठगतप्रश्नाः 17.3

1. पूर्णवाक्येन उत्तरत–
   (क) कल्पनाचावला प्रथमवारं कदा अन्तरिक्षं गता?
   (ख) केन यानेन तया द्वितीया यात्रा कृता?
   (ग) यानं कति दिनानि अन्तरिक्षे उड्डीयमानम् आसीत्?
   (घ) कस्य रोगस्य विषये सामग्रीसंचयनं कृतम्?
   (ङ) कस्य अधीनम् इदं जगत्?
2. अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नान् उत्तरत–

   ताम् प्रति श्रद्धाप्रसूनानि समर्पयता अस्माकं प्रधानमन्त्रिणा भारतीय–अन्तरिक्ष–अनुसंधानकेन्द्रस्य (इसरो) अग्रिमोपग्रहस्य नाम 'कल्पनाचावला प्रथमः' इति उद्घोषितम्।

   (क) अत्र 'ताम्' इति पदं कस्यै प्रयुक्तम्?
   (ख) पुष्पाणि इत्यस्य किं पर्यायवाचिपदं गद्यांशे प्रयुक्तम्?
   (ग) 'प्रति' योगे अत्र का उपपदविभक्तिः प्रयुक्ता?
3. अधोलिखितकर्तृवाच्यान्तवाक्यानां समक्षं कर्मवाच्यान्तं रूपं लिखत
   (क) कल्पना तु भारतस्य 'द्वितीय–अन्तरिक्षयात्री' इति गौरवम् अधिगतवती।
   (ख) त्वम् सम्यक् पृष्टवान्।

(ग) यानम् अनेकेषु विषयेषु सामग्रीसंचयं कृतवत्।

(घ) सा यात्रां प्रारब्धवती।

(ङ) प्रधानमन्त्री अन्तरिक्ष–अनुसंधानकेन्द्रस्य नाम 'कल्पना चावला प्रथमः' इति उद्घोषितवान्।

17.4 किम् अधिगतम्

- परिश्रमेण दुर्लभानि कार्याणि अपि सिध्यन्ति।
- महद्विभूतीनां लक्षणानि बाल्ये एव दृश्यन्ते।
- नारी अपि पुरुषः इव सबला सफला च।
- गुणाः पूजास्थानं गुणिषु न च लिङ्गम् न च वयः।
- 'प्रति'–'अधि' योगे द्वितीया, 'सह' योगे तृतीया, 'नमः' योगे चतुर्थी विभक्तिः भवति।
- भूतकालस्य अर्थे क्त–क्तवतु प्रत्यययोः प्रयोगः भवति।
- इदम्, अदस् सर्वनाम शब्दयोः रूपाणि त्रिषु लिंगेषु भवन्ति।

17.5 योग्यताविस्तारः

(क) लेखकपरिचयः

संस्कृतभाषायाः प्रचार–प्रसारार्थं सततं निरतानां श्री शङ्करलाल शास्त्रिणां जन्म राजस्थानप्रान्तस्य सीकरमण्डलस्य किशोरपुराग्रामे श्रीमतां पं. श्री लक्ष्मीनारायणशर्मणां गृहे समजायत। अमीभिः प्रणीताः ग्रन्थाः सन्ति– 1. संस्कृत कवि मञ्जरी (चम्पूकाव्यम्) 2. संस्कृत–कथा–मन्दाकिनी 3. कविता–निर्झरी, 4. राजस्थान के संस्कृत कृतिकार 5. संस्कृत साहित्य का संक्षिप्त इतिहास 6. संस्कृत वाङ्मय में पर्यावरण।

अयम् राजस्थान संस्कृतानुसन्धान संस्थानात प्रकाशितायाः ''सौवर्णी'' इत्याख्यायाः शोधपत्रिकायाः संपादकः वर्तते। श्री शास्त्री संप्रति राजस्थान संस्कृतानुसन्धान संस्थाने (शाहपुरोनगरे) निदेशकपदे कार्यरतः अस्ति।

(ख) भावविस्तारः

'कल्पना' तु वैमानिकक्षेत्रेऽद्भुतसाहसस्य प्रतीका। सा भारतस्य नारीजातेः च गौरवभूता। तस्याः कीर्तिः अमरा। सत्यमेव कल्पनाकीर्तिर्विजयते।

अस्माभिः विविधपुस्तकेभ्यः 'इन्टरनैट' माध्यमेन वा अन्तरिक्षविज्ञानविषयकं ज्ञानम् अर्जनीयम्। कल्पनाचावला सदृशी महिला सुनीताविलियम अपि अस्मिन् क्षेत्रे

प्रसिद्धिं प्राप्तवती। सा अन्तरिक्षयात्रां कृत्वा सकुशलं प्रत्यागच्छत्। राष्ट्रगौरव–ञ्चावर्धयत्।

(ग) भाषाविस्तारः

काव्यशास्त्रदृष्ट्या भाषा भावपूर्णा प्रसादगुणोपेता वैदर्भीरीतियुता स्यात्। भावप्रधानोऽयं निबन्धः सरस–सुगम–प्राञ्जल भाषया निबद्धः।

17.6 पाठान्तप्रश्नाः

1. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनः लिखत
   (क) कोलम्बियाशटलयानेन 2003 तमे वर्षे जनवरीमासस्य षोडशतिथौ तया यात्रा पुनः प्रारब्धा।
   (ख) कल्पना चावला अपि तेन यानेन सह आकाशीया संजाता।
   (ग) 1997 तमे वर्षे नवम्बरमासस्य विंशतितिथौ एषा अन्तरिक्षयात्रां विधाय 'भारतस्य द्वितीय–अन्तरिक्ष यात्री' इति गौरवम् अधिगतवती।
   (घ) 1961 तमे वर्षे जुलाईमासस्य प्रथमे दिवसे एषा जन्म लब्धवती।
   (ङ) 1988 तमे वर्षे सा नासा इति केन्द्रे प्रवेशं लब्धवती।
   (च) कल्पना चावला नाम्नी महिला तु द्विवारम् अन्तरिक्षयात्रां कृतवती।
   (छ) करनाले टैगोरबालनिकेतनविद्यालये इयं प्रारम्भिकशिक्षां प्राप्तवती।
   (ज) प्रधानमन्त्रिणा 'इसरो' इति केन्द्रस्य अग्रिमोपग्रहस्य नाम 'कल्पना चावला प्रथमः' इति उद्घोषितम्।
2. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिः क्रियताम्
   (क) ————(आचार्य) नमः।
   (ख) ————(कल्पना) अधिकृत्य वर्धते मे जिज्ञासा।
   (ग) सा ————(यान) सह आकाशीया संजाता।
   (घ) अस्माकं प्रधानमन्त्रिणा ———— (तद्) प्रति श्रद्धाप्रसूनानि समर्पयता 'इसरो' केन्द्रस्य अग्रिमोपग्रहस्य नाम 'कल्पना चावला प्रथमः' इति उद्घोषितम्।
3. कोष्ठकात् उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत
   (मा, ततः, कुत्र, नूनं, तर्हि, कथम्)
   (क) ———— प्रविशति आचार्यः।
   (ख) अरे! ———— एवं वद।
   (ग) ————कालाधीनम् इदं जगत्।
   (घ) तया शिक्षा ————प्राप्ता ?

(ङ) अये! त्वया ———ज्ञातम्?
(च) यदि पठिष्यति—— उत्तीर्णः भविष्यति।

4. अधोलिखितवाक्येषु लङ्लकारस्य स्थाने 'क्तवतु' प्रत्ययस्य प्रयोगं कृत्वा पुनः लिखत
(क) रूसदेशवास्तव्यः यूरी गागरिनः सर्वप्रथमम् अन्तरिक्षम् अगच्छत्।
(ख) वयं वायुयानात् पृथिव्याः सौन्दर्यम् अपश्याम।
(ग) सा वैमानिकीविषये शोधकार्यम् अकरोत्।
(घ) अनेके वैज्ञानिकाः अन्तरिक्षं प्राप्नुवन्।
(ङ) वैज्ञानिकाः अनेकेषु विषयेषु सामग्रीसंचयनम् अकुर्वन्।
(च) कल्पना चावला 1961 तमे वर्षे जन्म अलभत।

5. इमं पाठं पठित्वा भवद्भिः का प्रेरणा प्राप्ता? प×चवाक्येषु लिखत।

6. निर्देशानुसारम् उपयुक्तेन पदेन रिक्तस्थानानि पूरयत
(क) ..... ('इदम्' नपुं.) शोभनं नगरम्।
(ख) ..... ('इदम्' पुं.) बालकेन सह कश्चित् अपि मित्रतां न करोति।
(ग) ..... ('इदम्' स्त्री.) आम्रं न रोचते।
(घ) ..... ('इदम्' स्त्री.) बालिकानां सौन्दर्यं दर्शनीयम्।
(ङ) ..... ('इदम्' पुं.) सैनिकयोः वीरता प्रशंसनीया वर्तते।
(च) ..... ('अदस्' पुं.) पराक्रमी राजा अस्ति।
(छ) ..... ('अदस्' पुं.) बालाय हितं क्षीरः।
(ज) ..... ('अदस्' स्त्री.) नगर्यां सज्जनाः निवसन्ति।
(झ) ..... ('अदस्' पुं.) जानात् भीतः बालकः रोदिति।
(ञ) ..... ('अदस्' स्त्री.) नारीभिः विजयश्रीः प्राप्ता।

7. निम्नलिखितश्लोकेषु विद्वस् शब्दस्य रूपाणि चित्वा तेषां विभक्तिं वचनं च निर्दिशत

स्वदेशे पूज्यते राजा विद्वान् सर्वत्रपूज्यते।
देशान्तरेऽपि विद्वांसं पूजयन्ति जनाः श्रिया।।
सङ्गतिं विदुषा कुर्याः श्रद्धया विदुषेऽर्पयेः।
लभस्व विदुषो ज्ञानं विदुषो वाक्यमाचर।।
श्रद्धा विदुषि ते भूयात् प्रियो विद्वन् त्वमेव मे।
विद्वांसः सर्वदा वन्द्या वाग्वैभव–विभूषिताः।।

17.7 उत्तराणि

17.3 बोधप्रश्नाः

1. (क) राकेशशर्मा (ख) देदीप्यमाना (ग) द्विवारं (घ) 1961 तमे वर्षे (ङ) वैमानिक्याम् (च) हरियाणा

2. (क) विविधानि, (ख) स्वच्छे, (ग) विषयेषु, (घ) शुक्लेन, (ङ) दारुणा, (च) प्रथमे
3. (क) iii, (ख) v, (ग) i, (घ) ii, (ङ) iv

पाठगतप्रश्नाः

17.1 1. (क) आकाशमण्डले (ख) पृथ्वी (ग) चन्द्रतारकैः (घ) पृथिव्याः
(ङ) पंजाब अभियान्त्रिकी महाविद्यालयात् (च) कल्पनाचावला
2. (क) आकाशमण्डलम् (ख) त्वम् (ग) वैज्ञानिकाः (घ) राकेशशर्मा (ङ) ग्रहनक्षत्राणि
(च) पृथिवी
3. (क) गतः (ख) वर्णितम् (ग) कृता (घ) जातम् (ङ) प्राप्ताः

17.2 1. (क) कल्पनाचावला कुत्र जन्म लब्धवती?
(ख) तस्याः कस्यां विशिष्टा रुचिः आसीत्?
(ग) सा कालारोडो विश्वविद्यालयात् कस्य उपाधिं लब्धवती?
(घ) सा कासाम् भूषणं जाता?
(ङ) कस्मिन् केन्द्रे तस्याः नियुक्तिः जाता?
2. (क) सा दिल्लीनगरे जन्म लब्धवती
(ख) सा विदेशे शिक्षां प्राप्तवती
(ग) सा नगरे स्नातकोपाधिम् अधिगतवती
(घ) सा शोधकार्यम् अपि कृतवती।
(ङ) सा तत्र आगतवती
(च) सा फलं याचितवती।
3. (क) भ्राता (ख) गुरुवर (ग) विभा (घ) अग्रजे (ङ) श्रीमान् (च) महोदय

17.3 1. (क) कल्पनाचावला प्रथमवारं 1997 तमे वर्षे अन्तरिक्षं गता।
(ख) कोलम्बियाशटलयानेन तया द्वितीया यात्रा कृता।
(ग) यानम् षोडश दिनानि अन्तरिक्षे उड्डीयमानम् आसीत्।
(घ) कैंसररोगस्य विषये सामग्रीसंचयनं कृतम्।
(ङ) कालाधीनम् इदम् जगत्।
2. (क) अत्र ताम् इति पदं 'कल्पनाचावला' इति कृते प्रयुक्तम्।
(ख) प्रसूनानि।
(ग) 'प्रति' योगे द्वितीया विभक्तिः प्रयुक्ता।
3. (क) तया भारतस्य द्वितीय–अन्तरिक्ष यात्री इति गौरवम् अधिगतम्।
(ख) त्वया सम्यक् पृष्टम्।
(ग) यानेन अनेकेषु विषयेषु सामग्रीसचयनं कृतम्।
(घ) तया यात्रा प्रारब्धा।

(ङ) प्रधानमन्त्रिणा अन्तरिक्ष– अनुसंधानकेन्द्रस्य नाम 'कल्पना चावला प्रथमः' इति उद्घोषितम्।

17.6 पाठान्तप्रश्नाः

1. (च), (घ), (छ), (ङ), (ग), (क), (ख), (ज)
2. (क) आचार्याय (ख) कल्पनाम् (ग) यानेन (घ) ताम्
3. (क) ततः (ख) मा (ग) नूनं (घ) कुत्र (ङ) कथम् (च) तर्हि
4. (क) रूसदेशवास्तव्यः यूरीगागरिनः सर्वप्रथमम् अन्तरिक्षं गतवान्।
   (ख) वयं वायुयानात् पृथिव्याः सौन्दर्यं दृष्टवन्तः।
   (ग) सा वैमानिकीविषये शोधकार्यं कृतवती।
   (घ) अनेके वैज्ञानिकाः अन्तरिक्षं प्राप्नुवन्तः।
   (ङ) वैज्ञानिकाः अनेकेषु विषयेषु सामग्रीसंचयनं कृतवन्तः।
   (च) कल्पना चावला 1961 तमे वर्षे जन्म लब्धवती।
5. स्वयं कुरुत
6. (क) इदम् (ख) अनेन (ग) अस्यै (घ) आसाम् (ङ) अनयोः (च) असौ (छ) अमुष्यै (ज) अमुष्याम् (झ) अमुष्यात् (×ा) अमूभिः
7. (i) विद्वान् – प्र. वि., ए. व.
   (ii) विद्वांसम् – द्वि. वि., ए. व.
   (iii) विदुषा – तृ. वि., ए. व.
   (iv) विदुषे – च. वि., ए. व.
   (v) विदुषः – ष. वि., ए. व.
   (vi) विदुषः – ष. वि., ए. व.
   (vii) विदुषि – स. वि., ए. व.
   (viii) विद्वन् – सम्बोधनम्, ए. व.
   (ix) विद्वांसः – प्र. वि., बहुवचनम्

309sk18

18

पर्यावरणस्य संरक्षणम्

भवान् जानाति एव यत् अद्यत्वे पर्यावरणस्य भीषणा समस्या वर्तते। वयं गृहस्य अवकरं नदीषु क्षिपामः; वस्त्राणि च फेनिलेन नदीषु, कूपेषु सरोवरेषु एव प्रक्षालयामः। औद्योगिकगैसैः अपि जलं प्रदुष्यते। किमधिकम् गंगायमुनेऽपि प्रदूषिते जाते। वयं तत् दूषितं जलमेव पिबामः रुग्णाः च भवामः। ध्वनिविस्तारकयन्त्रैः विशेषतः रात्रौ विभिन्नसमारोहेषु उच्चैः गीतानां कोलाहलेन ध्वनिप्रदूषणं जायते। औद्योगिकविकासेन वायुप्रदूषणमपि जातम्। एवमेव विचारप्रदूषणम् अपि सर्वत्र दृश्यते। अतोऽस्माभिः सदा पर्यावरणस्य संरक्षणं कर्तव्यम्। एतदर्थं अस्माभिः किं कर्तव्यम् इति विषये अस्मिन् पाठे वयं पठामः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- 'पर्यावरणम्' इति शब्दस्य अर्थं लेखितुं समर्थः भविष्यति;
- पर्यावरणस्य संरक्षणे अस्माभिः किं किं कर्तव्यम् इति लेखिष्यति;
- पर्यावरण–प्रदूषणस्य कारणानि वर्णयितुं सक्षमः भविष्यति;
- पंचविधानां मण्डलानां नामानि लेखितुं समर्थः भविष्यति;
- संस्कृतवाङ्मयात् पर्यावरणविषयकं सन्दर्भद्वयं लेखितुं शक्ष्यति;
- विसर्गसन्धेः उदाहरणानि चित्वा संन्धिं/सन्धिच्छेदं करिष्यति;
- 'द्वन्द्वसमासस्य विग्रहं विग्रहयुक्तपदानां च समसनं करिष्यति;
- अस्, ब्रू, हन्, कृ धातूनां रूपाणां प्रयोगं करिष्यति।

क्रियाकलापः

18.1

18.2

18.3

18.4

18.5

उपरि चित्राणि दर्शितानि। तानि ध्यानेन दृष्ट्वा अधोलिखितानां प्रश्नानां शुद्धैः उत्तरैः सह मेलनं कुरुत–

प्रश्नाः	**उत्तराणि**
(क) वाहनपदार्थैः सर्वत्र किं भवति?	(i) वस्त्राणि
(ख) द्वितीये चित्रे कस्य पर्वणः वर्णनम् अस्ति?	(ii) धूमम्
(ग) महिलाः किं क्षिपन्ति?	(iii) प्रदूषणम्
(घ) ध्वनिप्रदूषणेन वायुप्रदूषणेन च किं जायते?	(iv) अवकरम्
(ङ) रजकः नद्यां कानि क्षालयति?	(v) दीपावल्याः
(च) चलत् यानं किं त्यजति?	(vi) रोगः

18.1 मूलपाठः

पर्यावरणस्य संरक्षणम्

सम्प्रति मूलपाठं ध्यानेन पठामः

परितः आवृणोति सर्वान् अस्मान् यत् तत् पर्यावरणं कथ्यते। अद्यत्वे सर्वत्र पर्यावरणसंरक्षणस्य चिन्ता व्याप्नोति। स्वच्छं पर्यावरणं मानवजीवनाय अपेक्षितं भवति। प्रदूषितं पर्यावरणं विनाशाय कल्पते। अद्य प्रायः लोभैषणा वर्धते। मर्यादाः भज्यन्ते, नाद्रियते प्राकृतिकं जीवनम्।

वेदेषु पर्यावरणविषये सर्वत्र कल्याणकामना दृश्यते यथा–

शन्नोवातः पवतां शन्नः तपतु सूर्यः।
शन्नः कनिक्रद्देवः पर्जन्योऽभिवर्षतु।।

अथ पञ्चविधं पर्यावरणस्थानं–स्थलमण्डलम्, जलमण्डलम्, तेजोमण्डलम्, वायुमण्डलम्, नभोमण्डलम् च।

पर्यावरणस्य प्रथमं स्थानं भूमिः। पृथिव्यां ये पादपाः वीरुधो वनस्पतयो वा जायन्ते ते सर्वे क्षेमाय भवन्तु। यत्र तत्र निक्षिप्तानि प्लास्टिकवस्तूनि प्रदूषणं जनयन्ति। एतानि न क्षीयन्ते, न क्लिद्यन्ते, न वा नश्यन्ति अपितु वनस्पतीनां प्ररोहणे बाधां जनयन्ति।

भागवतपुराणेऽपि आदेशो दृश्यते यत् वृक्षाणां दहनं न करणीयम्–

मा द्रुमेभ्यो महाभागाः, दीनेभ्यो द्रोग्धुमर्हथ।

महाभारतेऽपि लिखितम् ''वनेन रक्ष्यते व्याघ्रः, व्याघ्रेण रक्ष्यते वनम्'' इति। अशोकस्य राज्ये एकोऽपि वृक्षः राजाज्ञां विना छेत्तुं न शक्यते स्म। संरक्षितानां पशूनां पक्षिणां च हननं दण्डार्हम् आसीत्।

शब्दार्थाः

संरक्षणम् = बचाव
आवृणोति = घेरता है
परितः = चारों ओर
व्याप्नोति = व्याप्त करता है
अपेक्षितम् = आवश्यक
अद्यत्वे = आजकल
कल्पते = समर्थ होता है
लोभैषणा = लालच की चाह
भज्यन्ते = टूट रही है
आद्रियते = आदर किया जाता है
शम् = कल्याणकारी
नः = हमारे लिए
वातः = वायु
पवताम् = बहे
कनिक्रद्देवः = बिजली के साथ गरजता हुआ देवता
पर्जन्यः = बादल
अभिवर्षतु = चारों ओर बरसे
वीरुधः = लहलहाती लताएँ
वनस्पतयः = वृक्ष
क्षेमाय = कल्याण के लिए
निक्षिप्तानि = फेंकी गई
जनयन्ति = पैदा करती है
न क्षीयन्ते = नष्ट नहीं होती है
न क्लिद्यन्ते = गीली नहीं होती
प्ररोहणे = उगने में
द्रुमेभ्यः = पेड़ों के लिए
मा द्रोग्धुम् अर्हथ = द्रोह नहीं करना चाहिए। व्याघ्रः = बाघ, रक्ष्यते = रक्षा की जाती है, राजाज्ञां विना = राजा की आज्ञा के बिना, छेत्तुं न शक्यते स्म = काटा नहीं जा सकता था, हननं = मारना, दण्डार्हम् = दण्डनीय

पर्यावरणस्य द्वितीयं तत्त्वं जलम् अस्ति। अद्यत्वे जलानि दूषितानि विषाणुसंसिक्तानि च दृश्यन्ते। अपि च दूषितजलपानेन स्वास्थ्यं नश्यति, नराः रुग्णाः भवन्ति पञ्चत्वं च यान्ति।

विषाणुसंसिक्तानि = विषैले कृमियों से युक्त, दूषितजलपानेन = गंदा पानी पीने से, पञ्चतत्वम् = मृत्यु को यान्ति = प्राप्त होते हैं, यन्त्रागारेषु = कारखानों में, विद्युत्सम्बन्धेन = विजली के सम्पर्क से, धातु–योजक–वियोजक कृत्यानि = धातुओं को जोड़ने और अलग करने की प्रक्रियाएं, रश्मिसमूहान् = किरणों के समूह को, उत्सृजन्ति = उत्पन्न करते हैं, उत्सृष्टः = छोड़ा गया, विकारेभ्यः = दोषों से,

अन्तरिक्षमण्डले पर्यावरणस्य यत् तत्त्वं वर्तते तत् कथ्यते तेजोमण्डलम् यन्त्रागारेषु औद्योगिकक्षेत्रेषु कृत्यानि तान् रश्मिसमूहान् उत्सृजन्ति यैर्मानवजीवनं क्षतिग्रस्तं जायते। परमाणुकेन्द्राद् उत्सृष्टः रश्मिपुञ्जः विनाशको भवति। अतः एतेभ्यः विकारेभ्यः तेजोमण्डलं सर्वथा रक्षणीयम्।

प्रकृष्टम् = सर्वोत्कृष्ट, प्रसरति = फैलती है, प्रेरयति = प्रेरित करती है, निर्माणशालाभ्यः = कारखानों से निर्गतधूमैः = निकले हुए धुएं से विषाक्तं = विषैला, उत्पादयति = उत्पन्न करती है।, नभोमण्डलं = आकाशमण्डल, वाहनानि = गाड़ियां यन्त्रशालाः = कारखाने,

पर्यावरणस्य सर्वतः व्याप्तं प्रकृष्टं तत्त्वं वायुमण्डलम्। एतेन गन्धः प्रसरति। वायुः सर्वत्र पवित्रं वायुमण्डलं जीवनचक्रं च प्रेरयति। अद्यत्वे निर्माणशालाभ्यो निर्गतधूमैः वातावरणं विषाक्तं भवति। विषाक्तो वायुः अनेकान् रोगान् उत्पादयति।

18.6

नभोमण्डलं पर्यावरणस्य पञ्चमं स्थानम्। वहनानि यन्त्रशालाः, ध्वनिविस्तारकाश्च उच्चैः ध्वनिमुत्पाद्य ध्वनिप्रदूषणं कुर्वन्ति। यत्र तत्र प्रदूषितो ध्वनिः बधिरत्वम् उत्पादयति। अन्तरिक्षे दशयोजनम् यावत् 'ओजोन' वायुमण्डलं परावृत्तम् इव आवर्तते। तस्मिन् ओजोनपटले साम्प्रतं विकिरणप्रभावेण दृश्यतेऽपक्षयः। यदि ओजोनपटलस्य रक्षा न क्रियते तदा क्षयकारिणः भयङ्कराः व्याधयः सम्भविष्यन्ति। अनुकूलपर्यावरणे जीवसृष्टिः वर्धते, प्रतिकूलपर्यावरणे च विनश्यति।

ध्वनिविस्तारकाः = लाउडस्पीकर उत्पाद्य = पैदा करके, बधिरत्वम् = बहिरापन, पराकृत्तम् इव = मानों वापस लौटा हुआ, साम्प्रतम् = अब विकिरणप्रभावेण = फैलाव के प्रभाव से, अपक्षयः = विनाश, हानि, क्षयकारिणः = विनाशकारी, व्याधयः = बीमारियों जीवसृष्टिः = प्राणिजगत् की रचना



18.7

यदि वयं पर्यावरणसंरक्षणे सावधानाः भवेम तदैव अस्माकं जीवनं शान्तिमयं सुखमयं च भवितुं शक्नोति। अस्माकं मानसिकविकृतिकारणात् अनेके रोगाः जायन्ते। मनसोऽशान्तिः बहुरोगान् जनयति, सामाजिकं वातावरणं च नाशयति। अतएव अस्माभिः मनः शुद्धं कर्तव्यम्। यदि मनः निर्मलं भविष्यति, तदैव अस्माकं विचाराः शुद्धाः, चिन्तनं शुद्धं भविष्यति येन पर्यावरणस्य विशुद्धिः अवश्यमेव भविष्यति। तदेव कारणं यत् ऋषयः सततं कामयन्ते स्म–

यतो यतः समीहसे, ततो नो अभयं कुरु।
शन्नः कुरु प्रजाभ्यः, अभयं नो पशुभ्यः।।

मानसिकविकृतिकारणात् = मानसिक बुराइयों/दोषों के कारण, मनसः = मन की, बहुरोगान् = अनेक रोगों को, जनयति = पैदा करती है, सततम् = निरन्तर, कामयन्ते = कामना करते हैं, यतःयतः = जहां जहां हो, समीहसे = इच्छा करते हो, ततः = वहां से, नः = हमें, अभयं कुरु = निडर बनाओ पशुभ्यः = पशुओं से, प्रजाभ्यः = प्रजा के लिए, शम् कुरु = कल्याण करो।

18.2 बोधप्रश्नाः

1. पाठं पठित्वा रिक्तस्थानानि पूरयत
   (क) ..... पवित्रं वायुमण्डलं जीवनचक्रं च प्रेरयति।
   (ख) अद्यत्वे सर्वत्र ..... चिन्ता व्याप्नोति।
   (ग) वेदेषु सर्वत्र पर्यावरणविषये ..... दृश्यते।
   (घ) पर्यावरणस्य प्रथमं स्थानं .....।
   (ङ) संरक्षितानां ..... पक्षिणां च हननं ..... आसीत्।
2. 'क' स्तम्भस्यं वाक्यांशान् 'ख' स्तम्भस्य वाक्यांशैः सह मेलयत

"क" स्तम्भः	"ख" स्तम्भः
(क) प्रदूषितं पर्यावरणम्	(i) ते क्षेमाय एव भवन्तु।
(ख) शन्नोवातः पवताम्	(ii) बधिरत्वम् उत्पादयति।
(ग) पृथिव्यां ये पादपाः वीरुधः	(iii) राजाज्ञां विना छेत्तुं न शक्यते स्म।
(घ) अशोकस्य राज्ये एकोऽपि वृक्षः	(iv) जीवनं सुखमयं भवितुं शक्नोति।

(ङ) प्रदूषितो ध्वनिः (v) बहुरोगान् जनयति।

(च) मनसोऽशान्तिः एव (vi) विनाशाय कल्पते।

(छ) यदि वयं पर्यावरणसंरक्षणे सावधानाः भवेम (vii) वातावरणं विषाक्तं भवति।

(ज) अद्यत्वे निर्माणशालाभ्यः निर्गतधूमैः (viii) शन्नः तपतु सूर्यः।

3. पाठं पठित्वा पञ्चविधपर्यावरणस्थानानां नामानि लिखत

(क) .....

(ख) .....

(ग) .....

(घ) .....

(ङ) .....

18.3 अधुना अवगच्छामः

प्रथमः अंशः

इदानीम् प्रथमम् अंशं बोधामः।

परितः आवृणोति ..... द्रोग्धुमर्हथ।

अद्यत्वे पर्यावरणसंरक्षणस्य चिन्ता सर्वत्र वर्तते। स्वच्छपर्यावरणं विना मानवजीवनं दुष्करम्। प्रदूषितं पर्यावरणं विनाशस्य कारणं भवति। वेदेषु वयं प्रकृष्टां पर्यावरणचेतनां पश्यामः। उदाहरणार्थम् अस्मिन् पाठांशे प्रदत्तं मन्त्रम् अवलोकयामः।

शन्नोवातः पवतां शन्नः तपतु सूर्यः।
शन्नः कनिक्रद्देवः पर्जन्योऽभिवर्षतु।।

पदच्छेदः शम् नः वातः पवताम् शम् नः तपतु सूर्यः।
शम् नः कनिक्रदत् देवः पर्जन्यः अभिवर्षतु।।

अन्वयः वातः नः शम् पवताम्। सूर्यः नः शम् तपतु। कनिक्रदत् देवः पर्जन्यः नः शम् अभिवर्षतु।

भावार्थः

वायवः अस्माकं कल्याणाय प्रवहन्तु। सूर्यः अस्माकं हिताय तपतु। विद्युता सह गर्जन् देवः पर्जन्यः अस्माकं क्षेमाय वर्षतु।

व्याख्या

प्रकृतिः प्रतिक्षणं मानवस्य हितसम्पादने निरता। पर्यावरणस्य संरक्षणाय प्रकृतिमानवयोः पारस्परिकं सन्तुलनम् अनिवार्यम्। प्रकृत्यां परिव्याप्तैः पञ्चमहाभूतैः एव मानवशरीरं विनिर्मितम्। शुद्धवायुं, स्वच्छं जलं, शुद्धां पृथिवीं विना मानवजीवनस्य कल्पना अपि कर्तुं न शक्यते। सहस्राणि वर्षाणि पूर्वं वैदिकऋषिभिः एतत् सत्यं सम्यक् अवगतम्। तैः प्राकृतिकतत्त्वानां देवतारूपेण स्तुतयः कृताः। तैः पर्यावरणस्य शुद्धये यज्ञसंस्थाविनिर्मिता। परन्तु सम्प्रति प्रकृतेः उपेक्षा क्रियते। मानवकल्याणाय प्रकृतेः पर्यावरणस्य सुरक्षा करणीया।

पर्यावरणस्थानं पञ्चविधम् उक्तम्– स्थलमण्डलम्, जलमण्डलम्, तेजोमण्डलम्, वायुमण्डलम् नभोमण्डलञ्च। पर्यावरणस्य प्रथमं स्थानं भूमिः पादपैः संरक्ष्यते। अतः अस्माकं प्राचीनग्रन्थेषु वृक्षसंरक्षणाय निर्देशाः सन्ति। वृक्षाः देववत् पूज्याः, पुत्रवत् पालनीयाः मन्यन्ते। परन्तु यत्र तत्र निक्षिप्तानि प्लास्टिकवस्तूनि पादपानां संवर्धने बाधकानि भवन्ति। अतः मानवैः वृक्षसंरक्षणाय पर्यावरणशुद्ध्यर्थं प्लास्टिकवस्तूनि यथासम्भवं निराकरणीयानि।

सारः

यत् अस्मान् परितः आवृणोति तत् पर्यावरणम् अद्यत्वे पर्यावरणसंरक्षणस्य चिन्ता सर्वत्र तीव्रा दृश्यते। वेदेषु पर्यावरणविषये सर्वत्र कल्याणकामना दृश्यते। मानवजीवनाय स्वच्छं शुद्धं च पर्यावरणम् अपेक्ष्यते। इतस्ततः निक्षिप्तानि प्लास्टिकवस्तूनि प्रदूषणं जनयन्ति। पर्यावरणस्थानं पञ्चविधम्। प्रथमं स्थानं तु स्थलमण्डलम् भूमिमण्डलम् वा। पादपाः मनुष्यस्य क्षेमाय भवन्तु। भागवतपुराणेऽपि आदिष्टम् यत् अस्माभिः वृक्षाः कदापि न दहनीयाः।

आजकल संसारभर में लोग पर्यावरण के विषय में चिन्ताग्रस्त हैं। पर्यावरण की शुद्धता के लिये तथा प्रदूषण रोकने के लिये सर्वत्र गोष्ठियां आयोजित की जा रही हैं। विचारप्रदूषण से ही वातावरण प्रदूषित होता है। आज लालच की भावना बढ़ रही है, प्राकृतिक जीवन का कोई आदर नहीं करता। हालांकि वेदों में सर्वत्र पर्यावरण संबंधी कल्याणकामना की गई है। वृक्षों से पर्यावरण की सुरक्षा सम्भव है इसीलिये भागवतपुराण में स्पष्ट आदेश है कि वृक्षों को कभी जलाना नहीं चाहिये। हमें प्लास्टिकवस्तुओं को इधर उधर फेंकना नहीं चाहिए ताकि पर्यावरण सुरक्षित रहे।

व्याकरणबिन्दवः

सन्धिच्छेदाः

नाद्रियते	= न + आद्रियते	अ + आ = आ	दीर्घसन्धिः
लोभैषणा	= लोभ + एषणा	अ + ए = ऐ	वृद्धिसन्धिः

पर्जन्योऽभिवर्षतु = पर्जन्यः + अभिवर्षतु – उ विसर्गसन्धिः (अ+इ = ओ)

आदेशोदृश्यते = आदेशः + दृश्यते – उ विसर्गसन्धिः (अ+इ = ओ)

दीनेभ्यो द्रोग्धुम् = दीनेभ्यः + द्रोग्धुम् – उ विसर्गसन्धिः (अ+इ = ओ)

प्रकृतिप्रत्ययपरिचयः

द्रोग्धुम् – √द्रुह् + तुमुन्, अव्ययम्

करणीयम् – √कृ + अनीयर्, नपुं., प्रथमाविभक्तिः, एकवचनम्।

पर्यावरणम् – परि + आ + √वृ + ल्युट्, नपुं., प्रथमाविभक्तिः, एकवचनम्।

संरक्षणम् – सम् + √रक्ष् + ल्युट्, नपुं., प्रथमाविभक्तिः, एकवचनम्।

निक्षिप्तानि – नि + √क्षिप् + क्त, नपुं., प्रथमाविभक्तिः, एकवचनम्।

प्रदूषितम् – प्र + √दुष् + णिच् + क्त, नपुं., प्रथमाविभक्तिः, एकवचनम्।

परस्मैपद–क्रियापदानि

आवृणोति – आ + √वृ + लट्, प्रथमपुरुषः, एकवचनम्

व्याप्नोति – वि + √आप् + लट्, प्रथमपुरुषः, एकवचनम्

नश्यन्ति – √नश्, लट्, प्रथमपुरुषः, एकवचनम्

अर्हथ – √अर्ह्, लट्, मध्यमपुरुषः, बहुवचनम्

अभिवर्षतु – अभि + √वृष्, लोट्, प्रथमपुरुषः, एकवचनम्

आत्मनेपद–क्रियापदानि

कथ्यते – √कथ् + कर्मवाच्य, लट्., प्रथमपुरुषः, एकवचनम्।

दृश्यते – √दृश् + कर्मवाच्य, लट्., प्रथमपुरुषः, एकवचनम्।

भज्यन्ते – √भञ्ज् + कर्मवाच्य, लट्., प्रथमपुरुषः, बहुवचनम्।

क्षीयन्ते – √क्षि + कर्मवाच्य, लट्., प्रथमपुरुषः, बहुवचनम्।

क्लिद्यन्ते – √क्लिद् + कर्मवाच्य, लट्., प्रथमपुरुषः, बहुवचनम्।

कल्पते – √क्लृप् + लट्., प्रथमपुरुषः, एकवचनम्।

वर्धते – √वृध् + लट्., प्रथमपुरुषः, एकवचनम्।

अव्ययपदानि

परितः – परितः अस्मान् सर्वान् आवृणोति तत् पर्यावरणम्।

अद्यत्वे, सर्वत्र – अद्यत्वे सर्वत्र पर्यावरणसंरक्षणस्य चिन्ता व्याप्नोति।

अद्य, प्रायः – अद्य प्रायः लोभैषणा वर्धते।

यत्र, तत्र – यत्र, तत्र निक्षिप्तानि प्लास्टिकवस्तूनि प्रदूषणं जनयन्ति।

अथ – अथ पञ्चविधं पर्यावरणस्थानम्।

मा – दीनेभ्यः द्रुमेभ्यः मा द्रोग्धुम् अर्हथ।

पाठगतप्रश्नाः 18.1

1. संस्कृतेन उत्तरत
   (क) परितः आवृणोति यत् अस्मान् तत् किं कथ्यते?
   (ख) वेदेषु पर्यावरणविषये का दृश्यते सर्वत्र?
   (ग) अद्य प्रायः विचारप्रदूषणाय का वर्धते?
   (घ) वनस्पतीनां प्ररोहणे कानि बाधां जनयन्ति?
   (ङ) भागवतपुराणे वृक्षविषये कः आदेशः अस्ति?
2. कर्तृपदानि चिनुत
   (क) पर्यावरणसंरक्षणस्य चिन्ता अस्मान् व्याप्नोति।
   (ख) एतानि प्ररोहणे बाधां जनयन्ति।
   (ग) वेदेषु कल्याणकामना दृश्यते।
   (घ) पृथिव्यां पादपाः क्षेमाय एव भवन्तु।
   (ङ) वृक्षाणां दहनं न करणीयम्।
3. रेखाङ्कितपदानि बहुवचने परिवर्तयत
   (क) अद्य लोभैषणा वर्धते।
   (ख) अद्यत्वे प्राकृतिकं जीवनं नाद्रियते।
   (ग) भागवतपुराणे आदेशः अस्ति यत् वृक्षस्य दहनं न करणीयम्।
   (घ) निक्षिप्तं प्लास्टिकवस्तु न नश्यति, न क्लिद्यते।
   (ङ) वेदे सर्वत्र कल्याणकामना अस्ति।

द्वितीयः अंशः

महाभारतेऽपि लिखितम् ..... रोगान् उत्पादयति।

सम्प्रति द्वितीयम् अंशं सम्यक् अवबोधामः। अत्र महाभारतस्य कथनम्– ''वनेन रक्ष्यते व्याघ्रः व्याघ्रेण रक्ष्यते वनम्'' अत्यधिकं महत्त्वपूर्णम्। वनानाम् अभावे व्याघ्राणां संरक्षणं न भविष्यति। अतः ते असुरक्षिताः भविष्यन्ति। व्याघ्राः अपि वनानि रक्षन्ति यतः तेषां भयात् जनाः वनानां छेदनं कर्तुं न उत्सहन्ते। अत्र 'व्याघ्र' इति शब्देन न केवलं व्याघ्रः अभिप्रेतः

अपितु सम्पूर्ण पशु जगत् पक्षिजगत् च अभीष्टम्। वनानि, पशवः पक्षिणः च पर्यावरणस्य संतुलने सहायतां कुर्वन्ति। अत एव पुरा भारते अशोकस्य राज्ये राजाज्ञां विना वृक्षं छेत्तुं न शक्यते स्म। पशूनां पक्षिणां हननम् अपि दण्डार्हम् आसीत्। एकेन शिलालेखेन ज्ञायते यत् 2200 वर्षेभ्यः पूर्वमेव अशोकेन तत्कालीनाम् आवश्यकताम् अवगत्य पर्यावरणरक्षणविषयिणी आज्ञा दत्ता आसीत्। अस्याम् आज्ञायां न केवलं धार्मिकं सांस्कृतिकं च चिन्तनं दृश्यते, अपितु पर्यावरणसंरक्षणविषयिणी जागरूकता वैज्ञानिकी दृष्टिः च प्रतिबिम्बिता दृश्यते।

पर्यावरणस्य द्वितीयं तत्त्वं जलम् अस्ति। सम्प्रति न केवलं नदीनाम् एव जलम् अत्यधिकं प्रदूषितम् अपितु औद्योगिकसंयत्रेभ्यः निष्कासितप्रदूषकतत्त्वैः भूमिगतजलम् अपि प्रदूषितम्। प्रदूषितजलैः अनेके रोगाः भवन्ति।

अन्तरिक्षमण्डले विराजमानं तेजोमण्डलम् अपि औद्योगिकक्षेत्रेषु धातुयोजकवियोजककृत्येभ्यः निर्गतैः रश्मिसमूहैः, परमाणुकेन्द्रेभ्यः उत्सृष्टैः रश्मिपुञ्जैश्च प्रदूषितम्। तदपि सर्वथा रक्षणीयम्।

पर्यावरणस्य प्रकृष्टं तत्त्वं वायुमण्डलमपि निर्माणशालाभ्यः निर्गतैः धूमैः विषाक्तं जातम्। एतत् अपि अनेकान् रोगान् उत्पादयति।

सारः

महाभारते सत्यं लिखितम् "व्याघ्रेण वनं रक्ष्यते।" अशोकस्य राज्ये वृक्षकर्तनं पशुपक्षिवधः च दण्डनीयः अपराधः आसीत्। जलं पर्यावरणस्य द्वितीयं तत्त्वं वर्तते। दूषितजलंपानेन स्वास्थ्यं नश्यति। अन्तरिक्षमण्डले तेजोमण्डलं पर्यावरणस्य एकं तत्वम् अस्ति। पर्यावरणस्य प्रकृष्टं तत्वं वायुमण्डलम्। वायुः दूषितः न करणीयः यतः विषाक्तो वायुः अनेकान् रोगान् जनयति।

महाभारत में लिखा है कि वन से ही बाघ की रक्षा की जा सकती है। अशोक के राज्य में एक भी पेड़ राजा के आज्ञा के बिना काटा नही जा सकता था। रक्षित पशुओं और पक्षियों का वध एक दण्डनीय अपराध था। पर्यावरण का दूसरा तत्व जल है। दूषित जल पीने से कई रोग फैलते है। अन्तरिक्ष में तेजोमण्डल पर्यावरण का तीसरा तत्त्व है। पर्यावरण का प्रकृष्ट तत्त्व वायुमण्डल है। विषाक्त वायु जल ही की भाँति अनेकों रोगों को पैदा करती है। अतः वायु धुएँ से रहित तथा विषाक्त पदार्थो से रहित हो जिससे पर्यावरण शुद्ध रह सके।

व्याकरणबिन्दवः

सन्धिच्छेदः

दण्डार्हम् = दण्ड + अर्हम् = अ + अ = आ, दीर्घसन्धिः

अद्यत्वेऽपि = अद्यत्वे + अपि = ए + अ = ऽ, पूर्वरूपसन्धिः

यैर्मानवजीवनम् = यैः + मानवजीवनम् = :–र् , विसर्गसन्धिः

विषाक्तो वायुः = विषाक्तः + वायुः = :– र्,विसर्ग सन्धिः

समस्तपदानि	विग्रहाः	समासमास
1 दूषितविषाणुसंसिक्तानि	दूषितानि च विषाणुसंसिक्तानि च	द्वन्द्वः
2 पशुपक्षिणाम्	पशूनां च पक्षिणां च	द्वन्द्वः
3 यन्त्रागारोद्योगिकक्षेत्रेषु	यन्त्रागारेषु च औद्योगिकक्षेत्रेषु च	द्वन्द्वः
4 वायुमण्डलजीवनचक्रे	वायुमण्डलं च जीवनचक्रं च	द्वन्द्वः

प्रकृतिप्रत्ययपरिचयः

छेत्तुम् – √छिद् + तुमुन्, अव्ययम्
हननम् – √हन् + ल्युट्, नपुं प्र ए व ।
लिखितम् – √लिख् + क्त, नपुं प्र ए व ।
ग्रस्तम् – √ग्रस् +क्त, नपुं प्र ए व ।
संसिक्तानि – सम् + √सिच् + क्त, नपुं प्र ए व ।
क्रियमाणानि – √कृ + कर्मवाच्य + शानच्, नपुं प्र ए व ।
उत्सृष्टः – उत् + √सृज् + क्त, नपुं प्र ए व ।
प्रकृष्टम् – प्र + √कृष् + क्त, नपुं प्र ए व ।
व्याप्तम् – वि + √आप् + क्त, नपुं प्र ए व ।

क्रियापदानि

यान्ति = √या + लट्, प्र.पु., ब.व.।
आसीत् = √अस् + लङ्, प्र.पु., ए.व.।
उत्सृजन्ति = उत् + √सृज् + लट्, प्र.पु., ब.व.।
प्रसरति = प्र + √सृ + लट्, प्र.पु., ए.व.।
प्रेरयति = प्र + √ईर् + णिच् + लट्, प्र.पु., ए.व.।
उत्पादयति = उत् + √पद् + णिच् + लट्, प्र.पु., ए.व.।
रक्ष्यते = √रक्ष् + कर्मवाच्य + लट्, , प्र.पु., ए.व.।
शक्यते = √शक् + कर्मवाच्य + लट्, , प्र.पु., ए.व.।
कथ्यते = √कथ् + कर्मवाच्य + लट्, , प्र.पु., ए.व.।

अव्ययपदानि

अपि – महाभारतेऽपि लिखितम्।
न, विना – राजाज्ञां विना वृक्षः छेत्तुं न शक्यते स्म।
अद्यत्वे – अद्यत्वे जलानि दूषितानि सन्ति।
अपि च – अपि च दूषितजलपानेन स्वास्थ्यं नश्यति।
अतः – अतः तेजोमण्डलं रक्षणीयम्।
सर्वतः – सर्वतः व्याप्तं तत्त्वं वायुमण्डलम्।

पाठगतप्रश्नाः 18.2

1. मञ्जूषायाः अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत

(क) ..... पर्यावरणं सर्वत्र दूषितं क्रियते।

(ख) अस्माभिः तेजोमण्डलं विविधविकारेभ्यः ..... रक्षणीयम्।

(ग) ओषजनं विना जीवाः न जायन्ते, ... प्राणिनां स्वास्थ्यम् ..... नश्यति।

(घ) ..... अस्माभिः मिलित्वा प्रदूषणसमस्यायाः निवारणं कर्तव्यम्।

मञ्जूषा

अतः, सर्वथा, अपि, अद्यत्वे, अपि च

2. कर्मवाच्यान्तवाक्यानां कर्तृवाच्ये परिवर्तनं कुरुत

कर्मवाच्यम्	**कर्तृवाच्यम्**
(क) व्याघ्रेण वनं रक्ष्यते।	(i) ..... रक्षति।
(ख) वेदेषु कल्याणकामना दृश्यते।	(ii) ..... पश्यामः।
(ग) वृक्षाः छेत्तुं न शक्यन्ते स्म।	(iii) ..... शक्नुवन्ति स्म।
(घ) धूमेन वातावरणेन विषाक्तं भूयते।	(iv) ..... ।

तृतीयः अंशः

नभो मण्डलं ..... अभयं नो पशुभ्यः।

व्याख्या

तृतीयांशे वर्णितं यत् पर्यावरणस्य पञ्चमं स्थानं नभोमण्डलम्। भवन्तः जानन्ति यत् वातावरणे विभिन्नाः ध्वनयः व्याप्ताः भवन्ति। तीव्राः कर्कशाः च ध्वनयः पर्यावरणं प्रदूषयन्ति। अद्यत्वे पर्यावरणविशेषज्ञानां ध्यानं ध्वनिप्रदूषणं प्रति आकृष्टम्। ध्वनिप्रदूषणस्य दुष्प्रभावेन चिन्तनक्षमता क्षयमाप्नोति। कर्णेन्द्रियविकारेण जनाः बधिराः भवन्ति। साम्प्रतं पर्यावरणप्रदूषणेन 'ओजोन–पटले' अपक्षयः सर्वेषां चिन्तायाः विषयः सञ्जातः। पर्यावरणरक्षणेन जीवनं शान्तं सुखमयं च भवति। मनसः अशान्तिः न केवलम् अनेकान् रोगान् जनयति अपितु सामाजिकपर्यावरणम् अपि प्रदूषयति। अतः सर्वविधपर्यावरणविशुद्धये मानसिकं पर्यावरणप्रदूषणं दूरीकरणीयम्। अत एव ऋषिभिः कथितम्–

''यतो यतः समीहसे, ततो नो अभयं कुरु।
शन्नः कुरु प्रजाभ्यः, अभयं नो पशुभ्यः।।''

पदच्छेदः यतः यतः समीहसे, ततः नः अभयम् कुरु।
शम् नः कुरु प्रजाभ्यः, अभयम् नः पशुभ्यः।।

अन्वयः यतः यतः समीहसे ततः नः अभयम् कुरु। नः प्रजाभ्यः शम् कुरु न पशुभ्यः अभयम् कुरु।

भावार्थ

अत्र ऋषिः प्रार्थयति यत् सर्वत्र शान्तिमयः वातावरणं भवेत्, कुतः अपि आशंका भयं वा न स्यात्। सर्वप्राणिनां कल्याणं भवेत्।

सारः

नभोमण्डलम् पर्यावरणस्य पञ्चमं स्थानम्। वाहनानि, यन्त्रशालाः, ध्वनिविस्तारकाः च उच्चैः ध्वनिम् उत्पाद्य ध्वनिप्रदूषणं कुर्वन्ति येन बधिरत्वम् उत्पाद्यते। ओजोनपटले विकिरणप्रभावेण अधुना अपक्षयः दृश्यते। यदि अस्य रक्षा न क्रियते तदा भयंकराः व्याधयः सम्भविष्यन्ति। यदि वयं पर्यावरणरक्षणे सावधानाः भवेम, तदा जीवनं शान्तिमयं भवेत्। अतः ऋषयः प्रजाभ्यः पशुभ्यः च अभयं कल्याणं च कामयन्ते।

आकाशमण्डल पर्यावरण का पांचवां स्थान है। प्रदूषित ध्वनि वाहनों, यन्त्रशालाओं और ध्वनिविस्तारकों से पैदा होती है तथा वह बहिरापन उत्पन्न करती है। यदि ओजोन पटल की रक्षा नहीं की जाती है तब भयंकर बीमारियां उत्पन्न हो जायेंगी। मन की अशान्ति बहुत से रोगों को पैदा करती है इसीलिए हमारे ऋषिगण समस्त प्राणियों के लिए अभय की कामना करते हैं।

व्याकरणबिन्दवः

सन्धिच्छेदाः

तदैव = तदा + एव, आ + ए – ऐ, वृद्धिसन्धिः

मनसोऽशान्तिः = मनसः + अशान्ति = :– उ, विसर्गसंन्धिः

दृश्यतेऽपक्षयः = दृश्यते + अपक्षयः ए + अ = ऽ, पूर्वरूपसन्धिः

समस्तपदानि	**विग्रहः**	**समासनाम**
शान्तिमयसुखमये	शान्तिमयं च सुखमयं च	द्वन्द्वः
शुद्धमनः	शुद्धं मनः	कर्मधारयः
अभयम्	न भयम्	नञ् तत्पुरुषः
बहुरोगान्	बहवः रोगाः तान्	कर्मधारयः

प्रकृतिप्रत्ययपरिचयः

सृष्टिः – √सृज् + क्तिन्

शान्तिमयं – शान्ति + मयट् नपु., प्रथमा एकवचनम्

विशुद्धिः – वि + √शुध् + क्तिन्

चिन्तनम् – √चिन्त् + ल्युट्
शान्तिः – √शम् + क्तिन्
कर्तव्यम् – √कृ + तव्यत्

क्रियापदानि

सम्भविष्यन्ति	सम् + √भू + लृट्, प्रथमपुरुषः, बहुवचनम्।
विनश्यन्ति	वि + √नश् + लट्, प्रथमपुरुषः, बहुवचनम्।
कामयन्ते	√काम् + लट्, प्रथमपुरुषः, बहुवचनम्।
वर्धते	√वृध् + लट्, प्रथमपुरुषः, एकवचनम्।
आवर्तते	आ + √वृत्+ लट्, प्रथमपुरुषः, एकवचनम्।

धातुरूपाणि

'अस्' धातुः (परस्मैपदी) अदादिगणतः

	लट् लकारः			लृट् लकारः		
	ए. व.	द्वि. व.	ब. व.	ए. व.	द्वि. व.	ब. व.
प्र० पु०	अस्ति	स्तः	सन्ति	भविष्यति	भविष्यतः	भविष्यन्ति
म० पु०	असि	स्थः	स्थ	भविष्यसि	भविष्यथः	भविष्यथ
उ० पु०	अस्मि	स्वः	स्मः	भविष्यामि	भविष्यावः	भविष्यामः
	लङ् लकारः			लोट् लकारः		
प्र० पु०	आसीत्	आस्ताम्	आसन्	अस्तु	स्ताम्	सन्तु
म० पु०	आसीः	आस्तम्	आस्त	एधि	स्तम्	स्त
उ० पु०	आसम्	आस्व	आस्म	असानि	असाव	असाम

विधिलिङ्

प्र० पु०	स्यात्	स्याताम्	स्युः
म० पु०	स्याः	स्यातम्	स्यात
उ० पु०	स्याम्	स्याव	स्याम

ब्रू –(अदादिगणतः) उभयपदी

परस्मैपदे

	लट् लकारः			लृट् लकारः		
	ए. व.	द्वि. व.	ब. व.	ए. व.	द्वि. व.	ब. व.
प्र० पु०	ब्रवीति,	ब्रूतः,	ब्रुवन्ति,	वक्ष्यति	वक्ष्यतः	वक्ष्यन्ति
म० पु०	ब्रवीषि,	ब्रूथः,	ब्रूथ	वक्ष्यसि	वक्ष्यथः	वक्ष्यथ
उ० पु०	ब्रवीमि	ब्रूवः	ब्रूमः	वक्ष्यामि	वक्ष्यावः	वक्ष्यामः
	लङ्लकारः			लोट् लकारः		
प्र० पु०	अब्रवीत्	अब्रूताम्	अब्रूवन्	ब्रवीतु	ब्रूताम्	ब्रुवन्तु
म० पु०	अब्रवीः	अब्रूतम्	अब्रूत	ब्रूहि	ब्रूतम्	ब्रूत
उ० पु०	अब्रवम्	अब्रूव	अब्रूम	ब्रवाणि	ब्रवाव	ब्रवाम

विधिलिङ्

प्र० पु०	ब्रूयात्	ब्रूयाताम्	ब्रूयुः
म० पु०	ब्रूयाः	ब्रूयातम्	ब्रूयात
उ० पु०	ब्रूयाम्	ब्रूयाव	ब्रूयाम

हन् (अदादिगणतः) परस्मैपदी

	लट्लकारः			लृट्लकारः		
	ए. व.	द्वि. व.	ब. व.	ए. व.	द्वि. व.	ब. व.
प्र० पु०	हन्ति	हतः	घ्नन्ति	हनिष्यति	हनिष्यतः	हनिष्यन्ति
म० पु०	हंसि	हथः	हथ	हनिष्यसि	हनिष्यथः	हनिष्यथ
उ० पु०	हन्मि	हन्वः	हन्मः	हनिष्यामि	हनिष्यावः	हनिष्यामः
	लङ्लकारः			लोट्लकारः		
प्र० पु०	अहन्	अहताम्	अघ्नन्	हन्तु	हताम्	घ्नन्तु
म० पु०	अहनः	अहतम्	अहत	जहि	हतम्	हत
उ० पु०	अहनम्	अहन्व	अहन्म	हनानि	हनाव	हनाम

विधिलिङ्

प्र० पु०	हन्यात्	हन्याताम्	हन्युः
म० पु०	हन्याः	हन्यातम्	हन्यात
उ० पु०	हन्याम्	हन्याव	हन्याम

कृ (तनादिगणतः) उभयपदी

परस्मैपदे

	लट्लकारः			लृट्लकारः		
	ए. व.	द्वि. व.	ब. व.	ए. व.	द्वि. व.	ब. व.
प्र० पु०	करोति	कुरुतः	कुर्वन्ति	करिष्यति	करिष्यतः	करिष्यन्ति
म० पु०	करोषि	कुरुथः	कुरुथ	करिष्यसि	करिष्यथः	करिष्यथ
उ० पु०	करोमि	कुर्वः	कुर्मः	करिष्यामि	करिष्यावः	करिष्यामः
	लङ्लकारः			लोट्लकारः		
प्र० पु०	अकरोत्	अकुरुताम्	अकुर्वन्	करोतु	कुरुताम्	कुर्वन्तु
म० पु०	अकरोः	अकुरुतम्	अकुरत	कुरु	कुरुतम्	कुरुत
उ० पु०	अकरवम्	अकुर्व	अकुर्म	करवाणि	करवाव	करवाम

विधिलिङ्

प्र० पु०	कुर्यात्	कुर्याताम्	कुर्युः
म० पु०	कुर्याः	कुर्यातम्	कुर्यात
उ० पु०	कुर्याम्	कुर्याव	कुर्याम

पाठगतप्रश्नाः 18.3

1. प्रश्नानाम् उत्तराणि लिखत

(क) कानि ध्वनिप्रदूषणं कुर्वन्ति?

(ख) विकिरणप्रभावेण ओजोनपटले साम्प्रतं किम् दृश्यते?

(ग) अस्माकं जीवनं सुखमयं कथं भवितुं शक्नोति?

(घ) मनसः अशान्तिः कं नाशयति?

(ङ) ऋषयः प्रजाभ्यः पशुभ्यः किं कामयन्ते।

2. एकवचने क्रियापदानि परिवर्तयत

(क) सम्भविष्यन्ति .....।

(ख) शक्नुवन्ति .....।

(ग) कामयन्ते .....।

(घ) कुर्वन्ति .....।

(ङ) आवर्तन्ते .....।

3. वाक्येषु क्रियापदानि कर्तृपदानि च चिनुत

(क) ध्वनिविस्तारकाः ध्वनिप्रदूषणं कुर्वन्ति।

(ख) 'ओजोन' वायुमण्डलं परावृत्तम् आवर्तते।

(ग) अनुकूलपर्यावरणे जीवनसृष्टिः वर्धते।

(घ) मनसः अशान्तिः बहुरोगान् जनयति।

(ङ) अस्माकं ऋषयः प्रजाभ्यः अभयं कामयन्ते।

18.4 किम् अधिगतम्

- पर्यावरणस्य समस्या चिन्तनीया अस्ति।
- पर्यावरणस्थानस्य पञ्चविधानि नामानि।
- अस्माभिः वृक्षदहनं न कर्तव्यम्, प्लास्टिकवस्तूनां प्रयोगः न कर्तव्यः यतः तानि प्रदूषणं जनयन्ति।
- वाहनानि, ध्वनिविस्तारकयन्त्राणि ध्वनिप्रदूषणं कुर्वन्ति। पशूनां पक्षिणां च संरक्षणम् आवश्यकम्, वृक्षकर्तनं न कर्तव्यम्, दूषितं जलं न पातव्यम्।

18.5 योग्यताविस्तारः

भावविस्तारः

भारतदेशे 2200 वर्षेभ्यः पूर्वम् एव पर्यावरणस्य जागरूकता आसीत् इति नूनं विस्मयावहम्। यस्य पर्यावरणस्य विषये अद्य वयं बहु चिन्तिताः स्मः तस्य पर्यावरणस्य संरक्षणस्य चिन्ता

अशोकस्य राज्येऽपि आसीत्। अस्य प्रमाणाः सन्ति तत्कालीनाः उपलब्धाः शिलालेखाः। ततः तु पर्यावरणस्य ईदृशी समस्या नासीत् यतः अस्माकं पर्यावरणं प्रकृतेः विविधोपादानैः पूर्णमासीत्। समस्तानि प्राकृतिकतत्त्वानि देवताः एव मन्यन्ते स्म।

अतः यजुर्वेदे उक्तम्–

अग्निर्देवता वातोदेवता सूर्योदेवता ..... वरूणो देवता।।

ओउम् देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाया

दिव्यो गन्धर्वः केतपूः केतं न पुनातु वाचस्पतिर्वीचं नः स्वदतु। यजु. 30/1।

स्थलम्– पृथिवी अस्माकं माता अतः नमस्करणीया वर्तते कथितं हि–
माता भूमिः पुत्रोऽहं पृथिव्याः। अथर्ववेद 12/1/12।

जलम्– (आपः) शंनो देवीरभिष्टये आपो भवन्तु पीतये। यजु. 36/12।

तेजः– अग्निमीडे पुरोहितं, यज्ञस्य देवमृत्विजम्।
होतारं रत्नदाधतम्। ऋग्वेद 1/1/1।

वायुः– ओउम् शन्नो वातः पवतां शंन्नस्तपतु सूर्यः। यजु. 36/10।

नभः– शं न सुरुचिः भवतु स्वधाभिः। शं रोदसी बृहती शं नो अद्रिः।
शं नो देवानां सुहतानि सन्तु । नाहक् 7/35/3

सर्वत्र शान्तिः भवेत्। क्वचिदपि विचारप्रदूषणं न स्यात्। अतः यजुर्वेदे इत्थं प्रार्थितम्–

ओउम् द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव सा मा शान्तिरेधि।

पर्यावरणसंरक्षणाय एतादृशी शान्तिः सर्वत्र अपेक्षिता।

भाषिककार्यम्

चुरादिगणधातवः (लट्)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमः पुरुषः	चोरयति	चिन्तयतः	ताडयन्ति
मध्यमः पुरुषः	भक्षयसि	गणयथः	पूजयथ
उत्तमः पुरुषः	कथयामि	चोरयावः	चिन्तयामः

इकारान्त पुल्लिङ्गाः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	मुनिः	मुनी	मुनयः
द्वितीया	ऋषिम्	ऋषी	ऋषीन्
तृतीया	हरिणा	हरिभ्याम्	हरिभिः
चतुर्थी	मुनये	मुनिभ्याम्	मुनिभ्यः
पंचमी	उदधेः	उदधिभ्याम्	उदधिभ्यः
षष्ठी	व्याधेः	व्याध्योः	व्याधीनाम्
सप्तमी	रवौ	रव्योः	रवीषु
सम्बोधन	हे कपे	हे कपी	हे कपयः

इकारान्त स्त्रीलिङ्गाः

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	मतिः	मती	मतयः
द्वितीया	जातिम्	जाती	जातीः
तृतीया	स्थित्या	स्थितिभ्याम्	स्थितिभिः
चतुर्थी	बुद्धये	बुद्धिभ्याम्	बुद्धिभ्यः
पंचमी	नीतेः	नीतिभ्याम्	नीतिभ्यः
षष्ठी	तिथेः	तिथ्योः	तिथीनाम्
सप्तमी	भूमौ	भूम्योः	भूमिषु
सम्बोधन	हे मते	हे मती	हे मतयः

18.6 पाठान्तप्रश्नाः

1. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत

   (क) मानवजीवनाय स्वच्छं पर्यावरणम् अपेक्षितं भवति।

   (ख) भागवतपुराणे द्रुमाः दीनाः कथिताः।

   (ग) महाभारते वनविषये लिखितम् यत् वनेन व्याघ्रः रक्ष्यते।

   (घ) अद्यत्वे निर्माणशालाभ्यः निर्गतधूमैः वातावरणं विषाक्तं भवति।

   (ङ) तेजोमण्डलं विकारेभ्यः रक्षणीयम्।

   (च) यदि वयं पर्यावरणसंरक्षणे सावधानाः भवेम, अस्माकं जीवनं सुखमयं शान्तिमयं च भवेत्

2. कथनानां समुचितमेलनं कुरुत

(क) नाद्रियते अद्यत्वे	(i) विकिरणप्रभावेण अपक्षयः दृश्यते।
(ख) भूमिः मण्डलानां	(ii) ततो नो अभयं कुरु।
(ग) औद्योगिकक्षेत्रकारणात्	(iii) प्रथमं तत्वं वर्तते।
(घ) ओजोनपटले साम्प्रतं	(iv) प्राकृतिकं जीवनम्।
(ङ) यतो यतः समीहसे	(v) मानवजीवनं क्षतिग्रस्तं जायते।

3. समस्तपदानां विग्रहं कृत्वा समासनाम अपि लिखत'

   (क) पशुपक्षिणाम्

   (ख) यन्त्रागारौद्योगिकक्षेत्राणि

   (ग) निर्गतधूमैः

   (घ) पादपवीरुधवृक्षाः

(ङ) पर्यावरणसंरक्षणे

(च) अभयम्

4. निर्देशानुसारम् उपयुक्तैः धातुरूपैः रिक्त स्थानानि पूरयत

(i) मम गृहे शतं पुस्तकानि .....। (अस्, लट्लकारः)

(ii) लोचनाभ्यां विहीनस्य दर्पणः किं .....। (कृ लृट्लकारः)

(iii) पुरा शूद्रको नाम राजा .....। (अस् लङ्लकारः)

(iv) सः माणवकं धर्मं .....। (ब्रू लट्लकारः)

(v) त्वं सत्यं .....। (ब्रू लोट्लकारः)

(vi) दुर्जने दयां मा .....। (कृ लोट्लकारः)

(vii) अहम् अक्षराणाम् अकारः .....। (अस् लट्लकारः)

(viii) सः चर्मणि गजं .....। (हन् लट्लकारः)

(ix) त्वं साधूनां सेवां .....। (कृ विधिलिङ्लकारः)

(x) सत्यं ..... प्रियं .....। (ब्रू विधिलिङ्लकारः)

(xi) त्वं संग्रामे शत्रून् .....। (हन् लोट्लकारः)

(xii) अहं कमपि जीवं न .....। (हन् विधिलिङलकारः)

5. 'पर्यावरणस्य संरक्षणम्' विषयम् अधिकृत्य षड्वाक्यानि रचयत।

18.7 उत्तराणि

18.3 बोधप्रश्नाः

1. (क) सर्वतः (ख) पर्यावरणसंरक्षणस्य (ग) कल्याणकामना (घ) भूमिः (ङ) पशूनाम्, दण्डार्हम्।
2. (क) vi, (ख) viii, (ग) i, (घ) iii, (ङ) ii, (च) v, (छ) iv, (ज) vii
3. (क) स्थलमण्डलम् (ख) जलमण्डलम् (ग) तेजोमण्डलम् (घ) वायुमण्डलम् (ङ) नभोमण्डलम्

पाठगतप्रश्नाः

18.1 1. (क) तत् पर्यावरणं कथ्यते।

(ख) वेदेषु सर्वत्र कल्याणकामना दृश्यते।

(ग) अद्य प्रायः विचारप्रदूषणाय लोभैषणा वर्धते।

(घ) निक्षिप्तानि प्लास्टिकवस्तूनि वनस्पतीनां प्ररोहणे बाधां जनयन्ति।

(ङ) भागवतपुराणे आदेशः अस्ति यत् वृक्षाणां दहनं न करणीयम्।

2. (क) चिन्ता, (ख) एतानि, (ग) कल्याणकामना, (घ) पादपाः, (ङ) दहनम्।

3. (क) लोभैषणाः वर्धन्ते। (ख) प्राकृतिकानि जीवनानि न आद्रियन्ते।
(ग) वृक्षाणाम्। (घ) निक्षिप्तानि प्लास्टिकवस्तूनि, नश्यन्ति, क्लिद्यन्ते।
(ङ) वेदेषु कल्याणकामनाः सन्ति।

18.2 1. (क) अद्यत्वे, (ख) सर्वथा, (ग) अति च, अपि, (घ) अतः

2. (क) व्याघ्रः वनं रक्षति।

(ख) वेदेषु कल्याणकामनां पश्यामः।

(ग) वृक्षान् छेत्तुं न शक्नुवन्ति स्म।

(घ) धूमेन वातावरणं विषाक्तं भवति।

18.3 1. (क) यन्त्रशालाः, ध्वनिविस्तारकाः वाहनानि च ध्वनिप्रदूषणं कुर्वन्ति।

(ख) विकिरणप्रभावेण ओजोनपटले साम्प्रतम् अपक्षयः दृश्यते।

(ग) अस्माकं जीवनं तदैव सुखमयं भवितुं शक्नोति यदा वयं पर्यावरणसंरक्षणे सावधानाः भवेम।

(घ) मनसः अशान्तिः सामाजिकं वातावरणं नाशयति।

(ङ) ऋषयः प्रजाभ्यः पशुभ्यः च अभयं कामयन्ते।

2. (क) सम्भविष्यन्ति (ख) शक्नोति (ग) कामयते (घ) करोति (ङ) आवर्तते।

3.

	कर्तृपदानि	**क्रियापदानि**
(क)	ध्वनिविस्तारकाः	कुर्वन्ति
(ख)	वायुमण्डलम्	आवर्तते
(ग)	जीवसृष्टिः	वर्धते
(घ)	अशान्तिः	जनयति
(ङ)	ऋषिः	कामयते

18.6 पाठान्तप्रश्नाः

1. (क) मानवजीवनाय किम् अपेक्षितं भवति?

(ख) भागवतपुराणे द्रुमाः कीदृशाः कथिताः?

(ग) महाभारते वनविषये किं लिखितम्?

(घ) अद्यत्वे निर्माणशालाभ्यः निर्गतधूमैः वातावरणम् कीदृशं भवति?

(ङ) तेजोमण्डलं केभ्यः रक्षणीयम्?

(च) अस्माकं जीवनं कथं सुखमयं शान्तिमयं च भवितुं शक्नोति?

2. कथनानां समुचितमेलनम्

(क) नाद्रियते अद्यत्वे प्राकृतिकं जीवनम्।

(ख) भूमिः मण्डलानां प्रथमं तत्त्वं वर्तते।

(ग) औद्योगिकक्षेत्रकारणात् मानवजीवनं क्षतिग्रस्तं जायते।

(घ) ओजोनपटले साम्प्रतं विकिरणप्रभावेण अपक्षयः दृश्यते।

(ङ) यतो यतः सीमहसे, ततो नो अभयं कुरु।

3. (क) पशवः च पक्षिणः च, तेषाम् द्वन्द्वः

(ख) यन्त्रागाराः च औद्योगिकक्षेत्राणि च, द्वन्द्वः

(ग) निर्गताः धूमाः तैः (कर्मधारयः)

(घ) पादपाः च वीरूधः च वृक्षाः च, द्वन्द्वः

(ङ) पर्यावरणस्य संरक्षणम् तस्मिन् (ष. त.)

(च) न भयम् न×् तत्पुरुषः

4. (i) सन्ति। (ii) करिष्यति। (iii) आसीत्। (iv) ब्रवीति अथवा ब्रूते। (v) ब्रूहि। (vi) कुरु। (vii) अस्मि। (viii) हन्ति। (ix) कुर्याः। (x) ब्रूयात्। (xi) जहि। (xii) हन्याम्।

5. 'पर्यावरणस्य संरक्षणम्' विषये स्वेच्छया षड्वाक्यानि लेख्यानि।

19

309sk19

क्रोधोऽनर्थकारकः

मानवजीवने सर्वदा सर्वम् अनुकूलमेव न घटते। कदाचित् कामनाः प्रतिहताः भवन्ति, कदाचित् कश्चित् कस्यचित् उपहासं करोति। एतादृशीषु प्रतिकूलपरिस्थितिषु केचन जनाः सर्वं शान्तभावेन सहन्ते। परम् अपरे केचित् क्रुद्धाः भूत्वा आत्मनः परेषां च अपकारं कुर्वन्ति। क्रोधस्य परिणामाः भयङ्कराः एव भवन्ति। क्रोधावेशे विवेकः विनश्यति। एकदा अतिक्रुद्धेन दुर्वाससा देवी सरस्वती अभिशप्ता। अत्र वयम् इमामेव रोचककथां पठामः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- क्रोधस्य दुष्परिणामं वर्णयितुं समर्थः भविष्यति;
- धरणितले सरस्वत्याः अवतरणस्य कथां लेखितुं शक्तः भविष्यति;
- दुर्वासामुनेः चरित्रचित्रणं कर्तुं सक्षमः भविष्यति;
- सकारान्तपुल्लिङ्गशब्दानां रुपाणि लेखितुं शक्ष्यति;
- विसर्गस्थाने रत्वं सत्वम् इति करिष्यति;
- दृश् धातोः रूपाणां प्रयोगं करिष्यति।

क्रियाकलापः

चित्राणि दृष्ट्वा प्रश्नानि उत्तरत। उत्तराणि मञ्जूषायां दत्तानि।

19.1

(क) माता बालकाय किं ददाति?

(ख) बालकाय तु किं रोचते?

(ग) सः क्रोधेन उन्मत्तः भूत्वा किं करोति?

(घ) मृत्तिकास्थालिका कुत्र पतति?

(ङ) मृत्तिकास्थालिकायाः कः परिणामः भवति?

भूमौ, भोजनम्, स्थालिकां क्षिपति, स्थालिका भग्ना भवति, मिष्ठान्नं

19.1 मूलपाठः

क्रोधोऽनर्थकारकः

अधुना वंय मूलापाठं ध्यानेन पठामः।

पुरा भगवान् परमेष्ठी कमलासने समुपाविष्टः देवैः परिवृतः विद्यागोष्ठीः समाचरन् आसीत्। केचित् स्तुतिचतुराः ऋचः समुदचारयन्। केचित यजूंष्यपठन्। केचित् सामानि अगायन्। तत्र प्रकृत्या अतिरोषणः महातपा मुनेरत्रेस्तनयः दुर्वासा द्वितीयेन मन्दपालनाम्ना मुनिना सह कलहायमानः साम गायन् क्रोधान्धः भूत्वा विस्वरमकरोत्। सर्वेषु च तेषु शापभयात् मौनेषु

शब्दार्थाः
परमेष्ठी = बह्मा
परिवृतः = घिरे हुए
विद्यागोष्ठीः = विद्यागोष्ठी
समाचरन् = आयोजित करते हुए
ऋचः = ऋचाओं का
समुदचारयन् = उच्चारण कर रहे थे
अतिरोषणः = अतिक्रोधी
मुनेः अत्रेः तनयः = अत्रि मुनि का पुत्र
विस्वरम् = बेसुरा

मुनिषु, पितामहम् उपवीजयन्ती सरस्वती तच्छ्रुत्वा हसितुं प्रारभत।

तां तथा हसन्तीं स मुनिः 'आः पापकारिणि! दुर्विदग्धे! माम् उपहससि' 'इत्युक्त्वा जटाकलापस्य रोचिषा सिञ्चन्निव रोषदहनद्रवेण दशदिशः भृकुटिमाबध्नन् अतिलोहितेन चक्षुषा कोपकम्पतरलिताङ्गुलिना करेण अक्षमालाम् आक्षिप्य कामण्डलवेन वारिणा समुपस्पृश्य शापजलं जग्राह।

उपवीजयन्ती = पंखा झलती हुई
दुर्विदग्धे = दुरभिमानिनी
जटाकलापस्य = जटासमूह से
रोचिषा = तेज से
रोषदहनद्रवेण = क्रोधाग्नि के द्रव से
भुकुटिम् आबध्नन् = भौंहें चढ़ाते हुए
अतिलोहितेन = अत्यधिक लाल
कोप = क्रोध से उत्पन्न कंपकंपा के कारण
चंचल अंगुलियों वाले
करेण = हाथ से
कामण्डलवेन = कमण्डलु के
समुपस्पृश्य = आचमन करके



19.2

अत्रान्तरे स्वयम्भुवस्समीपे समुपविष्टा देवी सावित्री अवदत्, "आः दुरात्मन् क्रोधोपहत, कथम् आत्मस्खालितम् अगणय्य सुरासुरमुनिमनुजवृन्दवन्दनीयां त्रिभुवनमातरं भगवतीं सरस्वतीं शप्तुम् अभिलषसि", 'ततो मर्षय भगवन्! अभूमिरेषा शापस्य' इत्यनुनाथ्यमानोऽपि विबुधैः 'उपाध्याय! स्खलितमेकं क्षमस्व' इति बद्धांजलिपुटैः प्रसाद्यमानोऽपि स्वशिष्यैः पुत्र! मा कृथास्तपसः प्रत्यूहम् इति निवार्यमाणोऽप्यत्रिणा रोषवेशविवशो दुर्वासाः 'दुर्विनीते! व्यपनयामि ते विद्याजनितामुन्नतिम् इमाम्, अधस्ताद् गच्छ मर्त्यलोकम्' इत्युक्त्वा तप्छापोदकं विससर्ज। प्रतिशापदानाय उद्यतां सावित्रीं 'सखि! संहररोषम्, असंस्कृतमतयोऽपि मुनयः माननीयाः' इति अभिदधाना सरस्वती एव तां न्यवारयत्।

अत्रान्तरे = इसी बीच
स्वयम्भुवः = ब्रह्मा के
अगणय्य = न समझते हुए
मर्षय = क्षमा करो
अभूमिः = योग्य नहीं है
अनु0 = अनुनय किए जाने पर भी
विबुधैः = देवों के द्वारा
स्खलितम् = अपराध को
प्रसाद्यमानः = मनाए जाते हुए भी
प्रत्यूहम् = विघ्न
निवार्यमाणः = रोका जाता हुआ
अत्रिणा = अत्रि के द्वारा
व्यपनयामि = दूर करता हूँ
विद्याजनिताम् = विद्या जनित उन्नति को
विससर्ज = छोड़ दिया
अधस्ताद् = नीचे
प्रतिश0 = बदले में शाप देने का उद्यत
संहर = रोको
असंस्कृ0 = असंस्कृत मति वाले भी मुनि
अभिदधाना = कहती हुई
न्यवारयत् = रोका

अथ तां तथा शप्तां सरस्वतीं दृष्ट्वा शापकलकलं निवार्य पितामहः सुधीरम् उवाच, 'ब्रह्मन्! न खलु साधुसेवितोऽयं पन्थाः येनासि प्रवृत्तः। क्षमा हि मूलं सर्वतपसाम्। परदोषदर्शनदक्षा दृष्टिरिव कुपिता बुद्धिः! न ते आत्मदोषं पश्यति। अतिरोषणश्चक्षुष्मानन्धः एव जनः। न हि कोपकलुषिता विमृशति मतिः कर्तव्यम् अकर्तव्यम् वा। रोषदोषनिषधे स्वहृदये निग्राह्ये किमर्थमसि निगृहीतवाननागसां सरस्वतीम्।' इत्युक्त्वा पुनराह– 'वत्से सरस्वति! विषादं मा गाः। एषा त्वामनुयास्यति सावित्री। विनोदयिष्यति चास्मद्विरहदुःखिताम्। आत्मजमुखकमलावलोकनावधिश्च ते शापं भविष्यति।

सुधीरम् = धैर्यपूर्वक
दक्षा = चतुर
अतिरोषणः = अति क्रोधी
चक्षुष्मान् = आंखों वाला
कोपकलुषिता = क्रोध से कलुषित
मति = बुद्धि
निग्राह्ये = नियन्त्रित करने के स्थान पर
अनागसां = निरपराध
पुनः आह = फिर कहा
मा गाः = मत प्राप्त होवो
अनुयास्यसि = पीछे पीछे जाएगी।

19.2 बोधप्रश्नाः

1. पाठं सम्यक् पठित्वा 'अ' स्तम्भस्य वाक्यांशैः सह 'ब' स्तम्भस्य वाक्यांशानां मेलनं कुरुत

'अ'	'ब'
(क) केचित् स्तुतिचतुराः	(i) अगायन्।
(ख) ततो मर्षय भगवन्!	(ii) ऋचः समुदचारयन्।
(ग) केचित् सामानि	(iii) विषादं मा गमय।
(घ) वत्से सरस्वति!	(iv) विससर्ज।
(ङ) इत्युक्त्वा तच्छापोदकं	(v) सर्वतपसाम्।
(च) क्षमा हि मूलं	(vi) अभूमिरेषा शापस्य

2. पाठात् उचितपदानि चित्वा रिक्तस्थानानि पूरयत
   (क) पितामहम् उपवीजयन्ती सरस्वती तच्छ्रुत्वा हसितुं .....।
   (ख) आत्मजमुखकमलावलोकनावधिश्च ते शापं .....।
   (ग) कुपिता बुद्धिः न ते आत्मदोषं .....।
   (घ) वत्से सरस्वति! विषादं मा .....।
   (ङ) मुनिः कामण्डलवेन वारिणा समुपस्पृश्य शापजलं .....।

3. प्रश्नान् उत्तरत (एकपदेन)

(क) भगवान् परमेष्ठी कुत्र समुपविष्टः?

(ख) क्रोधान्धः भूत्वा दुर्वासाः किम् अकरोत्?

(ग) स्वयंभुवः समीपे का समुपविष्टा आसीत्?

(घ) क्षमा केषां मूलम्?

(ङ) कीदृशी बुद्धिः कर्त्तव्यम् अकर्तव्यं वा न विमृशति?

19.3 अधुना अवगच्छामः

प्रथमः अंशः

पुरा भगवान् ..... शापजलं जग्राह।

अधुना वयं पाठस्य प्रथमांशं सम्यक् अवबोधामः।

व्याख्या

अत्र दुर्वाससः क्रोधसम्बद्धा एका कथा समुदाहृता। पुरा देवैः परिवृतः परमेष्ठी (परमे पदे तिष्ठति इति) ब्रह्मा विद्यागोष्ठीः समाचरन् कमलस्य आसने उपविष्टः आसीत्। ऋचां, यजुषां साम्नां च उच्चारणं भवति स्म। गोष्ठ्यां परस्परं विद्याविसंवादेकृते विवादे अतिक्रोधिनः दुर्वाससः द्वितीयेन मुनिना सह कलहः सञ्जातः। कलहायमानः सः साम गायन् विस्वरम् अकरोत्। विस्वरं श्रुत्वा सरस्वती हसितवती। दुर्वासाः तत्क्षणमेव शापं दातुम् उद्यतः अभवत्।

एतां कथां सम्यक् अवबोद्धुम् अधोलिखितानां परिचयः अस्माकं सहायकः भविष्यति–

विद्यागोष्ठीः– ब्रह्मसृष्ट्यादिविविधविषयाणां विवेचनार्थम् आयोज्यमानाः गोष्ठयः।

ऋचः– ऋग्वेदस्य मन्त्राः।

यजूंषि – यजुर्वेदस्य मन्त्राः।

सामानि – सामवेदस्य मन्त्राः।

दुर्वासाः– दुर्वासाः एकः अतिक्रोधी ऋषिः इति भवद्भिः अवश्यमेव श्रुतं भवेत्। सः अत्रेः अनसूयायाश्च आत्मजः (पुत्रः) आसीत्। तस्य प्रसादनम् अतीव दुष्करमासीत्। तेन अनेके जनाः अभिशप्ताः। कालिदासस्य अभिज्ञानशाकुन्तलस्य नाटकस्य नायिका शकुन्तला अपि तेन शप्ता आसीत्।

विस्वरम्– स्वरदोषम्। वेदमन्त्राणां गाने त्रयः स्वराः भवन्ति उदात्तः अनुदात्तः स्वरितश्च। अर्थात् यः स्वरः उच्चैः उच्चार्यते स 'उदात्तः' भवति। यः स्वरः नीचैः = शनैः उच्चार्यते स अनुदात्तः भवति। यः स्वरः मध्यमरूपेण उच्चार्यते स स्वरितः कथ्यते। यदि एकस्य स्वरस्य स्थाने अन्यः स्वरः प्रयुज्यते तदा विस्वरः जायते।

दशदिशः

1. पूर्वा, 2. आग्नेयी, 3. दक्षिणा, 4. नैर्ऋती, 5, पश्चिमा, 6. वायवी, 7. उत्तरा, 8. ऐशानी, 9. ऊर्ध्वम्, 10. अधः।



व्याकरणबिन्दवः

पदपरिचयः

यजूंषि	'यजुस्' शब्दः, नपुंकसकलिङ्गम्, द्वितीयाविभक्तिः, बहुवचनम्।
प्रकृत्या	'प्रकृति' शब्दः, तृतीयाविभक्तिः, एकवचनम्।
अत्रेः	'अत्रि' शब्दः, षष्ठीविभक्तिः, एकवचनम्।
दिशः	'दिक्' शब्दः, प्र. द्वितीयाविभक्तिः, बहुवचनम्।
चक्षुषा	'चक्षुष्' शब्दः, नपुसकलिङ्गम्, तृतीयाविभक्तिः, एकवचनम्।
वारिणा	'वारि' शब्दः, नपुसकलिङ्गम्, तृतीयाविभक्तिः, एकवचनम्।
उपहससि	उप + हस् लट् म.पु. एकवचनम्।
जग्राह	√ग्रह् लिट् प्र.पु. एकवचनम्

क्तप्रत्ययान्तशब्दाः

समुपविष्टः	सम् + उप + √विश् + क्त पु. एकवचनम्
परिवृतः	परि + √वृ + क्त + पु. एकवचनम्

क्त्वाप्रत्ययान्तशब्दाः

भूत्वा	√भू + क्त्वा
उक्त्वा	√वच् + क्त्वा
श्रुत्वा	√श्रु + क्त्वा

ल्यप्प्रत्ययान्तशब्दौ

आक्षिप्य — आ + √क्षिप् + ल्यप्

समुपस्पृश्य — सम् + उप + √स्पृश् + ल्यप्

शतृशानच्प्रत्यान्तशब्दाः

कलहायमानः — √कलह + णिच् + शानच् पु. प्र.वि. एकवचनम्

उपबीजयन्ती — उप + √बीज् + शतृ + स्त्रीलिंग प्र.पु. एकवचनम्

हसन्तीम् — √हस् + शतृ + स्त्रीलिंगम्, द्वितीया वि. एकवचनम्

सन्धिच्छेदाः:

मुनेरत्रेस्तनयः = मुनिः + अत्रेः + तनयः (विसर्गःसन्धिः)

क्रोधान्धः = क्रोध + अन्धः (दीर्घसन्धिः)

तच्छ्रुत्वा = तत् + श्रुत्वा (व्यञ्जनसन्धिः)

प्रथमांशसारः

पुरा भगवान् ब्रह्मा देवैः परिवृतः विद्यागोष्ठीः भावयन् उपाविशत। गोष्ठ्यां वेदमन्त्राणां पाठः अभवत्। विद्यायाः विभिन्नेषु विषयेषु वादविवादः प्राचलत्। एकस्मिन् विषये क्रोधयुक्तः दुर्वासाः ऋषिः केन अपि मुनिना सह कलहायमानः साम गायने स्वरभङ्गम् अकरोत्। तत् श्रुत्वा भगवती सरस्वती अहसत्। अपमानम् अनुभूय दुर्वासाः सरस्वतीं शप्तुं जलं हस्ते अगृहणात्।

प्राचीन समय में ब्रह्मा ने दवेताओं के साथ शाश्वत ब्रह्म के विषय में चर्चा करने के लिए गोष्ठी का आयोजन किया। गोष्ठी में वेदमन्त्रों का पाठ हुआ। वहाँ उन लोगों के बीच आपस में विद्याविषयक बहस छिड़ गई। एक विषय पर क्रोधी दुर्वासा का किसी दूसरे मुनि के साथ झगड़ा हो गया और उनके द्वारा सामगान करते हुए क्रोध के कारण स्वरभङ्ग हो गया। शाप के डर से सब मुनि तो चुप रहे किन्तु भगवती सरस्वती से यह स्वरहीन पाठ सहन नहीं हुआ और वे हँस पड़ी। स्वयं को अपमानित मान कर दुर्वासा ने सरस्वती को शाप देने के लिए हाथ में जल ले लिया।

पाठगतप्रश्नाः 19.1

1. एकपदेन उत्तरत

   (क) भगवान् परमेष्ठी कैः परिवृतः आसीत्?

   (ख) दुर्वासाः कस्य तनयः आसीत्?

   (ग) मन्दपालनाम्ना मुनिना सह कस्य कलहः जातः?

(घ) साम गायन् दुर्वासाः किम् अकरोत्?

(ङ) विस्वरं श्रुत्वा का अहसत्?

(च) सरस्वतीं शप्तुं दुर्वासाः किम् जग्राह?

2. मञ्जूषायाः उपयुक्तं शतृप्रत्यान्तं पदं चित्वा रिक्तस्थानपूर्तिं कुरुत–

उपवीजयन्ती, हसन्तीं, आबध्नन्, समाचरन्, धावन्ती, शिक्षयन्ती

(क) तां ..... दृष्ट्वा मुनिः तस्यै अक्रुध्यत्।

(ख) पितामहम् ..... भगवती सरस्वती जहास।

(ग) भुकुटिम् ..... दुर्वासा शापजलं जग्राह।

(घ) ..... बालिका हसति।

(ङ) परमेष्ठी विद्यागोष्ठीः ..... आसीत्।

(च) ..... अध्यापिका चित्रं दर्शयति।

3. रिक्तस्थानेषु उचितं कर्मपदं लिखत–

(क) केचित् स्ततिचतुराः ..... समुदचारयन्।

(ख) केचित् ..... अगायन्।

(ग) दुर्वासाः साम गायन् ..... अकरोत्।

(घ) कामण्डलवेन वारिणा समुपस्पृश्य दुर्वासा ..... जग्राह।

(ङ) केचित् ..... अपठन्।

(च) ..... उपवीजयन्ती सरस्वती हसितुं प्रारभत्।

द्वितीयः अंशः

अत्रान्तरे ..... न्यवारयत्।

सम्प्रति वयं द्वितीयम् अशं सम्यक् अवगच्छामः। वयं सर्वे जानीमः यत् क्रोधावेशे जनः कर्त्तव्यम् अकर्तव्यं विचारयितुम् अक्षमः। किम् स्मरन्ति भवन्तः यत् कदाचित् क्रोधावेशे भवद्भिः अपि किञ्चित् अनिष्टं कृतम्। यदि स्मृतिपथम् आयाति काचित् घटना तर्हि पञ्चवाक्येषु लिखन्तु।

व्याख्या

वयं प्रायः पश्यामः यत् क्रोधोन्मत्ताः जनाः अनर्थं कुर्वन्ति। अतिक्रोधी दुर्वासाः अपि क्रोधान्धः भूत्वा देव्या सावित्र्या, देवैः, शिष्यैः, स्वपित्रा च बहुशः निवारितः अपि सरस्वतीम् अभिशप्तवान्। प्रतिक्रियारूपेण प्रतिशापं प्रदातुम् उद्यता सावित्री सरस्वत्या निवारिता। तस्याः मते मुनयः सर्वथा माननीयाः।

बाल्यकाले भवन्तः अनेककथाः श्रुतवन्तः यासु शापस्य वरस्य वा वर्णनम् आसीत्। प्राचीनकाले प्रसन्नाः देवाः ऋषयः च वरदानम् रुष्टाश्च शापं प्रदातुं समर्थाः आसन्। यत् किञ्चित् अपि ऋषिमुखात् विनिःसृतं तत् अवश्यमेव घटितम्। उक्तम् च उत्तररामचरिते– ''ऋषीणां पुनराद्यानां वाचम् अर्थोऽनुधावति।'' अधत्वेऽपि ये जनाः सततं सत्यम् आराधयन्ति ते एतादृशीं शक्तिं प्राप्नुवन्ति।

वयं पश्यामः यत् जनाः भिन्नप्रकृतयः भिन्न स्वभावाः भवन्ति। अस्यामेव कथायाम् एकतः क्रोधपरायणः दुर्वासाः अपरतः क्षमारूपिणी शान्तस्वभावा सरस्वती या दुर्वाससा अभिशप्ता अपि देवीं सावित्रीं प्रतिशापदानात् न्यवारयत्। सरस्वती विद्यायाः देवी वर्तते। अतएव सा विनम्रस्वभावा विद्यते। यतः 'विद्या ददाति विनयम्।''

व्याकरणबिन्दवः

पदपरिचयः

विबुधैः	'विबुध' शब्दः, तृतीयाविभक्तिः, बहुवचनम्
अत्रिणा	'अत्रि' शब्दः, तृतीयाविभक्तिः, एकवचनम्
दुर्विनीते!	'दुर्विनीता' शब्दः, सम्बोधन–एकवचनम्
अभिलषसि	अभि + लष् + लट् म.पु. एकवचनम्
क्षमस्व	√क्षम् + लोट् म.पु. एकवचनम्
कृथाः	√कृ + विधिलिङ् म.पु. एकवचनम् आत्मनेपदी
व्यपनयामि	वि + √अप + नी + लट् उ.पु. एकवचनम्
गच्छ	√गम् लोट् म.पु. एकवचनम्
विससर्ज	वि + √सृज् + लिट्
संहर	सम् + √हृ + लोट् म.पु. एकवचनम्

तुमुन्प्रत्ययान्तशब्दः

शप्तुम्	√शप् + तुमुन्

शानच्प्रत्ययान्तशब्दाः

अनुनाथ्यमानः	अनु + नाथ् + णिच् + शानच् पु. प्र.वि. एकवचनम्
प्रसाद्यमानः	प्र + सद् + णिच् + शानच् पु. प्र.वि. एकवचनम्
निवार्यमाणः	नि + वृ + णिच् + शानच् पु. प्र.वि. एकवचनम्

सन्धिच्छेदाः

स्वयम्भुवस्समीपे	= स्वयंभुवः + समीपे –	विसर्गसन्धिः (सत्वम्)
क्रोधोपहतः	= क्रोध + उपहतः –	गुणसन्धिः
अभूमिरेषा	= अभूमिः + एषा –	विसर्गसन्धिः (रत्वम्)

इत्यनुनाथ्यमानोऽपि	= इति + अनुनाथ्यमानः + अपि –	यण्सन्धिः विसर्गसन्धिश्च।
प्रसाद्यमानोऽपि	= प्रसाद्यमानः + अपि –	विसर्गसन्धिः (उत्वम्)
कृथास्तपसः	= कृथाः + तपसः –	विसर्गसन्धिः (सत्वम्)
निवार्यमाणोऽप्यत्रिणा	= निवार्यमाणः + अपि + अत्रिणा– यण्सन्धिश्च।	विसर्गसन्धिः, पूर्वरूपसन्धिः,
असंस्कृतमतयोऽपि	= असंस्कृतमतयः + अपि –	विसर्गसन्धिः (उत्वम्)
इत्युक्त्वा	= इति + उक्त्वा –	यण् सन्धिः
तच्छापोदकम्	= तत् + शाप + उदकम् –	व्यञ्जनसन्धिः,गुणसन्धिश्च।
न्यवारयत्	= नि + अवारयत् –	यण्सन्धिः

द्वितीयांशसारः

अस्मिन् अवसरे देवी सावित्री अपि ब्रह्मणः समीपे समुपविष्टा आसीत्। सा दुर्वाससम् अवदत् यत् सः क्रोधी, आत्मापराधम् अगण्य्य सर्वैः वन्दनीयां त्रिभुवनमातरं भगवतीं सरस्वतीं शप्तुम् इच्छति। देवैः शिष्यैः च प्रसाद्यमानोऽपि पित्रा अत्रिणा च निवार्यमाणः अपि सः सरस्वत्याः विद्याजनितगर्वं दूरीकर्तुं ''गच्छ अधः मर्त्यलोकम्'' इति कथयित्वा शापजलं विसर्जितवान्। प्रतिशापं दातुम् उद्यताम् सावित्रीं सरस्वती न्यवारयत्।

इस अवसर पर सावित्री भी ब्रह्मा के समीप बैठी थी। उन्होंने दुर्वासा से कहा– ''अरे दुरात्मन्, क्रोधी अपने अपराध को न मानने वाला तू सबके द्वारा वन्दनीया, त्रिभुवन की माता सरस्वती को शाप देना चाहता है।'' देवताओं और शिष्यों द्वारा प्रार्थना किए जाने पर भी तथा पिता अत्रि द्वारा सरस्वती को शाप देने के लिए मना किये जाने पर भी वह नहीं माना और उसने सरस्वती के विद्याजनित वर्ग को तोड़ने के लिए शाप का जल छिड़क कर सरस्वती को नीचे मर्त्यलोक में जाने का शाप दे दिया। दुर्वासा को प्रतिशाप देने के लिए तैयार सावित्री को सरस्वती ने ऐसा करने से रोक दिया।

पाठगतप्रश्नाः 19.2

1. अधोलिखितवाक्यानि पठित्वा रेखांकितपदम् आश्रित्य प्रश्ननिर्माणं क्रियताम्

   (क) देवी सावित्री स्वयम्भुवः समीपे समुपविष्टा आसीत्।

   (ख) सा दुर्वाससम् अपृच्छत्, 'किमर्थं त्वं सरस्वतीं शप्तुम् इच्छसि?

   (ग) दुर्वासाः देवैः शिष्यैः च प्रार्थितः।

   (घ) सः अत्रिणा निवारितः।

   (ङ) अधस्ताद्गच्छ मर्त्यलोकम् इत्युक्त्वा तच्छापोदकं विससर्ज।

   (च) सरस्वती सुरैः असुरैः मुनिभिः नरैः च वन्दनीया।

2. सन्धिच्छेदे सन्धियुक्ते पदे वा रिक्तस्थानानि पूरयत–

(क) क्रोध + उपहतः = ...

(ख) अभूमिः + ... = अभूमिरेषा

(ग) ..... + अनुनाथ्यमानः + ... = इत्यनुनाथ्यमानोऽपि

(घ) ..... + अंजलिपुटैः = बद्धांजलिपुटैः

(ङ) इति + ... = इत्युक्त्वा

3. अधः शानच्प्रत्ययान्तपदानि सन्ति। तेषां प्रकृतिः निर्देशनीया

पदम्	**प्रकृतिः**
(क) कलहायमानः	.....
(ख) अनुनाथ्यमानः	.....
(ग) प्रसाद्यमानः	.....
(घ) निवार्यमाणः	.....
(ङ) वर्तमानः	.....
(घ) कम्पमानः	.....

तृतीयः अंशः

अथ तां तथा ..... शापं भविष्यति।

सम्प्रति वयं तृतीयम् अंशं पुनः पठामः सम्यक् अवगच्छामः च।

व्याख्या

निरपराधां सरस्वतीं शप्तां दृष्ट्वा ब्रह्मा सधैर्यं दुर्वाससं न्यवेदयत्–

(क) ''न खलु साधुसेवितोऽयं पन्थाः येनासि त्वं प्रवृत्तः।''

अयं मार्गः तु क्रोधवशात् शापदानेन अन्येषाम् अनिष्टकरणस्य मार्गः, सज्जानानां मार्गः न अस्ति। यदि कश्चित् प्रतिकूलम् आचरति तर्हि द्वौ विकल्पौ वर्तेते– क्रोधमार्गः क्षमामार्गश्च। क्रोधमार्गम् उपयुक्तं मन्यमानाः कथयन्ति यत् क्रोधरहितस्य जनस्य शत्रुषु भयं न भवति। क्रोधशून्यान् जनान् शठाः तथैव नाशयन्ति यथा कवचरहितान् अंगान् तीक्ष्णाः बाणाः।

परं सतां तु क्षमामार्गः एव। अस्माभिः अपि क्षमामार्गः एव अनुसरणीयः। यतो हि– ''महाजनो येन गताः स पन्थाः।''

ब्रह्मा दुर्वाससम् उपादिशत् यत् शापदानात् वरं क्षमादानं भवति, यतः ''क्षमा हि मूलं सर्वतपसाम्'' क्षमातुल्यं तपः न विद्यते। क्षमाशीलाय जनाय दुर्जनः अपि किमपि अनिष्टं कर्तुं न प्रभवति। कथितमपि ''क्षमाशस्त्रं करे यस्य दुर्जनः किं करिष्यति?'' क्षमा एकं

वशीकरणमन्त्रं येन सर्वं साधयितुं शक्यते। सुष्ठु उक्तं महाभारते ''क्षमावशीकृतिर्लोके क्षमया किं न साध्यते।''

(ख) परदोषदर्शनक्षमा दृष्टिरिव कुपिता बुद्धिः न ते आत्मदोषं पश्यति''

ब्रह्मा दुर्वाससम् अकथयत् यत् परदोषदर्शनपरायणा बुद्धिरिव ते क्रोधयुक्ता बुद्धिः आत्मदोषदर्शने असमर्था अस्ति। वयं प्रायः पश्यामः यत् केचन जनाः निरन्तरं परदोषदर्शने निरताः भवन्ति। ते परावगुणपरमाणून् अपि पर्वतीकृत्य पश्यन्ति अर्थात् परेषां स्वल्पम् अपि दोषं महान्तं दोषमिव पश्यन्ति। परं ते महत्तरान् अपि आत्मदोषान् न पश्यन्ति। क्रोधयुक्ता बुद्धिः स्वदोषदर्शने न प्रवर्तते। क्रोधीजनः नेत्रवान् अपि नेत्रहीनः इव भवति। सः कर्तव्यम् अकर्तव्यं वा निश्चेतुं न शक्नोति। क्रोधस्य कारणात् एव दुर्वासाः निर्दोषायै सरस्वत्यै शापं दत्तवान्। अतः सुस्पष्टं यत् 'क्रोधः महान् अनर्थकरः।'

प्रायः वयं पश्यामः यत् किशोराः अत्यधिकं क्रोधं कुर्वन्ति। क्रोधावेशे अविचार्य यत् किञ्चिदपि कुर्वन्ति। किं जानन्ति भवन्तः यत् यदा वयं क्रोधं कुर्मः तदा अन्येषां हानिः तादृशी न भवति यादृशी अस्माकम्। यथा अग्नितीलिका किञ्चित् प्रज्वालनात् प्राक् स्वयं प्रज्वालिता भूत्वा विनश्यति तथैव वयम् अपि क्रोधेन विनाशं प्रति गच्छामः। उक्तञ्च गीतायाम्–

क्रोधात् भवति सम्मोहः संमोहात् स्मृतिविभ्रमः।
स्मृतिभ्रंशात् बुद्धिनाशः बुद्धिनाशात् प्रणश्यति।।

अतः कल्याणकांक्षिभिः क्रोधस्य नियन्त्रणम् अवश्यमेव कर्त्तव्यम्। क्रोधनियन्त्रणे ध्यानयोगः, प्राणायामस्य अभ्यासः, कानिचित् योगासनानि च अत्यधिकं सहायकानि भवन्ति।

व्याकरणबिन्दवः

पदपरिचयः

तपसाम्	– 'तपस्' शब्दः	षष्ठीविभक्तिः	बहुवचनम्
वत्से	– 'वत्सा' शब्दः	सम्बोधने	एकवचनम्
विमृशति	– वि + √मृश् + लट्	प्र0पु0	एकवचनम्
अनुयास्यति	– अनु + √या लृट्	प्र0पु0	एकवचनम्
विनोदयिष्यति	– वि + √नुद् लृट्	प्र0पु0	एकवचनम्

प्रकृति–प्रत्ययप्रयोगः

प्रवृत्तः – प्र + वृत् + क्त, पु0 प्र0 विभक्तिः, एकवचनम्

उक्त्वा – वच् + क्त्वा

सन्धिच्छेदः

साधुसेवितः	+ अयम्	=	साधुसेवितोऽयम्	(विसर्गसन्धिः)
अतिरोषणः	+ चक्षुष्मानन्धः	=	अतिरोषणश्चक्षुष्मानन्धः	(विसर्गसन्धिः)
इति	+ उक्त्वा	=	इत्युक्त्वा	(यण्सन्धिः)
पुनः	+ आह	=	पुनराह	(विसर्गसन्धिः–रत्वम्)
दृष्टिः	+ इव	=	दृष्टिरिव	(विसर्गसन्धिः–रत्वम्)

समासाः

कोपकलुषिता	–	कोपेन कलुषिता	(तृतीया तत्पुरुषः)
रोषदोषनिषद्ये	–	रोषः एव दोषः	(कर्मधारध समासः)
		रोषदोषेण निषद्यः	(तृतीया तत्पुरुषः)
अनागसाम्	–	न आगसा अनागसा ताम्	(नञ्तत्पुरुष)

विसर्गसन्धिः

विसर्गस्य कृते संस्कृते विसर्जनीयशब्दस्य प्रयोगः भवति।

विसर्जनीयस्य र्

मुनेरत्रेः	–	मुनेः	+ अत्रेः
अभूमिरेषा	–	अभूमिः	+ एषा
पयःपावकयोरिव	–	पयः	+ पावकयोः + इव
दृष्टिरिव	–	दृष्टिः	+ इव
बुद्धिर्न	–	बुद्धिः	+ न
पुनराह	–	पुनः	+ आह

विसर्जनीयस्य स्

अत्रेस्तनयः	–	अत्रेः	+ तनयः
अधस्तात्	–	अधः	+ तात्
कृथास्तपसः	–	कृथाः	+ तपसः

विसर्जनीयस्य उ

सतो वा	–	सतः + वा
तपो गलति	–	तपः + गलति

विसर्जनीयस्य श् (ः – स् – श्)

अतिरोषणश्चक्षुष्मान् – अतिरोषणः + चक्षुष्मान्

विसर्जनीयस्य ष् (: – स् – ष्)

चक्षुष्मान् – चक्षुः + मान्

शब्दरूपाणि

दुर्वासस् – अयं शब्दः सकारान्तः पुल्लिंगः। अस्य रूपाणि अधः दीयन्ते

	एकवचनम्	द्विवचनम्	बहुवचनम
प्रथमा	दुर्वासाः	दुर्वाससौ	दुर्वाससः
द्वितीया	दुर्वाससम्	दुर्वाससौ	दुवाससः
तृतीया	दुर्वाससा	दुर्वासोभ्याम्	दुर्वासोभिः
चतुर्थी	दुर्वाससे	दुर्वासोभ्याम्	दुर्वासोभ्यः
पञ्चमी	दुर्वाससः	दुर्वासोभ्याम्	दुर्वासोभ्यः
षष्ठी	दुर्वाससः	दुर्वाससोः	दुर्वासाम्
सप्तमी	दुर्वाससि	दुर्वाससोः	दुर्वासस्सु
सम्बोधनम्	हे दुर्वासः	हे दुर्वाससो	हे दुर्वाससः

चन्द्रमस्, महातेजस्, प्राचेतस्, शब्दानाम् अपि रूपाणि इत्थम् एव भवन्ति।

शतृप्रत्ययान्तस्त्रीलिंगशब्दानां रूपाणि यथा हस् + शतृ = हसन्ती, लिख् + शतृ = लिखन्ती) ईकारान्त नदी शब्दवत् भवन्ति।

धातुरूपाणि

दृश् (पश्य)

	लट् लकारः			लोट् लकारः		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	पश्यति	पश्यतः	पश्यन्ति	पश्यतु	पश्यताम्	पश्यन्तु
मध्यमपुरुषः	पश्यसि	पश्यथः	पश्यथ	पश्य	पश्यतम्	पश्यत
उत्तमपुरुषः	पश्यामि	पश्यावः	पश्यामः	पश्यानि	पश्याव	पश्याम

	लङ् लकारः			लृट् लकारः		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	द्रक्ष्यति	द्रक्ष्यतः	द्रक्ष्यन्ति	अपश्यत्	अपश्यताम्	अपश्यन्
मध्यमपुरुषः	द्रक्ष्यसि	द्रक्ष्यथः	द्रक्ष्यथ	अपश्यः	अपश्यतम्	अपश्यत
उत्तमपुरुषः	द्रक्ष्यामि	द्रक्ष्यावः	द्रक्ष्यामः	अपश्यम्	अपश्याव	अपश्याम

विधिलिङ्

	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
प्रथमपुरुषः	पश्येत्	पश्येताम्	पश्येयुः
मध्यमपुरुषः	पश्येः	पश्येतम्	पश्येत
उत्तमपुरुषः	पश्येयम्	पश्येव	पश्येम।

तृतीयांशसारः

पितामहः सरस्वतीं शप्तां दृष्ट्वा शापकलकलं दूरीकृत्य गंभीरस्वरेण अकथयत् दुर्वासमुनेः मार्गः उचितः नास्ति। यः जितेन्द्रियः न भवति तस्य विवेकः नश्यति। मुनिना तु क्षमा कर्त्तव्या यतोहि क्षमा हि मूल सर्वतपसाम्। ऋषेः दुर्वाससः दृष्टिः तु परदोषदर्शनदक्षा अस्ति। क्रोधेन अभिभूता बुद्धिः आत्मनः दोषं न पश्यति। अतिरोषेण जनः अन्धः भवति। क्रोधे विद्यमाने सति किमर्थं सः निरपराधसरस्वतीं शापेन निगृहीतवान्। तदनन्तरं ब्रह्मा सरस्वतीम् अकथयत् यत् सा विषादं न कुर्यात्। सावित्री तया सह मर्त्यलोकं गमिष्यति। पुत्रस्य मुखदर्शनपर्यन्तम् शापस्य अवधिः भविष्यति।

दुर्वासा ने सरस्वती को शाप दे दिया, यह देखकर प्रजापति ने शाप के कारण उत्पन्न कोलाहल को शान्त कर दुर्वासा से कहा कि जो मार्ग उन्होंने अपनाया है वह उचित नहीं है। जो जितेन्द्रिय नहीं होता उसका विवेक नष्ट हो जाता है। मुनि को तो क्षमा करनी चाहिए क्योंकि क्षमा ही सब तपस्याओं का मूल है। दुर्वासा की दृष्टि तो दूसरों के दोष देखने में निपुण है। क्रोध से अभिभूत दृष्टि अपने दोषों को नहीं देख पाती। अतिक्रोध से व्यक्ति अन्धा हो जाता है। दुर्वासा को क्रोध से भरे अपने हृदय पर नियन्त्रण रखना चाहिए था। इसके बाद प्रजापति ने सरस्वती से कहा कि वह चिन्तित न हो। उसके साथ सावित्री मर्त्यलोक जाएगी और शाप की अविध पुत्र का मुखकमल देखने तक है।

पाठगतप्रश्नाः 19.3

1. 'क' स्तम्भस्य पदानि 'ख' स्तम्भे पदैः सह मेलयत

'क' स्तम्भः	**'ख' स्तम्भः**
(क) अवलोकयन्	(i) निपुणा
(ख) पन्थाः	(ii) आदिः
(ग) उवाच	(iii) पश्यन्
(घ) दक्षा	(iv) पुत्रः
(ङ) आरम्भः	(v) मार्गः
(च) आत्मजः	(vi) अकथयत्

2. पूर्णवाक्येन उत्तरत
   (क) सर्वतपसां मूलं का अस्ति?
   (ख) कोपकलुषिता मतिः किं न विमृशति?
   (ग) सरस्वतीं का अनुयास्यति?
   (घ) शापस्य अवधिः का भविष्यति?
   (ङ) दुर्वासाः काम् निगृहीतवान्?

3. विशेषणेन सह विशेष्यं मेलयत

विशेषणम्	विशेष्यम्
(क) शप्तुम्	धिया
(ख) विशुद्धया	सरस्वति
(ग) इयम्	मतिः
(घ) कोपकलुषिता	सरस्वतीम्
(ङ) वत्से	वृत्तिः

19.4 किम् अधिगतम्

- प्रजापतेः सभायां देवाः विद्याविषये चर्चां कुर्वन्ति स्म।
- वेदानां पठने स्वराणां शुद्धः प्रयोगः कर्तव्यः।
- दुर्वाससः मुनेः स्वभावः क्रोधयुक्तः अस्ति।
- दुर्वाससः शापात् सरस्वती धरणीतले आगता।
- परस्मैपदिधातुभिः सह शतृप्रत्ययस्य प्रयोगः भवति। आत्मनेपदिधातुभिः सह शानच्प्रत्ययस्य प्रयोगः भवति।
- विसर्गस्थाने रत्वं, सत्वं, शत्वं, उत्वं च भवति।

19.5 योग्यताविस्तारः

दुर्वाससा शप्ता सरस्वती सावित्र्या सह पृथ्वीतलम् आगच्छत्। सा शोणनद्याः तीरे अवसत्। ऋषेः च्यवनस्य सुतेन दधीचिना सह उषित्वा पुत्रवती अभवत्। पुत्राय वेदानां, शास्त्राणां, कलानां, सर्वासां विद्यानां च ज्ञानं दत्त्वा च्यवनस्य ऋषेः दीधीचेः च आज्ञया सरस्वती सावित्र्या सह ब्रह्मलोकं गतवती। सारस्वतः स्वपितृव्यपुत्रेण वत्सेन सह वृद्धिं गतः। यौवनं प्राप्य सारस्वतः स्वमित्राय वत्साय सर्वाः विद्याः उक्त्वा स्वपितुः दधीचेः तपोवने तपः आचरितुम् अगच्छत्।

वत्सेन वंशः प्राचलत्। तस्य गोत्रस्य नाम वात्स्यायन गोत्रम् इत्यभवत्। वात्स्यायनगोत्रे संस्कृतभाषायाः सुप्रसिद्धः गद्यलेखकः बाणभट्टः जन्म अलभत। तस्य पितुः चित्रभानुः तथा मातुः नाम राजदेवी इति आसीत्।

प्रस्तुतः पाठः बाणभट्टसय हर्षचरितम् इति ग्रंथात् गृहीतः। अस्मिन् ग्रन्थे बाणभट्टेन आत्मकथा अपि लिखिता। अयम् एकमात्रं ग्रन्थः यत्र केनापि स्वजीवनकथा लिखिता।

क्रोधः– अमर्षशून्यस्य जनस्य जन्तुना न जातहार्देन विद्विषादरः।
प्रतिश्य हि घ्नन्ति शठास्तथाविधान् असंवृताङ्गान् निशितो इवेषवः। (शिशु व महा.)

देव्यः– भारतीय संस्कृतौ तिस्रः प्रमुखाः देव्याः स्मर्यन्ते। सरस्वती– इयं विद्यायाः देवी अस्ति। इयं श्वेतवस्त्रावृता तिष्ठति। अस्याः वाहनं हंसः अस्ति यः श्वेतवर्णः भवति। अस्याः हस्ते स्फटिकमाला भवति। अन्यस्मिन् हस्ते पुस्तकं तिष्ठति।

दुर्गा– इयं शक्तेः देवी। इयं पार्वती इत्यपि उच्यते। चामुण्डा, कात्यायनी, कालिका इत्यादीनि दुर्गायाः अन्यानि नामानि सन्ति।

लक्ष्मीः– इयं धनस्य देवी। इयं रमा, श्रीः इत्यपि कथ्यते। इयं देवैः असुरैः च समुद्रे मन्थनकाले चतुर्दशरत्नैः सह लब्धा। इयं विष्णोः नारायणस्य पत्नी अस्ति। अस्याः वाहनम् उलूकः अस्ति।

सावित्री– सावित्री ब्रह्मणः पत्नी। सावित्री गायत्री मन्त्रस्य, अधिष्ठात्री देवी अस्ति।

वेदाः– वेदाः ज्ञानमयाः ग्रन्थाः सन्ति। वेदाः चत्वारः सन्ति ऋग्वेदः, यजुर्वेदः, सामवेदः अथर्ववेदः। ऋग्वेदे देवस्तुतयः वर्तन्ते। यजुर्वेदे यज्ञानां सम्बन्धे मन्त्राः सन्ति। सामवेदे गानानि सन्ति। अथर्ववेदे स्वास्थ्यस्य, समाजस्य लोकव्यवहारस्य मन्त्राः सन्ति।

19.6 पाठान्तप्रश्नाः

1. कः कम् कथयति?

कथनानि	कः?	कम्?
(क) आः पापकारिणि! दुर्विदग्धे माम् उपहससि।	.....	.....
(ख) ततो मर्षय भगवन्! अभूमिरेषा शापस्य।	.....	.....
(ग) आः दुरात्मन्, क्रोधोपहत, कथं त्रिभुवनमातरं भगवतीं सरस्वतीं शप्तुम् अभिलषसि?	.....	.....
(घ) सखि! संहर रोषम्, असंस्कृतमतयोऽपि मुनयः माननीयाः।	.....	.....
(ङ) उपाध्याय! स्खलितमेकं क्षमस्व।	.....	.....

2. सरस्वत्याः धरणीतले अवतरणस्य कथायाः सारं पञ्च वाक्येषु लिखत।
3. मुनेः दुर्वाससः चरित्रस्य चतस्रः विशेषताः लिखत।

4. अधोलिखितानां शब्दानां प्रत्येकं द्वौ समानार्थकौ शब्दौ शब्दमञ्जूषायाः लिखत।

शब्दाः	समानार्थकौ शब्दौ	
(क) परमेष्ठी	.....	.....
(ख) वारि	.....	.....
(ग) चक्षुः	.....	.....
(घ) सरस्वती	.....	.....
(ङ) वत्से	.....	.....

शब्द–मञ्जूषा

जलम्, अक्षि, भारती, प्रजापतिः, नेत्रम्, पुत्रि, उदकम्, ब्रह्मा, शारदा, सुते

5. दशदिशां नामानि लिखत।
6. 'क्रोधः' इत्यस्मिन् विषये पञ्चवाक्यानि लिखत।
7. 'दुर्वासस्' शब्दस्य इव चन्द्रमस् शब्दस्य रूपाणि लिखत।
8. निर्दिष्ट धातुरूपैः वाक्यानि पूरयत
   (क) त्वम् गजं ..... (दृश्–लट्)
   (ख) ते क्रिकेटम् ..... (दृश्–लोट्)
   (ग) उमा ह्यः नाटकम् ..... (दृश्–लङ्)
   (घ) यूयम् मेलकं ..... (दृश्–विधिलिङ्)
   (ङ) वयम् श्वः उद्यानं ..... (दृश्–लृट्)

19.7 उत्तराणि

19.3 बोधप्रश्नाः

1. (क) ii, (ख) vi, (ग) i, (घ) iii, (ङ) iv, (च) v
2. (क) प्रारभत, (ख) भविष्यति, (ग) पश्यति, (घ) गाः, (ङ) जग्राह
3. (क) कमलासने, (ख) विस्वरम्, (ग) सावित्री, (घ) सर्वतपसाम्, (ङ) कोपकलुषिता

पाठगतप्रश्नाः

19.1
1. (क) देवैः, (ख) अत्रेः, (ग) दुर्वासा, (घ) विस्वरमकरोत्, (ङ) सरस्वती, (च) शापजलम्।
2. (क) हसन्तीम्, (ख) उपवीजयन्ती, (ग) आबध्नन्, (घ) धावन्ति, (ङ) समाचरन्, (च) शिक्षयन्ती
3. (क) ऋचः, (ख) सामानि, (ग) विस्वरम्, (घ) शापजलम्, (ङ) यजूंषि (च) पितामहम्

19.2 1. (क) का (ख) कम् (ग) कैः (घ) कुत्र (ङ) का

2. (क) क्रोधोपहतः (ख) अभूमिः + एषा (ग) इति + अनुनाथ्यमानः + अपि (घ) बद्धः + अ×जलिपुटैः (ङ) इति + उक्त्वा

3. (क) कलह् धातुः (ख) अनु उपसर्गः नाथ् धातुः (ग) नि उपसर्गः + वृ धातुः (घ) वर्तधातुः (ङ) कम्प् धातुः

19.3 1. (क) iii (ख) v (ग) vi (घ) i (ङ) ii (च) iv

2. (क) सर्व तपसां मूलं क्षमा अस्ति।

(ख) कोपकलुषिता मतिः कर्त्तव्यम अकर्त्तव्यम् वा न विमृशति

(ग) सरस्वतीं सावित्री अनुयास्यति।

(घ) शापस्य अवधिः पुत्रमुखावलोकनं भविष्यति।

(ङ) दुर्वासा सरस्वतीं निगृहीतवान्।

3. (क) शप्तुम् सरस्वतीं (ख) विशुद्धया धिया (ग) इयम् वृत्तिः (घ) कोपकलुषिता मतिः (ङ) वत्से सरस्वति

19.6 पाठान्तप्रश्नाः

1. (क) दुर्वासा – सरस्वतीम् (ख) देवाः – दुर्वाससम् (ग) सावित्री – दुर्वाससम् (घ) सरस्वती – सावित्रीम् (ङ) शिष्याः – दुर्वाससम्
2. स्वयं कुरुत।
3. स्वयं कुरुत।
4. (क) प्रजापतिः ब्रह्मा
   (ख) उदकम्, जलम्
   (ग) अक्षि, नेत्रम्
   (घ) शारदा, भारती
   (ङ) पुत्रि, सुते
5. 1. पूर्वा, 2. आग्नेयी, 3. दक्षिणा, 4. नैऋती, 5, पश्चिमा, 6. वायवी, 7. उत्तरा, 8. ऐशानी, 9. ऊर्ध्वम्, 10. अधः।
6. स्वयं कुरुत।
7. स्वयं कुरुत।
8. (क) पश्यसि (ख) पश्यन्तु (ग) अपश्यत्
   (घ) पश्येत (ङ) द्रक्ष्यामः

309sk20

20

अनन्तःज्ञानसागरः

अस्माकं संस्कृतवाङ्मयम् अत्यधिकं प्राचीनं विशालं सागरवत् ज्ञानगम्भीरं विराजते। न केवलम् आध्यात्मिकक्षेत्रे अपितु विज्ञानक्षेत्रे अपि प्राचीनभारतीयैः ऋषिभिः बहवः वैज्ञानिकसिद्धान्ताः सूत्ररूपेण सन्दर्शिताः। अद्यत्वे पाश्चात्यविद्वांसः अपि भारतीयविज्ञानेन आकृष्टाः भूत्वा अनुसन्धानकार्याणि कुर्वन्ति। अनेकाः पाण्डुलिपयः विदेशेषु, मठेषु, मन्दिरेषु इदानीमपि वर्तमानाः सन्ति यासां प्रकाशनं न जातम्। भारतीय–ज्ञानराशेः संरक्षणम् अस्माकं सर्वेषामेव कर्तव्यमस्ति। अतः अस्मिन् पाठे तस्य ज्ञानराशेः बिन्दुरूपेण काश्चन उपलब्धयः सङ्केतिताः, येन अस्माकं मनसि अधिकं ज्ञातुं जिज्ञासा भवेत्।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- 'विज्ञानविषयकग्रन्थानां परिचयं लेखितुं शक्ष्यति;
- शल्यक्रियायाः उत्कृष्टम् उदाहरणं वर्णयिष्यति;
- प्रकाशवेगस्य विषये आधुनिकमतेन सह प्राचीनमतस्य तुलनां कर्तुं शक्ष्यति;
- गणितविषये विश्वं प्रति भारतीययोगदानं स्पष्टीकर्तुं सक्षमः भविष्यति;
- पञ्चमीषष्ठीविभक्त्योः भेदं प्रयोगमाध्यमेन विशदीकरिष्यति;
- कर्मवाच्यस्य प्रयोगं करिष्यति;
- चुर्–भक्ष्–गण्–कथ्–चुरादिगणीय–धातूनां प्रयोगं करिष्यति।

क्रियाकलापः

अधोलिखितं त्रिकोणं पश्यत। एतत् समकोण–त्रिभुजम् अस्ति। अस्य एका भुजा द्वि–अंगुलिपरिमिता अन्या च त्रि–अंगुलिपरिमिता अस्ति। तस्य कर्णभुजा कतिपरिमिता भविष्यति?



शुल्वसूत्रे वर्णितम् अब^2 + बस^2 = अस^2

तर्हि अस = $\sqrt{3\times3+4\times4} = \sqrt{9+16} = \sqrt{25} = 5$

किं भवान् अस्य सिद्धान्तस्य नाम जानति? किम् उच्यते? 'पाइथोगोरस' सिद्धान्तः इति।

कस्मात्? यतः पाइथोगोरसनामकः गणितज्ञः इमं सिद्धान्तम् अरचयत्। वस्तुतः एतत् वास्तविकं तथ्यं नास्ति। एषः सिद्धान्तः पूर्वमेव यजुर्वेदस्य शुल्वसूत्रेषु वर्णितः। एतादृशाम् अनेकेषां सिद्धान्तानां ज्ञानं प्राप्तुं पठामः वयम् एतं पाठम्– 'अनन्तः ज्ञानसागरः'।

20.1 मूलपाठः

अनन्तः ज्ञानसागरः

सम्प्रति मूलपाठं ध्यानेन पठामः

संस्कृतवाङ्मयं द्विधा विभक्तुं शक्यते–आध्यात्मिकं ज्ञानविज्ञानात्मकम् च। आध्यात्मिकसाहित्ये वेदाः, उपवेदाः, वेदाङ्गानि, पुराणानि, रामायणं, महाभारतम्, गद्यसाहित्यं पद्यसाहित्यं, नाट्यसाहित्यं च समाहितम्। विज्ञाने तु आयुर्वेदः, गणितं, वास्तुविज्ञानं, भौतिकशास्त्रं, रसायनशास्त्रं, जीवविज्ञानं, ज्योतिश्शास्त्रम् इत्यादीनि बहूनि शास्त्राणि गण्यन्ते। संस्कृतवाङ्मये वैज्ञानिक–ग्रन्थानां भाण्डागारः एव अस्ति।

आयुर्वेदविषये चरकसंहिता, सुश्रुतसंहिता, अष्टाङ्गहृदयं, भावप्रकाशः इत्यादयः बहवः प्रसिद्धाः ग्रन्थाः सन्ति। सुश्रुतसंहितायां छिन्ननासिकायाः प्रत्यारोपणार्थं शल्यचिकित्सा वर्णिता। जीवकः इति नामकः महान् शल्यचिकित्सकः भोजराजस्य मस्तिष्कस्य शल्यक्रियामकरोत्।

शब्दार्थाः
वाङ्मयम् = साहित्य
द्विधा = दो प्रकार से
विभक्तुं = बाँटना, विभाजित करना
समाहितम् = सम्मिलित है
गण्यन्ते = गिने जाते हैं
प्रत्यारोपणार्थम् = दुबारा लगाने के लिए

20.1

ओषधीनां विषये कथ्यते यत् कोऽपि गुल्मकः पादपः, तृणमपि च ओषधीगुणरहितः नास्ति। तथासमृद्धम् आसीत् प्राचीनं भारतीयज्ञानम्।

गणिते शून्यं, दशांशपद्धतिः संख्याः, पाईमूल्यम् (π) इत्यादिकं पूर्वमेव भारतीयैः आविष्कृतम् आसीत्। पाइथागोरससिद्धान्तः शुल्वसूत्रेषु वर्णितः। सायणाचार्येण प्रकाशस्य वेगः प्रतिनिमेषं 74,000 क्रोशमितः (185,000 मीलपरिमितः) वर्णितः। आधुनिकैः च प्रकाशवेगः 186202 मीलपरिमितः मन्यते।

सङ्गीतस्य प्रयोगः अपि चिकित्सार्थं क्रियते स्म। संगीतचिकित्सारत्नाकरे नामके ग्रन्थे 34,800 रोगाणां चिकित्साविषये विस्तरेण वर्णनम् उपलभ्यते।

वास्तुविद्यायां तु कर्णाटके बेलूरे विद्यमानाः स्पर्शरहिताः स्तम्भाः, अनन्तपुरीस्थाः सप्तस्वरप्रभावाः मण्डपाधाराः स्तम्भाः देहलीस्थ लौहस्तम्भः, कोणार्कदेवालयः, अजन्ता–एलोरागुहाचित्राणि, इत्यादिभिः अनेकानि तथ्यानि भारतीयवास्तुविद्यायाः गरिमाणं प्रमाणीकुर्वन्ति।

रसायनविज्ञाने पातञ्जलमहर्षेः लोहशास्त्रं लोहसंस्करणेन लवणनिर्माणं वर्णयति। अपि च विविधैः संस्कारैः अभ्रकयोगेन च पारदं सेवनयोग्यं कृत्वा तत्सेवनेन जरारहितदेहप्राप्तिः भवति स्म।

गुल्मकं = झाड़ी
तथासमृद्धम् = इतना समृद्ध
दशांशपद्धतिः = दशमलव प्रणाली
परिमितः = मापा हुआ
उपलभ्यते = प्राप्त होता है।
भूमिस्पर्शरहिता = पृथ्वी को न छूने वाले
देहलीस्थः = दिल्ली में स्थित
गरिमाणम् = गरिमा को
प्रमाणीकुर्वन्ति = प्रमाणित करते हैं
रसायनविज्ञाने = कैमिस्ट्री में
लोहसंस्करणेन = लोहे को शोधित करके
लवणनिर्माणम् = नमक बनाना
अभ्रकयोगेन = अभ्रक के मेल से
पारदं = पारे को
जरारहितदेहप्राप्तिः = वृद्धावस्था से रहित शरीर की प्राप्ति
कुजः = मंगल ग्रह
जीवनसम्भाव्यतां = जीवन की संभावना को
सौर ऊर्जम् = सौर–ऊर्जा को
सञ्चार्यमाणानि = चलाये जाते हुए
उपनिषत्सु = उपनिषदों में
स्वाध्यायात् = स्वाध्याय से
मा प्रमदः = आलस्य मत करो
ज्ञानराशेः = ज्ञानराशि का

जीवविज्ञाने वृक्षायुर्वेदः, गजायुर्वेदः अश्वायुर्वेदः इत्यादयः बहवः प्रसिद्धाः ग्रन्थाः वनस्पतीनां पशूनां च विषये महत्वपूर्णां सूचनां प्रयच्छन्ति। ज्योतिष्शास्त्रे मन्यते यत् असंख्याः ग्रहाः सन्ति। अन्यसौरमण्डलानि अपि भवितुं शक्नुवन्ति। 'कुजः' इति ग्रहस्य नाम्नः अर्थः अस्ति 'भूमिपुत्रः'। एषः शब्दः एव तस्मिन् ग्रहे जीवनसम्भाव्यतां सूचयति। सूर्यादीनां सञ्चारः भ्रममूलः ग्रहाणां स्वप्रकाशता नास्ति इति आर्यभटेन पूर्वमेव स्वग्रन्थे आर्यभटीये प्रदर्शितम्।

विमानशास्त्रे सौर–ऊर्जं प्रयुज्य सञ्चार्यमाणानि विमानानि वर्णितानि। भारद्वाजस्य यन्त्रसर्वस्वं, भोजराजस्य समराङ्गणसूत्रधारम् इत्यादयः अनेके ग्रन्थाः विमानशास्त्रस्य परिचयं कारयन्ति। एवं विपुलः ज्ञानराशिः वर्तते संस्कृतवाङमये। अतएव उपनिषत्सु कथितम्– स्वाध्यायान्मा प्रमदः। अस्य ज्ञानसागरस्य मन्थनम् अस्माकं सर्वेषां भारतीयानां परमं कर्तव्यम्, येन अस्य ज्ञानराशेः सम्यक् संरक्षणम् स्यात्।

20.2 बोधप्रश्नाः

1. मूलपाठं पठित्वा रिक्तस्थानानि पूरयत
   (क) आध्यात्मिकसाहित्ये वेदाः ....., वेदाङ्गानि, ... रामायणं ..... च इति विविधं साहित्यं समाहितम्।
   (ख) विज्ञाने तु आयुर्वेदः, गणितं, ..., भौतिकशास्त्रम्, ..., जीवशास्त्रम् ..... इत्यादयः गण्यन्ते।
   (ग) सङ्गीतचिकित्सारत्नाकरः ग्रन्थः ..... रोगाणां चिकित्साविषये विस्तरेण वदति।
   (घ) विमानशास्त्रे ..... उपयुज्य सञ्चार्यमाणानि विमानानि वर्णितानि।
   (ङ) अतएव ..... कथितम् ..... मा प्रमदः।
2. अधोलिखितवाक्येषु षष्ठयन्तपदानि पाठात् चित्वा लिखत
   (क) ..... यन्त्रसर्वस्वं, ... समराङ्गणसूत्रधारम् इत्यादयः अनेके ग्रन्थाः ..... परिचयं कारयन्ति।
   (ख) संस्कृतवाङ्मये ..... भण्डारः एव अस्ति।
   (ग) जीवकः इति नामकः महान् शल्यचिकित्सकः ..... मस्तिष्कस्य शल्यक्रियाम् अकरोत्।
   (घ) ..... विषये कथ्यते यत् कोऽपि गुल्मकः पादपः तृणमपि च ओषधीय–गुणरहितः नास्ति।
   (ङ) ..... प्रयोगः अपि चिकित्सार्थं क्रियते स्म।
3. (क) आयुर्वेदविषयकाणां ग्रन्थानां नामानि लिखत।
   (ख) जीवविज्ञाने ग्रन्थद्वयस्य नाम्नी लिखत।
   (ग) विमानशास्त्रस्य प्रमुखयोः ग्रन्थयोः नाम्नी लिखत।

20.3 अधुना अवगच्छामः

प्रथमः अंशः

अस्तु प्रथमम् अंशम् पुनः पठामः

संस्कृतवाङ्मयम् ..... **भारतीयज्ञानम्**

अस्मिन् अंशे वयं जानीमः यत् संस्कृतसाहित्ये कीदृशः ज्ञानभण्डारः विद्यते। किं भवन्तः अपि संस्कृतसाहित्यस्य विषये किमपि जानन्ति, आम् तर्हि अत्र द्वि त्रि वाक्येषु लिखन्तु।

(i) .....

(ii) .....

(iii) .....

अस्तु, संस्कृतसाहित्यस्य ज्ञानकोशः एवमस्ति–

संस्कृतवाङ्मयम् द्विविधम् – 1. आध्यात्मिकम्
2. ज्ञानविज्ञानात्मकम्

आध्यात्मिकवाङ्मयम् – वेदाः, उपवेदाः, वेदाङ्गानि च।

ज्ञानविज्ञानात्मकम् – आयुर्वेदः, गणितं, वास्तुविज्ञानम्।

सुश्रुत संहिता– आयुर्वेदे शल्यचिकित्सा विषयकः, प्रसिद्धः ग्रन्थः। अस्य लेखकः महर्षि सुश्रुतः अस्ति।

चरक संहिता– रोगनिदानं चिकित्साविधेः च प्रमुखः ग्रन्थः। अस्य प्रणेता महर्षिः चरकः अष्टाङ्गहृदयम्, भावप्रकाशः आदयः अपि आयुर्वेदस्य ग्रन्थाः।

सुश्रुतः– भारतस्य प्रसिद्धः प्राचीनतमः शल्यचिकित्सकः।

जीवकः– एकः प्रसिद्धः शल्यचिकित्सकः। एषः एव भोजराजस्य मस्तिष्कस्य शल्यक्रियाम् अकरोत्।

वेदाः– वेदाः चत्वारः, ऋक्, यजुः, साम, अथर्व च। उपवेदाः अपि चत्वारः आयुर्वेदः, धनुर्वेदः गान्धर्ववेदः, स्थापत्यवेदः, अर्थवेदः।

वेदाङ्गानि– षट् सन्ति– शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्यौतिषम् च।

पुराणानि–अग्नि,–वायु,–शिव,–भागवत्,–स्कन्द,–गरुड़,–कूर्म,–नारद,–मार्कण्डेय,–ब्रह्म,–पद्म,–विष्णु,–भविष्यत्,–बराह,–ब्रह्मवैवर्त,–लिङ्ग,–वामन,–मत्स्य–अष्टादश पुराणानि सन्ति।

व्याकरणबिन्दवः

अत्र वयं पदानां परिचयं कुर्मः

अस्माकम् – अस्मद् षष्ठी बहुवचनम्

विज्ञानम् – वि + ज्ञा + ल्युट् नपु. प्रथमा एकवचनम्।

समाहितम् – सम् + आ + धा + क्त नपुं. प्रथमा एकवचनम्।

प्रत्यारोपणम् – प्रति + आ + णिच् + ल्युट् (अन) नपुं. प्रथमा एकवचनम्।

षष्ठ्यन्तपदानि

ग्रन्थानाम् ग्रन्थ, षष्ठी, बहुवचनम्।

ओषधीनाम् ओषधि, षष्ठी, बहुवचनम्।

भोजराजस्य भोजराज, षष्ठी, एकवचनम्।

मस्तिष्कस्य	मस्तिष्क, षष्ठी, एकवचनम्।
छिन्ननासिकायाः	छिन्ननासिका, षष्ठी, एकवचनम्।

सारः

संस्कृतसाहित्यस्य ज्ञानराशिः अनन्तः। आध्यात्मिकग्रन्थेषु वेद–पुराणादयः अनेके ग्रन्थाः एतादृशाः यान् अधीत्य वैदेशिकाः अपि चमत्कृताः जाताः। वैज्ञानिकसाहित्यम् अधिकृत्य अपि इदानीं शोधकार्याणि प्रचलन्ति। सुश्रुतः प्रथमः त्वक् प्रत्यारोपकः इति प्रसिद्धः। जीवकः शल्यचिकित्सकः आसीत्। तेन भोजराजस्य मस्तिष्कस्य शल्यचिकित्साम् अकरोत्।

संस्कृत साहित्य में विपुल ज्ञानराशि छिपी हुई है। प्रायः हमें दो प्रकार का साहित्य मिलता है– आध्यात्मिक साहित्य और वैज्ञानिक साहित्य। पहला हमारे मन और बुद्धि को दृढ़ बनाकर कार्य करने के लिए प्रोत्साहित करता है और दूसरा विज्ञान विषयक नई जानकारी प्रदान करता है। भारतीय आयुर्वेद आज विदेशों में भी अपनाया जा रहा है क्योंकि आयुर्वेद जीवन जीने की कला बता देता है। चरक और सुश्रुत दो ग्रन्थ इस क्षेत्र में अति प्रसिद्ध हैं। चरक में रोग चिकित्सा तथा सुश्रुत में शल्य चिकित्सा वर्णित है। सुश्रुत पहले प्लास्टिक सर्जन माने जाते हैं जिन्होंने अपने ग्रन्थ में कटी नाक को जोड़ने की शल्य क्रिया का वर्णन किया है। जीवक ने राजा भोज की मस्तिष्क की शल्य क्रिया की थी।

पाठगतप्रश्नाः 20.1

1. (क) अधोलिखितेषु ग्रन्थेषु के ग्रन्थाः आध्यात्मिकसाहित्यस्य अंशाः? तान् चिह्नीकुरुत।

   (i) रामायणम् (ii) अष्टांगहृदयम्

   (iii) चरकसंहिता (iv) गीता

   (v) महाभारतम् (vi) भावप्रकाशः

   (vii) अभिज्ञानशाकुन्तलम् (viii) भागवत्पुराणम्।

   (ख) कः विषयः विज्ञानक्षेत्रे परिगण्यते?

   (i) संगीतम् (ii) अभिनयः

   (iii) वास्तुविद्या (iv) नक्षत्रज्ञानम्

   (v) आत्मज्ञानम् (vi) समाधिः

   (vii) शल्यक्रिया, (viii) वृक्षायुर्वेदः।

2. अधोलिखितानाम् एकैकम् उदाहरणम् लिखत–

   (क) पुराणानि .....

(ख) वेदाङ्गानि .....

(ग) उपनिषद् .....

(घ) गद्यसाहित्यम् .....

(ङ) नाट्यसाहित्यम् .....

3. विज्ञानस्य काश्चन पञ्च शाखाः लिख्यन्ताम्

यथा (क) जीवविज्ञानम्

(ख) .....

(ग) .....

(घ) .....

(ङ) .....

द्वितीयः अंशः

भवन्तः जानन्ति एव यत् विज्ञानक्षेत्रे आधुनिकवैज्ञानिकानां योगदानम् प्रशंसनीयम् अस्ति परम् पुरा अस्माकं वैज्ञानिकैः गणितक्षेत्रे रसायनक्षेत्रे च कीदृशं योगदानं प्रदत्तम् इति अत्र वयं बोधामः।

गणिते शून्यं ..... देहप्राप्तिः भवति स्म।

व्याख्या

पुराकाले तद् तद् विषये कुशलाः आविष्कारकाः च ऋषय एव आसन्। ते तपोविद्याबलेन सम्पन्नाः। अस्माकं ते एव वैज्ञानिकाः। तर्हि अद्य भवता किं ज्ञायते–गणितक्षेत्रे अस्माकं वैज्ञानिकानां योगदानम्? आम् तर्हि ज्ञायताम्–

'शून्यम् दशांशपद्धतिः, संख्याः, π पाईमूल्यम् इति उपलब्धयः अस्माकं वैज्ञानिकानाम् एव।

दशांशपद्धतिः = दशमलवपद्धतिः।

'पाइथागोरससिद्धान्तः' कः? 'पाइथागोरस' नामकः कश्चित् वैदेशिकः गणितज्ञः अभवत्। तेन नाम्ना एषः सिद्धान्तः प्रतिपादितः। किं भवन्तः जानन्ति यत् अद्यत्वे छात्राः रेखागणित–विषये 'ज्यामितिः' इति रूपे 'प्रेमय' इति पठन्ति। एषः एव पाइथागोरससिद्धान्तः। परम् एषः सिद्धान्तः पुराकालतः एव अस्माकं शुल्वसूत्रेषु वर्णितः।

प्रकाशवेगः– प्रकाशवेगस्य निर्धारणं सर्वप्रथमं सायणाचार्येण कृतम्। यथा– ''प्रतिनिमेषं (मिनटमेकं) 185000 मीलं परिमितः'' इति। आधुनिक वैज्ञानिकैः तु प्रकाशस्य वेगः तु 186202 मीलपरिमितः मन्यते।

'संगीतचिकित्सा रत्नाकरः' कीदृशः ग्रन्थ? रोगचिकित्सायाः अद्भुतः एषः ग्रन्थः। विविधरोगाणां चिकित्सा संगीतमाध्यमेन वर्णिता वर्तते।

भूमिस्पर्शरहिताः स्तम्भाः के? भूमेः स्पर्शेण रहिताः एते स्तम्भाः। वास्तुदृष्ट्या एषां विशिष्टं महत्त्वमस्ति। ईदृशाः स्तम्भाः कर्णाटकराज्ये सन्ति।

सप्तस्वरप्रभावाः स्तम्भाः के? 'निषाद–ऋषभ–गान्धार–षडज–मध्यम–धैवत–पञ्चमा' इति संगीतस्य सप्तस्वराः सन्ति। एतैः स्वरैः गुञ्जिताः स्तम्भाः 'अनन्तपुर्याम्' सन्ति।

विकृतिरहितलौह स्तम्भाः– किं जानाति भवान् दिल्ल्यां लौहस्तम्भः कुत्र अस्ति? आम् 'महरौली (कुतुबमीनार क्षेत्रे) मुक्ताकाशे तथैव स्थितः। अद्यापि तस्मिन् कापि विकृतिः न जाता।

सूर्यदेवालयः कः? 'सूर्यमन्दिरम्' इति नाम्ना उड़ीसाप्रदेशे तिष्ठति। कलात्मकदृष्ट्या अति सुन्दरं प्रसिद्धं मन्दिरम् अस्ति।

उक्तचतुष्टयं तु वास्तुविज्ञानदृष्ट्या अद्भुतमेव।

लोहसंस्करणेन लवणनिर्माणं केन ऋषिणा वर्णितम्? जरारहित देहप्राप्तिः कथं भवति स्म? पात×जलिमहर्षिणां। अभ्रकयोगेन पारदसेवनेन।

सारः

विज्ञानस्य विविधक्षेत्रेषु प्राचीनैः महर्षिभिः चमत्कारपूर्णानि अनुसन्धानकार्याणि कृतानि। आर्यभटेन गणिते शून्यस्य सिद्धान्तः वर्णितः। संख्यापदानि 'हिन्दसे' इति कथ्यन्ते यतः तानि भारतदेशात् अरबदेशं प्रति गतानि। वास्तुविज्ञानेऽपि अद्वितीयभवननिर्माणानि आश्चर्यम् उत्पादयन्ति। रसायनविज्ञाने विविधधातूनां योगेन विविधाः औषधयः रच्यन्ते स्म।

प्राचीन भारतीय महर्षियों ने विज्ञान के विविध क्षेत्रों में अभूतपूर्व अनुसंधान किये जो आज भी वैज्ञानिकों के लिये रहस्य बने हुए हैं। गणित में बहुत पहले ही आर्यभट्ट ने शून्य, पाई सिद्धान्त, दशमलव पद्धति इत्यादि का वर्णन किया था। विविध स्मारक आज भी वास्तुविज्ञान के चमत्कारों की गरिमा का प्रदर्शन करते हैं जैसे अधर में लटके खम्भे, सात स्वरों की ध्वनि उत्पन्न करने वाले मण्डपाकार स्तम्भ, दिल्ली का जंगरहित लौहस्तम्भ, अजन्ता एलोरा की गुफाएं, प्राचीन वास्तुविज्ञान के उत्कर्ष का प्रमाण हैं।

रसायन विज्ञान में भी भारतीयों के अनुसंधान उल्लेखनीय हैं। लौह धातु को शोधित करके नमक बनाया जाता है। पारे को विविध प्रकार से संशोधित अभ्रक के साथ मिलाकर सेवन करने से वृद्धावस्था पास नहीं आती थी।

व्याकरणबिन्दवः

(i) कर्मवाच्यार्थे क्तप्रत्ययस्य प्रयोगः

आविष्कृतम्	आवि + कृ + क्त नपुं. प्रथमा एकवचनम्।
वर्णितः	वर्ण् + क्त पुं. प्रथमा एकवचनम्।

(ii) कर्मवाच्यान्तक्रियाप्रयोगाः

(क) प्रयोगः चिकित्सार्थं क्रियते स्म।

(ख) वर्णनम् उपलभ्यते।

(ग) प्रकाशवेगः मन्यते।

(iii) 'स्म' योगे लट्लकारस्य (वर्तमानकालिक क्रिया) क्रिया भूतकालिकम् अर्थं प्रकटयति।

(iv) (क) उपपदतत्पुरुषसमासः

अनन्तपुरीस्थाः	अनन्तपुर्यां तिष्ठन्ति इति
देहलीस्थः	देहल्यां तिष्ठति इति

(ख) षष्ठीतत्पुरुषसमस्तपदानि

लोहस्य शास्त्रम्	लोहशास्त्रम्
लोहस्य संस्करणेन	लोहसंस्करणेन
लवणस्य निर्माणम्	लवणनिर्माणम्
अभ्रकस्य योगेन	अभ्रकयोगेन

पाठगतप्रश्नाः 20.2

1. अधोलिखतप्रश्नान् उत्तरैः सह मेलयत

(क) π पाई मूल्यं किम्?	(i) 34,800 इति
(ख) प्रकाशस्य प्रतिनिमेषं वेगः?	(ii) संस्कारित–अभ्रकस्य
(ग) पाइथागोरससिद्धान्तस्य पूर्ववर्णनम् कुत्र वर्तते?	(iii) 3.1417 इति
(घ) संगीतरत्नाकरे वर्णितानां रोगाणां संख्या?	(iv) शुल्बसूत्रेषु
(ङ) कस्य योगेन पारदं सेवनयोग्यं भवति?	(v) 1,86,302 मीलपरिमितम्

2. एते स्तम्भाः कुत्र कुत्र सन्ति इति मेलनं कुरुत

स्तम्भाः	**स्थानम्**
(क) भूमिस्पर्शरहिता स्तम्भाः	(i) दिल्लीनगरे
(ख) विकृतिरहितः लौहस्तम्भः	(ii) अनन्तपुर्याम्
(ग) मण्डपाधाराः स्तम्भाः	(iii) दिल्ली नगरे
(घ) कुतबस्तम्भः	(iv) कर्णाटके बेलूरे

3. अधोलिखितवाक्येषु कर्मपदानि योजयत

(क) बहवः स्तम्भाः वास्तुविद्यायाः ..... प्रमाणीकुर्वन्ति।

(ख) लोहशास्त्रं लोहसंस्करणेन ..... वर्णयति।

(ग) चिकित्सारत्नाकरः रोगाणां ..... वर्णयति।

(घ) भारतीयाः पूर्वमेव शून्यं दशांशपद्धतिं ..... इति वर्णितवन्तः।

(ङ) सायणाचार्यः प्रकाशस्य ..... वर्णितवान्।

तृतीयः अंशः

जीवविज्ञाने ..... संरक्षणं स्यात्

अत्र वयं तृतीये अंशे अश्वादि–पशूनाम् आयुर्विषये, सौरमण्डलस्य विषये, विमानशास्त्रस्य विषये च ज्ञानं कुर्मः। किं भवन्तः कस्यापि पशोः रोगविषये, तस्य निदान–विषये, वृक्षस्य च स्वस्थीकरणाय कमपि उपायं जानन्ति। आम् तर्हि अत्र संक्षेपेण लिखत–

पशुः/वृक्षः	रोगः	निदानम्	
.....	.....	.....	.....
.....	.....	.....	.....
.....	.....	.....	.....

व्याख्या

अत्र बोधामः यत् पशूनां वृक्षाणां विषये अपि स्वतन्त्रचिकित्साग्रन्थाः उपलभ्यन्ते।

अश्वायुर्वेदः– एषः ग्रन्थः अश्वानां विभिन्नरोगाणां तदुपायानां च विषये महत्त्वपूर्णां सूचनां प्रयच्छति।

गजायुर्वेदः– एषः ग्रन्थः गजानां स्वास्थ्यविषये सम्यक् ज्ञानं ददाति।

वस्तुतः पुराकाले अश्व– गजौ राज्ञां कृते महत्त्वपूर्णौ। युद्धदृष्ट्या एतयोः विशिष्टं महत्त्वम् आसीत्। सम्पन्नजनाः अपि एतेषां परिपालनं कुर्वन्ति स्म। पर्यावरणदृष्ट्या उभयोः अतीव महत्त्वमस्ति।

वृक्षार्युवेदः– एषः ग्रन्थः वृक्षाणां विषये सम्पूर्णं ज्ञानं ददाति। अस्मिन् ग्रन्थे वृक्षाणां रक्षा/आरोपणं पुत्रपरिपालनमिव कथितम् वर्तते।

सौरमण्डलम्– ज्योतिश्शास्त्रे 'सौरमण्डलं' बहूनि भवितुं शक्नुवन्ति इति लिखितं वर्तते। आधुनिकवैज्ञानिकाः अपि एवमेव मन्यन्ते।

कुजः क? भूमिपुत्रः (कोः = पृथिव्याः जायते इति) मंगलग्रहः। एतेनैव मंगलग्रहे जीवनस्य सम्भावना क्रियते आधुनिकवैज्ञानिकैः।

ग्रहाणां प्रकाशः– ये ग्रहाः प्रकाश्यन्ते ते सर्वे सूर्यात् एव प्रकाशं प्राप्नुवन्ति।

आर्यभटीयम् किम्? आर्यभट्टस्य ज्यातिश्शास्त्रविषये महत्त्वपूर्णा रचना अस्ति।

विमानशास्त्रम्– किं भवन्तः जानन्ति यत् विमानानि केन इन्धनेन (पेट्रोल, डीजल, सी. एन.जी.) प्रचलन्ति। आम् सत्यम् 'पेट्रोल' इति। परं बहुपुरा भरद्वाजः विमानचालने सौर ऊर्जायाः प्रयोगः लिखितः। तेन लिखितः ग्रन्थः अस्ति– 'यन्त्रसर्वस्वम्'।

भोजराजकृतं 'समराङ्गणसूत्रधारम्' अपि विमानशास्त्रस्य परिचयं यच्छति।

एवं हि ज्ञायते पुरा अपि विज्ञानस्य विविधक्षेत्रेषु ऋषिभिः बहु चिन्तितं वर्तते।

सारः

वराहमिहिरस्य बृहत्संहितायां गजानाम्, अश्वानां, कुक्कुटानाम् इत्यादीनाम् अनेकेषाम् आयुर्विषये महत्त्वपूर्णं ज्ञानं प्रदत्तम्। अस्मिन् ग्रन्थे एव वृक्षायुर्वेदः अपि समाहितः। एषः ग्रन्थः ज्योतिश्शास्त्रस्य बहुमूल्यं विवरणं प्रददाति। आर्यभट्टस्य आर्यभटीयम् अपरः महत्त्वपूर्णः ग्रन्थः यत्र ग्रहाणां गतिविषये वर्णनम् अस्ति। 'भूगोल' इति शब्दः एव भूः गोलः वर्तते इति साधयति।

विमानशास्त्रे पारदस्य योगेन, सौर–उर्जायाः उपयोगेन च विमानानि उड्डयन्ते स्म। यन्त्रसर्वस्वे त्रिपुरविमानस्य वर्णनमपि उपलभ्यते यत् विमानं जले, भुवि, अन्तरिक्षे च सम्यक् चलितुं शक्नोति स्म। अतः अपूर्वः अनन्तः च अस्माकं विज्ञानराशिः।

वराहमिहिर की बृहत्संहिता में हाथियों, घोड़ों, मुर्गों और बकरियों का भी आयुर्वेद समाहित है। वृक्षायुर्वेद भी इसी ग्रन्थ का एक भाग है। यह ग्रन्थ ज्योतिषशास्त्र का अद्भुत ग्रन्थ माना जाता है। आर्यभट्ट द्वारा लिखित 'आर्यभटीयम्' ग्रन्थ दूसरा महत्त्वपूर्ण ग्रन्थ है जो ग्रहों की गति के विषय में बहुमूल्य तथ्य प्रदान करता है। 'भूगोल' शब्द ही यह सूचित करता है कि आर्यभट्ट के जमाने तक 'पृथ्वी गोल है' यह माना जाता था।

विमानशास्त्र में पारे के योग से, सौर ऊर्जा के उपयोग से विमान उड़ाये जाते थे। यन्त्रसर्वस्व में त्रिपुर विमान का वर्णन मिलता है जो जल, पृथ्वी और अन्तरिक्ष में सरलता से विचर सकता है। इस प्रकार हमारी ज्ञानराशि अनन्त और अपूर्व है।

व्याकरणबिन्दवः

कर्मवाच्ये कर्ता तृतीयान्तः भवति कर्म प्रथमान्तं, क्रियायाः सम्बन्धः कर्त्रा सह न भवति अपितु कर्मणा सह भवति। यथा (i) (कर्मवा.) वैद्येन अभ्रकस्य संस्कारः कृतः। (कर्तृ वैद्यः अभ्रकस्य संस्कारं करोति। (ii) (कर्मवा.) जीवकेन शल्यचिकित्सा कृता। कर्तृ. (जीवकः शल्यचिकित्सां करोति।)

अधोलिखितवाक्यानां कर्तृवाच्ये भाववाचके/कर्मवाच्ये रूपे पश्यन्तु

आर्यभटेन स्वग्रन्थे ग्रहाणां ज्ञानं प्रदर्शितम्। कर्मवाच्यम्

आर्यभटः स्वग्रन्थे ग्रहाणां ज्ञानं प्रदर्शितवान्। कर्तृवाच्यम्
भरद्वाजेन विमानशास्त्रे विमानानि वर्णितानि। कर्मवाच्यम्
भरद्वाजः विमानशास्त्रे विमानानि वर्णितवान्। कर्तृवाच्यम्
ते छायायां तिष्ठन्ति। कर्तृवाच्यम्
तैः छायायां स्थीयते। भाववाच्यम् भाववाच्ये कर्म न भवति।

विग्रहाः	**समस्तपदानि**	
जीवानां विज्ञाने	जीवविज्ञाने	षष्ठीतत्पुरुषः
वृक्षाणाम् आयुर्वेदः	वृक्षायुर्वेदः	षष्ठीतत्पुरुषः
भूमेः पुत्रः	भूमिपुत्रः	षष्ठीतत्पुरुषः
ज्ञानस्य राशिः	ज्ञानराशिः	षष्ठीतत्पुरुषः
महत्त्वेन पूर्णाः	महत्त्वपूर्णाः	तृतीयातत्पुरुषः
न संख्या येषां ते	असंख्याः	बहुव्रीहिः
कोः जायते इति	कुजः	उपपदतत्पुरुषः

प्रत्ययपरिचयः

महत्त्वम्	महत् + त्व	नपु. प्र. ए. व.
स्वप्रकाशता	स्वप्रकाश + तल्	स्त्री. प्र. ए. व.
संरक्षणम्	सम् + रक्ष् + ल्युट,	नपुं प्रथमा एकवचनम्
प्रसिद्धाः	प्र + सिध् + क्त	पुं प्रथमा बहुवचनम्
प्रदर्शितम्	प्र + दृश् + णिच्	नपुं प्रथमा एकवचनम्
वर्णितानि	वर्ण + क्त	नपुं प्रथमा बहुवचनम्
कथितम्	कथ् + क्त	नपुं प्रथमा एकवचनम्
भवितुम्	भू + तुमुन्	अव्ययम्
प्रयुज्य	प्र + युज् + ल्यप्	अव्ययम्

धातूनां रूपाणि– अस्मिन् पाठे 'वर्ण्' धातोः प्रयोगः कृतः। अत्र चुर, भक्ष्, कथ्, गण् धातूनां रूपाणि प्रयोगार्थं दीयन्ते।

चुर् (चुरादिगणतः) उभयपदी परस्मैपदे

	लट्लकारः			**लृट्लकारः**		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्र० पु०	चोरयति	चोरयतः	चोरयन्ति	चोरयिष्यति	चोरयिष्यतः	चोरयिष्यन्ति

म० पु०	चोरयसि	चोरयथः	चोरयथ	चोरयिष्यसि	चोरयिष्यथः	चोरयिष्यथ
उ० पु०	चोरयामि	चोरयावः	चोरयामः	चोरयिष्यामि	चोरयिष्यावः	चोरयिष्यामः

लङ्लकारः **लोट्लकारः**

प्र० पु०	अचोरयत्	अचोरयताम्	अचोरयन्	चोरयतु	चोरयताम्	चोरयन्तु
म० पु०	अचोरयः	अचोरयतम्	अचोरयत	चोरय	चोरयतम्	चोरयत
उ० पु०	अचोरयम्	अचोरचाव	अचोरयाम	चोरयाणि	चोरयाव	चोरयाम

विधिलिङ्

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र० पु०	चोरयेत्	चोरयेताम्	चोरयेयुः
म० पु०	चोरयेः	चोरयेतम्	चोरयेत
उ० पु०	चोरयेयम्	चोरयेव	चोरयेम

एवमेव भक्ष्कथ्गण्चुरादिगणीयधातूनां रूपाणि भवन्ति।

भक्ष्– भक्षयति.....; भक्षयिष्यति.....; अभक्षयत्.....; भक्षयतु.....; भक्षयेत्..... ।

कथ्– कथयति.....; कथयिष्यति.....; अकथयत्.....; कथयतु.....; कथयेत्..... ।

गण्– गणयति.....; गणयिष्यति.....; अगणयत्.....; गणयतु.....; गणयेत्..... ।

पाठगतप्रश्नाः 20.3

1. प्रश्नानाम् उत्तराणि लिखत
   (क) त्रयाणां प्रसिद्धानां उपनिषदाम् नामानि लिखत।
   (ख) ग्रहाणां वर्णनं कस्मिन् विज्ञाने वर्तते?
   (ग) विमानेषु प्रचीनकाले कीदृशम् ऊर्जं प्रयुज्यते स्म?
   (घ) समराङ्गणसूत्रधारस्य लेखकः कः?
2. अधोलिखितवाक्येषु क्रियापदानि पूरयत
   (क) बहवः ग्रन्थाः पशूनां विषये महत्त्वपूर्णां सूचनां .....
   (ख) 'भूमिपुत्रः' शब्दः तस्मिन् ग्रहे जीवनसम्भाव्यतां .....
   (ग) संस्कृतवाङ्मये विपुलः ज्ञानराशिः .....
   (घ) अतएव उपनिषत्सु ....., स्वाध्यायात् मा .....
3. विशेषणानि योजयत
   (क) ..... ग्रन्थाः।
   (ख) ..... सूचनाम्।
   (ग) ..... ग्रहाः।

(घ) ..... विमानानि।

(ङ) ..... ज्ञानराशिः।

(च) ..... कर्तव्यम्।

(छ) ..... भारतीयानाम्।

20.4 किम् अधिगतम्

- संस्कृतवाङ्मयं द्विविधं भवति– आध्यात्मिकं ज्ञानविज्ञानात्मकम् च।
- विज्ञानस्य क्षेत्रे आयुर्वेदः, गणितम्, ज्योतिषम्, वास्तुविज्ञानं, रसायनं, जीवविज्ञानं, विमानविज्ञानम् इति विविधाः शाखाः।
- प्राचीनं वैज्ञानिकं साहित्यम् अतीव समृद्धं विशालं च वर्तते।
- वयम् प्राचीनविज्ञानस्य उपेक्षां न कुर्याम, अपितु स्वाध्यायं कृत्वा शोधकार्यं कुर्याम।
- त्व, तल्, घञ् प्रत्ययानां योगेन भाववाचकशब्दानां निर्माणं भवति।
- पञ्चमीविभक्तिः अपादाने प्रयुज्यते, षष्ठी च सम्बन्धं प्रकटयति।
- कर्मवाच्ये कर्तरि तृतीया भवति, कर्मणि प्रथमा, क्रिया च कर्मपदम् अनुसरति न कर्तृपदम्।
- चुर्, गण्, भक्ष्, कथ् धातूनां रूपाणि समानानि भवन्ति।

20.5 योग्यताविस्तारः

आध्यात्मिकं साहित्यम्

उपनिषदः– एकादश उपनिषदः अतीव प्रसिद्धाः– ईश, केन, कठ, प्रश्न, मुण्डक, माण्डूक्य, एतरेय, तैत्तिरीय, बृहदारण्यक, छान्दोग्य, श्वेताश्वतर इति।

दर्शनानि– आस्तिकदर्शनानि, तानि यानि वेदं प्रमाणं मन्यन्ते– सांख्यम्, योगः, न्यायः, वैशेषिकम्, पूर्वमीमांसा, उत्तरमीमांसा। नास्तिकदर्शनानि वेदं प्रमाणं न मन्यन्ते– बौद्धदर्शनम्, जैनदर्शनम्, चार्वाकदर्शनम्।

वैज्ञानिकं साहित्यम्

शाखाः आयुर्वेदः, गणितं, भौतिकशास्त्रम्, रसायनशास्त्रम्, जीवशास्त्रं, ज्योतिश्शास्त्रम् इत्यादयः। भूमिः प×चभूतात्मिका कपित्थफलाकारिका च इति प्राचीनकाले मन्यते स्म।

भूमिः एव भ्रमति इति सौरमण्डलमपि पराशक्तिं केन्द्रीकृत्य भ्रमति इति अस्मत्पूर्वजैः सिद्धान्तितम्।

भूभृत् इति पर्वतस्य पर्यायः। भुवं धारयति इति पर्वताः भूतोलनं साधयन्ति इति मन्यते स्म।

ऊर्जासंरक्षणनियमः, अणुसिद्धान्तः, द्रव्यनिर्माणम् इत्यादयः विषयाः वैदिककालादारभ्य भारते प्रसृताः दृश्यन्ते।

एकस्यां पत्रिकायाम् आइन्सटाइन् महादेयस्य अधोलिखितः अनुच्छेदः अस्मभ्यं मार्गदर्शकः एव–

You hail from India in the name of Indian Philosophy. Yet you have not cared to learn Sanskrit. Come along, see my library which treasures classics from Sanskrit - the Gita and other treasures from Hindu Philosophy. They are the main source of my inspirations and guidelines for the prupose of scientific investigations and formulations of theories.

भाषाविस्तारः

पञ्चमीषष्ठीविभक्त्योः एकवचने रूपं समानं भवति परन्तु अर्थभेदः महान् भवति।

पञ्चमीविभक्तिः

- अपादाने पञ्चमी प्रयुज्यते।
- भी, जन्, जुगुप्, विरम् आदि धातूनां योगे पञ्चमी प्रयुज्यते–
  बालकः सिंहात् विभेति। प्रपातः पर्वतात् जायते। साधुः पापात् जुगुप्सते/विरमति।
- यस्मात् अधीते तत्रापि पञ्चमी
  गुरोः विद्याम् अधीते। अध्ययनात् पराजयते। आसनात् प्रेक्षते। श्वशुरात् जिह्रेति।
- तुलनायाम् पञ्चमी प्रयुज्यते यथा
  धनात् ज्ञानं गुरुतरम्। देवात् रमेशः पटुतरः, वर्धनाद् रक्षणं श्रेयः।
- आङ् इति योगे पञ्चमी
  आमूलात् श्रोतुमिच्छामि। आकैलाशात् भ्रमति।
- अन्य इतर, आरात्, ऋते, बहिः दिग्वाचिशब्देभ्यः पञ्चमी।
  हरेः अन्यः कः?
- वनात् आरात् (समीपे) नगरः नास्ति।
  ज्ञानात् ऋते न सुखम्। वैशाखात् पूर्वं चैत्रः। नगराद् बहिः वनम् अस्ति।

षष्ठीप्रयोगः

उपरि, अधः, अग्रे, आदौ, पुरः, दूरे, समीपे, इत्यादिशब्दैः सह षष्ठी प्रयुज्यते।

ग्रामस्य दक्षिणतः

गृहस्य उपरि/अधः/अग्रे

ग्रामस्य/ग्रामाद् वा दूरं वनम् (पञ्चमी च)

अधि + इ, दय्, स्मृ, आदिधातुभिः सह अपि षष्ठी प्रयुज्यते–

मातुः स्मरति, अनाथस्य दयते

कृदन्तानां कर्तरि कर्मणि च षष्ठी

शिशोः रोदनम्, कालस्य गतिः, पुस्तकस्य पाठः, राज्यस्य प्राप्तिः

निधारणे षष्ठी सप्तमी वा

कवीनां कविषु श्रेष्ठः कालिदासः।

किम्–तत्–यत्–एतत्–भवत्–सर्वनामशब्दानां स्त्रीलिङ्गरूपाणि

	किम्	तत्	यत्	एतत्	भवत्
प्रथमा	का	सा	या	एषा	भवती
	के	ते	ये	एते	भवत्यौ
	काः	ताः	याः	एताः	भवत्यः
द्वितीया	काम्	ताम्	याम्	एताम्	भवतीम्
	के	ते	ये	एते	भवत्यौ
	काः	ताः	याः	एताः	भवतीः
तृतीया	कया	तया	यया	एतया	भवत्या
	काभ्याम्	ताभ्याम्	याभ्याम्	एताभ्याम्	भवतीभ्याम्
	काभिः	ताभिः	याभिः	एताभिः	भवतीभिः
चतुर्थी	कस्यै	तस्यै	यस्यै	एतस्यै	भवत्यै
	काभ्याम्	ताभ्याम्	याभ्याम्	एताभ्याम्	भवतीभ्याम्
	काभ्यः	ताभ्यः	याभ्यः	एताभ्यः	भवतीभ्यः
पञ्चमी	कस्याः	तस्याः	यस्याः	एतस्याः	भवत्याः
	काभ्याम्	ताभ्याम्	याभ्याम्	एताभ्याम्	भवतीभ्याम्
	काभ्यः	ताभ्यः	याभ्यः	एताभ्यः	भवतीभ्यः
षष्ठी	कस्याः	तस्याः	यस्याः	एतस्याः	भवत्याः
	कयोः	तयोः	ययोः	एतयोः	भवत्योः
	कासाम्	तासाम्	यासाम्	एतासाम्	भवतीनाम्
सप्तमी	कस्याम्	तस्याम्	यस्याम्	एतस्याम्	भवत्याम्
	कयोः	तयोः	ययोः	एतयोः	भवत्योः
	कासु	तासु	यासु	एतासु	भवतीषु

अस्मद्–युष्मद्– भवत् (पुल्लिङ्गञ्च सर्वनामशब्दानां समानान्तररूपाणि)

	अस्मद्	**युष्मद्**	**भवत्**
प्रथमा	अहम्	त्वम्	भवान्
	आवाम्	युवाम्	भवन्तौ
	वयम्	यूयम्	भवन्तः

द्वितीया	माम्	त्वाम्	भवन्तम्
	आवाम्	युवाम्	भवन्तौ
	अस्मान्	युष्मान्	भवतः
तृतीया	मया	त्वया	भवता
	आवाभ्याम्	युवाभ्याम्	भवद्भ्याम्
	अस्माभिः	युष्माभिः	भवद्भिः
चतुर्थी	मह्यम्	तुभ्यम्	भवते
	आवाभ्याम्	युवाभ्याम्	भवद्भ्याम्
	अस्मभ्यम्	युष्मभ्यम्	भवद्भ्यः
पञ्चमी	मत्	त्वत्	भवतः
	आवाभ्याम्	युवाभ्याम्	भवद्भ्याम्
	अस्मत्	युष्मत्	भवद्भ्यः
षष्ठी	मम	तव	भवतः
	आवयोः	युवयोः	भवतोः
	अस्माकम्	युष्माकम्	भवताम्
सप्तमी	मयि	त्वयि	भवति
	आवयोः	युवयोः	भवतोः
	अस्मासु	युष्मासु	भवत्सु

20.6 पाठान्तप्रश्नाः

1. अधोलिखितवाक्येषु षठ्यन्तपदानि चित्वा तेषां मूलशब्दं लिखत
   (क) सुश्रुतसंहितायां छिन्ननासिकायाः प्रत्यारोपणार्थं शल्यचिकित्सा वर्णिता।
   (ख) ओषधीनां विषये कथितं यत् कोऽपि गुल्मकः गुणरहितः नास्ति।
   (ग) अनेकानि तथ्यानि वास्तुविद्यायाः गरिमाणं प्रमाणीकुर्वन्ति।
   (घ) अस्य ज्ञानराशेः सम्यक् संरक्षणं स्यात्।
   (ङ) पातञ्जलमहर्षेः लोहशास्त्रं लोहसंस्करणेन लवणनिर्माणं वर्णयति।
2. वाच्यं निर्दिशत
   (क) वैज्ञानिकैः आविष्कारः कृतः।
   (ख) जीवकेन शल्यचिकित्सा कृता।
   (ग) वैज्ञानिकाः निरन्तरम् अनुसन्धानं कुर्वन्ति।
   (घ) तैः व्यर्थं हस्यते।
3. वास्तुविद्यायाः पञ्च चमत्कारपूर्णनिर्मितयः वर्ण्यन्ताम्।
4. आध्यात्मिकसाहित्ये वेदानां वेदाङ्गानां च नामानि लिखत।

5. अधोलिखितप्रश्नानाम् उत्तराणि लिखत–

(क) आयुर्वेदस्य प्रसिद्धाः ग्रन्थाः के सन्ति?

(ख) जीवकः कस्य शल्यक्रियाम् अकरोत्?

(ग) औषधीगुणरहितः कः नास्ति? कुत्रेदं कथितम्?

(घ) रोगाणां चिकित्साविषये कस्मिन् ग्रन्थे वर्णनं कृतमस्ति?

(ङ) लोहशास्त्रं कस्य रचना अस्ति?

(च) कस्य सेवनेन जरारहितदेहप्राप्तिः भवति?

(छ) विमानशास्त्रे विमानानां सञ्चालनाय कीदृशी ऊर्जा प्रकल्पिता?

6. उचितमेलनं क्रियताम्

(i) वृक्षायुर्वेदः	(अ) ज्योतिश्शास्त्रे
(ii) सौर–ऊर्जा	(आ) रसायन विज्ञाने
(iii) लवण निर्माणम्	(इ) विमानशास्त्रे
(iv) असंख्याः ग्रहाः	(ई) जीवविज्ञाने
(v) लौह स्तम्भः	(उ) शुल्वसूत्रेषु
(vi) कोणार्क देवालयः	(ऊ) दिल्ल्याम्
(vii) पाइथागोरस सिद्धान्तः	(ए) उड़ीसाराज्ये

7. यथानिर्देशं धातूनाम् उपयुक्तरूपैः रिक्तस्थानानि पूरयत

(i) सः वार्ताः ..... । (कथ्–लट्लकारः)

(ii) दुष्टः जनः सज्जनमपि अपशब्दान् ..... । (कथ्–लङ्लकारः)

(iii) चतुरः चौरः रक्षकान् वञ्चयित्वा राजगृहात् धनम् ..... । (चुर्–लङलकारः)

(iv) सदाचारपरायणः बुभुक्षितः अपि कस्यापि धनं न ..... । (चुर्–लृट्लकारः)

(v) भक्ताः रुद्राक्षमालायाः गुटिकाः ..... । (गण्–लट्लकारः)

(vi) यदि सफलतां कांक्षसि तर्हि कष्टानि मा ..... । (गण्–लोट्लकारः)

(vii) रुग्णः अपथ्यं न ..... । (भक्ष्–विधिलिङ्)

(viii) तपस्यानिरता पार्वती वृक्षेभ्यः पतितानि पर्णानि अपि न ..... । (भक्ष्–लङ्लकारः)

20.7 उत्तराणि

20.2 बोधप्रश्नाः

1. (क) उपवेदाः, पुराणानि, महाभारतं

(ख) वस्तुज्ञानम्, रसायनशास्त्रम्, ज्योतिश्शास्त्रम्

(ग) 384,800

(घ) सौर–ऊर्जम्

(ङ) उपनिषत्सु स्वाध्यायान्मा

2. (क) भारद्वाजस्य भोजराजस्य, विमानशास्त्रस्य (ख) वैज्ञानिकग्रन्थानां (ग) भोजराजस्य (घ) ओषधीनां (ङ) सङ्गीतस्य

3. (क) चरकसंहिता, सुश्रुतसंहिता, अष्टाङ्गहृदयम्, भावप्रकाशः

(ख) वृक्षायुर्वेदः, गजायुर्वेदः

(ग) यन्त्रसर्वस्वं, समराङ्गणसूत्रधारम्

पाठगतप्रश्नाः

20.1 1. (क) रामायणम्, गीता, महाभारतम्, भागवत्पुराणम्

(ख) (iv) नक्षत्रज्ञानम् (iii) वास्तुविद्या

2. (क) विष्णु पुराणम् (ख) शिक्षा (ग) ईशोपनिषद् (घ) कादम्बरी (ङ) अभिज्ञानशाकुन्तलम्

3. (ख) भौतिकशास्त्रम् (ग) रसायनशास्त्रम् (घ) वास्तुज्ञानम् (ङ) गणितम्

20.2 1. (क) iii (ख) v (ग) iv (घ) i (ङ) ii

2. (क) iv (ख) i (ग) ii (घ) iii

3. (क) गरिमाणं (ख) लवणनिर्माणं (ग) चिकित्सां (घ) गणितम् (ङ) वेगम्

20.3 1. (क) ईश, कठः छान्दोग्यउपनिषद्, (ख) ज्योतिष्शास्त्रे (ग) सौर ऊर्जं

(घ) भोजराजः

2. (क) प्रयच्छन्ति (ख) सूचयति (ग) वर्तते (घ) कथितम्, प्रमदः

3. (क) बहवः (ख) महत्त्वपूर्णा (ग) असंख्याः (घ) सञ्चार्यमाणानि (ङ) विपुलः

(च) परमं (छ) सर्वेषां

20.6 पाठान्तप्रश्नाः

1. (क) छिन्ननासिकायाः मूलशब्दः छिन्ननासिका

(ख) ओषधीनां मूलशब्दः ओषधि

(ग) वास्तुविद्यायाः मूलशब्दः वास्तुविद्या

(घ) ज्ञानराशेः मूलशब्दः ज्ञानराशि

(ङ) महर्षेः मूलशब्दः महर्षि

2. (क) कर्मवाच्यम् (ख) कर्मवाच्यम् (ग) कर्तृवाच्यम् (घ) भाववाच्यम्

3. भूमिस्पर्शरहिताः स्तम्भाः मण्डपधाराः स्तम्भः, देहलीस्थः लौहस्तम्भः, कोणार्क देवालयः, अजन्ता एलोरा गुहाचित्राणि।

4. वेदाः चत्वारः– ऋग्वेदः, सामवेदः, यजुर्वेदः, अथर्ववेदः

   वेदाङ्गानि षट– शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्यौतिषम्।

5. (क) चरकसंहिता, सुश्रुतसंहिता, अष्टाङ्गहृदयम्, भावप्रकाशः चादयः।

   (ख) जीवकः भोजराजस्य मस्तिष्कस्य।

   (ग) कोऽपि गुल्मकः पादपः तृणं वा, आयुर्वेदे।

   (घ) संङ्गीतचिकित्सारत्नाकरे

   (ङ) पातञ्जलमहर्षेः

   (च) संस्कारयुक्त–अभ्रकयोगेन पारदसेवनेन

   (छ) सौर–ऊर्जा

6. (i) ई (ii) इ (iii) आ (iv) अ (v) ऊ (vi) ए (vii) उ

7. (i) कथयति

   (ii) अकथयत्

   (iii) अचोरयत्

   (iv) चोरयिष्यति

   (v) गणयन्ति

   (vi) गणय

   (vii) भक्षयेत्

   (viii) अभक्षयत्

309sk21

21

शल्यचिकित्साजनकः सुश्रुतः

भवन्तः जानन्ति यत् रुग्णाः जनाः वैद्यं चिकित्सकं वा उपगछन्ति। वैद्यः तेषां रोगस्य निदानं कृत्वा तेभ्यः औषधं यच्छति तेषां रोगं च अपनयति। यदा कस्याञ्चिद् दुर्घटनायाम् अङ्गभङ्गः भवति अथवा शरीरे व्रणादयः जायन्ते तदा वयं किं कुर्मः? वयं रोगिजनं कस्यचित् कुशलशल्यचिकित्सकस्य समीपं नयामः। सः पीडितानि भग्नानि अङ्गानि शल्यक्रियाद्वारा उद्घाट्य तेषाम् अस्थ्नां पुनः स्थापनां कृत्वा त्वचः सीव्यति। कालेन जनः स्वास्थ्यं लभते। किं जानन्ति भवन्तः यत् शल्यक्रियायाः जनकः सुश्रुतः आसीत्। सः प्राचीन–भारतीयवैज्ञानिकः आसीत्। स न केवलं शल्यक्रियायाः अपितु 'प्लास्टिक सर्जरी' नाम त्वक्प्रत्यारोपणस्य अपि जनकः कथ्यते। अत्र वयं तस्य विषये एव पठामः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- शल्य चिकित्सायां महर्षेः सुश्रुतस्य अवदानं वर्णयितुं समर्थः भविष्यति;
- सुश्रुतसंहितायाम् उल्लिखितानां शल्ययन्त्राणां वैविध्यं वर्णयितुं शक्तः भविष्यति;
- श्रेष्ठशल्यचिकित्सकस्य लक्षणानि लेखिष्यति;
- विविधशल्यविधाः वर्णयिष्यति;
- 'तव्यत्; अनीयर्' प्रत्ययप्रयुक्तपदानि वाक्ये प्रयोक्ष्यति;
- संधियुक्तपदानां सन्धिच्छेदं कृत्वा सन्धिनामानि लेखिष्यति;
- मु×च्, इष्, विश्, प्रच्छ् धातूनां वाक्येषु प्रयोगं करिष्यति।

क्रियाकलापः

21.1

21.2

21.3

21.4

रुग्णानां जनानां रोगनिवारणार्थं प्रधानतः द्वे विधी। केषाञ्चित् रोगाणां कृते चूर्ण गोलिका–आदीनि दीयन्ते तथा केषाञ्चित् कृते शल्यचिकित्सा क्रियते। अधोलिखितेषु केषु रोगेषु चूर्णगोलिकादिभिः औषधचिकित्सा भवति केषु च शल्यचिकित्सा, इति विचार्य प्रत्येकम् सम्मुखम् 'औषधचिकित्सा' 'शल्यचिकित्सा' च इति लिखत।

अजीर्णम् .....

अस्थिभङ्गः .....

ज्वरः .....

वक्रनासिकाशोधनम् .....

विषाक्तः व्रणः .....

उच्चरक्तचापम् .....

शिरः पालित्यम् .....

कृत्त–अङ्गुलियोजनम् .....

गृध्रसीवातः .....

तृतीये पाठे भवद्भिः महर्षिचरकविषये पठितं ज्ञातं च यत् स महान् वैद्यः आसीत्। चरकतुल्य एव महान् शल्यचिकित्सकः सुश्रुतः अपि आसीत्। तस्य विषये अत्र वयं पठामः।

21.1 मूलपाठः

शल्यचिकित्साजनकः सुश्रुतः

इदानीं मूलपाठं पठामः।

चिकित्साविज्ञाने विभागद्वयं वर्तते– औषधचिकित्सा शल्यचिकित्सा च। आयुर्वेदस्य प्राचीनतमौ ग्रन्थौ चरक–संहिता सुश्रुतसंहिता च। चरकसंहिता नाम औषधचिकित्साग्रन्थः चरकेण तथा सुश्रुतसंहितानामकः ग्रन्थः च महर्षिणा सुश्रुतेन रचितः इति मन्यते। सुश्रुतस्य नामोल्लेखः वाल्मीकिरामायणे अपि अस्ति। सः विश्वामित्रस्य पुत्रः आसीत्। शल्यचिकित्सायां यन्त्रशस्त्रक्षार–अग्नि–प्रणिधानानि इति चत्वारि शल्यविधानानि वर्णितानि। किं नाम शल्यम्? शल्यवत् तुदति तत् शल्यम्। तस्य निरसनं शल्यकर्म।

21.5

उत्तमः शल्यचिकित्सकः कीदृशः भवेत् इति विषये वर्णयति सुश्रुतः–

शौर्यम् आशुक्रिया शस्त्रतैक्ष्ण्यम् अस्वेदवेपथुः।
असम्मोहश्च वैद्यस्य शस्त्रकर्मणि शस्यते।।

सुश्रुतोक्तानां शस्त्रकर्मणि उपयुज्यमानानां यन्त्राणां संख्या शताधिका अस्ति। वस्तुतः शस्त्रकर्मणि वैद्यस्य हस्त एव प्रधानतमः। सर्वाणि अपि यन्त्रकर्माणि तदधीनानि। शस्त्राणि षट्प्रकाराणि तद्यथा स्वास्तिकयन्त्राणि सन्दंशयन्त्राणि, तालयन्त्राणि नाडीयन्त्राणि, शलाकायन्त्राणि उपयन्त्राणि चेति।

शब्दार्थः
प्रणिधानानि = प्रयोग
शल्यम् = काँटा, ऑपरेशन
यन्त्रं = उपकरण, औजार
क्षार = क्षार, रस
शल्यविधानं = शल्यचिकित्सा के नियम, विधियाँ
तुदति = चुभता है, गड़ता है
निरसनम् = हटाना, निकालना
आशुक्रिया = क्षिप्र क्रिया, फूर्ति
तैक्ष्ण्यम् = तीखापन, शास्त्र का तेज, धारदार होना
अस्वेदवेपथुः = पसीना और कंपन न होना
असम्मोहः = मूर्च्छायाः अभावः स्थिरता, शांत और स्थिर रहने का भाव
शस्यते = प्रशंसा क्रियते, प्रशंसा की जाती है, सराहा जाता है
उपयुज्यमानानाम् = प्रयुक्तानाम्, जिनका प्रयोग किया जा रहा हो।
शताधिकाः = शतः अधिका एक सौ से अधिक
प्रधानतमः = मुख्यतमः (प्रमुख हैं)
यन्त्रकर्माणि = उपकरणों का उपयोग
स्वास्तिक यन्त्राणि = स्वास्तिक की भाँति बीच से जुड़े यंत्र जमूरा (cross shaped higes)
सन्दंशः = चिमटी, संडासी (forceps)
तालयन्त्रम् = चम्मच की आकृति का यंत्र (scoops)
नाड्यः = नली के समान भीतर से पोले उपकरण (tubules)
शलाकायन्त्राणि = छड़ीनुमा यन्त्र (rod type instruments)
मृगपक्षिणाम् = पशूनां पक्षिणां च, पशु–पक्षियों का
शल्यज्ञः = शल्यचिकित्सा जानने वाला, सर्जन
रुग्णस्य = रोगिजनस्य, रोगी का
सीवनार्थम् = सीने के लिए, जोड़ने के लिए, सूच्यः = सुइयाँ

टिप्पणी

तत्र चतुर्विंशतिः स्वस्तिकयन्त्राणि, द्वे सन्दंशे, द्वे तालयन्त्रे, विंशतिः नाड्यः अष्टाविंशतिः शलाकाः पञ्चविंशतिः उपयन्त्राणि च सन्ति। एतेषां कानिचित् यन्त्राणां मुखानि नानाप्रकाराणां मृगपक्षिणां मुखैः सदृशानि प्रायः भवन्ति। यथा प्राणिमुखानि वस्तु गृह्णन्ति तथैव दृढ़तया एतैः अपि शल्यज्ञः रुग्णस्य शरीरस्य अङ्गं गृहीतुं शक्नोति।

शस्त्रप्रणिधाने विंशतिविधानि शस्त्राणि सुश्रुतेन वर्णितानि। सीवनार्थं विविधाः सूच्यः अपि अत्र वर्णिताः।

शस्त्राणाम् आचारणविधिः पायनक्रमः ग्रहणपद्धतिः, उपदेशनियमावलिः शस्त्रसम्पत्, वर्जनीयाः दोषाः इत्यादयः अपि तत्र विस्तरेण वर्णिताः। क्षारेण चिकित्सा क्षारकर्मणि उल्लिखिता, अग्निकर्माणि अग्निदाहेन चिकित्सा प्रदर्शिता, सुश्रुतस्य अद्यतनख्यातिः नासाप्रतिष्ठापने अस्ति। एतदर्थं तेन सुनम्यशस्त्र–चिकित्सा आविष्कृता तदेव अद्य 'प्लास्टिक सर्जरी' इति कथ्यते। आधुनिकसुनम्यशस्त्र– चिकित्साजनकः सुश्रुतः एव इति पाश्चात्यैः अपि अङ्गीकृतम् अस्ति।

नूनम् आरोग्यप्रदानं महापुण्यदायकम्। अतएव उक्तं स्कन्दपुराणे–

आरोग्यशालां यः कुर्यात् महावैद्यपुरस्कृताम्।
सर्वोपकरणोपेतां तस्य पुण्यफलं शृणु।।
धर्मार्थकाममोक्षाणामारोग्यं साधनं यतः।
तस्मादारोग्यदानेन तद्दत्तं स्याच्चतुष्टयम्।
अथैकमात्रं विद्वांसं स्वस्थीकृत्य प्रयत्नतः।
प्राप्नोति सुमहत्पुण्यमनन्तं क्षयवर्जितम्।।

वस्तुतः संस्कृते बहुमूल्यज्ञानं निहितम् अस्ति। मानवः जन्मतः त्रिभिः ऋणैः सह जायते। तेषु एकम् ऋषि–ऋणम्। अस्माकं पूर्वजाः ऋषयः महता कष्टेन ज्ञानं सम्पादितवन्तः। यदि वयं स्वाध्यायं कुर्मः तर्हि न केवलम् ऋषि–ऋणम् अपितु समाज–ऋणम् अपि अपाकृतं भवति एवं ज्ञानरथः च अग्रे सरति इति नास्तिः सन्देहः।

शब्दार्थः
आचरणिविधिः = प्रयोग करने की विधि
पायनक्रमः = उपयोग करने का क्रम
ग्रहण पद्धतिः = उपकरण को पकड़ने का तरीका
नासाप्रतिष्ठापने = कटी हुट नाक को अपने स्थान पर बिठाना
उपदेश नियमावलिः = उपदेश के नियम
शस्त्रसम्पत् = उपकरणों का भंडार
वर्जनीय = न करने वाले, जिसकी मनाही हो, वर्जित
विस्तरेण = विस्तार से
क्षारेण = क्षार से, रस, अम्ल से
अग्नि दाह = आग से दागना
अद्यतन = आधुनिक
सुनम्य शल्यचिकित्सा = प्लास्टिक सर्जरी
पाश्चात्यैः = पश्चिम (यूरोप अमेरिका) के निवासियों द्वारा
अंगीकृतम् = स्वीकार कर लिया है
आरोग्यशाला = चिकित्सालय, नर्सिंग होम
महावैद्यः = प्रमुख चिकित्सक
चतुष्टयम् = पुरुषार्थचतुष्टयम् धर्म, अर्थ, काम और मोक्ष
दत्तं स्यात् = दिए हुए के समान हैं
क्षयवर्जितम् = जिसका क्षय न हो, अक्षय
त्रिभिः ऋणैः = तीन ऋणों से, देवऋण, पितृऋण और ऋषि–ऋण से
अपाकृतम् = दूरीकृतम्, मुक्त
ज्ञानरथः = ज्ञान का रथ
सरति = आगे चलता है।

21.2 बोधप्रश्नाः

भवद्भिः मूलपाठः पठितः। अधुना अधोलिखितानां प्रश्नानाम् उत्तराणि दत्त

1. समुचितम् उत्तरं चिह्नीकुरुत

सुश्रुतः कः आसीत्?

(क) वैद्यराजः

(ख) शल्यचिकित्सकः

(ग) शल्यकारः

2. पाठं पठित्वा रिक्तस्थानानि पूरयत

(क) चिकित्साविज्ञाने विभागद्वयं वर्तते– (i) ..... (ii) .....

(ख) शल्यचिकित्सायां चत्वारि शल्यविधानानि वर्णितानि यन्त्र ..... क्षार ..... इति।

(ग) शस्त्रकर्मणि उपयुज्यमानानां यन्त्राणां संख्या ..... अस्ति।

(घ) सीवनार्थं विविधाः ..... अपि तेन वर्णिताः।

(ङ) एतदर्थं तेन ..... आविष्कृता तदेव अद्य प्लास्टिकसर्जरी इति कथ्यते।

(च) यदि वयं ..... कुर्मः तर्हि न केवलम् ऋषि–ऋणम् अपितु ..... अपि अपाकृतं भवति।

3. पद्यांशान् मेलयत

(i) असम्मोहश्च	(क) स्वस्थीकृत्य प्रयत्नतः
(ii) आरोग्यशालां यः कुर्यात्	(ख) तस्य पुण्यफलं श्रृणु
(iii) तस्मादारोग्यदानेन	(ग) आरोग्यं साधनं यतः
(iv) अथैकमात्रं विद्वांसम्	(घ) शस्त्रकर्मणि शस्यते
(v) प्राप्नोति सुमहत्पुण्यम्	(ङ) तैक्ष्यण्यम् अस्वेदवेपथुः
(vi) सर्वोपकरणोपेतां	(च) महावैद्यपुरस्कृताम्
(vii) धर्मार्थकाममोक्षाणां	(छ) अनन्तं क्षयवर्जितम्
(viii) शौर्यम आशुक्रियाशस्त्र	(ज) तद्दत्तं स्यात् चतुष्टयम्

टिप्पणी

21.3 अधुना अवगच्छामः

प्रथमः अंशः

चिकित्साविज्ञाने ..... गृहीतुं शक्नोति।

सम्प्रति प्रथमम् अंशं पुनः पठामः अवगच्छामः च।

व्याख्या–

सर्वप्रथमं लेखकः चिकित्साविज्ञानस्य विभागद्वयं कथयति। तत्र प्रथमः 'औषधचिकित्सा' अस्ति यत्र केवलं चूर्णगोलिकाः रसादिभिः चिकित्सा क्रियते। द्वितीयः तावत् 'शल्यचिकित्सा' वर्तते यत्र शल्यक्रिया माध्यमेन रुग्णस्य छिन्नम् अङ्गं विदार्य रोगस्य कारकम् अपाकृत्य व्रणः पुनः सीव्यते।

आयुर्वेदस्य द्वौ प्राचीनतमौ गन्थौ– 1. चरकसंहिता (औषधचिकित्साग्रन्थः)– चरकेण प्रणीतः। 2. सुश्रुतसंहिता (शल्यचिकित्साग्रन्थः)– महर्षिसुश्रुतेन लिखितः।

सुश्रुतः– रामायणे सुश्रुतस्य उल्लेखः विद्यते। एतत् सूचयति यत् सुश्रुतस्य जीवनकालः वाल्मीकेः अपि पूर्वम् आसीत्। एवम् इतः सार्द्ध–द्विसहस्राब्दिपूर्वं सुश्रुतस्य नाम सुप्रसिद्धम् आसीत्। सुश्रुतः विश्वामित्रस्य पुत्रः आसीत् इति कथ्यते, परं तस्य विषये वयम् अधिकं न जानीमः। तस्य महत्कर्मभिः तस्य यशः अद्यापि जीवति।

शल्यकर्म– तस्य कर्म शल्यक्रियाभिः रोगाणाम् अपनयनम्। 'शल्यकर्म' इति पदं 'शल्य' शब्दात् व्युत्पन्नम् 'शल्यम्' इति नाम तीक्ष्णकण्टकः यत् शल्यवत् तुदति, पीडयति तदपि शल्यम्। तस्य शल्यस्य निष्कासनम् एव शल्यचिकित्सा।

शल्यविधानानि– शल्यचिकित्सायां चत्वारि शल्यविधानानि कथितानि। तानि सन्ति– 1. यन्त्रप्रणिधानम् (यन्त्राणां प्रयोगः) 2. शस्त्रप्रणिधानम् 3. क्षारप्रणिधानम् 4. अग्निप्रणिधानम्। सुश्रुतस्य मतेन **आदर्शः शल्यचिकित्सकः** एवंविधः भवति। 1. सः शूरः भवति। 2. सः आशुक्रियः भवति, अर्थात् कार्याणि शीघ्रं क्षिप्रगतिना सम्पादयति। 3. तस्य शस्त्राणि–यन्त्राणि वा तीक्ष्णानि भवन्ति। 4. शल्यकर्मनिष्पादने सः सवेपथुः न भवेत्, भयेन स्वेदं च न मुञ्चतु। 5. मनसा स्थिरः भवेत् तस्य असम्मोहः अपि भवेत्।

अधुना पाठे प्रथमं श्लोकं पुनः सावधानतया पठामः

पदच्छेदः– शौर्यम् आशुक्रिया शस्त्रतैक्ष्ण्यम् अस्वेदवेपथुः।
असम्मोहः च वैद्यस्य शस्त्रकर्मणि शस्यते।।

शौर्यम् आशुक्रिया
शस्त्रतैक्ष्ण्यम् अस्वेदवेपथुः।
असम्मोहश्च वैद्यस्य
शस्त्रकर्मणि शस्यते।।

अन्वयः– शस्त्रकर्मणि वैद्यस्य शौर्यम्, आशुक्रिया, शस्त्रतैक्ष्ण्यम्, अस्वेदवेपथुः असम्मोहः च शस्यते।

व्याख्या– शस्त्रकर्म (शल्यकर्म) कुर्वतः चिकित्सकस्य अधोलिखितानि लक्षणानि प्रशंसनीयानि

1. शौर्यम् (साहसम्)
2. आशुक्रिया (शीघ्रता तथा कार्य–सम्पादनम्)
3. शस्त्रतैक्ष्ण्यम् (उपकरणानां तीक्ष्णता)
4. अस्वेदवेपथुः (शल्यक्रियां सम्पाद्यया सः अस्वेदः अवेपथुश्च भवेत्)
5. असम्मोहः (मनसः स्थैर्यम्)

सुश्रुतेन शल्यचिकित्सार्थं शताधिकानि यन्त्राणि निर्धारितानि। परं तेषु हस्तः एव प्रधानतमः। हस्तेन एव शल्यकर्म क्रियते। हस्तस्य कुशलतां विना यन्त्राणाम् न कोऽपि लाभः। अतः सर्वाणि यन्त्राणि, हस्तस्य अधीनानि एव। एवं **हस्तः प्रधानतमं यन्त्रम्।**

शताधिकानानि शल्ययन्त्राणि षड्विधानि, तद् यथा–

यन्त्राणां प्रकारः		**संख्या**
1. स्वास्तिकयन्त्राणि	–	24
2. सन्दंशयन्त्राणि	–	02
3. तालयन्त्राणि	–	02
4. नाडीयन्त्राणि	–	20
5. शलाकायन्त्राणि	–	28
6. उपयन्त्राणि	–	25

स्वास्तिकयन्त्राणि चतुर्विंशतिविधानि कथितानि। तेषु अनेकेषां यन्त्राणां मुखाकृतिः केषाञ्चित् पशूनां पक्षिणां वा मुखाकृतिसदृशा भवति। तेनैव कारणेन तेषां तानि–तानि नामानि दीयन्ते।

यथा पशवः मुखेन पक्षिणः च चञ्च्वा वस्तूनि दृढं गृह्णन्ति तथैव एतानि यन्त्राणि अपि रोगिजनस्य अङ्गानि दृढं गृह्णन्ति येन शल्यकर्मसम्पादनं सम्यक् भवेत्।

स्वास्तिकयन्त्राणि (पशुमुखाकृतिसदृशानि)

यन्त्रनाम्– 1. सिंहयन्त्रम्, 2. व्याघ्रयन्त्रम्, 3. वृकयन्त्रम्, 4. तरक्षुयन्त्रम्, 5. ऋक्षयन्त्रम्, 6. द्वीपीयन्त्रम्, 7. शृगालयन्त्रम्, 8. मृगयन्त्रम्

(व्याघ्र = बाघ, वृकः = भेड़िया, तरक्षुः = लकड़बग्घा, ऋक्षः = भालू, द्वीपी = चीता, शृगालः = सियार)

21.6



21.7

21.8

21.9

21.10

21.11

21.12



21.13

21.14



21.15

21.16



21.17

21.18

21.19

21.20

21.21

स्वास्तिकयन्त्राणि (पक्षिचञ्चुसदृशानि)

यन्त्रनाम् 1. काकयन्त्रम्, 2. कङ्कयन्त्रम्, 3. कुररयन्त्रम्, 4. चाषयन्त्रम्, 5. श्येनयन्त्रम्, 6. शशघाटयन्त्रम्, 7. गृध्रयन्त्रम्, 8. क्रौञ्चयन्त्रम्, 9. अञ्जलिकर्णयन्त्रम्

(काकः = कौवा, कङ्कः = बगुला, कुररः = उकाब कुरी, चाषः = नीलकंठ, श्येनः = बाज, शशघाटः = चील, गृध्रः = गीध, क्रौ×चः = सारस, अञ्जलिकर्णः = उल्लू)

21.22

21.23

21.24

21.25

21.26

21.27

21.28

21.29

21.30

21.31

21.32

21.33

21.34

21.34

21.36

21.37

सारः

चिकित्साविज्ञानस्य द्वे विभागे– औषधिचिकित्सा, शल्यचिकित्सा च। सुश्रुतः शल्यचिकित्सा जनकः कथ्यते। सः विश्वामित्रस्य पुत्रः आसीत्। तस्य ग्रन्थः 'सुश्रुतसंहिता' नाम। सुश्रुतस्य उल्लेखः महर्षिणा वाल्मीकिना स्वरामायणे कृतम्। एतत् प्रमाणं यत् सुश्रुतः वाल्मीकेः पूर्वम् आसीत्। सुश्रुतेन चत्वारि शल्यविधानानि उक्तानि–

● यंत्रप्रणिधानम् ● शस्त्रप्रणिधानम् ● क्षारप्रणिधानम् ● अग्निप्रणिधानम्। शल्यक्रियायां शताधिकानि यन्त्राणि–शस्त्राणि।

चिकित्साविज्ञान के दो विभाग हैं– औषधचिकित्सा तथा शल्यचिकित्सा। सुश्रुत शल्यक्रिया के जनक कहे जाते हैं। वे विश्वामित्र के पुत्र थे। उनके ग्रंथ का नाम है सुश्रुत–संहिता। सुश्रुत का उल्लेख महर्षि वाल्मीकि द्वारा अपनी रामायण में किया गया है। यह उसका

प्रमाण है कि सुश्रुत वाल्मीकि से पूर्व हुए थे। सुश्रुत द्वारा चार शल्य विधान कहे गये हैं–

● यंत्रप्रणिधान ● शस्त्रप्रणिधान ● क्षारप्रणिधान ● अग्निप्रणिधान।

शल्य क्रिया में सौ से अधिक शस्त्र कहे गए हैं।

पाठगतप्रश्नाः 21.1

1. आयुर्वेदस्य प्राचीनतमग्रन्थयोः नाम लिखत।
   (क) .....
   (ख) .....
2. वाल्मीकिना रामायणे सुश्रुतस्य नामोल्लेखं कृतम्, अनेन किं सिद्ध्यति?
   ....
3. शल्यकर्म किं कथ्यते? .....
4. अधोलिखितम् श्लोकं पूरयत
   शौर्यम् ..... शस्त्रतैक्ष्ण्यम् .....,
   असम्मोहश्च ..... शस्त्रकर्मणि प्रशस्यते।
5. त्रयाणां स्वस्तिकयंत्राणां नामानि लिखत
   .....

द्वितीयः अंशः

शस्त्रप्रणिधानं ..... नास्ति सन्देहः।

अधुना वयं द्वितीयम् अंशम् अवगच्छामः।

अस्माभिः प्रथमे अंशे पठितम् यत् सश्रुतेन चतुर्विधानि शल्यविधानानि उल्लेखितानि–
● यंत्रप्रणिधानम् ● शस्त्रप्रणिधानम् ● क्षारप्रणिधानम् ● अग्निप्रणिधानम् च।

यन्त्रप्रणिधानविषये अपि भवद्भिः प्रथमे अंशे पठितम् अस्ति। अधुना शस्त्र–क्षार–अग्नि प्रणिधानविषये किंचित् जानीमः।

व्याख्या–

यैः उपकरणैः व्रणादीनां लेखनं, भेदनं, छेदनं सीवनं च क्रियते तानि शस्त्राणि कथितानि। सुश्रुतेन विंशतिविधानि शस्त्राणि वर्णितानि। **शस्त्रप्रणिधाने** शस्त्राणाम् उपयोगविधिः, ग्रहणपद्धतिः, उपदेश–नियमाः, शस्त्रसम्पत्, वर्जनीयाः दोषाः च विस्तरेण वर्णिताः।

'क्षारप्रणिधाने क्षारेण चिकित्साविधिः वर्णिताः। **अग्निप्रणिधाने** च अग्निदाहने चिकित्सा–विधिः वर्णितः। सुश्रुतस्य महत्याः प्रतिष्ठायाः कारणं कृत्तनासिकायाः पुनः प्रतिष्ठापने तस्य निपुणता वर्तते। अनेन कारणेन स अद्यापि स्मर्यते।

एषः विधिः सुनम्यशल्यचिकित्सा नाम्ना उल्लिखिता। सः विधिः प्लास्टिक सर्जरी इति नाम्ना प्रख्याता।

रोगिजनानां हिताय अद्यापि सर्वकारेण परोपकारिभिः जनैः वा अरोग्यशालास्थापनं क्रियते। आरोग्यशाला कथंविधा स्यात्? तस्याः स्थापनेन पुण्यलाभः कथं भवेत्? अरोग्यप्रदानं कथं पुण्यकर्म इति कथ्यते? एतेषां प्रश्नानाम् उत्तराणि श्लोकत्रये दत्तानि। तद् यथा–

आरोग्यशलां यः कुर्यात्
महावैद्यपुरस्कृताम्।
सर्वोपकरणोपेतां तस्य
पुण्यफलं श्रृणु।।

पदच्छेदः– आरोग्यशालाम् यः कुर्यात् महावैद्यपुरस्कृताम्।
सर्वोपकरणोपेताम् तस्य पुण्यफलम् श्रृणु।।

अन्वयः– यः (जनः) महावैद्यपुरस्कृताम्, सर्वोपकरणोपेताम् आरोग्यशालाम् कुर्यात् तस्य पुण्यफलम् श्रृणु।

व्याख्या–

यत्र रोगिजनेभ्यः आरोग्यं दीयते सा आरोग्यशाला चिकित्सालयः इति कथ्यते।

आरोग्यशाला कथंभूता स्यात्

1. महावैद्यपुरस्कृता, कुशलचिकित्सकैः पूर्णा

2. सर्वोपकरणोपेता च यदि चिकित्सालये शल्यकर्मादीनां निष्पादनार्थं पर्याप्तानि उपकरणानि, भवेयुः तर्हि (रोगिजनानां चिकित्सा संभवा भवेत्।)

धर्मार्थकाममोक्षाणामारोग्यं
साधनं यतः।
तस्मादारोग्यदानेन
तद्दत्तं स्याच्चतुष्टयम्।

पदच्छेदः– धर्मार्थकाममोक्षाणाम् आरोग्यम् साधनम् यतः।
तस्मात् आरोग्यदानेन तत् दत्तम् स्यात् चतुष्टयम्।।

अन्वयः– यतः धर्म–अर्थ–काम–मोक्षाणाम् साधनम् आरोग्यम्। तस्मात् आरोग्यदानेन तत् चतुष्टयम् (धर्म–अर्थ–काम–मोक्षम् इति) दत्तम् स्यात्।

व्याख्या–

'चतुष्टयम्' इति पदेन पुरुषार्थचतुष्टयम् इति कथितम्। धर्मपालनम्, अर्थ सञ्चयम्, इच्छापूर्तिः, मोक्षाय प्रयत्नम् इति चत्वारि कर्माणि पुरुषार्थचतुष्टयस्य विषयाणि।

आरोग्यप्रदानं पुरुषार्थचतुष्टयस्य साधनं भवतिं यदि जनः रुग्णः भवति तदा सः धर्माचरणे अर्थसञ्चये, कामसेवने, मोक्षसाधने वा सर्वथा असमर्थः भवति। उक्तं हि– ''शरीरमाद्यं खलु धर्मसाधनम्।'' रुग्णेन शरीरेण न किञ्चित् क्रियते। अतः आरोग्यप्रदानं पुरुषार्थ चतुष्टयस्य साधनम् इति कथितम्–

अथैकमात्र विद्वांसं
स्वस्थीकृत्य प्रयत्नतः।
प्राप्नोति सुमहत्पुण्यमनन्तं
क्षयवर्जितम्।।

पदच्छेदः– अथ एकमात्रम् विद्वांसम् स्वस्थीकृत्य प्रयत्नतः।
प्राप्नोति सुमहत् पुण्यम् अनन्तम् क्षयवर्जितम्।।

अन्वयः– अथ एकमात्रम् विद्वांसम् प्रयत्नतः स्वस्थीकृत्य (जनः) अनन्तम् क्षयवर्जितम् सुमहत् पुण्यम् प्राप्नोति।

व्याख्या–

एकमात्रं जनं प्रयत्नपूर्वकं यः स्वस्थीकरोति, स्वास्थ्यं प्रयच्छति सः महत्पुण्यं प्राप्नोति तत् पुण्यम् अनन्तं सीमारहितं, क्षयवर्जितं च तत् न कदापि क्षीयते।

एवं स्पष्टं यत् अस्माकं समाजे चिकित्सकस्य महती प्रतिष्ठा। स्वास्थ्यलाभाय यः आरोग्यशालानिर्माणं करोति, तत्र कुशलान् वैद्यान् स्थापयति, उपयोगीयन्त्राणाम् उपकरणानां च व्यवस्थां करोति सः महत् पुण्यं प्राप्नोति।

मानवजीवने 'पुरुषार्थचतुष्टयम्' विद्वद्भिः कथितम्। अधोलिखिताः सन्ति पुरुषार्थाः

(i) धर्माचरणम् (ii) अर्थसङ्ग्रहः (iii) कामनापूर्तिः (iv) मोक्ष–प्राप्तये प्रयत्नः

यदि कोऽपि जनः अस्वस्थः भवति तर्हि सः पुरुषार्थसाधने अपि असमर्थः भवति, यः जनेभ्यः आरोग्यं ददाति सः वस्तुतः तान्–तान् जनान् पुरुषार्थसाधनाय सक्षमान् करोति। अनेन कर्मणा सः अक्षयं पुण्यं प्राप्नोति।

''मानवः जन्मतः'' त्रिभिः ऋणैः सह जायते। एतानि त्रीणि ऋणानि सन्ति–

1. देवऋणम्
2. ऋषिऋणम्
3. पितृऋणम्

संस्कृते निहितं बहुमूल्यं ज्ञानं प्राप्य तस्य प्रचारेण प्रसारेण च वयं ऋषि–ऋणेन मुक्ताः भवामः। ऋणत्रयात् मुक्तिः समाज–ऋणम् अपि अपाकरोति।

सारः

सुश्रुतेन शल्यक्रियार्थे न केवलं यन्त्राणाम् अपितु शस्त्राणां, सूच्यादीनां च उल्लेखं कृतम्। तेषां उपयोगविधिः च वर्णितः। सुश्रुतस्य प्रसिद्धेः आधारः सुनम्यशल्यचिकित्सा अस्ति। सः कृत्तां नासिकां पुनः स्थापने निपुणः आसीत्। एवं स अद्यतनप्लास्टिकसर्जरी नाम विधेः जनकः कथ्यते। आरोग्यप्रदानं महापुण्यदायकम् अस्ति। आरोग्यशालास्थापना पुण्यदायकम् कर्म। आरोग्यदानेन पुरुषार्थचतुष्टयम् एव दत्तं भवेत्।

व्याकरणबिन्दवः

(i) सन्धिः– अधोलिखितेषु पदेषु सन्धिच्छेदं कुरुत संधिनाम च लिखत

शताधिकाः	=	शत	+	.....	=	दीर्घस्वरसन्धिः
असम्मोहश्च	=	.....	+	च	=	विसर्गसन्धिः
सुश्रुतोक्तानाम्	=	.....	+	.....	=	गुणसन्धिः
सर्वोपकरणोपेताम्	=	सर्व + ...	+	.....	=	.....
सीवनार्थम्	=	.....	+	.....	=	.....

तदधीनाति	=	+	= व्यंजनसंधिः
तद्दत्तम्	=	+ दत्तम्	= .....

(ii) समासाः— समस्तपदउल्लेखः, समासविग्रहः समासनामोल्लेखः वा यथानिर्दिष्टं क्रियताम्

यथा—मृगपक्षीणाम्	= मृगाणां च पक्षीणां च	= द्वन्द्वः
.....	= प्राणिनां मुखानि	= तत्पुरुषः
चिकित्साजनकः	=	= तत्पुरुषः
.....	= आरोग्यस्य	= .....
अग्निदाहम्	= अग्निना दाहम्	= .....
.....	= महान् च असौ वैद्यः	= .....
धर्मार्थकाममोक्षाणाम्	= .....तेषाम्	= द्वन्द्वः
महत्पुण्यम्	=	= कर्मधारयः
ज्ञानार्थः	= ज्ञानाय अयम्	= .....

(iii) प्रत्ययाः— जानन्ति एव भवन्तः यत् प्रत्ययानां संयोगेन नूतनानि पदानि निर्मीयन्ते। यथा— धातोः— गत्वा, गतवती, गच्छत्, गम्यः, गन्तव्यः ..... इत्यादयः। अधुना वयं जानीमः तव्यत् अनीयर् च प्रत्ययौ—

धातुः + प्रत्ययः	**पदम्**	**प्रयोगः**
गम् + तव्यत्	गन्तव्यम्	त्वया गृहं गन्तव्यम्।
गम् + अनीयर्	गमनीयम्	त्वया कुत्र गमनीयम्?
कृ + तव्यत्	कर्त्तव्यम्	अस्माभिः देशसेवा कर्त्तव्या।
कृ + अनीयर्	करणीयम्	एतत् कार्यं शीघ्र करणीयम्।
दा + अनीयर्	दानीयम्	भिक्षुकाय दानीयम्।
हन् + तव्यत्	हन्तव्यम्	न कोऽपि जनः हन्तव्यः।
लिख् + अनीयर्	लेखनीयम्	मया एका कविता लेखनीया।

अस्मिन पाठे 'तुद्' धातोः प्रयोगः प्राप्यते। अतः केषाञ्चित् तुदादिगणीयधातूनां रूपाणि अत्र दीयन्ते।

'मुच्' धातुः 'उभयपदी' परस्मैपदे

	लट्लकारः			लृट्लकारः		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्र० पु०	मुञ्चति	मुञ्चतः	मुञ्चन्ति	मोक्ष्यति	मोक्ष्यतः	मोक्ष्यन्ति
म० पु०	मुञ्चसि	मुञ्चथः	मुञ्चथ	मोक्ष्यसि	मोक्ष्यथः	मोक्ष्यथ
उ० पु०	मुञ्चामि	मुञ्चावः	मुञ्चामः	मोक्ष्यामि	मोक्ष्यावः	मोक्ष्यामः

		लङ्लकारः			लोट्लकारः	
प्र० पु०	अमुञ्चत्	अमुञ्चताम्	अमुञ्चन्	मुञ्चतु	मुञ्चताम्	मुञ्चन्तु
म० पु०	अमुञ्चः	अमुञ्चतम्	अमुञ्चत	मुञ्च	मुञ्चतम्	मुञ्चत
उ० पु०	अमुञ्चम्	अमुञ्चाव	अमुञ्चाम	मुञ्चानि	मुञ्चाव	मुञ्चाम

विधिलिङ्

	एकवचनम्	द्विवनचनम्	बहुवचनम्
प्र० पु०	मुञ्चेत्	मुञ्चेताम्	मुञ्चेयुः
म० पु०	मुञ्चेः	मुञ्चेतम्	मुञ्चेत
उ० पु०	मुञ्चेयम्	मुञ्चेव	मुञ्चेम

इष् धातुः परस्मैपदी

	लट्लकारः			लृट्लकारः		
	एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र० पु०	इच्छति	इच्छतः	इच्छन्ति	एषिष्यति	एषिष्यतः	एषिष्यन्ति
म० पु०	इच्छसि	इच्छथः	इच्छथ	एषिष्यसि	एषिष्यथः	एषिष्यथ
उ० पु०	इच्छामि	इच्छावः	इच्छामः	एषिष्यामि	एषिष्यावः	एषिष्यामः

	लङ्लकारः			लोट्लकारः		
प्र० पु०	ऐच्छत्	ऐच्छताम्	ऐच्छन्	इच्छतु	इच्छताम्	इच्छन्तु
म० पु०	ऐच्छः	ऐच्छतम्	ऐच्छत	इच्छ	इच्छतम्	इच्छत
उ० पु०	ऐच्छम्	ऐच्छाव	ऐच्छाम	इच्छानि	इच्छाव	इच्छाम

विधिलिङ्

प्र० पु०	इच्छेत्	इच्छेताम्	इच्छेयुः
म० पु०	इच्छेः	इच्छेतम्	इच्छेत
उ० पु०	इच्छेयम्	इच्छेव	इच्छेम

निर्देशः प्रच्छ् धातोः रूपाणि इष् धातु वत् भवन्ति। अतः प्रच्छ् धातोः अपि परस्मैपदे पंचलकारेषु रूपाणि स्वयं लिखत।

पाठगतप्रश्नाः 21.2

1. शल्यचिकित्सकैः व्रणसीवनार्थं किं प्रयुज्यते?
2. सुश्रुतस्य अद्यतनख्यातिः केन कारणेन अस्ति?
3. पुरुषार्थचतुष्टयं किम्?
4. आरोग्यशाला कथंविधा कारयेत्?
5. ऋणत्रयाणां नामानि लिखत।
6. केन प्रदत्तेन पुरुषार्थचतुष्टयम् एव दत्तं भवेत्?
7. स्वास्थ्यप्रदानं क्षयवर्जितं कर्म कथं स्यात्?

21.4 किम् अधिगतम्

- चिकित्साविज्ञानस्य द्वे विभागे – (i) औषधचिकित्सा (ii) शल्यचिकित्सा स्तः
- सुश्रुतः प्राचीनतमः शल्यचिकित्सकः, तस्य ग्रंथः– 'सुश्रुतसंहिता'।
- शल्यचिकित्सायां यन्त्रशस्त्रक्षार–अग्निप्रणिधानानि इति चत्वारि शल्यविधानानि वर्णितानि।
- शल्यचिकित्सकस्य लक्षणानि–

  (i) शूरः भवति। (ii) कार्याणि शीघ्रं सम्पादयति। (iii) तस्य शस्त्राणि तीक्ष्णानि भवन्ति (iv) शल्यकर्मनिष्पादने तस्य हस्तौ अकम्पमानौ भवतः। (v) मनसा स्थिरः भवति।
- शल्यकर्माणि शताधिकानि यन्त्राणि प्रयुज्यते, यथा
  - स्वस्तिकाकृतियन्त्राणि – 24
  - सन्दंशयन्त्राणि – 2
  - तालयन्त्राणि – 2
  - नाडीयन्त्राणि – 20
  - उपयन्त्राणि – 25
- सुश्रुतस्य ख्यातिः नासाप्रतिष्ठापने अस्ति। सुनम्यशस्त्रचिकित्सा एव 'प्लास्टिक–सर्जरी' इति कथ्यते। अत एव सुश्रुतः प्लास्टिक–सर्जरी विज्ञानस्य अपि जनकः।
- आरोग्यदानं पुण्यकार्यम् भवति।

21.5 योग्यताविस्तारः

भारतवर्षे आयुर्वेदस्य परंपरा अति प्राचीना विद्यते। सुश्रुतः गाधिपुत्रस्य विश्वामित्रस्य पुत्रः दिवोदास–धन्वन्तरेः शिष्यः आसीत्। तस्य प्रणीतं ग्रन्थं 'सुश्रुतसंहिता'' इति कथ्यते। नागार्जुनेन वाग्भटेन च अस्य ग्रन्थस्य संपादनं कृतम्–इति अपि मन्यन्ते विद्वांसः।

प्रचीनानां केषांचित् आयुर्वेदाचार्याणाम् नामानि स्मरत

इन्द्रः, धन्वन्तरिः, चरकः, सुश्रुतः, भास्करः, धवनः, भृगुः, नागार्जुनः, वाग्भटः, हारीतः, जतूकर्णः इत्यादयः।

21.6 पाठान्तप्रश्नाः

1. एकवाक्येन उत्तरत

   (क) शस्त्रप्रणिधाने कतिविधानि शस्त्राणि सुश्रुतेन वर्णितानि?

(ख) शल्यकर्म किं?

(ग) शस्त्रकर्मणि प्रधानतमः कः?

(घ) सुश्रुतस्य अद्यतनख्यातिः कस्मिन् कर्मणि वर्तते?

(ङ) आधुनिकसुनम्यशस्त्रचिकित्साजनकः कः कथ्यते?

2. आरोग्यशाला कीदृशी भवेत्?
3. आरोगयशालानिर्माणस्य पुण्यं फलं किं भवति?
4. आरोग्यप्रदानेन पुरुषार्थचतुष्टयं कथं सम्पाद्यते?
5. शस्त्रकर्मचिकित्सकस्य प्रशस्तानि लक्षणानि कानि सन्ति?
6. पशुमुखाकृतिसदृशानां पक्षिचञ्चुसदृशानां च स्वस्तिकयन्त्राणां नामानि लिखत।
7. सुश्रुतेन आरब्धानां शल्यचिकित्सायां कीदृशी प्रगतिः कृता? स्वनिर्मितपञ्चवाक्येषु वर्णयत।
8. अधोलिखितानां तव्यत्प्रत्ययान्तपदानाम् अनीयर्प्रत्ययान्तपदानां च स्ववाक्येषु प्रयोगं कुरुत

(i) स्मर्तव्यम् (ii) गन्तव्यम् (iii) हन्तव्यः (iv) करणीयम् (v) लेखनीया

9. स्वपाठात् चित्वा दशक्तप्रत्ययान्तपदानि लिखत।
10. सन्धिच्छेदं कृत्वा सन्धिनामानि लिखत

(i) नामोल्लेखः (ii) असम्मोहश्च, (iii) तदधीनानि (iv) उल्लिखिताः (v) आविष्कृता (vi) अतएव (vii) पुरस्कृतम्

11. यथानिर्देशम् उपयुक्तैः धातुरूपैः रिक्तस्थानानि पूरयत

(i) आखेटकः मृगेषु शरान् .....। (मुच्–लङ्लकारः)

(ii) एताः कथम् अश्रूणि ..... । (मुच्–लट्लकारः)

(iii) अहं आमूलात् कथां श्रोतुम् .....। (इष्–लट्लकारः)

(iv) सः योगमयं जीवनम् .....। (इष्–लङ्लकारः)

(v) भवान् एकं प्रश्नं .....। (प्रच्छ्–लोट्लकारः)

(vi) वयम् किञ्चित् अपि न .....। (प्रच्छ्–लृट्लकारः)

(vii) कश्चित् जटिलः तपस्वी तपोवनम् .....। (विश्–लङ्लकारः)

(viii) सर्वे जनाः स्वैरं तपोवनं .....। (विश्–विधिलिङ् लकारः)

21.7 उत्तराणि

21.3 बोधप्रश्नाः

1. (i) ख (ii) ग (iii) ख
2. सुश्रुतः
3. वाल्मीकेः

पाठगतप्रश्नाः

21.1 1. चरकसंहिता, सुश्रुत संहिता।

2. सुश्रुतः वाल्मीकेः पूर्वम् आसीत्।

3. यत् शल्यवत् तुदति तस्य निष्कासनम्।

4. शूरः, आशुक्रियः, तीक्ष्णशस्त्रयुक्तः अस्वेदवेपथुः असम्मोहश्च।

5. सिंहयन्त्रम्, व्याघ्रयन्त्रम्, काकयन्त्रम्, क्रौ×च यन्त्रम् इत्यादयः

21.2 1. सूच्यः

2. नासाप्रतिष्ठापनेन

3. धर्म–अर्थ–काम–मोक्षम्

4. महावैद्य पुरस्कृता, सर्वोपकरणोपेता च

5. देव–ऋणम्, ऋषि–ऋणम्, पितृ–ऋणम्

6. आरोग्यदानेन

7. स्वास्थ्यप्रदानेन मानवानां हितं भवति। अस्य पुण्यस्य क्षयं न भवति।

21.6 पाठान्तप्रश्नाः

1. (क) शस्त्रप्रणिधाने विंशतिविधानि शस्त्राणि सुश्रुतेन वर्णितानि।

(ख) शल्यस्य निरसनं शल्यकर्म कथ्यते।

(ग) शस्त्रकर्मणि चिकित्सकस्य हस्तः एव प्रधानतमः।

(घ) सुश्रुतस्य अद्यतनख्यातिः नासाप्रतिष्ठापने अस्ति।

(ङ) सुश्रुतः आधुनिकसुनम्यशस्त्रचिकित्साजनकः कथ्यते।

2. आरोग्यशाला महावैद्यपुरस्कृता सर्वोपकरणोपेता च भवेत्।

3. आरोग्यशालानिर्माणस्य पुण्यं फलं पुरुषार्थचतुष्टयसम्पादनम् अस्ति।

4. आरोग्यं धर्मार्थकाममोक्षाणां साधनं भवति अतः आरोग्यदानेन पुरुषार्थचतुष्टयस्य सम्पादनं भवति।

5. शौर्यम्, आशुक्रिया, शस्त्रतैक्ष्ण्यम्, अस्वेदवेपथुः, असम्मोहश्च शस्त्रकर्मचिकित्सकस्य प्रशस्तानि लक्षणानि सन्ति।

6. पशुमुखाकृतिसदृशानि पक्षिचञ्चुसदृशानि यन्त्राणि सवस्तिकयन्त्राणि

1. सिंहयन्त्रम्	1. काकयन्त्रम्
2. व्याघ्रयन्त्रम्	2. कङ्कयन्त्रम्
3. वृकयन्त्रम्	3. कुररयन्त्रम्
4. तरक्षुयन्त्रम्	4. चाषयन्त्रम्

5. ऋक्षयन्त्रम्
6. द्वीपियन्त्रम्
7. शृगालयन्त्रम्
8. मृगयन्त्रम्

5. श्येनयन्त्रम्
6. शशघाटयन्त्रम्
7. गृध्रयन्त्रम्
8. क्रौञ्चयन्त्रम्
9. अञ्जलिकर्णयन्त्रम्

7. स्वयं कुरुत।

8. (i) मया मन्त्रं स्मर्तव्यम्। (ii) तेन गृहं गन्तव्यम्। (iii) कोऽपि जनः न हन्तव्यः। (iv) कार्यं शीघ्रं करणीयम्। (v) मया एका कविता लेखनीया।

9. (i) रचितः (ii) वर्णितानि (iii) उल्लिखिता (iv) प्रदर्शिता (v) आविष्कृता (vi) अङ्गीकृतम् (vii) उक्तम् (viii) पुरस्कृताम् (ix) उपेताम् (x) दत्तम्

10. (i) नाम + उल्लेखः – गुणसन्धिः

(ii) असम्मोहः + च – विसर्गसन्धिः

(iii) तत् + अधीनानि – व्यञ्जनसन्धिः

(iv) उत् + लिखिताः – व्यञ्जनसन्धिः

(v) आविः + कृता – विसर्गसन्धिः

(vi) अतः + एव – विसर्गसन्धिः

(vii) पुरः + कृतम् – विसर्गसन्धिः।

11. (i) अमु×चत् (ii) मु×चन्ति (iii) इच्छामि (iv) ऐच्छत्

(v) पृच्छतु (vi) प्रक्ष्यामः (vii) अविशत् (viii) विशेयुः

309sk22

22

कष्टं न्यासस्य रक्षणम्

संस्कृते सन्ति अनेकानि नाटक–रत्नानि। तेषु 'मृच्छकटिकम्' नाम नाटकं विशेषम् अस्ति। अत्र साधारणस्य जनजीवनस्य भावाः, क्रियाः एवं चित्रिताः यत् ते अद्यापि अस्माकं जीवनस्य, वर्तमानस्य समाजस्य चित्राणि इव प्रतीयन्ते। शूद्रकः अस्य नाटकस्य लेखकः। नाटके चारुदत्तः नाम नायकः। तस्य मित्रं मैत्रेयः नाम विदूषकः। चारुदत्तः पूर्वं धनिकः आसीत् परं भाग्यवशात् दरिद्रः जातः। धूता नाम तस्य पतिपरायणा पत्नी। एकदा वसन्तसेना स्व आभूषणानि चारुदत्ताय न्यासरूपेण रक्षार्थं समर्पितवती। शर्विलकः नाम कोऽपि चौरः चारुदत्तस्य गृहे प्रविष्टवान् तानि आभूषणानि च नीतवान्। एतद् वृत्तं कथं शूद्रक्रेण निरुपितम् इति अस्मिन् पाठे पठामः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- नाट्यांशस्य सारं कथारूपेण प्रस्तोतुं शक्ष्यति;
- चारुदत्तस्य चरित्रचित्रणं लेखितुं शक्ष्यति;
- प्रसिद्धवाद्ययन्त्राणां नामानि सचित्रं प्रस्तोष्यति;
- लोट्लकारे प्रयुक्तानि वाक्यानि लङ्लकारे परिवर्तयिष्यति;
- स्वस्ति, अलम्, कृते इत्यादीनां योगे उपपदविभक्तिप्रयोगं करिष्यति;
- नी, भज्, याच्, लभ्, सेव् धातुरूपाणां प्रयोगं करिष्यति।

क्रियाकलापः



उपरिदत्तानि चित्राणि दृष्ट्वा कानि सत्कर्माणि कानि च दुष्कर्माणि इति लिखत

सत्कर्माणि	दुष्कर्माणि
.....	.....
.....	.....
.....	.....
.....	.....
.....	.....

सत्कर्म कृत्वा नरस्य यशः वर्धते। अत्रापि चारुदत्तः नायकः सर्वं दानं कृत्वा दरिद्रः जातः। सः स्वयशसः विषये कथं चिन्तितः इति पठामः।

22.1 मूलपाठः

कष्टं न्यासस्य रक्षणम्

समयः – अर्धरात्रिः, यदा कदा कीटानाम् उलूकानां ध्वनिः श्रूयते। वीथ्यां पदसंचलनध्वनिः क्रमशः निकटम् आयाति। ततः प्रविशतः चारुदत्तः विदूषकः च।

चारूदत्तः – मित्रमैत्रेय! संगीतगोष्ठ्यां बहुकालं व्यतीतम्।

विदूषकः – भो एहि एहि। आपणान्तररथ्या विभागेषु सुखं कुक्कुराः अपि सुप्ताः। तद् गृहं गच्छावः।

चारूदत्तः – सम्यक् आह भवान्।

विदूषकः – भोः इदम् अस्माकं गृहम्। वर्द्धमानक! उद्घाटय द्वारकम्।

(द्वारोद्घाटनध्वनिः)

वर्द्धमानकः–आगच्छताम् आर्यौ। अत्र विस्तीर्णे आसने आस्यताम्।

विदूषकः – वर्द्धमानक! रदिनिकां शब्दापय पादौ धावितुम्।

चारुदत्तः – अलं सुप्तजनं प्रबोधयितुम्। स्वयं प्रक्षालयावः।

वर्द्धमानकः–आर्य मैत्रेय! एतत् तव सुवर्णभाण्डम्।

विदूषकः – मम सुवर्णभाण्डम्! कुतः मम सुवर्णभाण्डम्?

वर्द्धमानकः–कथं विस्मृतं भवता? वसन्तसेनया यत् स्वर्णाभूषणम् आर्यचारुदत्ताय न्यासरूपेण दत्तम् .....

विदूषकः – दत्तं भवेत्, तत् किं मया?

वर्द्धमानकः–आर्येण कथितम् आसीत् 'इदं स्वर्णभाण्डं रात्रौ मैत्रेयेण दिवा च वर्द्धमानेन रक्षितव्यम् इति। तद् गृहाण एतत्।

विदूषकः – हं हो! किम् अद्यापि एतत् तिष्ठति। किम् उज्जयिन्यां चौरः अपि नास्ति यः एतं निद्राचौरं सुवर्णभाण्डम् अपहरति। देहि तर्हि, गृहणामि।

(रात्रेः तृतीयः प्रहरः उलूंकस्य कीटादीनां च स्वरः श्रूयते। खट्–खट् इति इष्टिका–भ×जन ध्वनिः।)

शब्दार्थाः
कीटानाम् = कीड़ों की
वीथ्यां = गली में
एहि = आओ
आपणान्तररथ्याविभागेषु = बाजार के बीच की गलियों में
कुक्कुराः = कुत्ते
सम्यक् = ठीक
उद्घाटय द्वारकम् = दरवाजा खोलो
विस्तीर्णे आसने = बिछाए आसन पर
शब्दापय = बुलाओ
सुप्तजनं = सोए हुए व्यक्ति को
प्रबोधयितुं = जगाना
सुवर्णभाण्डम् = स्वर्णआभूषणों की पेटी
न्यासरूपेण = धरोहर के रूप में
दिवा = दिन में
निद्राचौरः = नींद चुराने वाला
इष्टिकाः = ईंटें
सन्धिः विवरम् = सेंध, चोरी के लिए दीवार पर बनाया गया छेद
अभ्यन्तरम् = आन्तरकिं भागम्, भीतर
कपटशयितम् = झूठ–मूठ का सोना
परमार्थ सुप्तंम् = सचमुच सोए हुए, लक्ष्य सुप्तम
न शंकितः = शंकारहित
सुविशदः = दीर्घः, अतिस्पष्टः

टिप्पणी

शर्विलकः – (मध्यमस्वरेण) भवतु। समाप्तोऽयं सन्धिः। तावत् प्रविशामि अभ्यन्तरम्। अरे! पुरुषद्वयं सुप्तम्। न जाने कपटशमितं परमार्थसुप्तं वा। तावत् परीक्षे।

निःश्वासोऽस्य न शङ्कितः सुविशदः तुल्यान्तरं वर्तते, दृष्टिर्गाढनिमीलिता न विकला नाभ्यन्तरे चञ्चला। गात्रं स्रस्तशरीरसन्धिशिथिलं शय्याप्रमाणाधिकम्, दीपञ्चापि न मर्षयेदभिमुखं स्याल्लक्ष्यसुप्तं यदि।।

तर्हि पश्यामि किं–किं नीतव्यम् अस्ति। अये! कथं मृदङ्गः? अयं पणवः। इयं वीणा, एते वंशाः अमी पुस्तकाः। कथं नाट्याचार्यस्य गृहनिदानम्? हा धिक्, भवनप्रत्ययात् प्रविष्टोऽस्मि। परमार्थदारंद्रोऽयम्। भवतु गच्छामि।

विदूषकः – (स्वप्ने जल्पति) भो वयस्य! सन्धिरिव दृश्यते, चोरमिव पश्यामि। तद् गृह्णातु भवान् इदं सुवर्णभाण्डम्।

शर्विलकः – (दृष्ट्वा) अये सत्यमेव एतद् सुवर्णभाण्डम्। भवतु गृह्णामि। अथवा, न युक्तं तुल्यावस्थं पीडयितुम्। तद् गच्छामि।

विदूषकः – (निद्रितः एव) भो वयस्य! शापितोऽसि यदि एतत् सुवर्णभाण्डं न गृह्णासि।

22.9

शर्विलकः – अनतिक्रमणीया भवतः आज्ञा। तद् गृह्णामि।

विदूषकः – भो वयस्व! शीतलः ते अग्रहस्तः।

शर्विलकः – (सविस्मयम्) धिक् प्रमादः। (गृह्णाति)

विदूषकः – गृहीतम्?

शर्विलकः – आम्, गृहीतम्।

विदूषकः – इदानीं विक्रीतपण्य इव वणिजः सुखं स्वप्स्यामि।

शर्विलकः – स्वपिहि वर्षशतम्। अहमपि गच्छामि।

तुल्यान्तरम्वर्तते = श्वास ग्रहणे निष्कासने च समान व्यवधानं विद्यते

गाढनिभीलिता दृष्टिः = भली भाँति बन्द आंखें

गात्रम् = शरीरम्

स्रस्त–शरीर–संधि–शिथिलम् = निद्राया शिथिलस्य शरीरस्य संधयः अपि शिथिलाः, नींद के कारण पूरा शरीर ढीला ढाला है।

शय्याप्रमाणाधिकम् = सुप्तस्य जनस्य शरीर शय्यायाः प्रमाणात् किञ्चित् दीर्घम् अस्ति, चारपाई से अधिक लंबा शरीर

न मर्षयेत् = न सहेत्

अभिमुखं दीपम् = सम्मुखस्थं दीपकम्, सामने स्थित दीपक

नीतव्यम् = चोरयितव्यम्, ले जाने योग्य है

मृदङ्गः–पणवः = बाजों के नाम

वंशाः = बाँसुरियाँ

भवनप्रत्ययात् = विशालं गृहम् इति मन्यमानः, बड़ा घर समझकर

न युक्तम् = न उचितम्

तुल्यावस्थम् = समान स्थितिकम्, मेरे समान स्थिति वाले

पीडयितुम् = सताना

भट्टिनी = आर्या, सम्माननीया

प्रतीच्छ = गृहाण, ग्रहण कीजिए

कथं चिरयसि = कथं विलम्बं करोषि, देर क्यों कर रहे हो

सदृशदार संग्रहस्य = फलम् सदृशं, अनुरूपं, पत्नी

रदनिका – (प्रविश्य सत्रासम्) हा धिक हा धिक्। अस्माकं गेहे सन्धिं कल्पपित्वा चोरो निष्क्रामति। मैत्रेयं प्रबोधयामि। (उच्चैः) आर्य मैत्रेय। उत्तिष्ठ उत्तिष्ठ अस्माकं गेहे सन्धिं कल्पयित्वा चोरः निष्क्रान्तः।

विदूषकः – (उत्थाय ससंभ्रमम्) किं भणसि! आः सन्धिः। भो वयस्य चारुदत्त! उत्तिष्ठ उत्तिष्ठ। अस्माकं गेहे सन्धिं दत्त्वा चोर निष्क्रान्तः।

चारुदत्तः – (मन्दं हसन्) भवतु। भो! अलं परिहासेन।

विदूषकः – न परिहासः स्वयमेव प्रेक्षतां भवान्।

चारुदत्तः – इह उज्जयिन्यां कः अस्माकं गृहवैभवं न जानाति। ततः स्वमित्रेभ्यः किं कथयिष्यति–सार्थवाहसुतस्य गृहं प्रविश्य न मया किञ्चिद् आसादितम्।

विदूषकः – तेन चिन्तितम् भवेत् महदेतत् गेहम्। इतः सुवर्णभाण्डं निष्क्रामयिष्यामि। (चिन्तयित्वा) सुवर्णभाण्डं....! भो वयस्य! सुष्ठु मया कृतं तत् सुवर्णभाण्डं भवतः हस्ते समर्पयित्वा। अन्यथा दास्याः पुत्रेण अपहृतं भवेत्।

चारुदत्तः – अलं परिहासेन।

विदूषकः – भोः किम् अहं परिहासस्यापि देशकालं न जानामि?

चारुदत्तः – (दीर्घं निःश्वस्य) कदाचिद् एवमपि स्यात्। (सहर्षम्) वयस्य दिष्ट्या प्रियं ते निवेदयामि।

विदूषकः – तत् किं न हृतं सुवर्णभाण्डम्।

चारुदत्तः – हृतम्।

विदूषकः – तथापि किं प्रियम्?

चारुदत्तः – यदसौ कृतार्थो गतः।

विदूषकः – न्यासः खलु सः वसन्तसेनायाः युष्मद् हस्ते।

चारुदत्तः – कथं न्यासः? भोः कष्टम्। अधुनां चरित्रम् अपि दूषितम्।

विदूषकः – समाश्वसितु भवान्। अहम् अपलपिष्यामि केन दत्तम्? केन गृहीतम्? को वा साक्षी? इति।

चारुदत्तः – अहम् इदानीम् अनृतम् अभिधास्ये?

दारा, तस्या संग्रहस्य प्राप्तेः फलम्, अपने स्वभाव स्वरूप पत्नी पाने का फल
विभवानुगताभार्या–सम्पत्तौ अनुकूलं = कार्यकारिणी पत्नी वैभव में अपने मन के अनुकूल कार्य करने वाली पत्नी,
सुख–दुःख सुहृत् = सुखे च दुःखे च समानः सखा, सुख–दुख में समान रूप से साथ देने वाला मित्र
न परिभ्रष्टम् = न नष्टम्, अभी नष्ट नहीं हुआ
दुर्लभम् = दुष्प्राप्यम्, कठिनाई से मिलता है
आदाय = (आ+दा+ल्यप्) लेकर
सकाशं = समीपम्
आत्मीयम् इति कृत्वा = अपना समझकर
द्यूते = द्यूतक्रीडायाम्, जुआ में
तस्य कृते = तस्य विनिमये, उसके बदले

(ततः प्रविशति चेट्या सह चारुदत्तवधूः धूता)

धूता – अयि! सत्यम् अपरिक्षतः शरीरः आर्यपुत्रः?

चेटी – सत्यम्, किन्तु यः सः वसन्तसेनायाः न्यासरूपः अलङ्कारकः सोऽपहृतः।

धूता – तदा तु सत्यमेव आर्यपुत्रः चारित्रेण परिक्षतः। साम्प्रत्म् उज्जयिन्यां सर्वे मन्त्रयिष्यन्ति– 'दरिद्रतया आर्यपुत्रेण एव ईदृशम् अकार्यम् अनुष्ठितम्' इति। (किंचित् विचार्य) आर्य, आर्यमैत्रेयं तावत् शब्दापय।

चेटी – आर्य मैत्रेय! भट्टिनी धूता त्वां शब्दापयति।

22.10

विदूषकः – (उपसृत्य) स्वस्ति भवत्यै, एष आगतोऽस्मि।

धूता – आर्य प्रतीच्छ इमाम्।

विदूषकः – किं नु इदम्?

धूता – आर्यमैत्रेय! अहं खलु रत्नषष्ठीव्रतम् उपोषिता आसम्। तस्य कृते प्रतीच्छ इमां रत्नमालिकाम्। (निष्क्रामति)

विदूषकः – (सहर्षम्) स्वस्ति भवत्यै गमिष्यामि प्रियवयस्यं निवेदयामि।

चारुदत्तः – मैत्रेय। कथं चिरयसि?

22.11

विदूषकः – एषोऽस्मि, गृहाण एताम्।

चारुदत्तः – किमेतद्?

विदूषकः – ते सदृशदारसंग्रहस्य फलम् (रत्नावलीं दर्शयति)

चारुदत्तः – (सहर्षम्) अहो नाहं दरिद्रः, यतः

विभवानुगता भार्या सुखदुःखसुहृद् भवान्।
सत्यञ्च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम्।।

मैत्रेय! गच्छ रत्नावलीम् आदाय वसन्तसेनायाः सकाशं वक्तव्या च सा मद्वचनात् यत् भवत्स्वर्णभाण्डम् अस्माभिः आत्मीयम् इति कृत्वा द्यूते हारितम्, तस्य कृते गृह्यतामियं रत्नावली। इति।

22.2 बोधप्रश्नाः

1. अयं नाट्यांशः कस्य लेखकस्य कृतिः?

(क) कालिदासस्य (ख) शूद्रकस्य

(ग) भासस्य (घ) भवभूतेः

2. कस्मात् नाटकात् गृहीतः अयं नाट्यांशः?
   (क) चारुदत्तात् (ख) शूद्रकात्
   (ग) मृच्छकटिकात् (घ) शाकुन्तलात्
3. विदूषकः कः कथ्यते?
   (क) दुष्टः जनः (ख) विद्वज्जनः
   (ग) नायकस्य विद्वत् मित्रम् (घ) नायकस्य मूर्खं मित्रम्
4. सुवर्णभाण्डं केन चोरितम्?
   (क) शर्विलकेन (ख) विदूषकेन
   (ग) चेट्या (घ) न केनापि
5. सुवर्णभाण्डं कस्य हस्ते कस्याः न्यासम्?
   (क) विदूषकस्य हस्ते वसंतसेनायाः (ख) विदूषकस्य हस्ते धूतायाः
   (ग) चारुदत्तस्य हस्ते वसंतसेनायाः (घ) चारुदत्तस्य हस्ते चेट्याः
6. कथं विधा भार्या भुविः दुर्लभा?
   (क) पतिप्रिया (ख) रूपवती
   (ग) विदुषी (घ) विभवानुगता

22.3 अधुना अवगच्छामः

प्रथमः अंशः

रात्रिः तृतीयः प्रहरः ..... विदूषकः चोरः निष्क्रान्तः।

अधुना एतत् नाट्यांशस्य पूर्वार्द्धम् सावधानतया पठामः।

चारुदत्तः तस्य मित्रं विदूषकः च संगीतगोष्ठयाः रात्रौ अतिचिरात् गृहम् आगच्छन्ति। वर्द्धमानकः विदूषकं कथयति–एतत् तव सुवर्णभाण्डम्। एतानि स्वर्ण आभूषणानि वसन्तसेनाया रक्षार्थम् आर्यचारुदत्ताय दत्तानि। एतेषां रक्षाम् अहं दिने करोमि। रात्रौ तु भवान्। अतः गृह्यताम् इदम्।

अस्मिन् अंशे चारुदत्तस्य गृहे सुवर्णभाण्डं कथं चोरितम् जातम् इति अत्र बोधामः।

प्रथमं केषाञ्चन पात्राणाम् परिचयं ज्ञास्यामः।

शर्विलकः अत्र चौररूपेण आगतः। सः गृहेषु सन्धिं दत्त्वा चौरकर्मणि निपुणः।

विदूषकः चारुदत्तस्य मित्रम्। अस्य वास्तविकं नाम मैत्रेयः अस्ति। विदूषकः संस्कृत नाटकेषु विशेषपात्रं भवति। सः हास्यप्रियः परं विद्वान् भवति।

रदनिका चारुदत्तस्य गृहे कापि सेविका, चेटी इति।

चारुदत्तः कथायाः नायकः। सः प्रथमं धनिकः आसीत्। भाग्यवशात् तस्य धनं नष्टम् दरिद्रः सन् अपि सः चरित्रवान् अस्ति।

अधुना कथां जानीमः। प्रथमं रङ्गमञ्चे शर्विलकः चोररूपेण आगच्छति। गृहस्य भित्तौ सन्धिं कृत्वा अभ्यन्तरं प्रविशति। तत्र द्वौ जनौ सुप्तौ। कौ तौ? आम् आम्, एकः चारुदत्तः अपरः च मैत्रेयः। चौरस्य नैपुण्यं पश्यन्तु। सः परीक्षितुम् इच्छति यत् तौ सत्यमेव प्रसुप्तौ अथवा कपटेन शयितम् नाटयतः। अत्र प्रगाढसुप्तस्य कानिचिद् लक्षणानि व्यक्तानि; तानि श्लोके पठामः

निःश्वासोऽस्य न शङ्कितः सुविशदः तुल्यान्तरं वर्तते,
दृष्टिर्गाढनिमीलिता न विकला नाभ्यन्तरे चञ्चला।
गात्रं स्त्रस्तशरीरसन्धिशिथिलं शय्याप्रमाणाधिकम्,
दीपञ्चापि न मर्षयेदभिमुखं स्याल्लक्षसुप्तं यदि।।

पदच्छेदः— निश्वासः अस्य न शङ्कितः सुविशदः तुल्यान्तरम् वर्तते,
दृष्टिः गाढनिमीलिता न विकला न अभ्यन्तरे चञ्चला।
गात्रम् स्रस्तशरीरसन्धिशिथिलम् शय्याप्रमाणधिकम्
दीपम् च अपि न मर्षयेत् अभिमुखम् स्यात् लक्षसुप्तम् यदि।।

अन्वयः— अस्य (जनस्य) निश्वासः शङ्कितःन। (निःश्वासः) सुविशदः तुल्यान्तरम् वर्तते। (अस्य) दृष्टिः गाढनिमीलिता, न विकला, न चञ्चला। (अस्य) गात्रम् स्रस्तशरीरसन्धि शिथिलम् शय्याप्रमाणात् अधिकम् च (वर्तते)। यदि (अयम् जनः) लक्षसुप्तम् स्यात् तदा अभिमुखम् दीपम् च अपि न मर्षयेत्। श्लोकानुसारं प्रगाढसुप्तं कपटशयितं वा इति उभयोः जनयोः मध्ये विशेषान्तरं स्पष्टम्। तत्कथम् पश्यामः—

	प्रगाढसुप्तः जनः	**कपटशमितः जनः**
लक्षणानि		
निःश्वासः	– अशङ्कितः	शङ्कितः
	– सुविशदः	अल्पः
	– निश्वासयोः मध्ये अन्तरं समं भवति	अन्तरं समानं भवति
दृष्टिः	– गाढं निमीलिता भवति	गाढं निमीलिता न भवति
	– विकला न भवति	विकला/चञ्चला भवति
	– गोलकान्तरे चञ्चला न	गोलकान्तरे चञ्चला भवति
गात्रम्	– शिथिलांगम्	अशिथिलांगम्
	– शिथिलत्वात् शय्याप्रमाणात् अधिकम् दृश्यते	सावधानत्वात् शय्याप्रमाणं भवेद् एव।
अभिमुखदीपम्	– प्रगाढसुप्तं जनं दीपप्रकाशः न बाधते	कपटशयितः प्रकाशं न सहते अतः दीपं मर्षयेत्

चारुदत्त और उसका मित्र विदूषक संगीत गोष्ठी में भाग लेकर रात को देर से घर आते हैं। वर्द्धमानक विदूषक को सुवर्णभाण्ड देता है। यह वही पात्र है जिसमें वसन्तसेना के सोने के गहने भरे हुए हैं और वसन्तसेना ने चारुदत्त को इसकी रक्षा के लिए दिया था। घर आकर फिर सभी सो जाते हैं। शर्विलक ने देखा कि सोए हुए लोग गाढ़ी नींद में हैं क्योंकि उनकी लंबी साँस शंकारहित होकर एक गति से चल रही है, आँख की पुतलियाँ अच्छी तरह बंद हैं, इसलिए दृष्टि में न चञ्चलता है न व्याकुलता, शरीर के अंग जोड़ों से स्वाभाविक रूप से शिथिल हैं और वे इतनी गाढ़ी नींद में हैं कि शरीर खाट से भी बाहर निकल आया है। दीप जल रहा है, पर उसकी भी उन्हें चिन्ता नहीं है।

जानन्ति एव भवन्तः शर्विलकः तत्र किमर्थम् आगतः? चौरकर्म सम्पादनाय। तर्हि सः पश्यति किं किं तत्र चोरणीयम् अस्ति। तत्र स किं पश्यति?

वीणा, पणवः, वंशाः पुस्तकानि। एतानि वस्तूनि कस्यचित् धनिकस्य गृहे न भवेयुः। एतद् गृहं न धनिकस्य परं कस्यचिद् नाट्याचार्यस्य शिक्षकस्य वा भवेत्। सुविशालं गृहं दृष्ट्वा अत्र सः धनार्थम् आगतः आसीत् परं अत्र तु न धनम्। कस्यचित् महादरिद्रस्य गृहम् इदम्। तर्हि गन्तुम् इच्छति।

– तस्मिन् एव समये विदूषकः स्वप्ने कथयति–
  भो वयस्य इति।
  विदूषकस्य किं नाम?
  मैत्रेयः।
– सः स्ववयस्यं = मित्रम् किं कथयति?
  सन्धिः दृश्यते चोरमिव पश्यामि। तद् गृह्यतां सुवर्णभाण्डम्।
– किं तत् सुवर्णभाण्डम्?
  तत् आभूषणपात्रम् अस्ति। वसन्तसेनया यानि आभूषणानि चारुदत्तस्य हस्ते अर्पितानि तानि तस्मिन् भाण्डे सन्ति।
– तत् श्रुत्वा शर्विलकः किं करोति?
  स भाण्डे सत्यमेव सुवर्णमयानि आभूषणानि पश्यति।

अत्र नाटकसंघटने एकां विचित्रतां पश्यन्तु। मैत्रेयः सम्बोधयति– "भो वयस्य!" इति। कस्मै एतत् संबोधनम्? चारुदत्तं प्रति, परं शर्विलकः अवगच्छति यत् एष सुप्तः जनः तस्मै (शर्विलकाय) भो वयस्य" इति कथयति तर्हि, मैत्रेयस्य अनुरोधं स्वीकर्तुम् इच्छन् स कथयति– 'भवतु, गृह्णामि।' यदा सः एतत् कर्म न युक्तम् इति मत्वा विरमति तदैव विदूषकः कथयति– "भो वयस्य! शापितोऽसि यदि एतत् सुवर्णभाण्डं न गृह्णासि।"

आज्ञाम् परिपालयन् शर्विलकः सुवर्णभाण्डम् गृह्णति। एवं कुर्वन् तस्य शीतलं हस्तं विदूषकस्य हस्तं स्पृशति।

सुवर्णभाण्डं दत्त्वा विदूषकः कथयति– अधुना विक्रीतपण्य इव वणिजः सुखं स्वप्स्यामि। किमत्र कारणम्?

अर्धनिद्रितावस्थायां विदूषकः स्वप्ने चारुदत्तेन सह जल्पते। परंतु तत्र शर्विलकः एव जागृतः न तु चारुदत्तः। विदूषकः सुवर्णभाण्डं चारुदत्ताय अर्पयितुम् इच्छति। शर्विलकः तं गृह्णाति। एतत् निद्रिताय विदूषकाय नैव स्पष्टं जातम्। मया चारुदत्ताय एव सुवर्णभाण्डम् अर्पितम् इति स मन्यते। अतएव कथयति–

सुवर्णभाण्डम् अर्पयित्वा अधुना अहं निश्शङ्कः जातः।

यदा पण्यसामग्रीं विक्रीय वणिजः सुखेन स्वपिति तदैव चारुदत्ताय सुवर्णभाण्डं अर्पयित्वा अहमपि सुखेन स्वप्स्यामि।

एतस्मिन् अवसरे रदनिका नाम सेविका तत्र आगच्छति। सा सन्धिं दृष्ट्वा उच्चैः वदति सुप्तं जनं च प्रबोधयति। प्रबुद्धः मैत्रेयः अधुना चारुदत्तं प्रबोधयति।

व्याकरणबिन्दवः

सन्धिः भवद्भिः दीर्घसन्धेः नियमाः पूर्वपाठेषु पठिताः। तदनुसारम् एव अत्र अभ्यासः अपेक्षितः।

नाट्याचार्यः = नाट्य + ...

प्रमाणाधिकम् = ... + अधिकम्

कीटादीनाम् = ... + ...

नाभ्यन्तरे = ... + अभ्यन्तरे

परमार्थः = ... + ...

विसर्गाणां पश्चात् यदि अ स्वरः भवति तदा विसर्गस्थाने ओ भवति अ स्थाने च अवग्रहः (ऽ) दीयते। यथा

श्वासः + अस्य = श्वासोऽस्य

प्रविष्टव्यः + अस्मि = प्रविष्टव्योऽस्मि

शापितः + असि = ...

..... + ... = दरिद्रोऽयम्

भवन्तः ध्यानेन पश्यन्तु अत्र पूर्वरूपसन्धिः भवति।

पाठगतप्रश्नाः 22.1

1. (क) शर्विलकः यदा गृहाभ्यन्तरे प्रविशति तदा तत्र कौ पश्यति?
   (ख) परमार्थसुप्तस्य जनस्य लक्षणद्वयं लिखत।
   (ग) शर्विलकः कस्मात् प्रत्ययात् चारुदत्तस्य गृहे सन्धिं कृत्वा प्रविष्टः आसीत्?
   (घ) 'परमार्थ दरिद्रोऽयम्' इति कथं तेन निर्णीतम्?
   (ङ) मैत्रेयस्य पार्श्वे सुवर्णभाण्डं कुतः?
   (च) मैत्रेयः 'विक्रीतपण्य इव वणिजः सुखं स्वप्स्यामि' इति किमर्थं कथयति?
2. रदनिकायाः त्रासस्य कारणम् किमस्ति
   (क) सन्धिं कल्पयित्वा चौरः निष्क्रामति।
   (ख) सन्धिं दृष्ट्वा विदूषकः उत्तिष्ठति।
   (ग) विदूषकः तां ताडयति।
   (घ) चारुदत्तः तां कुप्स्यति।
3. शर्विलकः 'धिक् प्रमादम्' इति कथयति।
   तत्र कः प्रमादः?
   (क) सुवर्णभाण्डग्रहणम्
   (ख) सुवर्णभाण्डत्यागम्
   (ग) शीतलेन हस्तेन मैत्रेयस्य स्पर्शः
   (घ) शीतलेन हस्तेन पात्रस्पर्शम्

द्वितीयः अंशः

चारुदत्तः (मन्दं हसन्) ..... रत्नावली इति (समाप्तिपर्यन्तम्)

इदानीं प्रश्नोत्तर माध्यमेन द्वितीयम् अंशं बोधामः।

– चारुदत्तः विदूषकस्य कथनम् 'परिहासः' इति कथं मन्यते?

चारुदत्तः परमदरिद्रः। दरिद्रस्य गृहे कोऽपि चौरः सन्धिं कल्पयित्वा गतः इति कथनम् तस्य कृते परिहास इव।

– चौरः कथम् आगतः भवेत्?

तेन चिन्तितं भवेत् यत् महदेतत् गृहम्। ''इतः सुवर्णभाण्डं निष्क्रामिष्यामि।'' इति निश्चितं कृत्वा चौरः आगतः भवेत्।

– सुवर्णभाण्डं स्मृत्वा विदूषकः कां घटनां स्मरति?

पूर्वं मया सुवर्णभाण्डं चारुदत्ताय समर्पितम्, अन्यथा चौरेण अपहृतम् इति।

– किं परिहासस्यापि देशकालं न जानामि? इति मैत्रेयः किमर्थम् कथयति?

चौरः सन्धिं कृत्वा गतः इति सर्वे विस्मिताः। मैत्रेयेण स्वप्ने सुवर्णभाण्डं चौराय दत्तं परं सः विश्वसिति यत् तेन चारुदत्ताय दत्तं न तु चौराय। चारुदत्तः मैत्रेयवचनम् परिहासम् इति मन्यते। तदा मैत्रेयः कथयति इदं स्थानं समयं वा परिहासाय न युक्तम् इति अहम् जानामि।

– हृतेऽपि सुवर्णभाण्डे चारुदत्तः कथं हृष्टः?

चौरः दरिद्रचारुदत्तस्य गृहे प्रविश्य सुवर्णघटहस्तः गतः न तु रिक्तहस्तः इति मत्वा चारुदत्तः प्रसन्नः आसीत्।

– 'अधुना चारित्रम् अपि दुष्टम्' अस्य कः अभिप्रायः?

दरिद्रः अपि चारुदत्तः सच्चरित्रवान् जनः। चौरेण यत् हृतं तत् वसन्तसेनायाः न्यासः आसीत्। अधुना जनाः तमेव चौरं मत्वा कथयिष्यन्ति यत् अनेनैव ईदृशम् अकार्यम् अनुष्ठितम्।

– धूता मैत्रेयं किमर्थम् आह्वयति?

सा बहुमूल्यां स्वरत्नावलीं दत्त्वा वसन्तसेनायाः न्यासस्य प्रत्यावर्तनम् कामयते।

– 'सदृशदारसंग्रहं' किम्? किं तस्य फलम्?

पत्नी स्वपत्युः विपत्तिसमये तस्य साहाय्यं करोति। तस्य सुख–दुःखेः स्व सुख–दुःखे इति मन्यते। एवंविधा दारा (पत्नी) प्राप्तिः एव 'सदृशदारसंग्रहः' इति। तस्य फलम् कष्टेभ्यः सङ्कटेभ्यः पत्युः मुक्तिः।

– अधुना चारुदत्तस्य श्लोकं वारमेकं पठन्तु

विभवानुगता भार्या सुखदुःखसुहृद् भवान्।
सत्यञ्च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम्।।

अन्वयः– यस्य (मम) भार्या विभवानुगता, भवान्, सुख–दुःखसुहृद्, सत्यम् च, न परिभ्रष्टम्, (यत्) दरिद्रेषु दुर्लभम्।

भावार्थः– चारुदत्तः आत्मानं सौभाग्यशाली मन्यते। तत्कथं? तस्य भार्या सम्पत्तौ विपत्तौ च तस्यानुकूलम् एव आचरति। तस्य मित्रं मैत्रेयः अपि न केवलं सुखसौभाग्य काले मैत्रीं निर्वहति दुःखकालेऽपि स मित्रकर्तव्यानि निर्वहति। दरिद्रजनेषु प्रायः सत्यवचनं न दृश्यते परं दरिद्रः अपि चारुदत्तः सत्यं रक्षति– अतः स न दरिद्रः स तु सौभाग्यशाली एव।

अधुना कानिचित् प्रश्नानि तेषाम् उत्तराणि च बोधयत

(क) रत्नावलीम् आदाय चारुदत्तः मैत्रेयं कुत्र प्रेषयति?

वसन्तसेनायाः सकाशं

(ख) 'वक्तव्या च सा मद्वचनात्' अत्र सा पदं कस्यै प्रयुक्तम्?

वसन्तसेनायै।

(ग) वसन्तसेना चारुदत्तवचनात् किं वक्तव्या?

युष्माकं सुवर्णभाण्डं अस्माभिः आत्मीयं कृत्वा द्यूतक्रीडायां हारितम्। तस्य कृते इयं रत्नावली प्रेष्यते, तद् गृह्यताम्।

सारः

रात्रौ शर्विलकः नाम चौरः चारुदत्तस्य गृहे सन्धिं कल्पयित्वा प्रविशति। तत्र स बहुमूल्यानि वस्तूनि द्रव्यं वा अन्वेषयति किन्तु केवलं मृदङ्गवीणादीनि वाद्ययन्त्राणि पुस्तकानि च पश्यति। एतद् दृष्ट्वा सः असन्तुष्टः भवति। सः तु अत्र बहुमूल्यं किञ्चित् नेतव्यम् भवेत् इति चिन्तयित्वा आगतः किन्तु इदं गृहं तु कस्यापि अतिदरिद्रस्य दृश्यते। स प्रत्यावर्तुम् इच्छति। तदैव विदूषकः स्वप्ने कथयति– गृहाण एतत् सुवर्णभाण्डम्। प्रथमं स सुप्तजनान् सुवर्णभाण्डं गृहीतुम् अयुक्तं मन्यते किन्तु यदा विदूषकः 'शापितोऽसि यदि न गृह्णाति' इति कथयति तदा शर्विलकः शापभयेन सुवर्णभाण्डं गृह्णाति। विदूषकः अवगच्छति यत् तेन स्वर्णाभूषणस्य पेटिका चारुदत्ताय समर्पिता। एवं मत्वा सः निश्चिन्तः स्वपिति।

रात में शर्विलक नाम का चोर चारुदत्त के घर में सेंध लगाकर प्रवेश करता है। वहाँ वह बहुमूल्य वस्तुएँ खोजता है किन्तु केवल मृदंग, वीणा पुस्तकें देख कर असन्तुष्ट हो जाता है। वह तो कीमती सामान लेने के लिए आया था किन्तु यह तो किसी अत्यन्त गरीब का घर निकला। अतः वह लौटना चाहता है। वैसे ही विदूषक स्वप्न में कहता है कि यह सुवर्णभाण्ड ले लो। पहले तो वह किसी सोए हुए व्यक्ति से सुवर्णभाण्ड लेना अनुचित समझता है किन्तु विदूषक स्वर्णभाण्ड की पेटी स्वीकार न करने पर उसे शाप देने की बात कहता है। शाप के डर से शर्विलक उसे ले लेता है। विदूषक समझता है कि उसने स्वर्णाभूषण की पेटी चारुदत्त को सौंप दी है। ऐसा मानकर वह निश्चिन्त होकर सुखपूर्वक सो जाता है।

व्याकरणबिन्दवः

(क) लोट्लकारः (आज्ञा–अर्थे)	लङ्लकारः (भूतकाले)	क्तप्रत्यान्तम्
(i) गृह्णातु	अगृह्णात्	गृहीतम्
(ii) स्वपिहि	अस्वपः	सुप्तम्
(iii) उत्तिष्ठ	उदतिष्ठः	स्थितम्
(iv) प्रेक्ष्यताम्	अप्रेक्ष्यताम्	प्रेक्षितम्
(vi) प्रतीक्ष	अप्रतीक्षः	प्रतीक्षितम्
(vii) गृहाण	अगृहणाः	गृहीतम्
(viii) गृह्यताम्	अगृह्यताम्	गृहीतम्

(ख) उपपदविभक्तयः

(I) अलम् (मा कुरु) इत्यर्थे तृतीया।

(i) अलं परिहासेन।

(ii) अलं विवादेन।

(iii) अलं कपटेन।

(iv) अलम् अनृतेन।

(v) अलम् ..... (मूर्खता)

(vi) अलम् ..... (असत्य)

(vii) अलम् ..... (विग्रह)

(II) अलम् (पर्याप्तम्) इत्यर्थे चतुर्थी

(i) रामः रावणाय अलम्।

(ii) सैनिकः रिपवे अलम्।

(iii) अयम् पाठः छात्रेभ्यः अलम्।

(iv) विद्वान् मूर्खाय अलम्।

(v) इदं धनं .... अलम् (याचक)।

(vi) इमानि पुष्पाणि .... अलम् (पुष्पमाला)।

(vii) एषः मल्लः .... अलम् (तद्)।

(III) स्वस्ति (कल्याणं भवतु) योगे–चतुर्थी भवति।

स्वस्ति भवत्यै स्वस्ति शिष्याय

स्वस्ति राज्ञे जनेभ्यः स्वस्ति

स्वस्ति प्रजाभ्यः

(ग) सूक्तीः

(i) न युक्तम् तुल्यावस्थं पीडयितुम्।

(i) इदानीं विक्रीतपण्य इव .....

(iii) नाहं दरिद्रः, यतः

(iv) .....

धातुरूपाणि

नी (नय्) (परस्मैपदे) (भ्वादिगणतः)

	लट्लकारः			लृट्लकारः		
	एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र० पु०	नयति	नयतः	नयन्ति	नेष्यति	नेष्यतः	नेष्यन्ति
म० पु०	नयसि	नयथः	नयथ	नेष्यसि	नेष्यथः	नेष्यथ
उ० पु०	नयामि	नयावः	नयामः	नेष्यामि	नेष्यावः	नेष्यामः

	लङ्लकारः			लोट्लकारः		
	एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र० पु०	अनयत्	अनयताम्	अनयन्	नयतु	नयताम्	नयन्तु
म० पु०	अनयः	अनयतम्	अनयत	नय	नयतम्	नयत
उ० पु०	अनयम्	अनयाव	अनयाम	नयानि	नयाव	नयाम

विधिलिङ्

प्र० पु०	नयेत्	नयेताम्	नयेयुः
म० पु०	नयेः	नयेतम्	नयेत
उ० पु०	नयेयम्	नयेव	नयेम

नी (नय्) (आत्मनेपदे)

	लट्लकारः			लृट्लकारः		
	एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र० पु०	नयते	नयेते	नयन्ते	नेष्यते	नेष्येते	नेष्यन्ते
म० पु०	नयसे	नयेथे	नयध्वे	नेष्यसे	नेष्येथे	नेष्यध्वे
उ० पु०	नये	नयावहे	नयामहे	नेष्ये	नेष्यावहे	नेष्यामहे

	लङ्लकारः			लोट्लकारः		
प्र० पु०	अनयत	अनयेताम्	अनयन्त	नयताम्	नयेताम्	नयन्ताम्
म० पु०	अनयथाः	अनयेथाम्	अनयध्वम्	नयस्व	नयेथाम्	नयध्वम्
उ० पु०	अनये	अनयावहि	अनयामहि	नयै	नयावहै	नयामहै

विधिलिङ्

प्र० पु०	नयेत	नयेताम्	नयेरन्
म० पु०	नयेथाः	नयेथाम्	नयेध्वम्
उ० पु०	नयेय	नयेवहि	नयेमहि

एवमेव भज् धातोः अपि रूपाणि भवति।

परस्मैपदे–

लट्लकारः– भजति .....; लृटलकारः– भक्ष्यति .....

लङ्लकारः– अभजत् .....; लोट्लकारः– भजतु .....

विधिलिङ्– भजेत् .....।

आत्मनेपदे–

लट्लकारः– भजते .....; लृटलकारः– भक्ष्यते .....

लङ्लकारः– अभजत् .....; लोट्लकारः– भजताम् .....

विधिलिङ्– भजेत .....।

लभ् (भ्वादिगणतः) आत्मनेपदी

	लट्लकारः			लृट्लकारः		
	एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र० पु०	लभते	लभेते	लभन्ते	लप्स्यते	लप्स्येते	लप्स्यन्ते
म० पु०	लभसे	लभेथे	लभध्वे	लप्स्यसे	लप्स्येथे	लप्स्यध्वे
उ० पु०	लभे	लभावहे	लभामहे	लप्स्ये	लप्स्यावहे	लप्स्यामहे

	लङ्लकारः			लोट्लकारः		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्र० पु०	अलभत	अलभेताम्	अलभन्त	लभताम्	लभेताम्	लभन्ताम्
म० पु०	अलभथाः	अलभेथाम्	अलभध्वम्	लभस्व	लभेथाम्	लभध्वम्
उ० पु०	अलभे	अलभावहि	अलभामहि	लभै	लभावहै	लभामहै

विधिलिङ्

प्र० पु०	लभेत	लभेयाताम्	लभेरन्
म० पु०	लभेथाः	लभेयाथाम्	लभेध्वम्
उ० पु०	लभेय	लभेवहि	लभेमहि

एवमेव सेव्धातोः रूपाणि भवन्ति।

सेव् (भ्वादिगणतः) आत्मनेपदी–

लट्लकारः– सेवते .....; लृट्लकारः– सेविष्यते .....

लङ्लकारः– असेवत .....; लोट्लकारः– सेवताम् .....

विधिलिङ्– सेवताम् .....।

याच् (भ्वादिगणतः) उभयपदी परस्मैपदे

	लट्लकारः			लृट्लकारः		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्र० पु०	याचति	याचतः	याचन्ति	याचिष्यति	याचिष्यतः	याचिष्यन्ति
म० पु०	याचसि	याचथः	याचथ	याचिष्यसि	याचिष्यथः	याचिष्यथ
उ० पु०	याचामि	याचावः	याचामः	याचिष्यामि	याचिष्यावः	याचिष्यामः

	लङ्लकारः			लोट्लकारः		
प्र० पु०	अयाचत्	अयाचताम्	अयाचन्	याचतु	याचताम्	याचन्तु
म० पु०	अयाचः	अयाचतम्	अयाचत	याच	याचतम्	याचत
उ० पु०	अयाचम्	अयाचाव	अयाचाम	याचानि	याचाव	याचाम

विधिलिङ्

प्र० पु०	याचेत्	याचेताम्	याचेयुः
म० पु०	याचेः	याचेतम्	याचेत
उ० पु०	याचेयम्	याचेव	याचेम

आत्मनेपदे

लट्लकारः– याचते .....; लृटलकारः– याचिष्यते .....

लङ्लकारः– अयाचत .....; लोट्लकारः– याचताम् .....

विधिलिङ्– याचेत .....।

'भज्' धातुः अपि उभयपदी। भज् धातोः रूपाणि अपि 'याच्' धातोः रूपाणि इव भवन्ति। केवलं लृट्लकारे भिन्नता वर्तते

परस्मैपदे–

लट्लकारः– भजति .....; लृटलकारः– भजिष्यति.....

लङ्लकारः– अभजत् .....; लोट्लकारः– भजतु .....

विधिलिङ्– भजेत् .....।

आत्मनेपदे–

लट्लकारः– भजते .....; लृटलकारः– भक्ष्यते .....

लङ्लकारः– अभजत .....; लोट्लकारः– भजताम् .....

विधिलिङ्– भजेत .....।

पाठगतप्रश्नाः 22.2

1. (क) चारुदत्तस्य गृहे चौरः किं चिन्तयित्वा आगतः?

   (ख) तस्य चौरकर्मणा चारुदत्तः कथं 'कृतार्थः' अभवत्?

   (ग) उज्जयिन्यां कः अस्माकं गृहवैभवं न जानाति?

   (घ) धूता चारुदत्तं चरित्रेण परिक्षतं कथं मन्यते?

   (ङ) धूतया स चारित्रपरिक्षतेन कथं रक्षितः?

2. चारुदत्तस्य मतेन दरिद्रेषु किं दुर्लभम् भवति?

   (क) धनम् (ख) सत्यम् (ग) बुद्धिः (घ) धैर्यम्

3. चारुदत्तः नाहं दरिद्रः इति किमर्थं कथयति?

   (क) तस्य विभवानुगता भार्या पत्नी

   (ख) तस्य सुख दुःख सुहृत् अस्ति

   (ग) तस्य सत्यं न परिभ्रष्टम्

   (घ) तस्य उपर्युक्तं सर्वं विद्यते

22.4 किम् अधिगतम्

- चारुदत्तः सत्यप्रियः सच्चरित्रः धनलोभात् विरक्तः अस्ति।
- विदूषकः चारुदत्तस्य हास्यप्रियः सखा अस्ति। तस्य नाम मैत्रेयः अस्ति।
- चारुदत्तस्य पत्नी आर्यधूता अस्ति। सा पतिव्रता सम्माननीया गृहिणी अस्ति।
- आर्यधूता पत्युः यशः रक्षार्थं स्वप्रियम् आभूषणं वसन्तसेनायै प्रयच्छति।
- नाट्यांशस्य सारम् अतीव मनोरञ्जकम् अस्ति।
- लोट्लकारक्रियापदानां लङ्लकारे परिवर्तनं कर्तुं शक्यते।
- स्वस्ति, अलम् (पर्याप्त्यर्थे) पदयोः योगे चतुर्थी, अलम् (निषेधार्थे) तृतीया भवति। 'कृते' योगे तु षष्ठी।
- पणवः, मृदङ्गः, वीणा वाद्ययन्त्राणि सन्ति।

टिप्पणी

22.5 योग्यताविस्तारः

(क) मृच्छकटिकम्– संस्कृतसाहित्यनाट्यजगति मृच्छकटिकम् नाटकम् अन्यतमं वर्तते। इदं नाटकम् एकं प्रकरणं वर्तते। प्रकरणस्य वृत्तम् लौकिकम् कविकल्पितं च भवति। अस्य नायकः चारुदत्तः धीरप्रशान्तलक्षणयुक्तः मध्यमकुलस्य सामान्यः जनः वर्तते। उदारतया दानशीलतया च सः निर्धनः जायते। नाटके चौरसेवकशाकटिकचाण्डालादीनि सामान्यपात्राणि सन्ति। नायिका वसन्तसेना अपि एका गणिका अस्ति। नाटककारः अस्मिन् नाटके सामान्यजीवनस्य यथार्थचित्रणं कृतवान्।

(ख) शूद्रकः मृच्छकटिकनाटकस्य रचयिता शूद्रकः एकः राजा आसीत्। सः धर्मशास्त्रे, द्यूतकलायां, चौर्यकलायां, लोकविद्यायां च निष्णातः आसीत्। शूद्रकस्य स्थितिकालः तृतीयशताब्दी मन्यते। अयं नाटककारः भारतस्य दक्षिणतः प्रतीयते।

(ग) भावविस्तारः

दृश्यम् लोकोक्तयः सूक्तयः

(क) आपणान्तररथ्या विभागेषु सुखं कुक्कुराः अपि सुप्ताः। अर्धरात्रेः परम् एतत् दृश्यम् कुक्कुराः अपि सुखेन सुप्ताः। निःशब्दा रात्रिः।

(ख) अलं सुप्तजनं प्रबोधयितुम्।

(ग) न जाने कपटशयितं परमार्थसुप्तम् वा।

(घ) इदानीं विक्रीतपण्य इव वणिजः सुखं स्वप्स्यामि। (निश्चिन्तः)

(ङ) किम् अहं परिहासस्यापि देशकालं न जानामि।

(च) सत्यञ्च न परिभ्रष्टं यद्दरिद्रेषु दुर्लभम्।

(छ) पतिव्रताः नार्यः दुर्लभाः लोके।

(ज) भर्तुर्भोग्यं तु नार्येका प्राप्नोति पुरुषर्षभ।

(झ) दातव्यमन्नं विधिवत् सत्कृत्य न तु लीलया। (बालकाण्डम् 93/94)

(ञ) कालो हि दुरतिक्रमः। (अरण्यकाण्डम् 68/29)

भाषाविस्तारः

(क) उपपदविभक्तयः

कारकविभक्तिः – कारकम् आश्रित्य या विभक्तिः भवति, सा कारकविभक्तिः कथ्यते।

यथा– (i) त्वम् कलमेन लिखसि।

(ii) वनात् कः आगतः?

अत्र क्रमशः करणकारकम् अपादानकारकं चास्ति। अतः तत्र तृतीया पञ्चमी विभक्ती भवतः। यतः करणकारके तृतीया भवति, अपादानकारके (पृथगर्थे) पञ्चमी भवति।

उपपदविभक्तिः – यदा किमपि पदम् आश्रित्य कारकविभक्तिः न भवति, अन्या विभक्तिः भवति, तदा उपपदविभक्तिप्रयोगः कथ्यते।

यथा– द्वितीया उपपदविभक्तिः (i) विद्यां विना ज्ञानं न भवति।

तृतीया उपपदविभक्तिः (ii) पुत्रेण सह आगतः पिता।

(iii) तव बलेन सदृशः कः अस्ति?

अत्र 'विना' 'सह', 'सदृशः' एते उपपदानि सन्ति। अतः तत्र क्रमशः द्वितीया तृतीयाविभक्ति दृश्यते।

चतुर्थी उपपदविभक्तिः (i) गुरवे नमः। अत्र 'नमः' योगे चतुर्थी।

(ii) पुत्राय क्रुध्यति। अत्र 'क्रुध्' धातुयोगे चतुर्थी।

पंचमी उपपदविभक्तिः (i) विद्यालयात् बहिः वृक्षाः सन्ति।

(ii) अशोकः श्यामात् पटुः।

अत्र 'बहिः' पदयोगे पञ्चमी। तुलना एकस्य उत्कर्षज्ञापने च पञ्चमी भवति।

षष्ठी उपपदविभक्तिः (i) कृत् प्रत्ययययोगे (ल्युट्) षष्ठी भवति।

कष्टं न्यासस्य रक्षणम्।

(ii) निर्धारण अर्थे षष्ठी वा सप्तमी भवति।

यथा (i) पुष्पाणाम्/पुष्पेषु कमलं श्रेष्ठम् (षष्ठी/सप्तमी)

(ii) सर्वछात्रेषु कुशलः (सप्तमी)

(ii) निपुणः, पदयोगेऽपि सप्तमी भवति।

युद्धे निपुणः।

अत्र विशिष्टम् अवधेयम् अस्ति–

यत्र कारक विभक्तिः प्राप्ता भवति, उपपदविभक्तिः अपि प्राप्ता भवति, तदा उपपदविभक्तिः एव भविष्यति।

लोट्लकारस्य वाक्यानां लङ्लकारे परिवर्तनम्। लोट्लकारः आज्ञायां भवति। लङ् च भूतकाले। भाषादृष्ट्या अस्य परिवर्तनम् महत्त्वपूर्णम्।

यथाः पिता छात्रम् आदिशति – त्वम् विद्यालयं गच्छ। (लोट्लकारः)

तदा छात्रः पितरं वदति – अहं विद्यालयम् अगच्छम्। अर्थात् आदेशात् पूर्वमेव आज्ञापालनं कृतवान्।

22.6 पाठान्तप्रश्नाः

1. (क) चारुदत्तः मित्रेण सह गृहं विलम्बेन कथम् आगतवान्?

(ख) विदूषकः सुवर्णभाण्डं स्वप्ने कस्मै दत्तवान्?

(ग) शर्विलकः किं किं वाद्ययन्त्रम् चारुदत्तस्य गृहे दृष्टवान्?

(घ) उज्जयिन्यां सर्वे चारुदत्तस्यविषये किं जानन्ति?

(ङ) चारुदत्तस्य हस्ते कस्याः न्यासः आसीत्?

(च) आर्याधूता वसन्तसेनायाः न्यासरूपे प्रदत्ताः अलंकाराः अपहृताः इति श्रुत्वा किं कथयति?

2. अधोलिखितगुणाः कस्य कस्य चरित्रेण सम्बद्धाः? लिखत।

सत्यवादिता, मैत्रीभावः, त्यागशीलता, धैर्यम्, सेवकान् प्रति कारुण्यम्, सुखदुःखयोः समत्वम्, सहिष्णुता।

(क) चारुदत्तः (i) ..... (ii) .....

(ख) विदूषकः (iii) ..... (iv) .....

(ग) शर्विलकः (v) ..... (vi) .....

(घ) धूता (vii) ..... (viii) .....

3. चारुदत्तस्य चरित्रचित्रणं स्वेच्छया पञ्च/षट् वाक्येषु लिखत।

4. 'आर्यधूता' कीदृशी गृहिणी अस्ति? चतुर्वाक्येषु लिखत।

5. कोष्ठकान्तर्शब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कुरुत–

(क) स्वस्ति ..... एष आगतोऽस्मि। (भवत्)

(ख) भोः अलं .....। (परिहास)

(ग) ततः सः स्व ..... किं कथयिष्यति। (मित्र)

(घ) ..... कृते प्रतीच्छ इमां रत्नमालिकाम्। (तत्)

(ङ) वयस्य! दिष्ट्या प्रियं ..... निवेदयामि। (युष्मद्)

6. निर्दिष्टधातुभिः क्त प्रत्ययोगेन वाक्यपूर्तिं कुरुत

(क) आपणेषु कुक्कुराः सुखं .....। (स्वप् + क्त)

(ख) ..... आसने आस्यताम्। (वि + स्तृ + क्त)

(ग) कथं ..... भवता? (वि + स्मृ + क्त)

(घ) वसन्तसेनया स्वर्णाभूषणानि चारुदत्ताय न्यासरूपेण .....। (दा + क्त)

7. निर्देशानुसारम् उपयुक्तैः धातुरूपैः रिक्तस्थानानि पूरयत

(i) पिता पुत्रीं पाठशालां .....। (नी– लट्लकारः)

(ii) ऋषयः जनान् सन्मार्गम् .....। (नी– लङ्लकारः)

(iii) छात्रः परिश्रमेण विद्यां .....। (लभ्–विधिलिङ्)

(iv) सुयोग्याः विद्यार्थिनः पुरस्कारान् .....। (लभ्–लृट्लकारः)

(v) त्वं स्वराष्ट्रं मातृवत् .....। (सेव्–लोट्लकारः)

(vi) वयं स्वपितरौ अहर्निशं .....। (सेव्–लट्लकारः)

(vii) याचकाः धनिकान् धनम् .....। (याच्–लङ्लकारः)

(viii) त्वं कमपि किमपि न .....। (याच्–लोट्लकारः)

(ix) अभितप्तम् अयः अपि मार्दवं .....। (भज्–लट्लकारः)

(x) भक्ताः परमेश्वरं .....। (भज्–विधिलिङ्)

22.7 उत्तराणि

22.3 बोधप्रश्नाः

1. (ख)
2. (ग)
3. (ग)
4. (क)
5. (ग)
6. (घ)

पाठगतप्रश्नाः

22.1 1. (क) विदूषकं चारुदत्तं च

(ख) निःश्वासः, दृष्टिर्गाढ़निमीलिता

(ग) भवनप्रत्ययात्

(घ) यतः चारुदत्तस्य गृहे वाद्ययन्त्राणि पुस्तकानि एव तेन दृष्टानि न किमपि मूल्यवान् वस्तु।

(ङ) मैत्रेयस्य पार्श्वे सुवर्णभाण्डं वर्धमानकेन दत्तम्।

2. क 3. ग

22.2 1. (क) चौर्यं कर्तुम्

(ख) पत्न्याः अनुकूलतां दृष्ट्वा कृतार्थः भवति।

(ग) सुहृद्जनः

(घ) न्यासस्य रक्षणाभावेन

(ङ) सा रत्नावली स्व अमूल्यम् आभूषणं पत्युः यशो रक्षार्थं दत्तवती।

2. (ख)

3. (घ)

22.6 पाठान्तप्रश्नाः

1. (क) चारुदत्तः सङ्गीतगोष्ठ्यां भागं गृहीत्वा विलम्बेन आगतवान्।
   (ख) शर्विलकाय
   (ग) पणव; मदृङ्गम् वीणा
   (घ) चारुदत्तस्य गृहवैभवम्
   (ङ) वसन्तसेनायाः
   (च) आर्यधूता कथयति आर्यपुत्रः चारित्रेण परिक्षतः।
2. (क) चारुदत्तः सत्यवादिता, सुखदुःखयोः समत्वम् सेवकान् प्रति कारूण्यम्।
   (ख) विदूषकः मैत्रीभावः
   (ग) शर्विलक, चौर्यम्
   (घ) धूता – त्यागशीलता, सहिष्णुता
3. स्वेच्छया पञ्च/षट्वाक्यानि लेखनीयानि।
4. स्वेच्छया चरित्रचित्रणं चतुर्वाक्येषु कुरुत।
5. (क) भवत्यै
   (ख) परिहासेन
   (ग) मित्राय
   (घ) तस्य
   (ङ) तुभ्यम्
6. (क) सुप्ताः (ख) विस्तीर्णे (ग) विस्मृतम् (घ) दत्तनि
7. (i) नयति अथवा नयते
   (ii) अनयन् अथवा अनयन्त
   (iii) लभेत
   (iv) लप्स्यन्ते
   (v) सेवस्व
   (vi) सेवामहे
   (vii) अयाचन् अथवा अयाचन्त
   (viii) याच अथवा याचस्व
   (ix) भजति अथवा भजते
   (x) भजेयुः अथवा भजेरन्

टिप्पणी

309sk23

23

हृदय–परिवर्तनम्

संसारे सज्जनाः अपि भवन्ति दुर्जनाश्चापि। दुर्जनास्तु प्रायः परपीडायाम् आनन्दम् अनुभवन्ति। परम् एतादृशाः अपि प्रसङ्गाः उपलभ्यन्ते यत्र सज्जनानां महापुरुषाणां संगत्या तेषाम् दुष्टानाम् हृदयपरिवर्तनम् जातम्, ते कुमार्गं त्यक्त्वा सत्पथगामिनः अभवन्। अस्मिन 'हृदयपरिवर्तनम्' इति नाट्यांशेऽपि वयं पठामः यत् भगवतः बोधिसत्त्वस्य जन्मान्तरे अद्भुतबलिदानं दृष्ट्वा दुष्टाः राक्षसाः कथं क्रूरतां त्यक्त्वा सहृदयाः जाताः इति।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- 'हृदयपरिवर्तनंम्' इति नाट्यांशस्य अभिनयं कर्तुं शक्ष्यति;
- राज्ञः मैत्रबलस्य चरित्रचित्रणं करिष्यति;
- मैत्रबलस्य त्यागभावनायाः उल्लेखं करिष्यति;
- अहिंसायाः महत्त्वं लेखिष्यति;
- समस्तपदानाम् विशेषतः बहुव्रीहिसमासस्य विग्रहं करिष्यति;
- 'तव्यत्' प्रत्ययस्य त्रिषु लिङ्गेषु प्रयोगं करिष्यति;
- दा, धा धात्वोः रूपाणि प्रयोक्तुं समर्थः भविष्यति।

क्रियाकलापः

23.1

23.2

23.3

उपरिदत्तानि चित्राणि दृष्ट्वा मञ्जूषायां प्रदत्तैः वाक्यैः अधोलिखितां कथां पूरयत–

एकः अङ्गुलिमाल नामकः लुण्ठकः आसीत्। सः नवनवतिः अङ्गुलीनां मालाम् धारयति स्म। सः अङ्गुलीनां शतकं धारयितुं कृतप्रतिज्ञः आसीत्। सः लुण्ठकः एकदा गच्छन्तं बुद्धम् उच्चैः उच्चार्य कथयति 1..... .....। मम मालायां शतमा अङ्गुली तवैव भविष्यति। 2..... परं 3..... इति बुद्धः पृच्छति। अहं भवतः साहसं दृष्ट्वा 4.....। तदा महात्मा बुद्धः उपदिशति 5..... ....., 6.....।

मञ्जूषा

अहं तु स्थितः अस्मि, तिष्ठ अग्रे मा गच्छ। त्वं कदा विरतः भविष्यसि?
प्राणिवधं त्यज, नतमस्तकः अस्मि, अहिंसा परमो धर्मः।

23.1 मूलपाठः

हृदय–परिवर्तनम्

सर्वप्रथमं पठनात् पूर्वम् अत्र वयं पात्राणां परिचयं प्राप्नुमः।

मैत्रबलः –राजा

पञ्चयक्षाः–रूष्टेन यक्षेश्वरेण स्वराज्यात् निष्कासिताः अपराधिनः, ब्राह्मणवेषधारिणः यक्षाः।

गोपालकः– राज्ञः मैत्रबलस्य राज्ये एकः वंशीवादकः।

मन्त्री –राज्ञः मैत्रबलस्य एकः मन्त्री।

इदानीम् मूलपाठं पठामः।

(स्थानम् – घोरम् अरण्यम्)

(समयः – प्रातर्वेला)

(ततः प्रविशन्ति धृतब्राह्मणवेशाः पञ्च यक्षाः)

प्रथमः – अहो श्वापदभूयिष्ठोऽयं वनप्रदेशः। अत्र तु रविकिरणाः अपि आशङ्किताः इव प्रविशन्ति।

द्वितीयः – सत्यं वदसि। अत्र सम्प्राप्ता वयं स्वैरं विहर्तुं प्रभविष्यामः। मैत्रबलस्य राज्ये तु प्राणधारणम् अपि दुष्करं जातम् भोजनाभावात्।

तृतीयः – (उच्चैः प्रहसन्) शाकभोजिनां मध्ये कुतोऽस्माकं पिशिताशनानां जीवन–निर्वाहः?

चतुर्थः – अस्माकम् अपराधेनैव रुष्टेन यक्षेश्वरेण वयं स्वराज्यात् निर्वासिताः।

पञ्चमः – किं वृथा चिन्तनेन? अत्रैव वने स्वेच्छया विहरिष्यामः।

(सहसा वंशीध्वनिः गुञ्जति)

सर्वे यक्षाः – कुतोऽस्मिन् घोरे विपिने संगीतकम्? कोऽयम् वंशीवादकः? एत, एत पश्यामः। ध्वनिम् अनुसरन्तो यामः।

प्रथमः – तर्कयामि, नातिदूरे कश्चन मुरलीं वादयति।

द्वितीयः – अहो, ज्ञायतेऽधुना यत्रैता गावो विचरन्ति, तत्समीपे एव तेन मुरलीवादकेन भवितव्यम्।

तृतीयः यक्षः– पश्यत, पश्यत वटतरुतले निषण्णः कश्चिद् युवा वंशीं ध्वनति। तमुपसर्पामः।

शब्दार्थः
घोरम् = भयंकर
अरण्यम = जंगल
प्रातवेला = सुबह का समय
धृतब्राह्मणवेशः = ब्राह्मण का वेष धारण किए हुए
श्वापदभूयिष्ठः = अनेक पशुओं से युक्त
स्वैरम् = स्वेच्छापूर्वक
विहर्तुं प्रभविष्यामः = विहार कर सकेंगे
दुष्करंजातम् = कठिन हो गया है
प्रहसन् = हंसते हुए
शाकभोजिना = साग खाने वालों के
पिशिताशनानां = कच्चा मांस खाने वालों का
रुष्टेन = नाराज हुए
निर्वासिताः = निकाल दिए गए हैं
वृथा = व्यर्थ ही
विहरिष्यामः = विहार करेंगे
वंशीध्वनिः = बांसुरी की आवाज
गु×जति = गूंजती है
विपिने = जंगल में
वंशीवादकः = बांसुरी बजाने वाला
यामः = जाते हैं
तर्कयामि = सोचता हूँ
वादयति = बजा रहा है
अधुना = अब
ज्ञायते = पता चला है

23.4

द्वितीयं दृश्यम्

(ततः प्रविशति यथा निर्दिष्टकर्मा गोपालकः)

गोपालकः – (ब्राह्मणवेशान् यक्षान् विलोक्य)

स्वागतम्, अत्र भवताम्। कुतः समायाताः भवन्तः?

यक्षाः – अरण्यदर्शनोत्सुकाः वयम् इहागताः स्मः। परं त्वम् एकाकी विचरन्, वंशीं च वादयन् भीतिं न अनुभवसि।

गोपालकः – कुतो भीतिः? भगवति बोधिसत्वे मैत्रीबले राज्यं शासति सर्वाः प्रजाः निर्भयाः सन्ति। कश्चित् कमपि पीडयितुं न प्रभवति।

यक्षाः – किम् राक्षसाः अपि?

गोपालकः – अथ किम्। यदि कौतूहलं, श्रूयताम्।

सर्वप्राणिषु धृतमैत्रीभावो मैत्रबलो हि जितेन्द्रियगणः, करुणापरिपूर्णमनाः, अहिंसायां च प्रतिष्ठितो वर्तते। मैत्री एव तस्य राज्ञः बलम्। क्रोधं तु स जानाति एव न। सैन्यसंगठनम् आचाररक्षणार्थमेव। तस्य महास्वस्त्ययनेन परिरक्षितं प्रजाजनम् अकारणद्वेषपराः यक्षराक्षसाः अपि हिंसितुं न प्रभवन्ति। मृदुभाषी सः, सम्यक् च पृथ्वीं पालयति।

यक्षाः – यथार्थं स्यात् त्वदीयं कथनम्। अस्तु, त्वमत्र धेनूश्चारय, वंशीं च वादय वयमग्रे गच्छामः। (सर्वे निष्क्रान्ताः)

तृतीयं दृश्यम्

(स्थानम्– राजसभा। समयः अपराह्नवेला। भूपतिः सिंहासनम्– धितिष्ठति,।

(द्वारपालः प्रविश्य)

गावः = गौएं
मुरलीवादकेन भीवतव्यम् = मुरली बजाने वाला होगा
पश्यत = देखो
निषण्णः = बैठा हुआ
युवा = नौजवान
तमुपसर्पामः = उसके पास जाते हैं
यथानिर्दिष्टकर्मा = जैसा निर्देश दिया गया है वैसे ही कार्य करते हुए
समायाताः = आए हैं
अरण्यदर्शनोत्सुकः = जंगल देखने की उत्सुकता से
एकाकी = अकेले
भीतिम् = भय को
राज्यंशासति = राज्य पर शासन करने पर
पीडयितुं न प्रभवति = तंग नहीं कर सकता
धृतमैत्रीभावः = मित्रता का भाव धारण किए हुए
श्रूयताम् = सुनिए
करुणापरिपूर्णमनाः = करुणा से जिसका मन भरा हुआ है
अहिंसायां प्रतिष्ठितः = किसी को न मारने में लगा हुआ
स्वस्त्ययनेन = रक्षक से
अकारणद्वेषपराः = बिना कारण द्वेष से युक्त
सम्यक् = अच्छी तरह से
यथार्थः = सच
त्वदीयं = तुम्हारा
धेनूः = गायों को
निष्क्रान्ताः = निकल जाते हैं
अपराह्णवेला = दोपहर का समय

द्वारपालः – जयतु महाराजः। केचन ब्राह्मणवेशाः पञ्च पथिकाः भोजनेच्छया द्वारदेशे तिष्ठन्ति।

मैत्रबलः – किम् अतिथयः। भोजनेच्छया बहिः तिष्ठन्ति सादरम् प्रवेशय।

(राजसभां प्रविश्य)

एकः ब्राह्मणः– महाराजो विजयताम्। दूरात् सम्प्राप्ताः वयम् क्षुधया पिपासया च पीडिताः स्मः। युष्माकं गुणगणख्यातिम् औदार्यं च निशम्य इह समागताः।

मैत्रबलः – अतिथीनां सेवा अस्माकं धर्मः। यथेच्छं भोज्यं पेयं च लप्स्यध्वे। (मन्त्रिणं प्रति) मन्त्रिवर। एतेषां भोजनादिकस्य व्यवस्था क्रियताम्।

मन्त्री – यथाज्ञापयति देवः।

(निष्क्रम्य पुनः प्रविश्य)

देव! भोजनम् आनीतम्।

ब्राह्मणाः – (राजोचितं विविधं भोजनं दृष्ट्वा) वयम् नैतद् भक्षयिष्यामः। वयं यक्षाः। मांसं रुधिरमेव अस्माकं प्रियं भोजनम्। तदेव उपनीयताम्।

(सहसा ते दीर्घाकारं विकरालं रूपं धारयन्ति)

राजा – आत्मगतम्। सम्प्रति किं करवाणि? एतेषां भोजनार्थे अन्येषां जीवानाम् हिंसा भविष्यति। न मे रोचते जीवहिंसा। (क्षणं विचिन्त्य) भवतु, दृष्टः उपायः। अहं स्वदेहस्य मांसेन एतान् तर्पयामि। (प्रकाशम्) मन्त्रिवर! अमूनि मांसानि शोणितानि च लोकस्य हितार्थमेव धृतानि। अद्य यदि तेषाम् उपयोगः अतिथिकृते भवेत् तत् तु मम सौभाग्यम् अस्ति। अतः अहं स्वशरीरेण आतिथ्यं कर्त्तुमिच्छामि।

अधितिष्ठति = बैठता है
प्रविश्य = प्रवेश करके
प्रवेशय = प्रवेश कराओ
विजयतम् = जय हो
क्षुधया = भूख से
पिपासया = प्यास से
ख्यातिम् = प्रसिद्धि को
निशम्य = सुनकर
भोज्यम् = खाने योग्य
पेयम् = पीने योग्य
निष्क्रम्य = निकलकर
उपनीयताम् = लाइए
दीर्घाकारम् = लम्बे आकार वाले
विकरालं रूपं = भयंकर रूप को
सम्प्रति = अब
मे = मुझे
जीवहिंसा = प्राणियों का विनाश
क्षणम् = थोड़ी देर
विचिन्त्य = सोचकर
तर्पयामि = तृप्त करता हूँ
अमूनि = ये
शोणितानि = रक्त
धृतानि = धारण किए गए हैं
आतिथ्यम् = अतिथि सत्कार
अनवेक्षितुम् = उपेक्षा करने के लिए
प्रदानहर्षातिशयात् = दान देने के लिए हर्षातिरेक में (अत्यधिक खुशी में) संविद्यमानम् = वस्तु के मौजूद रहने पर, विस्पष्टम् = साफ साफ
याचितः = मांगने पर
सिराः = नाड़ियां, धमनियां
मोचयितुम् = हटाने के लिए
निशितम् = तीखे
निस्त्रिंशम् = शस्त्र, तलवार का
मांसच्छेदवेदनाभिः = मांस काटने की पीड़ा से, विरम्यताम् = रुक जाइए
नः = हमारे, क्षमस्व = क्षमा करें
प्राणिहिंसाम् = प्राणियों के विनाश को, परद्रव्य लोभम् = दूसरे के धन के प्रति लालच को
विषवत् = जहर की तरह
त्यजन्तु = छोड़ दें
प्रतिजानीमः = प्रतिज्ञा करते हैं
स्प्रक्ष्यामः = छुएंगे
अन्तर्हिता भवन्ति = छिप जाते हैं
दैवकृपया = ईश्वर की कृपा से
अक्षतदेहः = स्वस्थ शरीर वाला

मन्त्री – नार्हति देवः प्रदानहर्षातिशयात् अनुरक्तानाम् प्रजानां हिताहितम् अनवेक्षितुम्। अपि च पञ्चानाम् एतेषां कृते जगत् अनर्थीकर्त्तव्यम् इति कोऽयं धर्ममार्गो देवस्य।

राजा – श्रूयताम्

संविद्यमानं नास्तीति ब्रूयादस्मद्विधः कथम्।
न दास्यामीत्यसत्यं वा विस्पष्टमपि याचितः।।1।।

तन्न मां वारयितुमर्हन्त्यत्र भवन्तः। वैद्याः आहूयन्ताम् पञ्चसिराः मोचयितुम्।

(वैद्यैः तथा कृते सति राजा स्वयं निशितं निस्त्रिंशमादाय स्वमांसानि छित्त्वा तेभ्यः प्रयच्छति)

यक्षाः – (आत्मगतम्) अहो विचित्रोऽयं नृपः। मांसच्छेदवेदनाभिः अकम्पमानः प्रसन्नवदनः विराजते। (प्रकाशम्) अलमलं देव विरम्यताम् स्वशरीरपीडाप्रसंगात्। यद्यपि तवायमुद्यमः लोकहितायैव तथापि अज्ञानवशात् स्वहितमपि अपश्यद्भिः यद् अस्माभिः एवं पीडितः भवान् तदर्थं क्षमस्व नः अपराधम्। (राज्ञः पादयोः पतन्ति)

राजाः – यदि भवन्तः अस्मत्प्रियमिच्छन्ति तर्हि अस्मात् क्षणात् प्राणिहिंसाम्, परद्रव्यलोभम्, मद्यपानं निन्दितवचनानि च विषवत् त्यजन्तु।

यक्षाः – प्रतिजानीमः वयम्। न पुनः कदापि मांसम् स्प्रक्ष्यामः। (यक्षाः प्रणम्य प्रदक्षिणां च कृत्वा अन्तर्हिताः भवन्ति)

(आकाशः दुन्दुभिध्वनिना पूरितः। पुष्पवृष्टिः भवति। दैवकृपया मैत्रबलः राजा अक्षतदेहः विराजते।

23.2 बोधप्रश्नाः

1. वाक्यांशान् मेलयत

खण्डः 'क'	**खण्डः 'ख'**
(क) कुतोऽस्मिन् घोरे	(i) वनप्रदेशः
(ख) भगवति बोधिसत्त्वे मैत्रबले राज्यं शासति	(ii) औदार्यं च निशम्य इह
(ग) श्वापदभूयिष्ठोऽयम्	(iii) अकम्पमानः प्रसन्नवदनः
(घ) युष्माकं गुणगणख्यातिम्	(iv) सर्वाः प्रजाः निर्भयाः सन्ति
(ङ) मांसच्छेदवेदनाभिः	(v) विपिने संगीतकम्

2. पाठं पठित्वा रिक्तस्थानानि पूरयत

अत्र तु रविकिरणाः अपि (i) ..... इव प्रविशन्ति। त्वमेकाकी (ii) ..... वंशीं च वादयन् (iii) ..... नानुभवसि। (iv) ..... सेवा अस्माकं धर्मः। वैद्याः (v) ..... सिराः मोचयितुम्। न पुनः कदापि मांसं (vi) .....

3. एतेषां कथनानां कः कः वक्ता?

(क) अस्माकं अपराधेनैव रुष्टेन यक्षेश्वरेण वयं स्वराज्यात् निर्वासिताः।

(ख) तर्कयामि, नातिदूरे कश्चन मुरलीं वादयति।

(ग) स्वागतम्, अत्र भवताम्। कुतः समायाताः भवन्तः?

(घ) किं राक्षसाः अपि?

(ङ) अतिथीनां सेवा अस्माकं धर्मः।

23.3 अधुना अवगच्छामः

प्रथमः अंशः

स्थानम् घोरम् अरण्यम् ..... तमुपसर्पामः।

इदानीं जानीमः च यत् कथं वने पञ्च यक्षाः ब्राह्मणवेशे भ्रमन्ति, एकं वंशीवादकं च पश्यन्ति।

किं भवन्तः जानन्ति यत् महात्मनः बुद्धस्य 'बोधिसत्त्वः' इति अपरं नाम अपि अस्ति? आम् बोधिसत्त्वः इति नाम तु तस्य बौद्धसन्यासिनः भवति यः पूर्णज्ञानस्य उपलब्धेः मार्गे अग्रसरः वर्तते। सः पूर्णबुद्धत्वं प्राप्य जन्म–मरण–दुःखबन्धनात् मुक्तिं (मोक्षं) प्राप्नोति।

बोधिसत्त्वस्य पूर्वजन्मनाम् अनेकाः कथाः विद्यन्ते। बोधिसत्त्वः 'महात्मा बुद्धः' इति नाम्ना प्रसिद्धोऽभूत्। तस्य पूर्वजन्मनां कथाः अपि भवद्भिः श्रुताः पठिताः अपि। ताः कथाः 'जातककथा' इति कथ्यन्ते। एतासां कथानां संग्रहः 'जातकमाला' इति ग्रंथे अस्ति।

बोधिसत्त्वः 'मैत्रबल' इति नाम्ना प्रसिद्धः नृपः आसीत्। तस्य अहिंसाभावेन यक्षाणां हृदयपरिवर्तनं जातम्। तेन च यक्षाः हिंस्रभावं त्यक्तवन्तः।

(1) अहो, श्वापदभूयिष्ठोऽयं वनप्रदेशः

यक्षाः देवयोनिविशेषस्य प्राणिनः भवन्ति। ते धन–संपत्तेः प्रभोः कुबेरस्य सेवकाः सन्ति तस्य कोषं च रक्षन्ति।

भवद्भिः श्रुतम् यत् यक्षाणां निवासः गहने निर्जने वनप्रदेशे भवति। इदं वनम् इयत् सघनम् अस्ति यत्र सूर्यकिरणानां प्रवेशः अपि काठिन्येन भवति। अत्र वन्यपशूनां व्याघ्रादीनां बहुलता वर्तते। यक्षाणां भोजनम् अपि मांसं शोणितादिकं एव भवति। ते पञ्चसंख्याकाः यक्षाः तत्र निर्जनं वनं प्राप्य अति मोदन्ते। ते तत्र स्वेच्छया भ्रमित्वा किमपि अभीष्टं

मांसादिकं च हिंसया प्राप्तुं प्रभवन्ति। अत एव अत्र 'अहो! इति शब्दः तेषां साश्चर्यसुखभावं द्योतयति।

(2) सर्वप्राणिषु धृतमैत्रीभावो ..... च प्रतिष्ठितो वर्तते

गोपालकः मैत्रबलस्य गुणान् वर्णयन् यक्षान् प्रति कथयति यत् मैत्रबलेन इन्द्रियेषु विजयः प्राप्तः। दीनजनान् प्रति तस्य हृदये करुणायाः भावः अस्ति। तस्य मनसि वचसि कर्मणि च जीवहिंसायाः भावः सर्वथा नास्ति, अतः तस्य जीवने अहिंसा प्रतिष्ठिता वर्तते। अन्येऽपि बहवः अहिंसकाः राजानः महापुरुषाः प्रसिद्धाः सन्ति। किं तेषां विषये भवद्भिः पठितम् श्रुतम् वा? आम्, यथा शिवि अशोकः, महात्मागांधी आदयः।

(3) अस्माकं अपराधैनैव ..... स्वराज्यात् निर्वासिताः

वने एकः यक्षः अन्यान् यक्षान् प्रति वदति यत् अस्माभिः जनानाम् ओजांसि हर्त्तुम् अपराधः कृतः, येन अस्माकं यक्षाधिपतिः कुबेरः रुष्टः जातः। स च अस्मान् दण्डरूपेण राज्यात् बहिः निष्कासितवान्। इदं तु सर्वविदितं यत् हिंसकानां कृते अद्यापि दण्डव्यवस्था अस्ति। प्राचीनकाले राज्यात् निष्कासनम् दंडस्य एकः प्रकारः आसीत्। अद्यत्वे हिंसकानां कृते कीदृशाः दंडाः सन्ति? इति विचारयन्तु।

सारः

ब्राह्मणवेशधारिणः पञ्च यक्षाः बुभुक्षिताः पिपासिताः च मैत्रबलनाम्नः राज्ञः राज्ये विचरन्ति। तेषु एकः स्वागमनकारणम् अपराधे कृते यक्षाधिपतिना राज्यनिःसारणं कथयति। तत्रैव वने ते केनापि गोपालकेन वादितं वंशीध्वनिम् शृण्वन्ति। समीपे एव गावः विचरन्ति स्म तेन तैः अनुमितं यत् वंशीवादकः गवां समीपे एव भवेत्। किंचित् कालानन्तरं तृतीयः यक्षः सर्वान् आह्वयति पश्यत, पश्यत, वटवृक्षस्य मूले कोऽपि युवा वंशीं वादयति। तत्पार्श्वे एव चलामः।

ब्राह्मण का वेश धारण किए हुए पाँचों यक्ष भूखे प्यासे मैत्रबल के राज्य में घूम रहे हैं। उनमें से एक अपने आने का कारण अपराध किए जाने पर यक्षाधिपति द्वारा राज्य से बाहर निकाला जाना बताता है। वहीं वन में उन्हें किसी ग्वाले द्वारा बजाई गई वंशी की ध्वनि सुनाई देती है। वहाँ गौएं घूम रही हैं, जिनसे वे अनुमान लगाते हैं कि वंशी वादक गायों के आस पास होना चाहिए। थोड़ी देर बाद तीसरा यक्ष सभी को बुलाता है– देखो, देखो, वट वृक्ष के नीचे कोई युवक बंशी बजा रहा है, चलो उसी के पास चलते हैं।

व्याकरणबिन्दवः

अधः रेखांकितपदेषु बहुव्रीहिसमासस्य तत्पुरुषसमासस्य च विग्रहं ध्यानेन पश्यन्तु।

(i) धृतब्राह्मणवेशाः यक्षाः प्रविशन्ति–धृतः ब्राह्मणस्य वेशः यैः, ते (यक्षस्य विशेषणम्)

(ii) कुतोऽस्माकं पिशिताशनानां जीवननिर्वाहः– पिशितम् अशनम् येषाम्, तेषाम् (अस्माकम् इत्यस्य विशेः)

(iii) भोजनाभावात् प्राणधारणमपि दुष्करं जातम्–भोजनस्य अभावात्।

(iv) वंशीध्वनिः गुञ्जति। वंश्याः ध्वनिः

अत्र वयं पश्यामः यत् बहुव्रीहिसमासे अन्यपदस्य प्रधानता अस्ति तस्मै च अर्थानुसारम् 'तत्' सर्वनाम प्रयुज्यते। यथा प्रथमे उदाहरणे 'ते' सर्वनाम यक्षेभ्यः प्रयुक्तम्। तत्पुरुष समासे च उत्तरपदं प्रधानं भवति। यथा भोजनस्य अभावात् इत्यत्र अभावात् इत्यस्य प्रधानता अस्ति।

तव्यत्–प्रत्ययस्य प्रयोगः

(i) तेन मुरलीवादकेन भवितव्यम्।

तव्यत्– प्रत्यये कर्तृपदं तृतीयाविभक्तौ कर्मपदं प्रथमाविभक्तेः क्रिया च कर्मानुसारं भवति। यदि वाक्ये कर्म नास्ति (यथा उपरि दत्ते उदाहरणे अस्ति) तदा क्रिया सदा नपुंसकलिंगे एकवचने आगच्छति। (यथा अत्र भवितव्यम् इति एकवचने अस्ति।)

(ii) त्वया नित्यं पाठः स्मर्तव्यः।

(iii) अस्माभिः नित्यम् प्रातः गीता पठितव्या।

एतेन भवद्भिः किं ज्ञातम्? आम् तव्यत्प्रत्ययः धातोः भवति। तव्यत् प्रत्ययान्तं पदं विशेषणं भवति।

कर्तृपदे	पुल्लिंगे	नपुंसकलिंगे	स्त्रीलिंगे रूपाणि
	देववत्	फलवत्	लतावत्
	(पठितव्यः)	(पठितव्यम्)	(पठितव्या)

विविधप्रत्ययाः उपसर्गाः च – अत्र क्त, तुमुन् शतृ प्रत्ययानां प्रयोगः अस्ति। एतेषां प्रत्ययानां प्रयोगस्य विषये भवद्भिः पूर्वपाठेषु पठितम्। अत्र प्रकृति प्रत्यय–प्रयोगस्य अभ्यासं कुर्मः।

सम्प्राप्ताः	सम्	+ प्र	+ आप् + क्त प्रत्ययः	
विहर्तुम्	वि	+ √हृ	+ तुमुन् प्रत्ययः (अव्य.)	
प्रहसन्	प्र	+ √हस्	+ शतृ प्रत्ययः (पु.)	
निर्वासितः	निर्	+ √विस्	+ णिच् + क्त प्रत्ययः (पु.)	
अनुसरन्तः	अनु	+ √सृ	+ शतृ प्रत्ययः (पु.)	
निषण्णः	नि	+ √सद्	+ क्त प्रत्ययः (पु.)	

पाठगतप्रश्नाः 23.1

1. एकपदेन उत्तरत्

(क) यक्षाः कीदृशवेषाः आसन्?

(ख) अयम् वनप्रदेशः कीदृशः?

(ग) कासाम् समीपम् मुरलीवादकेन भवितव्यम्?

(घ) कुत्र निषण्णः युवा वंशीं वादयति स्म?

(ङ) केषाम् मध्ये पिशिताशनानां जीवननिर्वाहः कठिनः जातः?

2. विशेषण–विशेष्यस्य मेलनं क्रियताम्

(क) घोरम्	(i) वनप्रदेशः
(ख) रुष्टेन	(ii) विपिने
(ग) अयम्	(iii) मुरलीवादकेन
(घ) घोरे	(iv) यक्षेश्वरेण
(ङ) तेन	(v) अरण्यम्

3. अत्र पदानाम् सत्यम् अर्थम् (✓) इति चिह्नेन, असत्यं तु (×) इति चिह्नेन स्पष्टीकुरुत

(क) अरण्यम् = विपिनम्/स्वैरम्

(ख) गावः = गोपालकाः/धेनवः

(ग) रविः = यक्षः/सूर्यः

(घ) दुष्करम् = कठिनम्/सुकरम्

(ङ) भूयिष्ठः = स्थिरः/बहवः

(च) वेला = समयः/विल्ववृक्षः

द्वितीयः अंशः

ततः प्रविशति यथा निर्दिष्टकर्मा ..... वयमग्रे गच्छामः, सर्वे निष्क्रान्ताः।

अधुना नाटकस्य द्वितीयांशं बोधामः जानीमः च कथम् गोपालकः वने स्वनिर्भीकतां यक्षान् प्रति वर्णयति–

(i) कुतो भीतिः? भगवति बोधिसत्त्वे ..... निर्भयाः सन्ति।

यक्षः वंशीं वादयन्तं युवानं पृच्छति यत् सः धोरे अरण्ये एकाकी विचरन् वंशीं च वादयन् कथं न विभेति? तदा गोपालकः वदति "अत्र पूर्वजन्मनि बुद्धः अस्मिन् जन्मनि मैत्रबलः राजा शासनं करोति। सः धृतमैत्रीभावः, अहिंसायां च प्रतिष्ठितः, क्रोधम् कदापि न

धर्मार्थकाममोक्षाणामारोग्यं
साधनं यतः।
तस्मादारोग्यदानेन
तद्दत्त स्याच्चतुष्टयम्।

करोति। सः मृदुभाषी राजा सम्यक् पृथ्वीं पालयति। अत्र तु सर्वाः प्रजाः निर्भयाः विचरन्ति। भयस्य स्थानमेव न अस्ति अत्र।

(ii) मैत्री एव तस्य राज्ञः बलम् ..... सम्यक् पृथ्वीं पालयति।

गोपालकः राज्ञः मैत्रबलस्य गुणान् यक्षाणां समक्षं वर्णयति "मित्रता तस्य राज्ञः मूलशक्तिः अतएव तस्य सार्थकं नाम अपि मैत्रबलः इति। सः सम्यक् जानाति यत् क्रोधात् एव विनाशः जायते अतः सः क्रोधहीनः निर्भयः चास्ति।

सः पृथ्वीं सम्यक् पालयति। सैन्यं तु राज्यव्यवहारार्थमेव। सः कदापि कठोरवचनं न वदति। इत्थं तस्य चरित्रम् आश्चर्यमयं, लोकोत्तरगुणयुक्तं च। एवंविधस्य राज्ञः राज्ये वयं प्रजाजनाः सुखिनः निर्भयाः च स्मः। तस्य मैत्रीभावबलात् राज्ये राक्षसाः अपि अहिंसकाः जाताः।

(iii) यथार्थं स्यात् त्वदीयं कथनम् ..... वयमग्रे गच्छामः।

गोपालकस्य मुखात् राज्ञः मैत्रबलस्य गुणान् श्रुत्वा अपि यक्षाः तद्वचनेषु विश्वासं न कुर्वन्ति। संभवतः ते राज्ञः शीलं परीक्षितुम् इच्छन्ति। अत एव ते गोपालकं प्रति उपेक्षाभावं दर्शयन्तः कथयन्ति, "त्वमत्र निश्चिन्तः सन् धेनूश्चारय वंशीं च वादय, वयम् तु अग्रे गच्छामः।

व्याकरणबिन्दवः

अत्र प्रदत्तसन्धीनां विषये पूर्वपाठेषु पठितमेव। तेषाम् अत्र पुनः अभ्यासं कुर्मः।

सन्धिच्छेदः

स्वागतम्	=	सु + आगतम्, अ + आ = व–यण् सन्धिः
अरण्यदर्शनोत्सकाः	=	अरण्यदर्शन + उत्सुकाः, अ + उ = ओ गुणसन्धिः
इहागताः	=	इह + आगताः, अ + आ = आ, दीर्घसन्धिः
धेनूश्चारय	=	धेनूः + चारय (श्) चारय विसर्गः श्चुत्वसंधिः च

समस्तपदानां विग्रहः– भवद्भिः बहुव्रीहि–तत्पुरुषसमासयोः विषये प्रथमांशे पठितम्। इदानीं तेषां पुनः अभ्यासं कुर्मः।

धृतमैत्रीभावः	=	धृतः मैत्रीभावः येन सः,	बहुव्रीहिः
निर्भयाः	=	निर्गतं भयम् येभ्यः ते,	बहुव्रीहिः
जितेन्द्रियगणः	=	जिताः इन्द्रियाणां गणाः येन सः,	बहुव्रीहिः
करुणापरिपूर्णमनाः	=	करुणया परिपूर्णं मनः यस्य सः,	बहुव्रीहिः
सैन्यसंघटनम्	=	सैन्यानाम् संघटनम्,	षष्ठी तत्पुरुषः
सर्वप्राणिषु	=	सर्वेषु प्राणिषु	कर्मधारयः
मैत्रबलः	=	मैत्रस्य बलम् यस्मिन् सः,	बहुव्रीहिः

प्रत्ययप्रयोगः– पूर्वपठित कृतप्रत्ययानाम् अत्र पुनः अभ्यासं कुर्मः।

विलोक्य = वि + लोक् + ल्यप् प्रत्ययः

परिरक्षितम् = परि + रक्ष् + क्त प्रत्ययः

हिंसितुम् = हिंस् + तुमुन् प्रत्ययः

निष्क्रान्ताः = निस् + क्रम् + क्त

विचरन् = वि + चर् + शतृ प्रत्ययः (पु.)

वादयन् = वद् + णिच् + शतृ प्रत्ययः (पु.)

भीतिः = भी + क्तिन् प्रत्ययः (ति) भावे अर्थे धातोः क्तिन् प्रत्ययो भवति। 'क्तिन्' प्रयोगे सति शब्दः नित्यस्त्रीलिङ्गः भवति।

सारः

यदा निर्जने वने गोपालकः ब्राह्मणवेषाणाम् यक्षाणाम् स्वागतम् करोति तदा ते वने तस्य निर्भीकतायाः कारणं पृच्छन्ति। सः कथयति यत् राज्ञि बोधिसत्त्वे मैत्रीबले राज्यं शासति, सर्वे जनाः निर्भयाः सन्ति। प्रजाजनम् अकारणं द्वेषपराः राक्षसाः अपि हिंसितुम् न प्रभवन्ति। राज्ञः गुणान् श्रुत्वा ते अग्रे गच्छन्ति।

ग्वाला ब्राह्मण वेशधारी यक्षों को देखकर उनका स्वागत करता है तब वे अकेले घूमते हुए चरवाहे से ''बंसी बजाते हुए तथा जंगल में अकेले घूमते हुए क्या तुझे डर नहीं लगता?'' यक्ष ऐसा प्रश्न पूछते हैं। ग्वाला कहता है कि, ''जब से भगवान बोधिसत्त्व राजा मैत्रबल के रूप में शासन कर रहे हैं, तभी से सारी प्रजा निडर है तथा कोई किसी को पीड़ित नहीं करता। मैत्रबल राजा जितेन्द्रिय है, दयालु तथा अहिंसक प्रवृत्ति का है। मैत्री ही उसका बल है, वह मृदुभाषी है, क्रोध नहीं करता। उसके राज्य में यक्ष–राक्षस भी हिंसा नहीं करते। वह भली प्रकार पृथ्वी का भरण–पोषण करता है।'' यक्ष उसकी बात का विश्वास नहीं करते और वहाँ से चले जाते हैं।

पाठगतप्रश्नाः 23.2

1. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।

   यथा (क) मैत्री एव तस्य राज्ञः बलम्।
   मैत्री एव कस्य राज्ञः बलम्?

   (ख) सर्वप्राणिषु धृतमैत्रीभावो मैत्रबलो अहिंसायां प्रतिष्ठितः वर्तते।

   (ग) यथार्थं स्यात् त्वदीयं कथनम्।

   (घ) त्वमत्र वंशीं वादय।

   (ङ) यदि कुतूहलं तदा युष्माभिः श्रूयताम्।

2. समस्तपदानि रचयत।

(क) धृतः मैत्रीभावः येन सः।

(ख) निर्गतं भयं येभ्यः ते।

(ग) जिताः इन्द्रियाणां गणाः येन सः।

(घ) मैत्री एव बलं यस्य सः।

3. कोष्ठकात् उचितं पदं चित्वा वाक्यानि पूरयत।

(क) राज्ञः ..... मैत्री एव आसीत्। (धनं, बलं)

(ख) त्वम् ..... वादयन् भीतिं न अनुभवसि। (वंशीं, वीणां)

(ग) ..... स्यात् त्वदीयं कथनम्। (यथार्थं, मिथ्या)

(घ) ..... उत्सुकाः वयम् इहागताः। (नगरदर्शनाय, अरण्यदर्शनाय)

(ङ) मैत्रबले राज्यं शासति सर्वाः प्रजाः .....। (भयभीताः, निर्भयाः)

तृतीयः अंशः

स्थानम्– राजसभा ..... अक्षतदेहः विराजते।

इदानीं नाटकस्य अन्तिमे अंशे पठामः यत् बोधिसत्त्वः कथं स्वशरीरेण आतिथ्यं कर्त्तुम् इच्छति।

(i) युष्माकं गुणगणख्यातिम् औदार्यं च निशम्य इह समागताः।

क्षुधापिपासापीडिताः ब्राह्मणवेशाः यक्षाः भोजनं प्रार्थयमानाः राजानं वदन्ति यत् अस्माभिः भवतः दानशीलता–उदारता–करुणा–अंहिसादिगुणानां विषये लोकेभ्यः श्रुतम्। अतएव वयम् अत्र भोजनेच्छया आगताः स्मः। कस्यापि जनस्य गुणविशेषं श्रुत्वा तस्या दर्शनेच्छा भवति एव।

(ii) अतिथीनां सेवा अस्माकं धर्मः।

मैत्रबलः यक्षाणां प्रार्थनां श्रुत्वा कथयति यत् भोजनेच्छया प्राप्ताः यूयम् मम अतिथयः। वयम् अतिथीनां सेवां परमधर्मम् मन्यामहे। अतः अत्र इच्छानुसारम् यूयं भोजनं पेय–पदार्थान् च प्राप्स्यथ। अनेन मैत्रीबलस्य अतिथिसेवकरूपस्य परिचयं प्राप्यते।

(iii) "अहम् स्वदेहस्य मांसेन एतान् तर्पयामि।"

अकस्मात् ब्राह्मणान् अतिथीन् धृतयक्षरूपान् दृष्ट्वा तेषां मांसभोजनेच्छां च श्रुत्वा नृपः किंकर्त्तव्यविमूढः जायते। सः अहिंसकः अस्ति अतः अन्यान् जीवान् हत्वा कथमहम् एतेषां कामनां पूरयेयम् इति चिन्तयति। सहसा तस्य मनसि विचारः स्फुरति–"अहं निजशरीरस्य

मासं रक्तं च दत्त्वा एतान् अतिथीन् तोषयामि यतः न मे रोचते जीवहिंसा। प्रशंसनीयः तस्य अतिथिसेवाभावः अहिंसाभावः च।

(iv) अपि च पञ्चानाम् एतेषां कृते जगत् अनर्थीकर्त्तव्यम् इति कोऽयं धर्ममार्गो देवस्य।

मन्त्री राज्ञे निवेदयति यत् एतेषां पञ्चानाम् यक्षाणाम् कृते भवतः शरीरस्य रक्तमांसदानेन प्राणहानिः सम्भाव्यते। एतादृशेन कृत्येन सकलराज्यस्य महती हानिः क्षतिः च भविष्यति। अतः यक्षाणाम् तोषणस्य एतादृशः विचारः त्यक्तव्यः।

(v) यक्षाः (आत्मगतम्) अहो! विचित्रोऽयं नृपः वेदनाभिः अकम्पमानः प्रसन्न–वदनः विराजते।

यदा मैत्रबलः छुरिकया स्वशरीरस्य कर्तनं करोति यक्षाः तस्य धैर्यम् साहसं च विलोक्य विस्मिताः भवन्ति। ते चिन्तयन्ति कीदृशोऽयं महासत्त्वः। शरीरच्छेदेऽपि वेदनया व्याकुलः न भवति। अपितु अस्य मुखे प्रसन्नता विराजते। नूनम् अयम् कोऽपि महापुरुषः एव।

(vi) श्लोकः

संविद्यमानं नास्तीति ब्रूयादस्मद्विधः कथम्।
न दास्यामीत्यसत्यं वा विस्पष्टमपि याचितः।।

पदच्छेदः– संवद्यिमानम् न अस्ति इति ब्रूयात् अस्मद्विधः कथम्
न दास्यामि इति असत्यम् वा विस्पष्टम् अपि याचितः।।

अन्वयः– संविद्यमानं न अस्ति इति अस्मद्विधः कथं ब्रूयात्? विस्पष्टम् अपि याचितः, न दास्यामि इति वा असत्यं वा कथम् ब्रूयात्?

व्याख्या

राजा मन्त्रिणं प्रति कथयति यत् अस्मादृशः सत्यप्रियः जनः वस्तुनि विद्यमानेऽपि मम समीपे नास्ति इति कथं वदेत्? अर्थात् यदि किमपि वस्तु सत्यवादिनः नरस्य पार्श्वे अस्ति तर्हि न अस्तीति असत्यं वक्तुम् सः न शक्नोति। यतः सत्यवक्ता असत्यं न भाषते। दानशीलः नरः याचितः सन् दानं करोति एव। अर्थात् किमपि कष्टं स्यात्; कापि हानिः स्यात्; प्राणाः प्रणष्टाः भवेयुः; परं स्वदानशीलतां दानी न त्यजति।

सारः

द्वारपालः राजानं सूचयति यत् द्वारे पञ्च पथिकाः भोजनेच्छया तिष्ठन्ति। राजा मन्त्रिणं तेभ्यः भोजनव्यवस्थां कर्त्तुम् आदिशति। किन्तु राजोचितं विविधं भोजनम् दृष्ट्वा ते एतत् न भक्षयन्ति। केवलं मांसरुधिरमेव तेषाम् भोजनम्। सहसा ते दीर्घाकारं विकरालं रूपम् धारयन्ति। राज्ञे जीवहिंसा न रोचते। अतः सः स्वशरीरेण आतिथ्यं कर्त्तुमिच्छति। वैद्यान्

आहूय नृपः स्वयं निशितेन अस्त्रेण स्वमांसानि छित्वा यक्षेभ्यः प्रयच्छति। यक्षाः चिन्तयन्ति यत् कथं विचित्रोऽयं नृपः यः मांसच्छेदवेदनाभिः अपि प्रसन्नमुखः अस्ति। ते क्षमायाचनां कुर्वन्ति, राज्ञः पादयोः च पतन्ति। राजा कथयति यत् यदि ते राज्ञः प्रियम् इच्छन्ति तर्हि प्राणिहिंसा, परद्रव्यलोभं, मद्यपानम्, निन्दावचनानि च विषवत् त्यजन्तु। यक्षाः सहर्षम् एवं कर्त्तुम् प्रतिजानन्ति। राजानम् प्रणभ्य तस्य प्रदक्षिणां च कृत्वा अन्तर्हिताः भवन्ति। दैवकृपया मैत्रबलः राजा अपि पूर्ववत् अक्षतदेहः जातः।

द्वारपाल राजा मैत्रबल को सूचित करता है कि ब्राह्मण वेशधारी पाँच यात्री भोजन की इच्छा से बाहर खड़े हैं। राजा उन्हें सादर अन्दर बुलाता है और मन्त्री को उनके लिए भोजन लाने का आदेश देता है। राजोचित भोजन देखकर वे पांचों यक्ष उठ खड़े होते हैं और कहते हैं, ''हम ऐसा भोजन नहीं खाएंगे। मांस और रुधिर ही हमारा प्रिय भोजन है। हमारे लिए वही लाएं।'' उसी समय वे राक्षसों की भांति अपना विकराल रूप धारण कर लेते है। तभी राजा मैत्रबल, जिसे जीवहिंसा बिल्कुल पसन्द नहीं, अपने शरीर का मांस देकर उन्हें तृप्त करने का निर्णय लेता है। मन्त्री उसे बहुत समझाते हैं कि वे कुछ धन देकर उन्हें विदा कर दें, लेकिन राजा वैद्यों को बुलाने का आदेश देता है वैद्यों के आते ही राजा स्वयं तीखे शस्त्र से अपना मांस काटकर खाने के लिए उन्हें परोसता है। तभी यक्षों की प्रतिक्रिया है कि यह राजा कितना विचित्र है। वे राजा को मांस काटने के लिए मना करते हैं। उनका हृदय बदल जाता है, वे दया से द्रवीभूत हो जाते हैं। राजा के पांव पर गिरकर क्षमायाचना करते हैं। राजा का उनसे कथन है कि यदि वे हम सब का प्रिय करना चाहते हैं तो प्राणियों की हिंसा, मद्यपान और निन्दित वचन जैसे कुकर्म विष की भाँति छोड़ दें। तभी वे राजा को वचन देते हैं कि फिर कभी मांस को छुएंगे भी नहीं। फिर यक्ष, राजा को प्रणाम कर, प्रदक्षिणा करके, अन्तर्ध्यान हो जाते हैं। आकाश में नगाड़े बजते हैं। फूलों की वृष्टि होती है। ईश्वर की कृपा से राजा मैत्रबल का शरीर पूर्णतया स्वस्थ हो जाता है।

व्याकरणबिन्दवः

प्रत्ययप्रयोगः– भवद्भिः ल्यप्–क्त क्त्वा प्रत्ययानां प्रयोगः पूर्वपाठेषु पठितः एव। अत्र तदनुसृत्य प्रकृतिप्रत्ययः। योगस्य अभ्यासं कुर्मः।

प्रविश्य = प्र + विश् + ल्यप् प्रत्ययः

निशम्य = नि + शम् + ल्यप् प्रत्ययः

निष्क्रम्य = निस् + क्रम् + ल्यप् प्रत्ययः

दृष्ट्वा = दृश् + क्त्वा प्रत्ययः

विचिन्त्य = वि + चिन्त् + ल्यप् प्रत्ययः

आदाय = आ + दा + ल्यप् प्रत्ययः

छित्त्वा = छिद् + क्त्वा प्रत्ययः

प्रणम्य = प्र + नम् + ल्यप् प्रत्ययः

कृत्वा = कृ + क्त्वा प्रत्ययः

समागताः = सम् + आ + गम् + क्त प्रत्ययः पुं. प्रथमा बहुवचनम्।

आनीतम् = आ + नी + क्त प्रत्ययः नपुं. प्रथमा एकवचनम्।

दृष्टः = दृश् + क्त प्रत्ययः, पुं. प्रथमा एकवचनम्

अनुरक्तानाम् = अनु + रञ्ज् + क्त प्रत्ययः पुं. षष्ठी बहुवचनम्

याचितः = याच् + क्त प्रत्ययः पुं. प्रथमा एकवचनम्

विस्पष्टम् = वि + स्पश् + क्त प्रत्ययः नपुं. प्रथमा एकवचनम्

पूरितः = पूर् + क्त प्रत्ययः पुं. प्रथमा एकवचनम्

समस्तपदानां विग्रहः

अपश्यद्भिः	= न पश्यद्भिः,	नञ् तत्पुरुषः
अनवेक्षितुम्	= न अवेक्षितुम्,	नञ् तत्पुरुषः
प्राणिहिंसाम्	= प्राणिनाम् हिंसा ताम्,	षष्ठी तत्पुरुषः
निन्दितवचनानि	= निन्दितानि वचनानि,	कर्मधारयः
अक्षतदेहः	= अक्षतं देहं यस्य सः,	बहुव्रीहिः
मैत्रबलः	= मैत्रम् एव बलम् यस्य सः,	बहुव्रीहिः
महाराजः	= महान् असौ राजा,	कर्मधारयः
पंचपथिकाः	= पञ्च पथिकाः,	कर्मधारयः
अतिथयः	= न तिथिः येषाम् ते,	बहुव्रीहिः
यथेच्छम्	= इच्छाम् अनतिक्रम्य,	अव्ययीभावः

अव्ययप्रयोगः— यः शब्दः सदा एकरूपे एव तिष्ठति अर्थात् यस्मिन् शब्दे विभक्ति–लिङ्ग–वचन दृष्ट्या किमपि परिवर्तनं न जायते सः शब्दः अव्ययम् कथ्यते।

(i) अतः अहम् स्वशरीरेण आतिथ्यं कर्त्तुम् इच्छामि।

(ii) निष्क्रम्य पुनः प्रविश्य।

(iii) किम् अतिथयः बहिः तिष्ठन्ति?

(iv) दूरात् सम्प्राप्ताः वयम्।

(v) युष्माकं औदार्यं निशम्य इह आगताः।

(vi) यथा आज्ञापयति देवः।

(vii) मांसरुधिरम् एव अस्माकं प्रियम् भोजनम्।

(viii) सम्प्रति किम् करवाणि।

(ix) क्षणम् विचिन्त्य।

(x) अद्य यदि तेषाम् उपयोगः भवेत् तत् तु मम सौभाग्यम्।

(xi) अपि च एतेषां कृते जगत् अनर्थीकर्त्तव्यम् इति कोऽयं धर्ममार्गो देवस्य।

(xii) वैद्ये तथा कृते सति।

(xiii) अहो! विचित्रोऽयम् नृपः।

(xiv) यद्यपि तवायमुद्यमः लोकहितायैव तथापि भवतः पीडा नोचिता।

(xv) यदि भवन्तः अस्मत्प्रियम् इच्छन्ति तर्हि च जीवहिंसां विषवत् त्यजत।

(xvi) न पुनः किमपि मांसं स्प्रक्ष्यामः।

धातुरूपाणि

दा (जुहोत्यादिगणतः) उभयपदी

परस्मैपदे

	लट्लकारः			लृट्लकारः		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्र० पु०	ददाति	दत्तः	ददति	दास्यति	दास्यतः	दास्यन्ति
म० पु०	ददासि	दत्थः	दत्थ	दास्यसि	दास्यथः	दास्यथ
उ० पु०	ददामि	दद्वः	दद्मः	दास्यामि	दास्यावः	दास्यामः
	लङ्लकारः			**लोट्लकारः**		
प्र० पु०	अददात्	अदत्ताम्	अददुः	ददातु	दत्ताम्	ददतु
म० पु०	अददाः	अदत्तम्	अदत्त	देहि	दत्तम्	दत्त
उ० पु०	अददाम्	अदद्व	अदद्म	ददानि	ददाव	ददाम

विधिलिङ्

	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**
प्र० पु०	दद्यात्	दद्याताम्	दद्युः
म० पु०	दद्याः	दद्यातम्	दद्यात
उ० पु०	दद्याम्	दद्याव	दद्याम

दा–आत्मनेपदे

	लट्लकारः			लृट्लकारः		
	एकवचनम्	**द्विवचनम्**	**बहुवचनम्**	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम्**
प्र० पु०	दत्ते	ददाते	ददते	दास्यते	दास्येते	दास्यन्ते
म० पु०	दत्से	दधाते	दद्ध्वे	दास्यसे	दास्येथे	दास्यध्वे
उ० पु०	ददे	दद्वहे	दद्महे	दास्ये	दास्यावहे	दास्यामहे

	लङ्लकारः			लोट्लकारः		
	एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र० पु०	अदत्त	अददाताम्	अददत	दत्ताम्	ददाताम्	ददताम्
म० पु०	अदत्थाः	अददाथाम्	अदद्ध्वम्	दत्स्व	ददाथाम्	दद्ध्वम्
उ० पु०	अददि	अदद्वहि	अदद्महि	ददै	ददावहै	ददामहै

विधिलिङ्

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र० पु०	ददीत	ददीयाताम्	ददीरन्
म० पु०	ददीयाः	ददीयाथाम्	ददीध्वम्
उ० पु०	ददीय	ददीवहि	ददीमहि

धा (जुहोत्यादिगणतः) उभयपदी

परस्मैपदे

	लट्लकारः			लृट्लकारः		
	एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र० पु०	दधाति	धत्तः	दधति	धास्यति	धास्यतः	धास्यन्ति
म० पु०	दधासि	धत्थः	धत्थ	धास्यसि	धास्यथः	धास्यथ
उ० पु०	दधामि	दध्वः	दध्मः	धास्यामि	धास्यावः	धास्यामः

	लङ्लकारः			लोट्लकारः		
प्र० पु०	अदधात्	अधत्ताम्	अदधुः	दधातु	धत्ताम्	दधतु
म० पु०	अदधाः	अधत्तम्	अधत्त	धेहि	धत्तम्	धत्त
उ० पु०	अदधाम्	अदध्म	अदध्म	दधानि	दधाव	दधाम

विधिलङ्

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र० पु०	दध्यात्	दध्याताम्	दध्युः
म० पु०	दध्याः	दध्यातम्	दध्यात
उ० पु०	दध्याम्	दध्याव	दध्याम

धा आत्मनेपदे

	लट्लकारः			लृट्लकारः		
	एकवचनम्	द्विवचनम्	बहुवचनम्	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र० पु०	धत्ते	दधाते	दधते	धास्यते	धास्येते	धास्यन्ते
म० पु०	धत्से	दधाथे	दद्ध्वे	धास्यसे	धास्येथे	धास्यध्वे
उ० पु०	दधे	दध्वहे	दध्महे	धास्ये	धास्यावहे	धास्यामहे

	लङ्लकारः			लोट्लकारः		
प्र० पु०	अधत्त	अदधताम्	अदधत	धत्ताम्	दधाताम्	दधताम्
म० पु०	अधत्थाः	अदधाथाम्	अधद्ध्वम्	धत्स्व	दधाथाम्	धद्ध्वम्
उ० पु०	अदधि	अदध्वहि	अदध्महि	दधै	दधावहै	दधामहै

विधिलङ्

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र० पु०	दधीत	दधीयाताम्	दधीरन्
म० पु०	दधीथाः	दधीयाथाम्	दधीध्वम्
उ० पु०	दधीय	दधीवहि	दधीमहि

पाठगतप्रश्नाः 23.3

1. अधोलिखितेषु कथनेषु यत् कथनं सत्यं तत् (✓) इति चिह्नेन यत् असत्यं (×) इति चिह्नेन च निर्दिशत।

   (क) ब्राह्मणाः शाकाहारं भोजनम् इच्छन्ति स्म।

   (ख) सहसा यक्षब्राह्मणाः विकरालं रूपं धारयन्ति।

   (ग) मांसच्छेदनात् राजा कम्पमानः खिन्नवदनः जातः।

   (घ) यक्षाः मैत्रबलं प्राणिहिंसां त्यक्तुं कथयन्ति।

   (ङ) न पुनः कदापि मांसं स्प्रक्ष्यामः इति यक्षाः राजानं प्रतिजानन्ति।

2. अधोलिखितपंक्तीः कः कं प्रति कथयति

	कः कथयति	कं प्रति च कथयति
(क) भवान् तदर्थं क्षमस्व नः अपराधम्।	.....	.....
(ख) यदि भवन्तः अस्मत्प्रियम् इच्छन्ति।	.....	.....
(ग) न मे रोचते जीवहिंसा।	.....	.....
(घ) अमूनि मांसानि शोणितानि च लोकस्य हितार्थमेवावधृतानि।	.....	.....
(ङ) नार्हति देवः प्रदानहर्षातिशयात् प्रजानाम् अनवेक्षितुं हिताहितम्।	.....	.....

3. कोष्ठके दत्तनिर्देशानुसारम् उत्तरत

   (क) हिताहितम् अनवेक्षितुम् (तुमुन् प्रत्ययान्तंपदम् किम्?)

   (ख) वारयितुम् अर्हन्ति अत्रभवन्तः (रेखांकितपदे मूलधातुः कः?)

   (ग) सम्प्रति किं करवाणि? (रेखांकितपदस्य पर्यायपदम् किम्)

   (घ) भवताम् औदार्यं निशम्य इह समागताः। (रेखांकितपदे कः प्रत्ययः?)

   (ङ) अतिथयः भोजनेच्छया बहिः तिष्ठन्ति। (रेखांकितपदे का विभक्ति?)

   (च) निष्क्रम्य, प्रवेशय, प्रवेश्य, निशम्य (कस्मिन् पदे ल्यप् प्रत्ययः नास्ति?)

23.4 किम् अधिगतम्

- राजा मैत्रबलः बोधिसत्त्वः आसीत्।
- मैत्रबलः अहिंसाप्रियः करुणापरः परहितरतः अतिथिसेवकः च आसीत्।
- यक्षाः ब्राह्मणवेशधारिणः राक्षसाः आसन्।
- मैत्रबलस्य महता त्यागेन तेषां हृदयम् परिवर्तितम्।
- ते मैत्रबलं मांसभक्षण–परित्यागस्य प्रतिज्ञां कुर्वन्ति।
- बहुव्रीहिसमासे अन्यपदस्य प्रधानता भवति तस्मै च अर्थानुसारम् 'तत्' इति सर्वनाम प्रयुज्यते।
- 'तव्यत्' प्रत्ययः धातुना सह युज्यते। अस्य प्रयोगे कर्तरि तृतीया कर्मणि प्रथमा भवति। अस्य रूपाणि त्रिषुलिङ्गेषु भवन्ति।

23.5 योग्यताविस्तारः

(क) कवि–ग्रन्थपरिचयः

'हृदयपरिवर्तनम्' नाम्नः एकांकिनाटकस्य एषा कथा मैत्रीबलजातकात् गृहीता सम्पादिता च। अस्य जातकस्य रचयिता महाकविः आर्यशूरः यस्य समयः तृतीया रव्रीष्टाब्दी निर्णीयते विद्वद्भिः। मूलपुस्तके क्रमेण एतानि एकादशजातकानि 3, 4, 8, 10, 12, 14, 15, 16, 19, 31 सन्ति। अस्य मुद्रणम् 1891 ईश्वीयवर्षे अमेरिकादेशान्तर्गत–हार्वर्ड विश्वविद्यालयद्वारा अभवत्। अत्र उपनिबद्धाः सर्वाः कथाः प्रायेण पालिभाषायाम् लिखित–पिटकग्रन्थेभ्यः जातकग्रन्थेभ्यः च संगृह्य आर्यशूरेण संस्कृतभाषायाम् अनूदिताः सन्ति। इयं जातकमाला पंचतंत्रादिवत् उपदेशप्रधानकथावस्तुघटितः प्रबन्धो वर्तते। चम्पूकाव्यवत् एषा अपि रचना गद्य–पद्यमयी अस्ति। परम् अस्याः भाषा सरसा, सरला मनोहारिणी च वर्तते।

(ख) भावविस्तारः

एतासु जातककथासु बोधिसत्त्वस्य उदारता–वीरता–अहिंसा–दानादिगुणानाम् कथारूपेण मनोहरं प्रेरकं च वर्णनं विद्यते। सर्वाः कथाः बोधिसत्त्वस्य तेषु जन्मान्तरेषु तं तं लोकोपकारवृत्तं श्रावयन्ति समुपदिशन्ति च मानवान् विशेषतः बालकान् सत्कर्मणां सदाचारशीलतायाः च। मैत्रीबलजातके मैत्रबलस्य मैत्रीभावनायाः ईदृशः परिणामोऽभवत्, येन यक्षाः राक्षसाः अपि तेषु आक्रमणं कर्त्तुम् समर्थाः नासन्। अपितु तस्य राज्ञः त्यागभावनां दृष्ट्वा तेषा यक्षाणाम् अपि हृदयपरिवर्तनम् अभवत्। यस्मिन् राष्ट्रे, समाजे, परिवारे, वा सौमनस्यं सद्भावना च विराजते तत्र सुखं, शान्तिः समृद्धिः च विलसन्ति।

(i) लोकानुरञ्जन/लोक कल्याणम्

स्नेहं दयां च सौरव्यं च यदि वा जानकीमपि।

(ii) परोपकारः

आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा (उत्तररामचरितम्)

(iii) परोपकाराय सतां विभूतयः।

(क) अतिथिदेवो भव।

(ख) सर्वेषामभ्यागतो गुरुः।

(iv) अहिंसा – अहिंसा परमो धर्मः।

भाषिकविस्तारः

उपपदविभक्तिप्रयोगः

(i) न मे रोचते जीवहिंसा। 'रुच्' धातुयोगे चतुर्थी विभक्तेः प्रयोगः भवति। अतः 'मे' इत्यत्र चतुर्थी विभक्तिः अस्ति।

(ii) दास्यामि 'दा' योगेऽपि चतुर्थी विभक्तिः प्रयुज्यते।

(iii) 'अलं' योगे तृतीया विभक्तिः भवति। यथा हि– अलं विवादेन, कोलाहलेन, कलहेन।

23.6 पाठान्तप्रश्नाः

1. अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत

(क) वनप्रदेशः कीदृशः आसीत्?

(ख) तृतीयः यक्षः उच्चैः प्रहसन् किं कथयति?

(ग) वंशीं कः ध्वनति?

(घ) गोपालकः मैत्रबलस्य कान् गुणान् वर्णयति?

(ङ) द्वारदेशे के तिष्ठन्ति?

(च) ब्राह्मणाः राजोचितं भोजनम् दृष्ट्वा किं कथयन्ति?

(छ) यक्षाणां हृदयपरिवर्तनम् कथम् जायते?

2. राजा मैत्रबलः किं किं त्यक्तुं यक्षान् अकथयत्? इति चतुर्वाक्येषु लिखत।

3. 'हृदयपरिवर्तनम्' नाट्यांशस्य सारं पञ्चवाक्येषु लिखत।

4. अधोलिखितवाक्यांशाः केषां चारित्रिकं वैशिष्ट्यं प्रकटयन्ति?

(क) परमकारुणिकः अस्ति। यक्षाणाम्/नृपस्य मैत्रबलस्य

(ख) वने स्वेच्छया विहरन्ति। यक्षाणाम्/मैत्रबलस्य

(ग) ते दीर्घाकाराः सन्ति। यक्षाणाम्/मैत्रबलस्य

(घ) मैत्री एव तस्य बलम्। यक्षाणाम्/मैत्रबलस्य

(ङ) कुतोऽस्माकं पिशिताशनानां जीवननिर्वाहः। यक्षाणाम्/मैत्रबलस्य

(च) मांसरुधिरमेव अस्माकं प्रियभोजनम्। यक्षाणाम्/मैत्रबलस्य

5. अधः वाक्येषु रेखांकितपदानां विग्रहं कुरुत

(क) यथेच्छम् पेयम् भोज्यं च लप्स्यध्वे।

(ख) राजा च अक्षतदेहः विराजते।

(ग) रुष्टेन यक्षेश्वरेण वयं राज्यात् निर्वासिताः।

(घ) तस्य सैन्यसंघटनम् आचाररक्षणार्थमेव।

(ङ) पंचपथिकाः भोजनेच्छया द्वारदेशे तिष्ठन्ति।

(च) स्वहितमपि अपश्यद्भिः।

6. अधोलिखितेषु वाक्येषु निर्दिष्टधातुना सह 'तव्यत्' प्रत्ययस्य प्रयोगं कुरुत

(क) युष्माभिः प्राणिहिंसा न ..... (कृ)

(ख) त्वया यथेच्छं भोजनं ..... (भुज्)

(ग) परद्रव्यलोभः न ..... (कृ)

(घ) सदा सत्यं ..... (वच्)

(ङ) मया नित्यं पाठः ..... (स्मृ)

7. निर्देशानुसारम् उपयुक्तैः धातुरूपैः रिक्तस्थानानि पूरयत

(i) धनिकः निर्धनेभ्यः धनं ..... । (दा–लट्)

(ii) सर्वे जनाः पीडितानां साहाय्यार्थं धनं ..... । (दा–विधिलिङ्)

(iii) अहं छात्रेभ्यः पुस्तकानि ..... । (दा–लृट्)

(iv) राजा विज्ञातदोषेषु दण्डं ..... । (धा–लट्)

(v) संपद्विनिमयेन उभौ राजानौ राज्यद्वयम् ..... । (धा–लङ्)

23.7 उत्तराणि

23.3 बोधप्रश्नाः

1. (क) v, (ख) iv, (ग) i, (घ) ii, (ङ) iii
2. (i) आशङ्कितः (ii) विचरन् (iii) भीतिम् (iv) अतिथीनाम्
   (v) आहूयन्ताम् (vi) स्प्रक्ष्यामः
3. (क) चतुर्थः (ख) प्रथमः (ग) गोपालकः (घ) यक्षाः (ङ) राजा

पाठगतप्रश्नाः

23.1 1. (क) ब्राह्मणवेशाः (ख) श्वापदभूयिष्ठः (ग) धेनूनाम् (घ) वटतरुतले (ङ) शाकभोजिनां

2. (क) v, (ख) iv, (ग) i, (घ) ii, (ङ) iii
3. (क) विपिनम् (ख) धेनवः (ग) सूर्यः (घ) कठिनम् (ङ) बहवः (च) समयः

23.2 1. (क) कस्य (ख) केषु (ग) किम् (घ) काम् (ङ) कैः

2. (क) धृतमैत्रीभावः (ख) निर्भयाः (ग) जितेन्द्रियगणः (घ) मैत्रीबलः
3. (क) बलं (ख) वंशी (ग) यथार्थं (घ) अरण्यदर्शनाय (ङ) निर्भयाः

23.3 1. (क) × (ख) ✓ (ग) × (घ) × (ङ) ✓

2.

कः	**कं**
(क) पञ्चयक्षाः	– राजानं मैत्रबलं प्रति
(ख) राजा मैत्रबलः	– पञ्चयक्षान् प्रति
(ग) राजा मैत्रबलः	– आत्मानं प्रति
(घ) मैत्रबलः	– मन्त्रिणं प्रति
(ङ) मन्त्री	– राजानं प्रति

3. (क) अनवेक्षितुम् (ख) अर्ह् (ग) अधुना (घ) ल्यप् (ङ) तृतीया एकवचनम् (च) प्रवेशय

23.6 पाठान्तप्रश्नाः

1. (क) वनप्रदेशः श्वापदभूयिष्ठः आसीत्।

   (ख) तृतीयः यक्षः उच्चैः प्रहसन् कथयति– ''शाकभोजिनां कुतोऽस्माकं पिशिताशनानां जीवननिर्वाहः।

   (ग) वंशी कश्चित् युवा ध्वनति।

   (घ) सः राजा मृदुभाषी अस्ति, सः कदापि क्रोधं न करोति, मैत्री एव बलं तस्य, सः प्रजापालकः इति गुणान् वर्णयति।

(ङ) द्वारदेशे यक्षाः तिष्ठन्ति।

(च) ब्राह्मणाः राजोचितं भोजनं दृष्ट्वा कथयन्ति यत् मांसम् रुधिरमेव तेषां प्रियं भोजनम्

(छ) राज्ञः त्यागेन यक्षाणां हृदयपरिवर्तनं भवति।

2. स्वेच्छया चतुर्वाक्यानि लिखत।

3. स्वेच्छया पञ्च वाक्यानि लिखत।

4. (क) नृपस्य मैत्रबलस्य (ख) यक्षाणाम् (ग) यक्षाणाम्
(घ) नृपस्य (ङ) यक्षाणाम् (च) यक्षाणाम्

5. पाठात् एव लिखत।

6. (क) कर्त्तव्या
(ख) भोक्तव्यम्
(ग) कर्त्तव्यः
(घ) वक्तव्यम्
(ङ) स्मर्तव्यः

7. (i) ददाति अथवा दत्ते
(ii) दद्युः अथवा ददीरन्
(iii) दास्यामि अथवा दास्ये
(iv) दधाति अथवा धत्ते
(v) अधत्ताम् अथवा अदधताम्

टिप्पणी

309sk24

24

पत्रं लिखामः

भाषायाः व्यवहारद्वयं भवति मौखिकं लिखितञ्च। वयं वाण्या स्वविचाराणाम् अभिव्यक्तिं कुर्मः। यदि कश्चित् जनः दूरे भवति तदा वयं लिखित्वा एव सन्देशं प्रेषयामः। कार्यालयेषु सर्वत्र पत्रव्यवहारमाध्यमेन एव कार्यं प्रवर्तते। यदि जलं दूषितं प्राप्यते तर्हि वयं नगरनिगमस्य जलविभागं प्रति पत्रं प्रेषयामः। एवमेव विभिन्नसमस्यानां निदानार्थं पत्रस्य आवश्यकता भवति। विवाहादिशुभावसरेषु लिखित्वा एव निमन्त्रणं प्रेष्यते। अद्य तु बहुविधसन्देशपत्राणां प्रचलनम् अस्ति—जन्मदिवसस्य उपलक्ष्ये, रुग्णस्य स्वास्थ्यलाभाय, पर्वसु शुभाशंसाः अधिकृत्य कार्डपत्राणि आपणे लभ्यन्ते। अतः वयम् अस्मिन् पाठे पत्राणां विविधं स्वरूपम् अधिकृत्य विचारं करिष्यामः लेखनाभ्यासञ्च साधयामः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्

- पत्राणां विविधप्रकारान् ज्ञात्वा पत्रस्य प्रकृत्यनुसारं क्रमम् अनुसर्तुं शक्तः भविष्यति;
- पत्रस्य अपेक्षितान् अंशान् शुद्धरूपेण यथाक्रमं प्रयोक्तुं समर्थः भविष्यति;
- पत्रलेखने सम्बोधनानुसारं शिष्टाचारवाक्यानि लेखितुं सक्षमः भविष्यति;
- पत्रप्राप्तेः अनन्तरं पत्रोत्तरं लेखितुं योग्यः भविष्यति;
- विशिष्टैः जनैः लिखितानां पत्राणां/अभिनन्दनपत्राणां सङ्कलनं करिष्यति;
- विशिष्टावसरोपयुक्तानि वाक्यानि सूचीबद्धानि करिष्यति।

टिप्पणी

क्रियाकलापः

अधोलिखिताः शुभाशंसाः कस्मिन् कस्मिन् अवसरे प्रेषयितुं शक्यन्ते इति मेलनं कुर्वन्तु

शुभाशंसाः	**अवसराः**
(क) रक्षासूत्रं रक्षतु सर्वान्।	(i) नववर्षम्
(ख) दीपाग्निशुद्धाश्च भवन्तु लोकाः।	(ii) परीक्षायां सफलता
(ग) स्वस्त्यस्तु चिरायुरस्तु।	(iii) संस्कृतदिवसः
(घ) नववर्षं नवहर्षं वितनोतु शुभं चिरम्।	(iv) दीपावलिः
(ङ) सफलतायै अभिनन्दनम्।	(v) यात्रायै शुभकामनाः
(च) होलिकोत्सवस्य शुभकामनाः।	(vi) रक्षाबन्धनम्
(छ) शुभाः सन्तु ते पन्थानः।	(vii) जन्मदिनम्
(ज) संस्कृतं लसतु गृहे गृहे।	(viii) होलिकोत्सवः

एतानि सर्वाणि अभिनन्दनपत्राणि अनौपचारिकानि एव यतः एतेषां प्रयोगः परिचितैः अथवा सम्बन्धिभिः सह एव क्रियते। एषः पत्रव्यवहारः कार्यालयसम्बन्धी नास्ति। अस्मिन् पाठे पत्राणां विविधं स्वरूपम् अधिकृत्य अधिकं ज्ञास्यामः, पत्रलेखनस्य अभ्यासमपि करिष्यामः।

24.1 अधुना अवगच्छामः

पत्रं लिखामः

अस्मिन् 'इण्टरनैट' प्रधाने वैज्ञानिकयुगे अपि पत्रलेखनस्य महत्त्वं वर्तते। अद्यापि पत्रलेखनं सन्देशप्रेषणस्य लोकप्रियः माध्यमः विद्यते। प्रायः पत्राणां विविधरूपं भवति।

(i) अनौपचारिकपत्राणि
(ii) अर्धौपचारिकपत्राणि
(iii) औपचारिकपत्राणि
अथवा
व्यवसायिकपत्राणि
अथवा
कार्यालयीयपत्राणि।

24.1

अनौपचारिकपत्राणि

24.2

अस्मिन् एकांशे वयम् अनौपचारिकपत्राणां विषये चर्चां करिष्यामः। अनौपचारिकपत्राणि वैयक्तिकपत्राणि अपि कथ्यन्ते। प्रायः अनौपचारिकपत्रस्य एतानि प्रमुखानि अङ्गानि भवन्ति–

(i) पत्रस्य प्रारम्भः

अनौपचारिकपत्रेषु प्रायः उपरि प्रारम्भे मांगलिकं पदं शीर्षिकारूपेण लिखामः यथा (i) श्रीः (ii) ओउम् (iii) ऊँ शिवाय नमः, (iv) ऊँ नमः गणेशाय, (v) श्रीगुरुचरणयोः नतिः, (vi) परमात्मने नमः, (vii) सर्वदा मङ्गलं भवतु (viii) वासुदेवाय नमः आदयः। यथा शीर्षिका–'ऊँ' इत्यादयः

(ii) पत्रप्रेषकस्य स्थानं दिनाङ्कश्च।

यः पत्रं लिखति सः पत्रस्य दक्षिणे कोणे स्वकीयं पत्रसङ्केतं लिखति यथा ई–296, टैगोरगार्डनएक्स, नवदेहलीतः। पत्रसङ्केतेऽपि क्रमः सर्वप्रथमं ब्लॉकसंख्या, गृहसंख्या, वीथिसंख्या, उपनगरस्य नाम, नगरस्य नाम, प्रदेशस्य नाम एतत्पश्चात् यस्मिन् दिने पत्रं लिख्यते तद्दिनाङ्कः लेखनीयः

(iii) सम्बोधनम्, पत्रस्य वामभागे यं प्रति पत्रं लिखामः। प्रायशः एतेषां सम्बोधनानाम् प्रयोगः क्रियते। अधोलिखितां तालिकां पश्यत

गुरुजनान् प्रति	समादरणीयाः!/पूज्याः गुरुवर्याः!/पूजनीयाः पितृवर्याः!
मातरं प्रति	समादरणीये मातः!/परमपूज्ये अम्ब!
पुत्रं प्रति/पुत्री प्रति	प्रिय पुत्रः!/प्रिय पुत्रि!/प्रिय सुते!
अग्रजं प्रति	समादरणीयभ्रातः!
अनुजं प्रति	प्रियभ्रातः!/प्रियसहोदरः/प्रिय अनुज!
अग्रजां प्रति	समादरणीये अग्रजे!/प्रिय भगिनि!
अनुजां प्रति	प्रिये अनुजे!/प्रियानुजे!
मित्रं प्रति	प्रियमित्र!/प्रियवयस्य!/प्रियसखि!/(स्त्री) प्रियवयस्ये (स्त्री)
शिष्यं प्रति	प्रियवत्स!/चिरंजीवित् (नाम)

(iv) सम्बोधनानन्तरम् अग्रिमपङ्क्त्यां क्वचित्स्थानं त्यक्त्वा अभिवादनम्/आशीर्वचनं वा लिख्यते यथा

गुरुजनान्/मातरं प्रति	सादरं चरणवन्दनम्/चरणस्पर्शः/सादरं प्रणामाः/नमो नमः
भ्रातरं प्रति (अग्रजं)	सादरं नमस्ते/सादरं वन्दनम्
भ्रातरं प्रति (अनुजं)	स्नेहाशिषः/चिरंजीव/शुभमस्तु/कल्याणमस्तु/शुभाशिषः/यशस्वी भव।
मित्रं प्रति	सस्नेहं नमस्ते/ सप्रेम नमः/
पुत्रं/पुत्रीं प्रति	शुभाशिषः!/परम स्नेहः!/ शुभाशीर्वादः

टिप्पणी

(v) कुशलनिवेदनम्/कुशलकामना

पत्रस्य विषयवस्तुनः प्रारम्भे कुशलवचनानि निवेद्यन्ते अपि च यं प्रति पत्रं लिखामः तस्य कुशलताविषये कामनां कुर्मः यथा

- अत्र सर्वगतम् कुशलं/ मन्ये भवान्/ भवती अपि सकुशलः/ सकुशला।
- अत्र सर्वे कुशलिनः/ तत्रापि कुशलं स्यात् इति मन्ये।
- भवतां कुशलतां ज्ञातुं चिन्तितोऽहम्/ चिन्तिता अहम्।
- अहं कुशली/ कुशलिनी/ भवन्तं/ भवतीम् अपि कुशलं कामये।

(vi) यदि पत्रस्य उत्तरं लिखामः तदा प्रारम्भे प्रायः ईदृशानि वाक्यानि प्रयुज्यन्ते–

- पत्रं प्राप्य आनन्दः जातः।
- बहुविलम्बेन पत्रं प्राप्तम्। अहं चिन्तितः। चिन्तिता आसम्।
- पत्रं पठित्वा चिन्ता जाता।
- शुभाशंसापत्रं प्राप्तम्। धन्यवादः। भवद्भ्यः अपि तथैव मे शुभकामना।
- उत्तरलेखने विलम्बः जातः। तर्हि कृपया क्षन्तव्यः/ क्षन्तव्या अहम्।

(vii) पत्र–लेखने अपेक्षितः बिन्दवः

पत्र–लेखने केचन अपेक्षितबिन्दवः ध्यातव्याः–

- किं लेखनीयम् इति स्पष्टं चिन्तनीयम्।
- लेखः शोभनः भवेत्।
- पत्रस्य वामभागे पर्याप्तः अवकाशः त्यक्तव्यः।
- पंक्तीनां मध्येऽपि यथोचितम् स्थानं स्यात्।
- पत्रस्य प्राप्तेः अनन्तरं शीघ्रातिशीघ्रम् उत्तरं प्रेषणीयम्। पत्रे यदि काचित् सूचना अपेक्षिता तर्हि 'विलम्बः न करणीयः'। पत्रप्राप्तिसूचकं/धन्यवादज्ञापकं पत्रम् अस्माकं गौरवं वर्धयति।
- भाषाविषयकत्रुटयः न स्युः इति एकवारं पुनः पत्रं पठनीयम्।

(viii) समापनवाक्यानि

पत्रस्य विषयवस्तुनः अन्ते समापने वयं अग्रजान् प्रति नमस्कारं अनुज्ञान् प्रति स्नेहं निवेदयामः। कानिचित् वाक्यानि अधः प्रस्तूयन्ते–

- मातरं/ पितरं/ सर्वान् मम प्रणामांजलिं निवेदयन्तु।
- ज्येष्ठेभ्यः सर्वेभ्यः नमः कनिष्ठेभ्यः आशीर्वादः।
- पत्रोत्तरं प्रतीक्षे।

(ix) विषयवस्तुनः अनन्तरं दक्षिणे कोणे सम्बन्धः ज्ञापनीयः यथा

- भवदीयः प्रियपुत्रः/प्रियपुत्री
- भवतः/ भवत्याः प्रियसुहृत्/प्रियसखी
- भवच्छुभाकांक्षी/भवतां शुभाकांक्षिणी
- प्रियः अनुजः/प्रिया अनुजा
- प्रियशिष्यः/प्रियशिष्या

(x) तदधः पत्रलेखकः स्वनाम लिखति हस्ताक्षरं वा करोति।

पत्रप्रारूपम्

मित्रं प्रति पत्रम्

भवान् ऋषभः। भवतां निवासः 23 जीवनवाटिका, पंखारोड, नईदिल्ली–59 मध्ये अस्ति। भवतां मित्रं सौरभः बोधिदीपनगरे पालमविहारे गुरुग्रामे निवसति। द्वादशकक्षायां संस्कृतं पठनार्थं प्रेरयितुं पत्रप्रारूपम्।

श्रीगुरवे नमः

23 जीवनवाटिका, पंखारोड,
नई दिल्लीतः
तिथिः 18.8.05

प्रिय मित्र सौरभ,

सस्नेहं नमस्ते।

भवतां पत्रं बहुचिरात् प्राप्तम्। अत्र सर्वगतं कुशलं, भवतामपि कुशलतां कामये। अद्यत्वे अहं राष्ट्रियमुक्तविद्यालयीय शिक्षा संस्थानतः संस्कृतभाषायां परीक्षायै कृतप्रयत्नः अस्मि। अस्य विद्यालयस्य नवीनपाठ्यक्रमे बहुरम्याणि आकर्षकाणि ज्ञानवर्धकानि पुस्तकानि निर्मितानि सन्ति। अहं तु तानि पठित्वा अत्यधिकम् आनन्दम् अनुभवामि। तत्र व्याकरणमपि पाठैः सह एव प्रयोगमाध्यमेन स्पष्टीकृतम्। अतः त्वमपि यथाशीघ्रं प्रवेशपत्रं पूरयित्वा पुस्तकानि लभस्व। यदि किमपि साहाय्यम् अपेक्ष्यते तर्हि मम पार्श्वे आगन्तव्यम्।

पूज्यपितृचरण्योः मम प्रणामाञ्जलिः निवेद्यताम्।

इति भवत्सुहृद्
ऋषभः

पत्रवेष्टनम्

सविधे
श्री सौरभः
बोधिदीपनगरम्, पालमविहारः
गुरुग्रामः (हरियाणा)–1122017

श्रीः पातु

माता पुत्रीं प्रति

25/125
श्रीभवनम्
ऋषिमंगलम्,
त्रिवेन्द्रम्
दिनाङ्कः 20.12.08

प्रिय पुत्रि,

शुभाशीर्वादः।

भवत्याः पत्रं न प्राप्तम् इति चिन्ता जाता। अत्र सर्वगतं कुशलम् अस्ति। तव पितुः स्वास्थ्यमपि इदानीं सम्यग् अस्ति। चिन्ता न कार्या। स्वस्वास्थ्यविषये सर्वदा जागरूकता भवतु। आरोग्यं सर्वसुखानां मूलम्। समये फलादिकं सेवनीयम्। विरामसमये वयं सर्वे 'हम्पी' इति स्थानं द्रष्टुं गमिष्यामः। अतः कुत्रचित् अन्यत्र व्यस्ता मा भवतु। आरोग्यम् अनपेक्ष्य मा पठतु। मन्ये अस्मिन् वर्षेऽपि प्रथमश्रेण्याम् उत्तीर्णा भविष्यसि इति मे शुभकामना।

अन्यत् सर्वं कुशलम्। पत्रोत्तरं शीघ्रं प्रेषयतु।

भवदीया माता

सुधा

सविधे

कुमारी सन्तोष शर्मा
कक्षा XII
गंगाछात्रावासः,
आदर्शसंस्कृतविद्यालयः,
वृन्दावनम् (मथुरा)–281121

पाठगतप्रश्नाः 24.1

1. रिक्तस्थानानि पूरयत–

पत्रस्य विषयवस्तुनः प्रारम्भे	**पत्रस्य विषयवस्तुनः समाप्तौ**
(क) ईश्वरस्य कृपया	(i) सर्वेभ्यः मम .....
(ख) भवतां पत्रं	(ii) अनुजाय .....
(ग) पत्रं चिरात् न प्राप्तम्	(iii) पितृचरणयोः .....
(घ) अत्र सर्वं कुशलं	(iv) पत्रोत्तरं .....
(ङ) तत्रपि सर्वे	(v) आरोग्यविषये .....

मञ्जूषा

अत्र सर्वे कुशलिनः, कुशलिनः इति मन्ये, प्रणामाञ्जलिः निवेद्यताम्, आशीर्वादः, चिन्ता वर्धते, प्रणामाः, शीघ्रं प्रेषयत, प्राप्य आनन्दः जातः, तत्रापि कुशलं स्यात् इति मन्ये, जागरूकता भवेत्

2. (क) भवतः विद्यालये वार्षिकी परीक्षा अस्ति। जनकं प्रति लिखिते पत्रे कथं समापनं करिष्यति? शुद्धम् उत्तरं चिह्नीकुरुत
   (i) अहं स्वस्थः। चिन्ता न कार्या।
   (ii) भवताम् आशीर्वादेन उत्तमान् अङ्कान् प्राप्स्ये।
   (iii) अत्र सर्वगतं कुशलम्। तत्रापि सर्वे कुशलिनः इति मन्ये।

   (ख) पत्रस्य उत्तरे प्रारम्भे किं वाक्यं समीचीनम् इति चिह्नीकुरुत
   (i) ईश्वरस्य कृपया अत्र सर्वे कुशलिनः।
   (ii) पत्रं पठित्वा महान् हर्षः जातः।
   (iii) चिरात् पत्रं न प्राप्तम्। चिन्ता वर्धते।

3. पत्रस्य उपाङ्गानि क्रमेण सूचीबद्धानि कुर्वन्तु
   (i) हस्ताक्षरम्
   (ii) शिष्टाचारवाक्यम्
   (iii) शीर्षिका
   (iv) दिनाङ्कः
   (v) पत्रलेखकस्य पत्रसङ्केतः
   (vi) कुशलनिवेदनम्
   (vii) सम्बोधनम्
   (viii) समाप्तिः
   (ix) पत्रवेष्टने पत्रसंङ्केतः (यं प्रति लिख्यते)

4. प्रथमे स्तंम्भे यं प्रति पत्रं लिख्यते, द्वितीये स्तम्भे च प्रेषकस्य परिचयः दीयते। उभयोः मेलनं कुरुत

यं प्रति पत्रं लिख्यते	**प्रेषकस्य परिचयः**
(क) पितरं प्रति	(i) भवदीया प्रियसखी
(ख) मातरं प्रति	(ii) भवताम् आज्ञाकारी शिष्यः
(ग) अग्रजां प्रति	(iii) भवदीयः आज्ञाकारी पुत्रः
(घ) अनुजां प्रति	(iv) भवदीया पुत्री
(ङ) अनुजं प्रति	(v) भवतः शुभाकांक्षी
(च) शिष्यं प्रति	(vi) भवत्याः प्रियभ्राता
(छ) गुरुं प्रति	(vii) भवत्याः प्रियभगिनी
(ज) सखीं मित्रं प्रति	(viii) भवदीयः अनुजः
(झ) अग्रजं प्रति	(ix) भवतः शुभाकांक्षिणी

24.2 अर्धौपचारिकपत्राणि

अर्धौपचारिकपत्राणि वैयक्तिकपत्रेभ्यः भिन्नानि भवन्ति। कुत्र कुत्र भेदः भवति इति पश्यत

- एतानि पत्राणि यं प्रति लिख्यन्ते तेन सह परिचयः भवति परन्तु कार्यालयीयमेव भवति।
- एतेषु पत्रेषु उपरि शीर्षिका न लिख्यते।
- पत्रेषु दक्षिणकोणे यथावत् यः पत्रं लिखति तस्य पत्रसङ्केतः दिनाङ्कः च लिख्येते।
- सम्बोधने ''प्रिय श्री। .....'' इति एवं नाम लिख्यते। शिष्टाचारे 'नमो नमः 'नमस्ते' वा प्रयुज्यते।
- कुशलनिवेदनस्य आवश्यकता नास्ति।
- पत्रं संक्षिप्तं भवति। यत् कार्यं भवति तत् स्पष्टतया संक्षेपेण निवेदनीयम्।
- अन्ते पारिवारिकजनेभ्यः 'प्रणामांजलिः इत्यादि निवेदनं न भवति।
- समाप्तौ यथाशीघ्रं कार्यसम्पादनाय प्रार्थना क्रियते।
- हस्ताक्षारात् पूर्वम् इति भवदीयः शुभाकांक्षी' अथवा भवदीया शुभाकांक्षिणी' इति लिखामः।
- ततः पत्रस्य वामभागे यं प्रति पत्रं लिखामः तस्य पूर्णनाम पत्रसङ्केतश्च लिख्येते।

पत्रप्रारूपम्

भवान् गौरवः अ 2/46 खण्ड 5,'रोहिणी' मध्ये निवसति। भवतां मित्रं दिल्लीपब्लिकपुस्तकालयस्य पाठकसदस्यः भवितुम् इच्छति। भवान् पुस्तकालयाध्यक्षं जानाति। तं प्रति स्वमित्रस्य साहाय्यं कर्तुम् अनौपचारिकपत्रं लिखत।

अ 2/86 खण्डः 5, रोहिणी
नईदिल्लीतः
दिनाङ्कः 25.12.08

प्रिय श्री सहायमहोदयाः

नमस्ते।

पत्रवाहकः मम मित्रं सुभाषः भवतां पुस्तकालयस्य 'पाठकसदस्यः' भवितुम् इच्छति। सदस्यतापत्रादिकं दत्त्वा तस्य साहाय्यं करोतु। सः तु द्वादशकक्षयां संस्कृतं पठति। तस्य पितरौ न स्तः। मम समीपे एव वसति। पुस्तकालयस्य सदस्यता तस्य अध्ययनक्रमे सहायिका भविष्यति।

धन्यवादः।

भवदीयः शुभाकांक्षी
गौरवः

श्री रघुनाथ सहायः
पुस्तकालयाध्यक्षः, दिल्लीपब्लिकपुस्तकालयः,
पटेलमार्गः,
नई दिल्ली–110001

भवती स्वोपनगरस्य महिलासंगठनस्य सचिवा रामानुजा। भवत्याः उपनगरे निश्शुल्कचिकित्सालयस्य उद्घाटनाय प्रसिद्धं वैद्यं श्रीमन्तं धन्वन्तरिम् आमन्त्रयितुं लिखितम् अनौपचारिकं पत्रम्

450 एम् आई जी फ्लैट्स
जहांगीरपुरी, दिल्ली–110033
दिनाङ्कः 10.8.08

सम्मान्यश्रीधन्वन्तरिमहोदयाः,
नमो नमः।

अस्माकम् उपनगरस्य मध्ये श्रावणपूर्णिमायाः अवसरे एकस्य निश्शुल्क–चिकित्सालयस्य स्थापना भविष्यति। तस्य उद्घाटनाय भवतः अमूल्यसमयात् कानिचित् क्षणानि प्राप्तुं समुत्सुकाः वयम् महिलासंगठनस्य सर्वाः सदस्याः। कृपया 19 तारिकायां प्रातः दशवादने दर्शनं प्रदाय अस्मान् अनुगृह्णन्तु।

सधन्यवादः।

वैद्याचार्यः धन्वन्तरिः
179, विज्ञानविहारः,
दिल्ली 110092

भवदीया दर्शनाभिलाषिणी
नमिता

निमन्त्रणस्वीकृतिपत्रम् / अस्वीकृतिपत्रम्

वैद्याचार्यः धन्वन्तरिः
179, विज्ञानविहारः,
दिल्ली–110092
दिनाङ्कः 12.8.08

प्रिये नमिते,

नमस्ते।

निश्शुल्कचिकित्सालयस्य उद्घाटनावसरार्थं भवत्या प्रेषितम् आमन्त्रणपत्रं प्राप्तम्। भवती यत् सेवाकार्यं करोति तत् नूनं प्रशंसनीयम् एव। अहं तस्मिन् दिने अन्यत्र व्यस्तः अस्मि। अतः तत्र उपस्थातुं न शक्नोमि। कृपया क्षन्तव्योऽहम्।

अनेकशुभाशीर्वादसहितम्

भवत्याः शुभाकांक्षी
(धन्वन्तरिः)

नमिता
सचिव, महिलासंगठनम्,
450, एम् आई जी फ्लैट्स,
जहांगीरपुरी, दिल्ली–110033

टिप्पणी

पाठगतप्रश्नाः 24.2

1. अर्धौपचारिकपत्रेषु यत् यत् अनपेक्षितं तस्य तस्य समक्षं (x) इति चिह्नीकुरूत–
   (क) शीर्षिका
   (ख) पत्रलेखकस्य पत्रसङ्केतः
   (ग) दिनाङ्कः
   (घ) सम्बोधनम्
   (ङ) शिष्टाचारशब्दाः
   (च) कुशलनिवेदनम्
   (छ) पारिवारिकजनेभ्यः प्रणामनिवेदनम्
   (ज) अन्ते यं प्रति पत्रं लिख्यते तस्य नाम पत्रसङ्केतश्च
2. अर्धौपचारिकपत्राणि कान् प्रति लिख्यन्ते?
   (क) पितृजनान् प्रति (ख) परिचितान् विशिष्टजनान् प्रति
   (ग) मित्राणि प्रति (घ) पत्रसम्पादकान् प्रति

तृतीयः अंशः

24.3 औपचारिकपत्राणि / व्यावसायिकपत्राणि

एतानि व्यावसायिकपत्राणि प्रायशः कार्यालयाध्यक्षान् प्रति, समाचारपत्राणां सम्पादकान् प्रति, नियुक्तिकृते नियोक्तॄन् प्रति, व्यापारिणः प्रति, विक्रेतॄन् इत्यादीन् प्रति लिख्यन्ते।

ध्यातव्याः बिन्दवः

1. औपचारिकपत्रेषु शीर्षिकाः शिष्टाचारशब्दाः, कुशलनिवेदनम् इत्यादि न लिख्यते।
2. औपचारिकपत्रेषु पत्रस्य सन्दर्भसंख्या दिनाङ्कश्च अत्यावश्यकः।
3. यः पत्रं लिखति सः उपरि पत्रसंख्यां लिखित्वा तस्य अधः एव लिखेत्–
   सकाशात्
   नाम,
   पत्रसङ्केतः
4. यं प्रति पत्रं लिख्यते तस्य कृते एवं लेखनीयः (–) सविधे, पदनाम, स्थाननाम च। यथा सम्पादकमहोदयः, विभागाध्यक्षः, ततः पत्रसङ्केतः।
5. पत्रस्य विषयः यथा संस्कृताध्यापकस्य नियुक्तिकृते प्रार्थनापत्रम्।
6. पत्रस्य सन्दर्भः यदि पत्रम् उत्तरे लिख्यते यथा भवदीय पत्रसंख्या ..... दिनाङ्कितः ————
7. अन्ते भवदीयविश्वासपात्रम्' इति लिखित्वा तस्य अधः हस्ताक्षरम् ततः पूर्णं नाम।
8. वामभागे स्थानं दिनाङ्कः वा अपि लिख्यते।

पत्रप्रारूपम्

दूरदर्शनं प्रति/आकाशवाणीं प्रति

पत्रसंख्या ..... दिनाङ्कः .....
सकाशात्
.....
.....
.....

सविधे
मान्याः निर्देशकाः,
दूरदर्शनम्/आकाशवाणी
केन्द्रस्य नाम .....
मान्याः,

भवतां 'साहित्यिकी' कार्यक्रमे ..... तिथौ रात्रौ ..... प्रसारितं 'विदुरनीतिपाठम्' अतीव ज्ञानप्रदम् उत्साहवर्धकम् च आसीत्। प्रतिसप्ताहम् एतादृशाः कार्यक्रमाः पुनः पुनः प्रसारणीयाः येन अस्मद्सदृशानां विद्यार्थिनाम् कल्याणं भवेत्।

धन्यवादाः।

संस्कृतानुरागी
.....

अथवा

सविधे
मान्यः संचालकः,
सेवाप्रकाशनम्,
नईदिल्ली–27

विषयः लेखप्रकाशनविषये

मान्याः,

भवतां मासिकपत्रिकायाः 'विद्यावर्धिनी' इत्यस्याः एकः अङ्कः मया दृष्टः। पत्रिका अतीव चित्ताकर्षिका छात्रोपयोगिनी च वर्तते। अहं धनादेशद्वारा ..... रूप्यकाणि वार्षिकं शुल्कं प्रेषयामि। कृपया अधोलिखितपत्रसङ्केते पत्रिकाम् प्रेषयतु।

पूर्णपत्रसङ्केतः .....
.....
.....

सधन्यवादः

भवदीयः
.....
(हस्ताक्षरम्)

स्थानम् .....
नाम .....
दिनाङ्कः .....

पाठगतप्रश्नाः 24.3

1. व्यावसायिकपत्रेषु किं किम् अपेक्षितम् इति (✓) चिह्नेन चिह्नीकुरूत

(क) कुशलनिवेदनम्	.....	.....
(ख) पत्रस्य विषयः	.....	.....
(ग) पत्रोत्तरे पत्रसन्दर्भः	.....	.....
(घ) विस्तृता समालोचना	.....	.....
(ङ) संक्षिप्तनिवेदनम्	.....	.....
(च) यः पत्रं लिखति तस्य पूर्वं 'सविधे' लेखनीयम्	.....	.....
(छ) यं प्रति पत्रं लिख्यते तस्य पूर्वं 'सकाशात्' लेखनीयम्	.....	.....
(ज) यं प्रति पत्रं लिख्यते तस्य पूर्वपत्रसङ्केतः	.....	.....

2. अधोलिखिते पत्रे रिक्तस्थानानि म×जूषातः चित्वा पूरयत

.....(1)

गणेशन्
99, द्वितीयमुख्यमार्गः
गिरिनगरम्, बङ्गलूरूः–85
.....(2)
मान्याः प्राचार्याः,
श्रीज्ञानवर्धिनीपाठशाला,
विनीतखण्डः, गोमतीनगरम्,
लखनऊ, उत्तरप्रदेशः

विषयः प्राथमिककक्षासु संस्कृताध्यापकस्य नियुक्तिः

.....(3)

भवतां गतरविवासरस्य 'प्रजावाणी' पत्रिकायां प्रकाशितं विज्ञापनं .....(4) अहम् इदम् आवेदनपत्रं प्रेषयामि। मया राष्ट्रियमुक्तविद्यालयीयसंस्थानतः दशमी कक्षा प्रथमश्रेण्यां (5)..... संस्कृतभाषायां च मम विशेषदक्षता अस्ति। अतः मम प्रार्थनां (6).....यदि भवन्तः मह्यम् भवत्पठशालायाम् अध्यापनावसरं प्रदास्यन्ति तर्हि अहं (7)..... संस्कृतभाषायाः सेवां करिष्यामि।

.....(8).....
.....(9)

दिनाङ्कः (10).....

म×जूषा

(i) समुत्तीर्णा, (ii) पूर्णरूपेण, (iii) स्वीकृत्य, (iv) गणेशन्, (v) बङ्गलूरूः, (vi) सविधे, (vii) महोदयाः, (viii) सकाशात्, (ix) दृष्ट्वा, (x) भवदीयविश्वासपात्रम्

24.4 किम् अधिगतम्

- पत्राणि त्रिविधानि भवन्ति– वैयक्तिकानि, अर्धौपचारिकाणि, व्यावसायिकानि च।
- एतेषां पत्राणां लेखने पत्राङ्गानां क्रमः अनुपालनीयः।
- पत्रं संक्षिप्तं सारगर्भितं भवेत्।
- पत्रे वामभागे पर्याप्तः अवकाशः स्यात्।
- पत्रं स्पष्टाक्षरेषु लेखनीयम्।
- पत्रसङ्केते क्रमानुसारं गृहसंख्या/वीथिसंख्या, उपनगरस्य नाम, नगरस्य प्रदेशस्य नाम च अङ्कनीयम्।
- यदि विदेशात् पत्रं लिख्यते तर्हि देशस्यनाम अपि अपेक्षितम्।
- पत्रस्य भाषा शुद्धा स्पष्टा च भवेत्।

पाठान्तप्रश्नाः 24.5

1. अधोलखितशब्दान् उचिते स्तम्भे लिखत–

(i) श्रीगणेशायनमः, (ii) शुभाशीर्वादाः, (iii) नमोनमः, (iv) भवदीयः, (v) प्रियसखि, (vi) धन्यवादः, (vii) श्रीः, (viii) प्रियवत्स!, (ix) प्रणामाञ्जलिः, (x) चरणस्पर्शः, (xi) चरणवन्दनम्, (xii) भवतां विश्वासपात्रम्, (xiii) राघवः, (xiv) प्रियमित्रम्, (xv) गणेशः

स्तम्भाः

शीर्षिका	सम्बोधनम्	अभिवादनम्/आशीर्वचनम्	समाप्तिः	हस्ताक्षरम्

2. भवतः अग्रजस्य स्नाातकपरीक्षायाः परिणामः घोषितः। सः प्रथमश्रेण्याम् उत्तीर्णः। तस्मै वर्धापनपत्रं लिखतु।
3. भवान् छात्रावासे निवसति। पत्रेण ज्ञातं यत् भवतः माता अस्वस्था। तस्याः स्वास्थ्यसमाचारज्ञानाय स्वपित्रे पत्रं लिखतु।
4. भवान् राष्ट्रीयमुक्तविद्यालयीशिक्षासंस्थानस्य द्वादशकक्षायाः छात्रः। संस्कृत–पाठ्यपुस्तकस्य अवबोधने काचित् समस्या वर्तते। समाधानाय आचार्यं प्रति पत्रं लिखतु।
5. भवता संस्कृतभाषायाम् एका रचना कृता। 'सन्देशः' इति पत्रिकायाः सम्पादकं स्वरचनायाः प्रकाशनाय निवेदनार्थं पत्रं लिखतु।
6. वर्षाकाले भवतः निवासस्थानं निकषा जलसंग्रहेण मशकवृद्धिः जाता। अनया रोगप्रकोपस्य आशङ्का वर्तते। एतां समस्यां प्रति ध्यानाकर्षणाय स्वास्थ्याधिकारिणं प्रति पत्रं लिखतु।

24.6 योग्यताविस्तारः

शुभाशंसाः

नववर्षम् अधिकृत्य

- भूयात् नूतनवत्सरः शिवमयः शान्तिप्रदः।
- सर्वाः आशाः तव मित्रं भवन्तु।
- पश्येम शरदः शतम्।
- आ नो भद्रा क्रतवो यन्तु विश्वतः।
- विश्वानि देव सवितः! दुरितानि परासुव।
- यद् भद्रं तन्न आसुव।
- सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
- करोतु मङ्गलं सदा ते गणेशः।

पर्वादिकम् अधिकृत्य

- मकरसंक्रान्तिशुभाशयाः
- रक्षाबन्धनोत्सवे हार्दिक्यः शुभकामनाः
- दीपावलिः पर्व मङ्गलमयं भवतु।
- होलिकोत्सवस्य शुभाशंसाः।

यात्रादीन् उपलक्ष्य–

- शुभाः ते सन्तु पन्थानः।
- भवदीयः सभारम्भः निर्विघ्नः भवतु।
- सर्वे मार्गाः प्रशस्ताः भवन्तु।

24.7 उत्तराणि

पाठगतप्रश्नाः उत्तराणि

24.1 1. पत्रस्यविषयवस्तुनः प्रारम्भे

(क) अत्र सर्वे कुशलिनः

(ख) प्राप्य आनन्दः जातः

(ग) चिन्ता वर्धते

(घ) तत्रापि कुशलं स्यात् इति मन्ये

(ङ) कुशलिनः इति मन्ये

पत्रस्य विषयवस्तुनः समाप्तौ

(i) प्रणामाञ्जलिः निवेद्यताम्

(ii) आशीर्वादः

(iii) प्रणामाः

(iv) शीघ्रं प्रेषयतु

(v) जागरूकता भवेत्

2. क. (ii) ख (ii)

3. (iii); (v); (iv); (vii); (ii); (vi); (viii); (i); (ix)

4. (क) (iii); (ख) (iv); (ग) (vi); (घ) (vii); (ङ) (ix); (च) (v); (छ) (ii); (ज) (i); (झ) (viii)

24.2 1. (क); (च); (ज) इति अनपेक्षितम्

2. (ख)

24.3 1. (ख) (ग) (ङ) (ज) इति अनपेक्षितम्

2. 1. (viii); 2. (vi); 3. (vii); 4. (ix), 5. (i); 6. (iii); 7. (ii); 8. (x); 9. (iv); 10. (v)

24.5 पाठान्तप्रश्नाः

1. शीर्षिकाः– (i), (vii)

सम्बोधनम् – (v); (viii)

अभिवादनम्/आशीर्वचनम्–(ii); (iii); (ix), (x) (xi)

समाप्तिः (iv) (vi) (xii) (xiv)

हस्ताक्षराणि– (xiii); (xv)

2. स्वयं करोतु

309sk25

25

परियोजना&निर्माणम्

वयं पश्यामः यत् नगरेषु/उपनगरेषु स्थाने स्थाने 'परियोजना' शब्दः लिखितः वर्तते। अद्यत्वे अनेके शिक्षिताः युवकाः सन्ति। यदि कोऽपि कमपि पृच्छति 'सम्प्रति' भवान् किं करोति? सः वदति– 'अहम् एकस्यां परियोजनायां कार्यं करोमि। समाचारपत्रेषु अपि वयं पठामः यत् सर्वकारेण अमुककार्याय यथा विद्युतीकरणाय एका परियोजना प्रस्तुता। किं भवन्तः जानन्ति परियोजना का भवति? कथं च सा निर्मीयते? अस्तु, अस्मिन् पाठे वयं परियोजनायाः विभिन्नेषु पक्षेषु विचारयामः शिक्षामः च 'परियोजना' कथं निर्मीयते?

उद्देश्यानि

इमं पाठं पठित्वा भवान्–

- 'परियोजना' का भवति इति स्पष्टयितुं शक्ष्यति;
- परियोजनायाः महत्त्वं वर्णयितुं शक्ष्यति;
- परियोजनायाः विविधानि रूपाणि ज्ञातुं शक्ष्यति;
- परियोजनायाः विशेषताः उल्लेखिष्यति;
- परियोजनायाः निर्माणं कर्तुं समर्थः भविष्यति।

क्रियाकलापः

भवद्भिः अवश्यमेव कुत्रचित् 'परियोजना' शब्दः श्रुतः, पठितः स्यात्। अतः श्रुतासु पठितासु वा परियोजनासु कयोश्चित् द्वयोः पूर्णनामसङ्केतः अत्र कार्यः।

1. .....

2. .....

25.1 अधुना अवगच्छामः

परियोजना&निर्माणम्

कास्ति परियोजना

भवान् विद्यालये शिक्षां प्राप्नोति। तत्र कदाचित् सांस्कृतिककार्यक्रमाः, कदाचित् खेलकार्यक्रमाः, कदाचित् उत्सवाः, कदाचित् अवकाशाः, विद्यालयं गमनागमने चापि समयः लगति, गृहेऽपि मातृ–पित्रोः कार्यम्, अतिथि सत्कारः, सम्बन्धीनां गृहं प्रति माङ्गलिककार्यावसरे आगमनं, मित्रैः सह भ्रमणम् इत्यादयः समयापेक्षिताः कार्यक्रमाः भवन्ति एव। एतेन पठने शिक्षणे च बाधा उत्पन्ना भवति। अतः एतया बाधया खिन्नः भवान् कथम् अनुभविष्यति किं करिष्यति च?

एवमेव नगरेषु/महानगरेषु यातायातसमस्या प्रतिदिनं भवति एव। मार्गेषु महान् जनसम्मर्दः भवति; वाहनानि अपि विविधानि विपुलानि च भवन्ति। अतः गमनागमनं सुकरं न भवति। कार्यालयं इष्टस्थानं वा समयेन प्रापणम् प्रायः प्रतिदिनमेव दुष्करं भवति। समाचारपत्रेषु अपि ईदृशीं समस्यां वयं प्रतिदिनं पठामः एव। तद्विषये चित्राणि अपि पश्यामः। एतत्सर्वम् अनुभूय भवान् अपि कामपि समुचितां व्यवस्थां कारयितुम् उपायान् चिन्तयिष्यति एव। एतादृशाः विचाराः यदा मनसि आयान्ति, तर्हि ते विचाराः 'योजना' इति शब्देन व्यवह्रियन्ते। यदा च एतादृशान् विचारान् लिखित्वा कार्यरूपेण वा प्रस्तौमः तदा ते विचाराः/उपायाः लिखिताः 'परियोजना' इति शब्देन कथ्यते।

'परियोजना' शब्दे योजनात् पूर्वं 'परि' उपसर्गः अस्ति। 'परि' उपसर्गस्य अर्थः अस्ति 'पूर्णता'। 'परियोजना' शब्दस्य अर्थः अस्ति – ''कमपि विचारं व्यवस्थितरूपेण प्रस्तुतीकरणम्''। आंग्लभाषायां तु परियोजना कृते 'प्रोजेक्ट' इति शब्दः प्रयुज्यते। अस्य शब्दस्य अर्थः अस्ति – 'प्रकाशनम्'। एवं हि परियोजना तु कस्याश्चित् समस्यायाः निदानम् अथवा कस्यापि विषयस्य तथ्यान् प्रकाशयितुं संसाधिका, एका पूर्णविचारयोजना भवति।

परियोजनायाः स्वरूपम्

परियोजनायाः निर्माणं विविधं भवितुं शक्यते। प्रतिव्यक्तिम् कार्यप्रणाली विविधा भवति। यथा वार्तालापः, आहारः, व्यवहारः च प्रत्येकं जनस्य पृथक् पृथक् भवति। एवमेव कवितालेखनम्, कथा–कथनम्, चित्रनिर्माणं पृथगेव भवति। पुनरपि परियोजना स्थूलरूपेण

टिप्पणी

भागद्वये विभक्तुं शक्यते। प्रथमा तु– याः परियोजनाः समस्यानां निदानाय निर्मिताः भवन्ति, अपरा च–याः कस्यापि विषयस्य समुचितं ज्ञानं प्रदातुं निर्मीयन्ते।

समस्यामूलक–परियोजनासु समबद्धसमस्यायाः प्रत्येकं तथ्यम् आश्रित्य विचारः क्रियते तस्याः समस्यायाः समाधानाय च परामर्शाः अपि दीयन्ते। एतादृश्यः परियोजनाः तु सर्वकारेण संगठनैः वा कामपि समस्यामाधृत्य कार्ययोजना–निर्माणकाले एव निर्मीयन्ते। एतेन तस्याः समस्यायाः विभिन्नपक्षेषु कार्य कर्तुं सौविध्यं जायते।

द्वितीया परियोजना तु शैक्षिकपरियोजना कथ्यते। एतादृशीनां परियोजनानां निर्माणकाले भवान् संबंधितविषयस्य तथ्यान् संगृह्य अनेकैः नूतनैः विषयैः स्वयमेव परिचितः भवति। शैक्षिक–परियोजना भगद्वये विभक्तुं शक्यते –

(क) पाठेन सम्बद्धपरियोजनाः, ख) शुद्धज्ञानस्य विषयेषु आधारिताः परियोजनाः।

भवतः पाठ्यपुस्तके 'कल्पनाकीर्तिर्विजयते' इति पाठः नारीजातेः गौरवमयम् इतिहासं प्रस्तौति। भवान् भारतस्य अनेकासां वीरांगनानां सामाजिक–योगदानम् आश्रित्य विशिष्टाः सामग्रीः संगृह्णातु। प्रसिद्धानां महिलानां चित्राणि संगृह्य क्रमशः तासां विवरणं विलिखन् तेषां संयोजनं करोतु। एवं हि पाठाधारिता परियोजना सज्जिता। अनेनप्रकारेण कमपि पाठम् आधृत्य भवान् परियोजनानिर्माणं कर्तुं शक्नोति।

परं काश्चन परियोजनाः शुद्धज्ञानेन सम्बद्धाः भवन्ति। एतादृशीनां परियोजनानां सम्बन्धः सरलतया पाठेन सह न भवति। परं पाठस्य सम्बद्धान् विविधान् तथ्यान् ज्ञातुं शक्नुमः । एतादृशीनां परियोजनानाम् उद्देश्यम् अस्ति – "पठतिपाठस्य तथ्यात्मकज्ञानं प्रति जागरूक–करणम् अथवा भवतः अभिव्यक्तिकौशलस्य विकासकरणम्। एवं हि शुद्धज्ञानस्य परियोजना तु भवता पठितपाठानाम् अवबोधने, पाठ्यपुस्तकात् प्राप्तज्ञानस्य सम्यक् संवर्धने, भवतः अभिव्यक्ति–कौशलस्य संवर्धने च साहाय्यं करोति।

एवं हि भवता अनुभूतमेव यत् 'परियोजना' अपि एकः क्रियाकलापः एव। परम् अस्य क्षेत्रं विशालं भवति।

25.2 परियोजनायाः महत्त्वम्

'परियोजना' शिक्षायाः एकं महत्त्वपूर्णम् अङ्गम् अस्ति। 'परियोजनायाः निर्माणे छात्रः आनन्दम् अनुभवति। खेलभावनया यत् शिक्षणं चलति, तेन परियोजना सज्जिता भवति। यथा हि 'होलीपर्व' देशे विदेशे च विविधरूपेण सम्मान्यते। विभिन्नसमाचारपत्रेषु पत्रिकासु च तद्विषये अनेकानि चित्राणि लेखानि च प्रकाश्यन्ते। तेषां संग्रहः अपि एका परियोजना। एतेन होलीपर्वणः उत्सवस्य विविधरूपं तथ्यानि च सहजरूपेण मनोर×जनपूर्वकं जानीमः।

परियोजना तु पाठ्यपुस्तकातिरिक्तम् अपि विश्वजनीनं ज्ञानं प्रयच्छति। एषा तु नूतन–तथ्यानां चयनस्य विचारस्य च अवसरं ददाति। एवं हि भवत्सु नूतन–तथ्यान् प्रति जिज्ञासा जायते, स्वविचाराणां प्रकटन–कौशलस्य च विकासः भवति। लेखनसंबंधे

नूतन–शैलीनां विकासः भवति। एवं पूर्वघटनायाः वर्तमानघटनया सह संयोजनेन चिन्तनशक्तेः अपि विकासः जायते।

पाठगतप्रश्नाः 25.1

प्रदत्तविकल्पेषु उचितं विकल्पं चित्वा प्रश्नान् उत्तरत

1. कीदृशान् विषयान् आधृत्य परियोजना न निर्मीयते?
   (क) भावनाप्रधानम् (ख) सामाजिकम्
   (ग) आर्थिकम् (घ) समस्याप्रधानम्
2. परियोजनां निर्मातुं मुख्याधाराः के सन्ति?
   (क) भावना चित्राणि च
   (ख) तथ्यानि, चित्राणि, अभिव्यक्तिः, मानाङ्काः (आंकड़े)
   (ग) केवलं चित्राणि मानाङ्काः (आंकड़े)
   (घ) तथ्यानि भावना च
3. शुद्धज्ञानाधारिताः परियोजनाः तु भवन्ति
   (क) पाठाधारिताः (ख) चित्राधारिताः
   (ग) अभिव्यक्तिकौशलस्य संवर्धने सहायिकाः (घ) पाठस्य तथ्येतरज्ञानाय

25.3 परियोजना&अनुच्छेदयोः भेदः

भवान् एवमपि चिन्तयितुं शक्नोति यत् कस्याश्चित् समस्यायाः निदानाय अनुच्छेदः अपि लेखितुं शक्यते। वस्तुतः अनुच्छेदलेखने भवान् स्व भावनाः व्यक्तुं पूर्णः स्वतंत्रः भवति, एवमेव अनुच्छेदः तु क्रिकेटम्, परोपकारः, सत्यम्, सत्संगतिः, किमपि पर्व, किमपि दृश्यम्, विद्या, सदाचारः, इत्यादीन् विषयान् आधृत्य लेखितुं शक्यते परं परियोजनालेखने भावनानाम् अभिव्यक्तेः अवकाशः न भवति। एवमेव केवलं कोऽपि विषयः एव अपेक्षितः न भवति अपितु परियोजना–निर्माणात् पूर्वं तथ्यानां संग्रहः, समाचारपत्रेषु मुद्रितानां चित्राणां संकलनं, तेषाम् उपरि च सम्यक् विश्लेषणम् अपेक्षितं भवति। परियोजनालेखने सदैव प्रामाणिकतथ्यानां प्रस्तुतीकरणम् अनिवार्यं भवति। तथैव चित्राणां, संदर्भाणां, सर्वकारपक्षतः विज्ञापितानां तथ्यानां, विचाराणाम्, उद्ददेश्यानाम् अपि प्रयोगः अपेक्षितः भवति। परम् अनुच्छेदलेखने एतत्सर्वं नैवापेक्षितं भवति। परं संस्कृतसाहित्यात् किमपि विषयम् आधृत्य सूक्तीनां संकलनं परियोजनाकार्यान्तर्गतम् आयाति।

एवं हि अनुच्छेदलेखनापेक्षया 'परियोजना' तु अधिका वैज्ञानिकी भवति। 'चेदहं प्रधानमंत्री स्याम्' एषः विषयः भावनाप्रधानः। परं सामाजिक–आर्थिक–भौगोलिकविषयान् समस्याप्रधानविषयान् आधृत्य 'परियोजना' निर्मातुं' शक्यते।

25.4 परियोजनायाः विशेषताः

परियोजनायाः निम्नलिखिताः विशेषताः सन्तिः

- परियोजना तु कस्या अपि समस्यायाः निदानाय अथवा कस्यापि विषयस्य वैशिष्ट्यं तथ्यात्मकं ज्ञानं प्रदातुं निर्मिता भवति।
- शैक्षिक–परियोजना तु खेलभावनया शिक्षणे कौशलं प्राप्तुं समुचितम् अवसरं प्रयच्छति।
- परियोजना मुख्यतः तथ्येषु आधारिता भवति।
- परियोजनायां स्वभावनानाम् अभिव्यक्तेः सम्भावना नापेक्ष्यते।
- परियोजनायाः निर्माणाय विषयस्य चयनस्य पूर्णं स्वातन्त्र्यं भवति, तन्निर्माणाय च पर्याप्तः अवसरः मिलति।

पाठगतप्रश्नाः 25.2

1. परियोजना लिख्यते
   (क) परीक्षाभवने (ख) अल्पसमये
   (ग) अध्ययन केन्द्रे (घ) पर्याप्ते समये
2. शैक्षिकः परियोजनायाः वैशिष्ट्यमस्ति यदस्याम्
   (क) कल्पनायाः उन्नतिः / वैशिष्ट्यं प्रस्तूयते
   (ख) 'खेल–खेल' इति रूपेण किमपि शिक्ष्यते।
   (ग) भावनाः अभिव्यक्ताः भवन्ति।
   (घ) प्रमाण–प्रदानस्य आवश्यकता न भवति
3. परियोजनानिर्माणात् पूर्वम् आवश्यकम् भवति –
   (क) काल्पनिकविषयः (ख) समाचारपत्राणि
   (ग) सर्वकारस्य सहमतिः (घ) प्रामाणिकतथ्यानां संग्रहः

25.5 परियोजना कथं निर्मातव्या

सर्वप्रथमं परियोजनां निर्मातुं विषयस्य चयनम् सम्यक् विचार्य एव करणीयम्। विषयस्य चयनं रुचिपूर्णं भवेत् येन तत्कार्यं कुर्वन् आनन्दानुभूतिः भवेत्।

- परियोजनायाः विषयस्य सम्यक् अवबोधः स्यात्।
- समस्यासम्बन्धितचित्राणि प्राप्तव्यानि।

- विषयस्य संबंधिनः तथ्याः संग्राह्याः
- समाचारपत्रेषु मुद्रिताः समाचाराः एकत्रीकरणीयाः।
- यदि किमपि ग्राफिकम्/रेखाचित्रम् उपलब्धं भवेत् तदपि प्राप्तव्यम्।
- परियोजना–निर्माणात् पूर्वम् एका विशिष्टा भूमिका लेखनीया / तदाधृत्य परियोजना निर्मातव्या।
- मानाङ्कान् (आंकड़े) आधृत्य समस्यायाः विविधपक्षाणां विश्लेषणं कर्तव्यम्।
- विश्लेषणं सम्यक् सुविचारितं भवेत्।
- समस्या/काऽपि वार्ता प्रामाणिकी भवेत् केनचित् श्रुता न भवेत्। उत्तरदायित्वपूर्णः विशिष्टः जनः (प्रधानमंत्री, राज्यपालादयः) यदि किमपि भाषेत् तत्तु प्रामाणिककथनरूपेण उल्लेखनीयम्।

उपर्युक्तचिन्तनेन ज्ञायते यत् 'परियोजना' मुख्यतः द्विधा भवति–प्रथमा तु कस्या अपि समस्यायाः निदानाय द्वितीया च कस्यापि विषयस्य समुचिताम् अवगतिं प्रदानाय। अस्तु अत्र परियोजनाद्वयस्य निर्माणविषये जानीमः।

(क) समस्याप्रधानपरियोजना

भवन्तः समाचारपत्रेषु/दूरदर्शने च देशे खाद्य–समस्या, पेयजल समस्या विद्युत्–आपूर्तिसमस्या इत्यादीनां विषये पठन्ति शृण्वन्ति च। यदि भवान् 'पेयजल समस्या' विषयाधारितां परियोजनां लेखितुम् इच्छति, तर्हि सर्वप्रथमम् एतत्समस्या–सम्बन्धिनः समस्तान् बिन्दून् बुद्ध्वा क्रमेण ते विश्लेषणीयाः। तस्याः समस्यायाः मानाङ्काः (आंकड़े) एकत्रीकरणीयाः।

वयं पश्यामः यत् देशे पेयजलसमस्या अनेककारणात् सञ्जाता। देशे पर्याप्ता वर्षा न भवति। वर्षाभावात् नदीनां जलस्तरः न्यूनः जायते। भूमेः अन्तः स्थितः जलस्तरः अधिकं नीचैः गच्छति। प्राकृतिकजलस्रोतसां कूप–तडागादीनां शुष्कतां प्रापणम्, जनसंख्यावृद्धिः, औद्योगिकविकासात् महता प्रदूषणेन जलस्य अपेयत्वम्, जागरूकतायाः अभावात् जनैः कृतः जलस्य दुरुपयोगः, अपव्ययः च। एवं हि देशे पेयजलसमस्याकृते अनेकानि प्रमुखानि कारणानि सन्ति।

एतद् विषयिकीं परियोजनां लेखितुं भवान् किं किं करिष्यति? आम्, अस्याः समस्यायाः विषये विविधपक्षतः मानाङ्काः (आंकड़े) एकत्रीकरणीयाः। एतत्समस्यासम्बन्धिनः समाचारपत्रेषु प्रकाशिताः लेखाः, सर्वकारेण पेयजल समस्यायाः निदानाय प्रदत्तानि विज्ञापनानि, चित्राणि, भाषणानि प्राप्तव्यानि। एवं हि दिल्ली राजस्थान–मध्यप्रदेश–बुंदेलखण्डक्षेत्रेषु प्रायः प्रतिवर्षं तत्र पेयजलसमस्यायाः विषये समाचारपत्रेषु पठन्ति एव। सर्वेभ्यः पातुं जलं न मिलति। नलकेभ्यः जलं न निस्सरति। जनाः स्वाक्रोशं प्रकटयन्ति। महिलाः दूरस्थात् स्थानात् शिरसि घटं निक्षिप्य जलम् आनयन्ति। एतद्विषयकानि चित्राणि पत्र–पत्रिकासु

भवान् पश्यति एव। सर्वकारेण एतादृश्याः समस्यायाः समाधानाय कीदृशाः उपायाः कृताः? सर्वकारद्वारा संचालितप्रयासेषु कियत् साफल्यं प्राप्तम् कियत् च असाफल्यम्?

भवान् एतत्सर्वं विज्ञाय 'देशे पेयजलसमस्या' विषयमधिकृत्य परियोजनाकार्यं करोतु। अन्ते भवान् एतत्पेयजलसमस्यायाः निदानाय स्वविमर्शमपि प्रस्तुतं करोतु। यथा वर्षायाः जलस्य भाण्डारणम् प्रदूषणात् नदीनां रक्षणम्, जलस्रोतसां समुचितः विकासः, पेयजलस्य दुरुपयोगस्य अपव्ययस्य च अवरोधनम्, जलस्य राजकीयसंरक्षणम्, समाजे जलसंरक्षणं प्रति जागरूकता। एवं हि सर्वं क्रमशः तथ्यानां निरूपणेन 'पेयजलसमस्या' सम्बन्धिनी परियोजना सज्जिता भविष्यति; भवान् आनन्दम् अपि अनुभविष्यति।

(ख) शुद्धज्ञानवर्द्धकविषया परियोजना

भवतः पाठ्यपुस्तके अनेके पाठाः सन्ति यान् आधृत्य भवान् शुद्धज्ञानवर्द्धकविषयिणीं परियोजनां लेखितुं शक्नोति। यथा हि ''राजते खलु कन्याकुमारी'' पाठमाधृत्य कन्याकुमारी क्षेत्रस्य/स्वामिविवेकानन्दस्य सर्वविधं ज्ञानवर्द्धकं परियोजनाकार्यं कर्तुं शक्नोति। एवमेव 'कल्पनाकीर्तिर्विजयते' अयं पाठः कल्पनाचावलामाश्रित्य लेखितः। भवान् ईदृशीनां अन्यासां नारीणां देशाय योगदानम् इति विषयम् आधृत्य शुद्धज्ञानवर्द्धिकां परियोजनां विविधचित्राणां सहायतया सुन्दररूपेण प्रस्तोतुं शक्नोति। एवमेव 'यदि जानासि तद् वद्' पाठमाधृत्य संस्कृतसाहित्यात् विविधाः प्रहेलिकाः विषयक्रमेण संचित्य सचित्रम् 'प्रहेलिका कोषः' इति रूपं परियोजनाकार्यं ज्ञानवर्द्धकं भवेत्। एवमेव 'लोकोक्तीनाम् अपि सङ्कलनम्' परियोजनाकर्यरूपेण प्रस्तोतुं समुचितमेव। एवमेव कापि दैनिक घटना या जीवनमूल्यदृष्ट्या प्रेरणाप्रदा कापि वार्ता परियोजनायाः विषयः भवितुमर्हति। अतः एतादृशं परियोजनाकार्यं तु सामाजिकजागरूकतां, निरन्तरं चिन्तनं प्रति प्रेरयति। एवं हि परियोजनायाः अनेके विषयाः भवितुं शक्नुवन्ति। एतादृशीभिः परियोजनाभिः रोचकं ज्ञानं प्राप्यते। समस्याप्रधानपरियोजनावत् एतादृशीषु परियोजनासु भवतः परामर्शाः नैवापेक्षिताः भवन्ति।

25.6 परियोजना–निर्माण–प्रक्रिया–प्रारूपम्

अस्तु, अत्र 'भारते होली पर्व' विषयमाधृत्य निर्मितां सज्जिताम् एकां परियोजनाम् अवगच्छामः।

25.1

भारते होली पर्व

भूमिका

भारतम् एकः महान् देशः। अत्र विविधभाषाभाषिणः, विभिन्नधर्मावलम्बिनः अनेकसंस्कृतिप्रियाः जनाः निवसन्ति। अत्र विभिन्नपर्वाणि महता उत्साहेन मान्यन्ते। यथा– होली,

दीपावली, रक्षाबन्धनम्, विजयदशमी (दशहरा), वैशाखी, क्रिसमसम्, पोंगलम् आदीनि। ऐतेषु 'होली' भारतीयानां प्रियं पर्व अस्ति। इदं पर्व सम्पूर्णे भारते केनचित् स्थानभेदेन सह मान्यते।

उद्देश्यम्

25.2

होलीपर्वणः विषये मान्यताऽस्ति यत् पुरा हिरण्यकशिपुः एकः दैत्यानां राजा अभवत्। सः आत्मानं ईश्वरं मन्यते स्म। सः प्रजापीडकः अत्याचारी चाभवत्। तस्य पुत्रः प्रह्लादः हरिभक्तः आसीत्। एतस्मात् कारणादेव सः तं दण्डयितुं निश्चयम् अकरोत्। सः स्वभगिनीं होलिकाम् आदिशत् यत् सा प्रह्लादम् अङ्के उपवेश्य अग्नौ तिष्ठेत्। वरदानकारणात् होलिका अग्नौ न ज्वलिष्यति। परम् ईश्वरकृपया प्रह्लादः सुरक्षितः जातः, होलिका तु दग्धा जाता। तदा कालतः एव इदं पर्व मान्यते। इदं तु फाल्गुनमासस्य पूर्णिमायाम् मान्यते। पूर्णिमायां रात्रौ होलिकादहनम् काष्ठानि संयोज्य क्रियते। अपरस्मिन् दिवसे 'धुलहण्डी' धूलिवन्दनम् रंगोत्सत्वश्च मान्यते। जनाः परस्परं शत्रुभावं विस्मृत्य अबीर–गुलालादिभिः विविधवर्णैः मुखं शरीरं च र×जयन्ति। सर्वे वर्णभेदं (जातिभेदं) विस्मृत्य प्रेम्णा हर्षेण एकवर्णाः भवन्ति।

कस्मिश्चित् युगे होली तु 'नवान्नेष्टि' यज्ञः कथ्यते स्म। वसन्तऋतोः प्रमुखं पर्व इदम्। जनाः नूतन यव–गोधूम–चणकान् क्षेत्रेभ्यः आनीय होलिकाग्नौ जुह्वति। एतेन नवान्नयज्ञः प्रारभ्यते। जनाः हुतशेषं भक्षयन्ति। जनाः विविधैः वाद्यैः सह 'फागगीतम्' अपि गायन्ति नृत्यन्ति च। नार्यः दिने होलिकापूजनं कुर्वन्ति। कुत्रचित् होलिकाग्निं गृहमानीय स्थापयन्ति।

होलीपर्वणः विविधानि रूपाणि

25.3

यद्यपि भारते होलीपर्वणः उद्देश्यम् एकमेव, परं विभिन्नप्रान्तेषु किमपि वैशिष्ट्यं दृश्यते एव। भवान् अपि दूरदर्शने, समाचारपत्रेषु अस्योत्सवस्य विषये पश्यति एव, पठति एव च। इदं पर्व प्रायः सर्वत्र रंगोत्सवः नूतनान्नेष्टिः इति रूपेण मान्यते। परं व्रजक्षेत्रे अस्य वैशिष्ट्यम् दृश्यते। तत्र गोकुल–नंदगाँव वरषाना क्षेत्रे नार्यः यष्टिकाभिः पुरुषपक्षम् ताडयन्ति पुरुषाः चात्मरक्षां कुर्वन्ति। एवमेव कश्चन पण्डाविशेषः होलिकाग्नेः मध्यात् अदग्धः निस्सरति।

25.4

दिल्ल्याम् अन्यप्रान्तेषु च होलीमिलनसमारोहाः अपि आयोज्यन्ते। अस्मिन् अवसरे कविसम्मेलनम्, उपाधिवितरणम्

टिप्पणी

(परिहासरूपेण) क्रियते। पंजाबप्रदेशे 'होला' कार्यक्रमः सम्पाद्यते। हरियाणाक्षेत्रे भ्रातृजायाभिः अन्याभिः च देवरः, सम्बन्धिनः, कशाघातेन यष्टिकया वा ताड्यन्ते। दक्षिणभारते इदं पर्व रंगोत्सवरूपेण विच्चित्भेदेन सह मान्यते। भोजपुरीशैल्यां तु अस्योत्सवस्य विशेषः आनन्दः अनुभूयते। इदं वासन्तिकं पर्व विविधरागरंगैः, गीतैः, अन्नाहुतिभिः, विविधैः पक्वान्नैः, आमोदैः, प्रमोदैः च समाजे ऐक्यम् प्रेमयुक्तम् आनन्दमयं वातावरणं जनयति। इदं पर्व विदेशेषु अपि तत्रत्यैः भारतीयैः हर्षातिरेकेण मान्यते। अस्मिन् पर्वणि देशस्य विभिन्नसंस्कृतीनां मेलनं भवति। मानवीयभावनायाः राष्ट्रैकतायाः उद्रेकः अस्मिन् पर्वणि सर्वत्र दृश्यते।

पाठगतप्रश्नाः 25.3

1. अधः कथनेषु यत् कथनं सत्यम् तत् (✓) इति चिह्नेन यत् च असत्यम् तत् (×) इति चिह्नेन चिह्नितं कुरुत

   (क) परियोजना–निर्माणकाले चित्रप्रदानम् नैव आवश्यकम्।

   (ख) कस्यापि विषयस्य परिज्ञानं दातुं या परियोजना निर्मीयते, तस्यां स्वविमर्शः अपेक्षितः वर्तते।

   (ग) समस्यामूलक–परियोजनाः केवलं तथ्याधारिताः भवन्ति।

   (घ) होलिकाग्नौ जनाः केवलं पक्वान्नं प्रक्षिपन्ति।

   (ङ) होलीपर्वणि राष्ट्रैक्यं दृष्ट्वा भारतीयसंस्कृतेः गरिमा दृश्यते।

   (च) परियोजना केवलं कल्पनाधारिता भवति।

25.7 परियोजनालेखनस्य विषयाः

भवान् अन्याः अपि परियोजनाः निर्मातुं शक्नोति। परियोजना तु दश पृष्ठतः पञ्चदशपृष्ठपर्यन्तं भवेत्। स्वरुचि–सुविधानुसारं च कमपि विषयं चित्वा परियोजनानिर्माणे तत्परः भवेत्।

परियोजनालेखनसम्बन्धिनः केचन प्रमुखविषयाः

(i) नगरेषु प्रदूषणसमस्या

(ii) जनसंख्यावृद्धिः, जीवनसुविधासु तस्याः दुष्प्रभावः

(iii) राजनैतिकः भ्रष्टाचारः

(iv) न्यायालयेषु लम्बिताः विवादाः अपराधवृद्धिश्च

(v) भिक्षावृत्तौ पातिताः बालाः

(vi) वयस्कानां जीवनरक्षणम्

शुद्धज्ञानवर्द्धकविषयसम्बद्धाः परियोजनाः

(i) गणतन्त्रदिवससमारोहः

(ii) भारते विजयदशमी (दशहरा) पर्व

(iii) कुम्भपर्वणः परम्परा

(iv) भारतस्य पर्वताः

(v) भारतस्य आदिवासिनः

(vi) आधुनिकयुगे यातायातस्य साधनानि

(vii) ग्रामेषु नारीणां स्थितिः

(viii) भारतीयपर्वसु सांस्कृतिक–एकता

(ix) संस्कृतवाङ्मये राष्ट्रैकतायाः सूत्राणि।

25.8 किम् अधिगतम्

- परियोजना कस्याः अपि समस्यायाः निदानाय अथवा कस्यापि विषयस्य सम्यक् अवगतिं प्रदातुम् इति उद्देश्येन निर्मीयते।
- परियोजना तथ्याधारिता भवति, एतस्यां भावनायाः न कोऽपि अवसरः।
- परियोजनानिर्माणात् पूर्वं विषयस्य सम्यक् ज्ञानं, तत्सम्बन्धित–तथ्यानां चित्राणां मानाङ्कानाम् (आंकड़े) ग्राफिकम्, विज्ञापनानाञ्च संग्रहः आवश्यक भवति।
- स्थूलतः परियोजना द्विधा निर्मीयते– एका कार्यपरियोजना द्वितीया च शैक्षिक परियोजना।
- समस्यामूलकपरियोजनायां भवान् स्वपरामर्शं दातुं शक्नोति, परं कस्यापि विषयस्य ज्ञान–प्रदात्री या परियोजना भवति, तस्यां स्वपरामर्शः नापेक्षते।
- शैक्षिकपरियोजनाः तु खेलभावनया नूतनं नानाविधं शिक्षणं शिक्षितुम् भवतां कृते अवसरं प्रयच्छन्ति।

25.9 पाठान्तप्रश्नाः

1. परियोजना का भवति?
2. परियोजनायाः स्वरूपं स्पष्टयत।
3. परियोजना निर्माणकाले केषां विषये ध्यानम् आवश्यकम्?

4. परियोजनायां भावनायाः किमपि महत्त्वं न भवति, स्पष्टयत।

5. परियोजनायाः महत्त्वम् स्वशब्देषु प्रस्तौतु।

6. परियोजना अनुच्छेदयोः लेखने कः भेदः स्पष्टयत।

7. समस्याप्रधानविषयम् अधिकृत्य शुद्धज्ञानवर्द्धकं विषयम् अवलम्ब्य च निर्मितपरियोजनयोः कः भेदः भवति? केषाञ्चित् चतुर्णाम् उल्लेखं कुरुत।

8. 'वनसंरक्षणेन लाभः' इति विषयमाधृत्य एका परियोजना निर्मीयताम्।

9. प्रमुखविभागानां/संस्थानाम् दश आदर्शवाक्यानि (यथा–योगक्षेमं वहाम्यहम्, अहर्निशं सेवामहे, विद्ययामृतमश्नुते इत्यादिकम्) आधृत्य एका परियोजना सज्जीक्रियताम्।

25.10 उत्तराणि

पाठगतप्रश्नाः

25.1 1. (क) 2. (ख) 3. (ग)

25.2 1. (घ) 2. (ख) 3. (घ)

25.3 1. (क) ×
(ख) ×
(ग) ✓
(घ) ×
(ङ) ✓
(च) ×

25.9 पाठांतप्रश्नाः

स्वयं करोतु